धर्मशास्त्रीयराज्यतत्त्वविमर्शः

(A STUDY OF POLITY BASED ON DHARMAŚĀSTRA)

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य

विद्यावारिधिः (पी-एच० डी०) इत्युपाधये

प्रस्तुतः शोधप्रबन्धः

निर्देशकः
डॉ० युगलकिशोरमिश्रः
वेदाचार्यः, एम० ए०, पी-एच० डी०
आचार्योऽध्यक्षश्च-वेदविभागस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः
वाराणसी

अनुसन्धाता
रामचन्द्रगौतमः
उपप्राध्यापकः
वाल्मीकिविद्यापीठस्य
त्रिभुवनविश्वविद्यालयः
काष्ठमण्डपम्, नेपालः

पञ्जीकरणसंख्या–७६९/२२७०

सौरश्रावणमासः २०४३

(अगस्त १९८६)

CC-0 Sampurnanand University Collection. Digitized by eGangotri

CC-0 Sampurnanand University Collection. Digitized by eGangotri
रमेश बुक बाईन्डर्स
C.K. 60/51 कर्णघंटा

४०९१९

EXTERNAL

Returned by Prof. V. Upadhyaya
12/2/87

T.Q
47

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

धर्मशास्त्रीयराज्यतत्त्वविमर्शः

(A STUDY OF POLITY BASED ON DHARMAŚĀSTRA)

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
विद्यावारिधिः (पी-एच० डी०) इत्युपाधये
प्रस्तुतः शोधप्रबन्धः

निर्देशकः
डॉ० युगलकिशोरमिश्रः
वेदाचार्यः, एम० ए०, पी-एच० डी०
आचार्योऽध्यक्षश्च-वेदविभागस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः
वाराणसी

अनुसन्धाता
रामचन्द्रगौतमः
उपप्राध्यापकः
वाल्मीकिविद्यापीठस्य
त्रिभुवनविश्वविद्यालयः
काष्ठमण्डपम्, नेपालः

पञ्जीकरणसंख्या–७६९/२२७०

सौरश्रावणमासः २०४३
(अगस्त १९८६)

CC.O Sampurnanand University Collection. Digitized by eGangotri

T.a/47

सरस्वती भवन पुस्तकालय
आगत संख्या 1668[illegible]0
सम्पूर्णानन्द संस्कृत विश्वविद्यालय

CC.O Sampurnanand University Collection. Digitized by eGangotri

प्रतिज्ञप्तिः

"धर्मशास्त्रीय-राज्यतत्त्वविमर्शः" इत्याख्यः शोधप्रबन्धोऽयं मया सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य वेदविभागेऽध्यक्षाणाम्, आचार्यश्रीयुगलकिशोरमिश्रमहोदयानां निर्देशने यथानियमं शोधकार्यं कृत्वा विरचितः। अस्य विरचयिताऽहं प्रतिजाने यदिदं मदीयं शोधकार्यं मौलिकमस्ति, शोधकार्यरूपेण चास्य प्रस्तुतिरितः पूर्वं कुत्रापि पूर्णतोऽशतो वा न कृतेति च।

रामचन्द्र गौतम
८-८-८६
(रामचन्द्र गौतमः)
अनुसन्धाता

अग्रसारणा

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये रामचन्द्रगौतमोऽनुसन्धाता १९८३ वत्सरे ७६६।२२७० संख्यया पञ्जीकरणमवाप्य धर्मशास्त्रीय-राज्यतत्त्व-विमर्शः इति विषयमधिकृत्य यथानियमं शोधकार्यं विधाय शोधप्रबन्धमिमं मन्निर्देशने आरचितवान्। राज्यतत्त्वानां धर्मशास्त्रीयदृष्ट्या सिद्धान्तपर्यालोचनेन भाषाशैल्योर्हृदयावर्जकतया च विद्यावारिधिः (पी० एच० डी०) इत्युपाधये प्रस्तुत्यर्हं शोधप्रबन्धमिमं मन्वानोऽग्रेसारयति।

युगल किशोर मिश्र
(डा०युगल-किशोरमिश्रः) ८।८
आचार्योऽध्यक्षश्च, वेदविभागस्य
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः
वाराणसी।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

प्रबन्धेऽस्मिन् समुपस्थापितानां विषयाणां संक्षिप्तसूची

(१) भूमिका -- -- क-ञ

(२) विषयप्रवेशः -- -- १-२६

(३) प्रथमपरिच्छेदे - राजतत्त्वस्य राज्यस्य समितेः सभायाश्च चिन्तनम् -- २७-१७१

(४) द्वितीयपरिच्छेदे - मन्त्रिपरिषदो व्यवस्थावर्णनम् १७२-२२६

(५) तृतीयपरिच्छेदे - मित्रामित्रादीनां सन्ध्यादीनाञ्च विचारः २२७-२७२

(६) चतुर्थपरिच्छेदे - कोशव्यवस्था -- २७३-२९८

(७) पञ्चमपरिच्छेदे - राष्ट्रस्य राज्यशासनव्यवस्थाया न्यायव्यवस्थाया दण्डव्यवस्थायाश्च वर्णनम् २९९-३७५

(८) षष्ठपरिच्छेदे - दुर्गव्यवस्था -- ३७६-३८८

(९) सप्तमपरिच्छेदे - सैन्यव्यवस्था -- ३८९-४३१

(१०) उपसंहार, सिंहावलोकनम् -- ४३२-४५०

(११) धर्मशास्त्रीयराज्यतत्त्वविमर्शे समुद्धृतग्रन्थानां सूची ४५१-४५५

(१२) सङ्केताक्षरसूची -- -- ४५६-४५७

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

भूमिका

जगदिदमनेकेषु राष्ट्रेष्वस्ति विभक्तम् । तेष्वनेकाः संस्कृतयः सन्ति प्रसिद्धाः । तास्वार्यमिश्रदेशीयग्रीकरोमनाद्याः प्राचीनतमाः । कालक्रमेणैतास्वप्यधिकतराणां नाममात्रमवशिष्टम् । किन्त्वार्यसंस्कृत्या त्वनेकानां विघ्नादीनां सहनं विधायापि स्वं गौरवपूर्णमस्तित्वमद्यापि यथावद्रक्षितम् । अस्याः परिपोषकाः संख्यायां त्वल्पा स्तथाप्यन्यधर्मानुयायिभिर्नोपेक्षणीयाः ।

आर्यसंस्कृतेर्मूलं स्रोतस्तु वेद एव । सोऽयमपौरुषेय इत्याहुरार्यधर्मावलम्बिनो मनीषिणः । आधुनिकैर्विद्वद्भिर्वेदस्य पौरुषेयत्वमङ्गीकृतं तैरप्यस्य रचनाकालस्तु न तु निर्धारितः ।

विश्वप्रचलितानां समस्तानां संकृतीनामुत्पत्तेर्मूलन्तु वेद एवेत्याहुरार्याः । पाश्चात्यैरप्यस्या उक्त्या खण्डनन्तु नतु कृतम् । सदाचारसद्विचारयोः समष्टिरेव संस्कृतिः । एतौ यदि वेदविहितौ स्त स्तदा तौ धर्मावपि, अर्थाद्वेदविहित आचारविचार धर्म एव । शिक्षाकल्पव्याकरणनिरुक्तच्छन्दोज्योतिषन्येतानि षट्शास्त्राणि वेदाङ्गानि । पुराणन्यायमीमांसाधर्मशास्त्रन्येतानि चत्वारि वेदस्योपाङ्गानि । ऋग्यजुः सामाथर्वाख्याश्चत्वारो वेदाः षडङ्गानि चत्वारि उपाङ्गानि चैतानि चतुर्दशशास्त्राणि विद्यानां धर्मस्य च स्थानानीत्याह महर्षिर्याज्ञवल्क्यः --

पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥
(याज्ञवल्क्यस्मृतिः १।३)

एतेभ्योऽतिरिक्तान्यायुर्वेदो धनुर्वेदो गान्धर्ववेदोऽर्थशास्त्रन्येतानि

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

शास्त्राणितूपवेदाख्यानीत्याह चरणव्यूहकारो महर्षिः शौनकः । याज्ञवल्क्योक्तानि चतुर्दश शास्त्राणि शौनकोदितान्युपवेदरूपाणि च संयोज्याष्टादशविद्याः परिगणयति विष्णुपुराणम् । यथा --

आयुर्वेदो धनुर्वेदो गान्धर्वश्चैति ते त्रयः ।
अर्थशास्त्रं चतुर्थं तु विद्या ह्यष्टादशैव तु ॥

विद्यास्वेतासु वेद एव स्वतः प्रमाणं प्रधानञ्च । विद्यास्तु केवलं वेदार्थान्बोधयन्ति । प्रकारेणानेनाष्टादशानां विद्यानां नामनिर्देशो विहितः शास्त्रप्रयोजकः । विद्यानामेतासां यथाधिकारमध्ययनमार्यजातीनां परं कर्तव्यम् । परन्तु केवले नाध्ययनेन पुरुषार्थानां नोपलब्धिः । पुरुषार्थप्राप्त्यर्थन्त्वाचारस्याप्यावश्यकता विद्यते । अत उक्तञ्च -- "आचारहीनं न पुनन्ति वेदाः" । आर्यजातीनामाचार प्रतिपादकानि तु मन्वादिभिर्विरचितानि वेदमूलकानि धर्मशास्त्राण्येव । आचारस्यापि सामान्यतस्त्रयोभेदादर्शिताः -- (१) श्रौतः, (२) स्मार्तः, (३) सामान्यश्च । एतेष्वाचारेषु श्रौताचारप्रतिपादकग्रन्थास्तु श्रौतसूत्राण्येव, स्मार्ताचारप्रतिपादकानि तु गृह्यसूत्राण्येव, सामान्याचारविधायकानि तु गौतमादिभिः प्रणीतानि धर्मसूत्राणि मन्वादिभिर्विरचितानि स्मृतिशास्त्राणि, इतिहासपुराणानि च । राज्यव्यवस्था प्रतिपादकान्यप्येतान्येव ।

राज्यव्यवस्थायां सप्तविधान्येव तत्त्वानि गतिशीलानि । तेषु राजैवोच्चतमः । राजशब्दोऽयं चतुर्ष्वर्थेषु प्रयुक्तो दृश्यते यथा - (१) प्रजापालकार्थे, (२) क्षत्रियार्थे, (३) अभिषिक्तक्षत्रियार्थे, (४) सज्जनार्थे च । यस्मिन् राजानि वास्तविकं राजत्वं विद्यते तस्मिन्नेते चत्वार एवार्थाः गुणविशेषा वा भवन्त्यन्तर्हिताः अर्थाद्राज्ञः कृते चत्वार एवैते गुणा अपेक्षन्ते । एतदुक्तं च मनुना --

ब्राह्मं प्राप्तेन संस्कारं क्षत्रियेण यथाविधि ।
सर्वस्यास्य यथान्यायं कर्तव्यं परिरक्षणम् ॥

(मनुस्मृतिः ७।२)

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

इत्थं प्रजापालनाधिकारस्तु क्षत्रियस्यैव स्वाभाविको दृश्यते । किन्तु महाभारतस्यैकस्मिन्प्रसङ्गे तु ब्राह्मणक्षत्रिययोर्द्वयोरेवाधिकारो दर्शितः, यथा --

प्रजापतिर्हि वैश्याय सृष्ट्वापरिददे पशून् ।
ब्राह्मणाय च राज्ञे च सर्वाः परिददे प्रजाः ।।
(शान्तिपर्व ६०।२३)

परं त्रिसप्ततितमे शान्तिपर्वाध्याये ऐलवाय्वो रेकोऽस्ति सम्वादः, तत्र तु पृथिव्यां ब्राह्मणस्यैव प्रथमोऽधिकारः प्रतिपादितः । समर्थब्राह्मणाभाव एव क्षत्रियाधिकारः ।

पत्यभावे यथा स्त्री ह हि देवरं कुरुते पतिम् ।
आनन्तर्यात्तथा क्षात्रं पृथिवी कुरुते पतिम् ।।
(शान्तिपर्व ७३।१२)

वस्तुतस्तु शस्त्रास्त्रग्रहणाधिकारस्तु क्षत्रियस्यैव शस्त्रास्त्रप्रयोगेण विना रक्षणकार्यं किं न तु सम्भवम् । ब्राह्मणस्य तु शस्त्रास्त्रधारणे प्रयोगे चापि नाधिकारः । अतो रक्षणादिकार्यमपि तस्य नाधिकारान्तर्गतम् । उक्तञ्च --

ज्याकर्षणं शत्रुनिबर्हणञ्च कृषिर्वणिज्या पशुपालनं च ।
शुश्रूषणं चापि तथार्थहेतोरकार्यमेतत्परमं द्विजस्य ।।
(शान्तिपर्व ६३।१)

वस्तुतः प्रजापालनं पोषणं रक्षणञ्च ब्राह्मणक्षत्रिययोर्द्वयोरेव कर्तव्यम्, परमेतयोरधिकारक्षेत्रन्तु पृथक् पृथग् व्यवस्थितं विभाजितं वा । तस्मात्स्वाधिकारान्तर्गतकार्यसम्पादनादौ द्वाभ्यामेव यत्नो विधातव्यः । तथैव प्रोक्तं महाभारते --

ब्रह्मक्षत्रमिदं सृष्टमेकयोनि स्वयंभुवा ।
पृथग्बलविधानं च तल्लोकं परिरक्षति ।।

तपोमन्त्रबलं नित्यं ब्राह्मणेषु प्रतिष्ठितम् ।
अस्त्रबाहुबलं नित्यं क्षत्रियेषु प्रतिष्ठितम् ।।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

ताभ्यां संभूय कर्तव्यं प्रजानां परिपालनम् ।
(शान्तिपर्व ७५।१३-१५)

विशेषतो मन्त्रबलेन यत्कार्यं सिद्ध्यति तत्सर्वं ब्राह्मणादेव । एतदतिरिक्तानि रक्षणपालनादीनि तु क्षत्रियस्यैव, क्षत्रियेष्वप्यभिषिक्तस्यैव, राजपदासीनोऽभिषिक्तक्षत्रिय एव राजा "राज्ञोऽधिकं रक्षणं सर्वभूतानाम्" (गौ० २।१७) राजैव राष्ट्रस्य सर्वोच्च शासकः । शब्दोऽयं शासको राजानं राष्ट्रपतिं राष्ट्राध्यक्षं स्वामिनं राष्ट्रनायकं राष्ट्रप्रमुखञ्च बोधयत्यर्थाज्जगत्युच्चशासका नामभिरेतैरुच्चार्यन्ते । वस्तुतस्त्वेते शब्दाः पर्यायवाचकाः । सर्वोच्च शासको येन केनापि शब्देनोच्चारितो भवेत्तथापि तस्यैव प्रमुखत्वे राज्यं भवति सञ्चालितम् ।

प्रबन्धस्यास्य परिच्छेदेषु विभाजनकारणम् -

राज्यं सप्ततत्त्वोपेतमिति तु सुप्रसिद्धमेव । तत्वानि चैतद्विधानि -- (१) स्वामी (सर्वोच्चशासकः), (२) अमात्यः, (३) सुहृत्, (४) कोशः, (५) राष्ट्रम्, (६) दुर्गम्, (७) बलञ्च । एतान्यमरोक्तानि (अमरकोशः २।८।१७) राज्यसञ्चालन विधावेतानि सर्वाण्येव तत्त्वानि सततं क्रियाशीलानि समानमहत्वप्रतिपादकानि च । तस्मादेतेषां पृथक् पृथग्विवेचनं युक्तिसंगतं स्यादिति विचार्य प्रबन्धोऽयं सप्तसु परिच्छेदेषु निबद्धः । प्रथमपरिच्छेदतः सप्तमपरिच्छेदं यावद्यथाक्रममेतेषां वर्णनं कृतं विद्यते । पुनर्यत्तत्त्वं यस्मिन्परिच्छेदे वर्णितं तस्मिन्नेव तेन तत्त्वेन सह सम्बद्धाः प्रायशः सर्वे विषया वर्ण्यन्ते ।

प्रथमपरिच्छेदे :-

राजतत्त्वचिन्तनम्, राजोत्पत्तिकालात्प्राक्कालिकजनसमाजवर्णनम्, राजोत्पत्तिवर्णनम्, राजोत्पत्तौ पाश्चात्यानां मतप्रदर्शनम्, निर्वाचनक्रियया राज्ञ-उत्पत्तिवर्णनम्, राज्याभिषेकविषयनिरूपणम्, राजपुरोहितयोः संवादप्रदर्शनम्, राजपदाधिकारनिरूपणम्, राज्योत्तराधिकारक्रमनिरूपणम्, राज्ञोगुणदोषयोर्वर्णनम्, विद्याध्ययनम्, राज्ञः कर्तव्यप्रदर्शनम्, राजपदविकासप्रदर्शनम्, शुक्लयजुर्वेद-

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

वर्णितानां राजपदानां प्रदर्शनम्, राज्ञोरक्षणोपायप्रदर्शनम्, राजाकालस्य कारण-मिति मतोपस्थापनम्, वास्तविकस्य राज्ञो वर्णनम्, गुणभेदे न राजभेदवर्णनम्, गणतन्त्रराज्यस्योत्कृष्टतावर्णनम्, पाणिन्यादिभिः प्रोक्तानां गणराज्यानां प्रदर्शनम्, वैराज्यद्वैराज्ययोर्गुणदोषवर्णनम्, गणराज्यविनाशकारणप्रदर्शनम्, गणराज्यस्य न्यायव्यवस्थावर्णनम्, गणराज्यानां सूची प्रदर्शनम्, गणराज्यविषये स्वविचारोपस्थापनम्, समितेरुत्कृष्टता प्रदर्शनम्, समितेः संघटनप्रदर्शनम्, राजसभाया नरिष्टासभायाः पौरसभाया जानपदसभायाश्च वर्णनम्, सभायाः कर्तव्यप्रतिपादनञ्चे-त्यादिभिः प्रथमपरिच्छेदः समाप्तो क्रियते ।

द्वितीयपरिच्छेदे -

मन्त्रिपरिषदोऽनिवार्यतावर्णनम्, अमात्यशब्दस्य प्राचीनत्वप्रतिपादनम्, अमात्यानां शौचाशौचपरीक्षणविधिप्रदर्शनम्, परीक्षितानाममात्यानां नियुक्ति-प्रदानव्यवस्थावर्णनम्, मन्त्रिपरिषदिसदस्यसंख्यानिरूपणम्, अमात्यानां गुणभेद-निरूपणम्, मन्त्रिपरिषदिवर्णानां प्रतिनिधित्वम्, मन्त्रणानव्यवस्था वर्णनम्, आन्तरिकसभायावर्णनम्, आन्तरिकसभायावर्णनम्, मन्त्रिपरिषदः संघटनम् प्रधानमन्त्रिणो नियुक्ति व्यवस्था, अमात्यानां कर्तव्याधिकारयोर्निरूपणम्, स्वीकृति-प्रदानक्रमनिरूपणम्, युवराजव्यवस्था, मन्त्रिपरिषदोऽध्यक्षव्यवस्थावर्णनम्, अमात्यानां परिवर्तनव्यवस्थावर्णनम्, पुरोहितव्यवस्था, पुरोहितगुणनिरूपणम्, पुरोहितस्यावश्यकतायाः कार्यस्य च निरूपणम्, दूतव्यवस्थावर्णनम्, दूतस्य गुण-भेदयोः कार्यस्य च वर्णनम्, गुप्तचरव्यवस्था, गुप्तचरस्य गुणभेदकार्याणां निरूपण-ञ्चेत्यादि सुष्ठु वर्णितम् ।

तृतीयपरिच्छेदे -

मित्रामित्रादीनां सन्ध्यादीनाञ्च निरूपणम्, मित्रस्वरूपगुणभेदानां निरूपणम्, शत्रोर्लक्षणनिरूपणं भेदप्रदर्शनञ्च, उदासीनलक्षणम्, उदासीनभेदाः

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

शत्रुमित्रादीनां महीपालानां मण्डलसिद्धान्तप्रदर्शनम्, शक्तिनिरूपणम्, उपायनिरूपणम्, षड्गुणानां वर्णनम्, सन्धिकालनिरूपणम्, सन्धिभेदनिरूपणम्, विग्रहयानयोः काल-निरूपणम्, यानकालेशुभाशुभसूचक शकुननिरूपणम्, यात्रायां तिथ्यादिनिरूपणञ्चेत्या-दिभि स्तृतीयपरिच्छेदः समाप्यते ।

चतुर्थपरिच्छेदे -

कोशस्वरूपवर्णनम्, कोशोत्पत्तिनिरूपणम्, करग्रहणसिद्धान्तप्रदर्शनम्, आयप्रोतोनिरूपणम्, करग्राह्यवस्तूनामंशग्रहणव्यवस्थावर्णनम्, क्षीणकोशपूरणो-पायप्रदर्शनम्, दुर्भिक्षादावनुग्रहव्यवस्थावर्णनम्, नवनिर्मितकूपतडागादीनां करग्रहण-व्यवस्था प्रतिपादनम्, कोशस्याय प्रोतोनिरूपणम्, शुल्कव्यवस्था वर्णनञ्चेत्यादिभि-श्चतुर्थपरिच्छेदः समाप्तीक्रियते ।

पञ्चमपरिच्छेदे -

राष्ट्रलक्षणनिरूपणम्, अथर्ववेदेराष्ट्रोत्पत्तिवर्णनम्, अग्निपुराणे राष्ट्रस्योत्कर्षतायावर्णनम्, राष्ट्रस्य श्रेष्ठत्वप्रतिपादकमतखण्डनम्, देशवर्णनम्, राष्ट्ररक्षणोपायप्रदर्शनम्, शासनव्यवस्थावर्णनम्, राज्यशासनव्यवस्थायां विभागीय-शासकानां महत्त्ववर्णनम्, विभागाध्यक्षाणां कार्यप्रदर्शनम्, कर्मचारिणां कार्य-परीक्षणव्यवस्थावर्णनम्, ग्रामशासनसंस्थायावर्णनम्, ग्रामाधिपतीनां व्यवस्थावर्णनम्, ग्रामशासनसंस्थायाः कर्त्तव्यनिरूपणम्, नगरव्यवस्थावर्णनम्, न्यायव्यवस्थावर्णनम्, न्यायसभानिरूपणम्, न्यायसभायाः सभासदां बलाबलनिरूपणम्, दशाङ्गोपेतायाः न्यायसभायावर्णनम्, न्यायाधीशस्य व्यवस्था प्रतिपादनम्, न्यायालयस्य भेद-प्रदर्शनम्, न्यायेन सह सम्बद्धव्यवहारपदनिरूपणम्, विवादपादनिरूपणम्, दण्डव्यवस्था-वर्णनम्, दण्डोत्पत्तिवर्णनम्, दण्डभेदवर्णनम्, अपराधभेदेनदण्डव्यवस्थावर्णनम्, ऋणादानाद्यष्टादशविवादेषु दण्डव्यवस्था प्रदर्शनञ्च विहितमस्मिन्परिच्छेदे ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

षष्ठपरिच्छेदे -

दुर्गपरिभाषाप्रदर्शनम्, दुर्गभेदवर्णनम्, दुर्गस्य महत्वप्रतिपादनम्, दुर्गस्यावश्यकताप्रदर्शनम्, दुर्गनगरादिसंज्ञोत्पत्तिवर्णनम्, विजयप्रददुर्गवर्णनम्, राजनिवासोपयुक्तस्थलनिरूपणम्, राजप्रासादवर्णनम्, राजधानीनिर्माणोचितनगरनिरूपणम्, राजप्रासादवर्णनम्, राजधानीनिर्माणोचितनगरनिरूपणम्, राजधानीराष्ट्रस्य प्राणरूपेति निरूपणम्, राजधान्यानिर्माणम्, राजधान्यां परिखाप्राकारादीनां व्यवस्था वर्णनञ्चास्ति परिच्छेदेऽस्मिन् ।

सप्तमपरिच्छेदे -

सैन्यबलव्यवस्थावर्णनम्, सेनाङ्गनिरूपणम्, सेनायामहत्त्वप्रदर्शनम्, सैनिककार्यनिरूपणम्, चतुरङ्गबलानां कार्यनिरूपणम्, नौबलविष्टिबलदेशिकबलचारबलानां व्यवस्थावर्णनम्, वायुसेनाया व्यवस्थावर्णनम्, सेनायाः प्रकारप्रदर्शनम्, औत्साहिकबलव्यवस्थावर्णनम्, सैन्यविभाजनम्, सेनापत्यादीनां गुणनिरूपणम्, सेनापतीनां कार्यनिरूपणम्, सचिवव्यवस्थावर्णनम्, बलाध्यक्षाणां व्यवस्था, पत्तिपालादीनां कार्यनिरूपणम्, सैनिकशासनसंस्थायावर्णनम्, शिबिरनिर्माणविधिप्रदर्शनम्, व्यूहव्यवस्थावर्णनम्, व्यूहभेदप्रदर्शनम्, युद्धलक्षणप्रतिपादनम्, युद्धभेदनिरूपणम्, युद्धनियमप्रदर्शनम्, नियमपूर्वकं कृतस्य युद्धस्य फलप्रतिपादनम्, अस्त्र-शस्त्राणां स्वरूपप्रदर्शनम्, अस्त्रशस्त्राणां भेदनिरूपणम्, अग्निचूर्णनिर्माणविधिप्रदर्शनम्, वर्मादीनामुत्पत्तिवर्णनम्, सैनिकबलविषयेविशेषविचारप्रदर्शनञ्चेत्यादिभिः सप्तमः परिच्छेदः समाप्ती क्रियते ।

आर्यजनानां बहुलतया कृष्णसारमृगस्य स्वच्छन्दविचरणेन चातिपवित्रमिदं भारतवर्षम् । वैदिकसंस्कारसंस्कृतानामार्याणामत्युत्कृष्टतमं स्थानं विद्यते वर्षेऽस्मिन् । राज्यसञ्चालनसम्बन्धिबहवो नियमा अप्यार्यं परम्परायामेवाधारिताः

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

सन्त्यस्मिन् । आर्यपरम्परानुगतनियमस्याधारसञ्चालितस्यास्य राज्यस्य भूमिकापि महत्वपूर्णा विश्वविख्याता च । राज्येऽस्मिन् नानाविधा वर्णा वर्गा जातयश्च निवसन्ति । एतेषां प्रजाजनानां राज्यस्य चात्यन्तं निकटसम्बन्धो विद्यते, तस्मात्सर्वाः प्रजा राज्येनैव संरक्षिताः परिपालिताश्च । प्रजारक्षणपालन-सम्बन्धिनियमप्रतिपादका मन्वादिभिर्विरचिता ये ये सन्ति धर्मशास्त्रग्रन्था एते सर्वे संस्कृतभाषायामुल्लिखिता अतिकठिना अगाधरूपाश्च । पुनरेतौ राज्यव्यवस्था-सम्बन्धिनियमा अनेकप्रकरणप्रकीर्णाः सन्ति चेदन्यतः के के विषया कुत्र कुत्र वर्तन्ते कस्य कोऽभिप्राय इत्येतादृश्यपि दशा सर्वसाधारणानां जनानामल्पसंस्कृत-ज्ञानाञ्च कृते सदैवोपस्थिता । विद्वज्जनमनस्यप्यस्मिन्विषयेऽसङ्गत्या अनुभव स्तूद्भूत एव । अतएवानेकप्रकरणगतानां ग्रन्थान्तर्हितानां वा राज्यव्यवस्थायाः कृत उपादेयानां विषयाणामन्वेषणं विधाय विषयसम्बद्धानि विविधेषु ग्रन्थेषु प्रकरणेषु वोल्लिखितानि कृषिवाक्यानि तत्संहिताभ्यः समादाय सङ्गत्यनुसार-मेकत्र संकलय्य प्रस्तुतविषये विरचितोऽनुसन्धानात्मकः प्रबन्धोऽस्माकं जनसमाजे सुतरामपेक्षितः ।

आर्यजनसाधितधर्मकर्मादिभिः परिपूतायामार्यतपोभूमिरूपायामस्यां भारत-भूमौ निवसन्ति बहवो वैदिकसनातनधर्मावलम्बिनो मानवाः । ते सर्वे भवन्ति राज्य-प्रदत्तनियमद्वारा संरक्षिताः । तस्मादाप्नुवन्ति ते सततं सुखं शान्तिं च । स्वेनैव परिरक्षितान्स्वदेशस्थान् सर्वान् जनानाचारव्यवहारादिषु सत्कार्येषु सदैव समा-दिष्टान् करोति राज्यम् । पुनरमर्यादितेभ्यो दुष्कार्यप्रवृत्तेभ्यश्च यथोचितं दण्डादिकं दत्त्वा जनसमाजं मर्यादितं विदधाति । प्रबन्धेऽस्मिन् मर्यादित जनसमाजनिर्माण-सहायकभूतानां प्रजानां राज्यस्य च कर्तव्याकर्तव्यादीनां निर्णायकसाधनरूपविषया-णाञ्चास्ति विस्तृतं विवेचनम् ।

कस्य को धर्मः किंकर्तव्यमुत्तरदायित्वञ्च किमित्येतद्विधं ज्ञानं सर्व-साधारणेषु जनेषु न तु विद्यते, अतश्चौर्यसाहसव्यभिचारादीनि महापातकोपपातकाति-पातकानुपातकरूपाणीह परत्रवातिशयदुःखजनकानि दुष्कार्याणि लोके सदैवोपस्थितानि

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

दृश्यन्ते । प्रबन्धेऽस्मिन् राज्यस्य राज्यसञ्चालकानामुच्चपदाधिकारिणामन्येषां कर्मचारिणां प्रजाजनानाञ्च कृते कर्तव्याकर्तव्यबोधकविषयाः सन्ति स्पष्टरूपेण प्रदर्शिताः । अतो विषयाणामेतेषां यथार्थं ज्ञानेनानाचारभ्रष्टाचारादिकुत्सित-कार्येभ्यो निवृत्तास्ते जनाः कार्यकर्तारश्च स्वस्वकर्तव्योन्मुखा भवन्ति सत्कार्ये प्रेरिताश्च । यदा लोके एतादृशानां कर्तव्यनिष्ठानां जनानामाधिक्यं भवेत्तदा प्रजानां राज्यस्य चाभ्युदयो जायते । अतो देशस्य जनानाञ्च समुन्नतये प्रमुखां भूमिकामावक्ष्यतीति विचार्य सम्पादितोऽयं निबन्धः ।

सरलसंस्कृतभाषायां लिखितोऽस्त्ययम् । तस्माद्राज्यतत्त्वविषयेतत्त्वानां धर्मकर्मणोः सम्बन्धे च । निर्णयप्रदानार्थं तथ्यज्ञानोत्पादनार्थञ्चाल्पसंस्कृतज्ञानां कृतेऽप्यतीवोपयुक्तो लोकव्यवहार्योऽपि भविष्यतीति दृढो मामकीनो विश्वासः ।

उपर्युक्तां धारणां मनसिसमादाय नैकशास्त्र गतानेक प्रमाणान्वेषण-कर्मणि संलीनोऽहं वेदवेदाङ्गसंकायाध्यक्षाणां श्रीमतां युगलकिशोरमिश्रमहोदयानां निर्देशत्वे सन्नद्धः ।

मदीयविचारस्याधारे निर्मितस्य प्रबन्धस्यास्य युक्तत्वायुक्तत्वविचारे तु विचक्षणानां विचारेणैव पुरस्थापनीया ।

"धर्मशास्त्रीयराज्यतत्त्वविमर्शः" विषयोऽयमगाधोऽतिव्यापकश्च, एतद्विधेऽस्मिन्विषये स्वल्पमतेर्मत्सकाशात्सर्वाङ्गपूर्णमनुसन्धानं तु नस्यात्तथापि समुचित-प्रमाणस्याधारे प्रस्तुतविषयस्याङ्गपूर्तौ यथासम्भवं प्रयासस्तु विहितो वर्तते । तथाप्यत्र मतिमान्द्यात् प्रमादवशान्मुद्रणसम्बन्धिदोषाद् वा काश्चित् त्रुटयः सम्भवेयुश्चेत्तर्हि गुणैकपक्षपातिनो विपश्चिद्वराः क्षमान्विता भविष्यन्तीत्याशासे ।

नेपालस्थ त्रिभुवनविश्वविद्यालयस्य वाराणसेय सम्पूर्णानन्दसंस्कृतविश्व-विद्यालयस्य च विचारपूर्णया स्वीकृत्या प्रस्तुतविषये निबन्धलेखनावसरः समुपलब्धः, अवसरेऽस्मिन्विरचितोऽयं प्रबन्धो विद्यावारिध्युपाधये पूर्णः प्रमुखाधारो भविष्यति, एतद्विधावसरप्रदायकौ तौ द्वावेव प्रति सविनयं कृतज्ञतां विनिवेदयामि ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

: श्री :

वाराणसेय संस्कृतविश्वविद्यालयस्य वेदवेदाङ्गसंकायाध्यक्षैः डा०श्रीयुगलकिशोरमिश्रमहाभागैः निर्देशकत्वमङ्गीकृत्य शोधविषये निर्देशनं विविधोदाहरणादिभिः समुचितमार्गप्रदर्शनं निबन्धावलोकनं विधाय युक्तायुक्तकथनञ्चेत्यादयो बहव उपकारा विहिता इति तान् विदुषः प्रति सादरं कृतज्ञतां ज्ञापयामि ।

नेपालस्थ त्रिभुवनविश्वविद्यालय वाल्मीकिविद्यापीठस्य प्राध्यापकैः श्रीसिद्धिनाथमहोदयैर्लिखितकृत्यवलोकनं कृत्वाऽनेकैः शास्त्रीयोदाहरणादिभिर्योग्यतातिशयवृद्धिकरा उपदेशा विहिता इति तान् विद्वद्वरान् प्रत्यपि कृतज्ञतां प्रकटयामि ।

विद्वद्वरैरेतैः कृतमुपकारं न कदाचिदपि विस्मरिष्यति मे हृदयम् । इत्थमस्मिन् शोधकार्ये उपकर्तॄणां गुरुजनानां भगवतः परमेश्वरस्य च प्रसादो मम हृदयं भृशमाल्हादयतीत्येवमुक्त्वेदानीं विरमामि ।

(रामचन्द्र गौतमः)
अनुसन्धाता
उप-प्राध्यापकः
त्रिभुवनविश्वविद्यालय-वाल्मीकिविद्यापीठस्य,
प्रदर्शनीमार्ग-काष्ठमण्डप-नेपालस्य ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

विषयानुक्रमणी

(१) भूमिका -- -- क - न

(२) विषयप्रवेश: -- -- १ - २६

धर्मतत्त्वविचार: १, धर्मशास्त्रपरिचय: १२,
राज्यतत्त्वविचार: २२

(३) प्रथमपरिच्छेदे - राजतत्त्वस्य राज्यस्य समिते:
समायाश्च चिन्तनम् -- २७ - १७१

राजोत्पत्तिकालात्प्राक्कालिको जनसमाज: २७,
राजोत्पत्तिवर्णनम् २८, राज्ञ उत्पत्ते रपरो
वृत्तान्त: ३०, सिंहावलोकनतो राजतत्त्वोत्पत्ति-
विचार: ३२, राजोत्पत्तौ पाश्चात्यानां मतम् ३५,
राज्ञ उत्पत्तेराधुनिक: सिद्धान्त: ३७, निर्वाचन-
प्रक्रियया राज्ञ उत्पत्ति: ३६, राज्याभिषेक: ४४,
अभिषेककाल: ४५, अभिषेकप्रदातृणां पूजा ४६,
अभिषेककाले आकाशादीनां पूजा ५१, अभिषेचनीय-
जलसंग्रहणम् ५३, अथाभिषेकप्रयोग: ५४, राज्या-
धिकारग्रहणमभिषेकसमाचारप्रसारश्च ५६, राज-
पुरोहितयो: संवाद: ६०, इन्द्रादिदेवानां
चरित्रस्यानुकरणम् ६३, राजपदाधिकार: ६६,
राजपदे ज्येष्ठस्यैवाधिकार: ६६, राज्योत्तरा-
धिकारिक्रम: ७३, राजगुणा: ७३, राजदोषा:
७६, वृद्धसेवा ७६, इन्द्रियजय: ७७, शत्रुषड्वर्ग-
त्याग: ७८, दुर्व्यसनान्यतिशयकष्टदायकानि ८०,
विद्याध्ययनम् ८३, प्रजापालनं राज्ञ: कर्तव्यम् ६०,
शत्रुदमनेन प्रजापालनम् ६३, भयेभ्य: प्रजारक्षणम् ६४,

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अनाथादीनां रक्षणम् ९५, दुर्भिक्षादौ प्रजारक्षणम् ९६
व मनुनोपदिष्टं राज्ञो दैनिकं कर्तव्यम् ९८, कौटिल्यमते
राज्ञो दैनिकं कर्तव्यम् १००, कृषिव्यवस्था १०१, पशु-
पालनम् १०२, वाणिज्यव्यवस्था १०३, सार्वजनीनानां
कूपतडागयातायातादीनां निर्माणम् १०५,
प्रजापालनादौ पौरुषस्य महत्वम् १०६, राजपदविकास:
१०८, शुक्लयजुर्वेदवर्णितानि राजपदानि ११०,
सायणाचार्योक्तानि राज्यानि राजपदानि च ११३,
राजरक्षा ११४, कीदृशो राजा राजसत्तम: ११७,
राजा कालस्य कारणम् ११८, नीतिमान् राजैव
वास्तविक: १२०, देवांशो राजा १२०, गुणभेदेन
राजभेदा: १२२, अधार्मिको राजा दण्ड्यो भवति १२२,
गणतन्त्रात्मकं राज्यम् १२५, गणतन्त्रराज्यस्योत्कृष्टता
वर्णनम् १२६, पाणिनिना प्रोक्तानि गणराज्यानि
१२८, कौटिल्योक्तानि गणराज्यानि १३१, बौद्ध-
कालिकं गणराज्यम् १३२, गणराज्यमपि द्विविधम् १३४,
वृष्णिगणराज्यम् १३५, वैराज्यद्वैराज्ययोर्गुणदोष-
वर्णनम् १३७, गणराज्यविनाशकारणानि १४०,
गणराज्यस्य न्यायव्यवस्था १४१, गणराज्यानां
सूची १४३, गणराज्यसम्बन्धे मदीयो विचार: १४७,
समिति: सर्वोत्कृष्टा संस्था १५०, राज्ञो निर्वाचनादीनि
कार्याणि समित्यन्तर्गतानि १५१, समितेरध्यक्षस्तु
राजैव १५४, समिते: संघटनम् १५४, सभा - राज्यस्य
सर्वोच्चा संस्था १५५, सभा - स्वतन्त्राधिकारसम्पन्ना
१५६, सभाया: सभासदो राज्ञ: पितृस्थानीया: १५८,

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

नरिष्टा सभा १५६, पौरसभा १६०, पौरसभायाः कर्तव्यम् १६२, जानपदसभा १६५, पौरजानपदानां राजनीतिकं कार्यम् १६८, राजपदप्रदानं राजपदान्निष्कासनञ्च पौरजानपदानामेवाधिकारान्तर्गतम् १७० ।

(४) द्वितीयपरिच्छेदे - <u>मन्त्रिपरिषद्</u> -- -- १७२-२२६

मन्त्रिपरिषदोऽनिवार्यता १७२, प्राचीनतमोऽमात्यशब्दः १७७, अमात्यानां शौचाशौचपरीक्षणविधिः १७८, परीक्षितानाममात्यानां नियुक्तिः १७९, मन्त्रिपरिषदि सदस्यसंख्या १८१, अमात्यानां गुणाः १८४, अमात्यभेदाः १८५, उप-मन्त्रिणः १८६, मन्त्रिपरिषदिवर्णानां प्रतिनिधित्वम् १८८, मन्त्रनिर्धारणम् १८९, आन्तरिकसभा १९१, मन्त्रिपरिषदः संघटनम् १९३, प्रधानमन्त्री १९६, अमात्यानां कर्तव्यम् १९७, अमात्यानामधिकारः १९९, मन्त्रिपरिषदो निर्णयो राज्ञापि मान्यः २०२, स्वीकृतिप्रदानक्रमः २०३, युवराजः २०५, मन्त्रिपरिषदोऽध्यक्षः २०७, अमात्यानां परिवर्तनम् २०७, पुरोहितः २०९, पुरोहितगुणाः २११, पुरोहितस्यावश्यकता २१२, पुरोहितकार्यम् २१३, दूतव्यवस्था २१६, दूतगुणाः २१६, दूतभेदाः २१७, दूतकार्यम् २१८, गुप्तचरव्यवस्था २२०, गुप्तचरगुणाः २२१, गुप्तचरभेदाः कार्याणि च २२१, पञ्चसंस्था २२५ ।

(५) तृतीयपरिच्छेदे - <u>मित्रामित्रादीनां सन्ध्यादीनाञ्च विचारः</u> २२७-२७२

मित्रस्वरूपम् २२७, मित्रभेदाः २३०, मित्रगुणाः २३१, शत्रोर्लक्षणं भेदाश्च २३३, उदासीनलक्षणं भेदाश्च २३४,

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

शत्रुमित्रादीनां महीपालानां मण्डलम् २३५, तिस्रः शक्तयः २४१,
चत्वार उपायाः २४३, षाड्गुण्यम् २४७, सन्धिकालाः,
सन्धिभेदाः २५१, विग्रहः २५५, यानं यानकालिकं कृत्यन्च
२५६, यात्रायां शुभाशुभसूचकानि शकुनानि २५६,
यात्रायां ग्राह्यास्तिथ्यादयः २६१ ।

(६) चतुर्थपरिच्छेदे - कोशव्यवस्था -- -- २७३-२९८

कोशस्य स्वरूपं महत्वं च २७३, कोशस्योत्पत्तिः २७६,
करग्रहणस्य प्रथमसिद्धान्तः २७७, द्वितीयसिद्धान्तः २७९,
तृतीयसिद्धान्तः २८१, करप्रदाने हेतुः २८३, भागकरबलि-
शब्दानां प्रयोगः २८४, आयस्य त्रयो मार्गाः २८५,
धान्याद्यंशग्रहणे मतभेदः २८६, करग्राह्यवस्तूनामंशग्रहणम्
२८७, क्षीणकोशपूरणोपायाः २८८, दुर्भिक्षादावनुग्रहः,
नवनिर्मिततडागादीनां करव्यवस्था २९०, कोशस्यायस्रोतः
२९१, शुल्कव्यवस्था २९३, राष्ट्रियकोशस्य व्ययभारः
२९६, पौरस्त्यैर्विद्वद्भिः प्रतिपादितेयं कोशव्यवस्था
सम्प्रत्यपि सार्थका २९७ ।

(७) पन्चमपरिच्छेदे - राष्ट्रस्य राज्यशासनव्यवस्थाया न्यायव्यवस्थाया
दण्डव्यवस्थायाश्च वर्णनम् -- २९९-३७५

राष्ट्रलक्षणम् २९९, अथर्ववेदे राष्ट्रोत्पत्तिवर्णनम् ३००,
अग्निपुराणे राष्ट्रस्य श्रेष्ठता वर्णिता ३०१, श्रेष्ठता-
प्रतिपादकमतखण्डनम् ३०२, राष्ट्राभिधादेशाः ३०३,

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

राष्ट्ररक्षणोपायाः शासनव्यवस्था ३०५, राज्यशासनव्यवस्थायां विभागीयाः शासकाः ३०५, कौटिल्योक्ता विभागाध्यक्षास्तेषां कार्याणि च ३०७, कर्मचारिणां कार्यपरीक्षणम् ३१५, ग्रामशासनव्यवस्थायां ग्रामाधिपतयः ३१७, ग्रामशासनसंस्था ३१८, ग्रामशासनसंस्थायाः कर्तव्यम् ३२०, ग्रामसंस्थास्वतन्त्राधिकारसम्पन्ना ३२१, नगरव्यवस्था ३२२, न्यायप्रदानेन प्रजारक्षणं राज्ञः कर्तव्यम् ३२३, न्यायसभा ३२५, न्यायसभायाः सभासदां बलाबलविचारः ३२७, दशाङ्गोपेता न्यायसभा ३२८, न्यायाधीशः ३३०, न्यायाधीशगुणाः ३३१, न्यायालयः ३३२, न्यायप्रदानार्हव्यवहारपरिभाषा, न्यायेन सह सम्बद्धानि व्यवहारपदानि ३३४, विवादस्य चत्वारः पादाः ३३६, मनुस्मृतौ दण्डोत्पत्तिवर्णनम् ३४७, दण्डलक्षणम् ३४८, दण्डः प्रजानां योगक्षेमसाधकः ३४८, महाभारते दण्डस्वरूपवर्णनम् ३४९, दण्डभेदाः ३५०, धनदण्डः ३५१, वधदण्डः ३५२, अपराधभेदेन दण्डभेदाः ३५३, ऋणादानाख्ये विवादे दण्डव्यवस्था, उपनिधौ दण्डव्यवस्था ३५४, अस्वामिविक्रयाख्ये विवादे दण्डः, दत्तानपाकर्माख्ये विवादे दण्डः ३५६, वेतनादानविवादे दण्डः ३५७, संविद्व्यतिक्रमाख्ये विवादे दण्डः, क्रयविक्रयानुशयाख्ये विवादे दण्डः ३५८, स्वामिपालयोर्विवादे दण्डः ३५९, सीमाविवादे दण्डविधानम् ३६०, वाक्पारुष्ये दण्डव्यवस्था ३६१, दण्डपारुष्ये दण्डव्यवस्था ३६३, स्तेयाख्ये विवादे दण्डव्यवस्था ३६६, साहसे दण्डव्यवस्था ३६८, स्त्रीसंग्रहणे दण्डव्यवस्था ३७१, द्यूतसमाह्वयाख्ये विवादे दण्डः ३७४ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

(८) षष्ठपरिच्छेदे - दुर्गव्यवस्था -- -- ३७६-३८८

दुर्गपरिभाषा, दुर्गभेदा: ३७६, दुर्गस्य प्राधान्यम् ३७८, दुर्गमहत्ता ३७९, दुर्गस्यावश्यकता, दुर्गनगरादिसंज्ञोत्पत्ति: ३८०, धनधान्यायुधादिभि: परिपुष्टं दुर्गं विजयप्रदम्, राजनिवासोपयुक्तं स्थलम् ३८१, राजप्रासादवर्णनम् ३८२, राजधानीनिर्माणोचितं नगरम् ३८३, राजधानी राष्ट्रस्य प्राणरूपा ३८४, राजधान्या निर्माणम् ३८५, राजधान्यां परिखाप्राकारादीनां व्यवस्था ३८७ ।

(९) सप्तमपरिच्छेदे - सैन्यव्यवस्था -- -- ३८९-४३१

सेनाङ्गनिरूपणम् ३८९, सेनाङ्गानां महत्वं कार्यञ्च ३९०, हस्तिकार्यम्, अश्वकार्यम् ३९२, रथकार्यम् ३९३, पदातिकार्यम्, नौबलम् ३९४, विष्टिबलम्, देशिकबलम्, चारबलम् ३९५, आकाशसेना वायुसेना वा, सेनाया: प्रकार: ३९६, औत्साहिकं बलम् ३९७, सैन्यविभाजनम् ३९९, सेनापत्यादीनां गुणा: कार्यञ्च ४०२, सचिव-व्यवस्था, बलाध्यक्षा: ४०४, पत्तिपालादीनां कार्याणि ४०५, सैन्यशासनसंस्था ४०७, शिबिरनिर्माणम् ४०७, व्यूहरचना व्यूहविभागश्च ४०८, समव्यूह: ४०९, विषम-व्यूह:, आवाप: ४१०, व्यूहभेदा: ४११, युद्धलक्षणम्, युद्धभेदा: ४१४, युद्धनियमा: ४१५, नियमपूर्वककृतयुद्धस्य फलम् ४१७, अस्त्रशस्त्राणां लक्षणम्, अस्त्रभेदा: ४१८, अस्त्रोपयुक्ताग्निचूर्णनिर्माणविधि: ४१९, शस्त्रलक्षणम् ४२०, वर्मादीनामुत्पत्ति: ४२१, अस्त्रशस्त्राणां प्रकार: ४२२,

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

सैनिकबलविषये विशेषो विचार: ४२६ ।

(१०) उपसंहार, सिंहावलोकनम् -- -- ४३२-४५०

(११) धर्मशास्त्रीयराज्यतत्त्वविमर्शे समुद्धृतग्रन्थानां सूची -- ४५१-४५५

(१२) सङ्केताक्षरसूची -- -- -- ४५६-४५७

S
SSS
SSSSS
SSSSSSS
SSSSSSSSS
SSSSSSSSSSS
SSSSSSSSSSSSS
SSSSSSSSSSS
SSSSSSSSS
SSSSSSS
SSSSS
SSS
S

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

विषयप्रवेश:

धर्मतत्त्वविचार: -

"धृञ् धारणे" इत्यस्माद्धातो: "अर्तिस्तुसुहुसृधृक्षिक्षुभायावापदियक्षिनीभ्यो मन्"[1] इत्युणादिसूत्रेण "मन्" प्रत्यये सति धर्मशब्दो निष्पद्यते । तथा चास्येत्थं व्युत्पत्ति: - ध्रियते लोकोऽनेन इति धर्म:, ध्रियते धारणीध्रियते धारयति वा विश्वं य:, स धर्म इति । धनानि प्रीति इति धर्म: । य: प्राणिनां सुखसमृद्ध्यर्थं सर्वविधानां धनधान्याधभीष्टवस्तूनां प्रीत: समुत्पादयति स धर्म: । धर्मो वृषश्चोच्यते वर्षति अभिष्टान् कामान् इति वृ-ष:, शब्दस्यास्य व्युत्पत्त्यनुसारमेतादृशार्थज्ञानं भवति यत् भूमण्डलोद्भवानां समस्तानां प्राणिनां सुखशान्त्यर्थमभिलषितपदार्थान्प्रवर्षयति य: स वृषो धर्म: । यस्तत्त्वविशेष: सर्वं जगधारयति पालयति पोषयति च स एव धर्म: । धर्मोऽयमकर्तव्यं दुराचारं च विनाशयति । तथैव विवृतं महामुनिना व्यासेन --

धनान्प्रीति धर्मो हि धारणाद्वेति निश्चय: ।
अकार्याणां मनुष्येन्द्र स सीमान्तकर: स्मृत: ॥[2]

धर्मोऽयं चतुर्विधेषु पुरुषार्थेषु प्रथम इति तु सुप्रसिद्धमेव ।

---

(१) मध्यसिद्धान्तकौमुदी (उणादिप्रकरणम्) ।

(२) शान्ति० ६१।१५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

पुरुषेणार्थ्यते प्रार्थ्यते इति पुरुषार्थः । प्रार्थनाविषयत्वं सुखस्यैति सर्वत्र प्रसिद्धम् । काममोक्षयोः सुखस्वरूपत्वात्प्रार्थनाविषयत्वम् । धर्मार्थयोस्तु-सुखसाधनत्वात्प्रार्थनाविषयत्वं न स्वरूपतः । पुरुषार्थचतुष्टयमध्ये चोत्तरोत्तरं प्रकर्षाधिक्यम् । अर्थादीनां त्रयाणां धर्मापेक्षयोत्तरोत्तरं प्रकर्षाधिक्येऽपि तेषां पुरुषार्थत्वं धर्ममूलकमेवेति । अतः पुरुषार्थसाधनप्रवृत्ता जीवाः स्वभावत एव प्रथमतो धर्ममेवावलम्बन्ते । धर्मो हि नित्यः सुखदुःखे त्वनित्ये, अतएवाभ्युदयार्थं नित्यरूपस्य धर्मस्यैवावलम्बनं विधातव्यम् । धर्मएवैकं सन्निकृष्टं मित्रं यन्मरणेऽप्यभीष्टफलप्रदानायानुगच्छति, यस्मादन्यत्सर्वं भार्यापुत्रादि शरीरेणैव सहादर्शनं गच्छति, तस्मात्पुत्रादिस्नेहापेक्षयापि धर्मो न हातव्यः । तथैवोक्तमादिमुनिना मनुना --

> एकएव सुहृद्धर्मो निधनेऽप्यनुयाति यः[१] ।
> शरीरेणसमं नाशं सर्वमन्यद्धि गच्छति ॥

श्रीमद्भगवद्गीतायां भगवान् श्रीकृष्णोऽपि -- स्वधर्मे निधनं श्रेयः, कुरुकर्मैव तस्मात्त्वम्, स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभतेनरः, इत्यादि । सोमश्रवादयो मुनयो योगीश्वरं याज्ञवल्क्यं पूजयित्वा उक्तवन्तोऽस्मभ्यं वर्णाश्रमेतराणां[२] धर्मानशेषतः कथयेति । तन्त्रवार्तिककारोभट्टपादोऽपि

---

(१) मनुः ८।१७ ।

(२) वर्णाश्रमेतराणां - वर्णा-ब्राह्मणादयः, आश्रमा ब्रह्मचारिप्रभृतयः, इतरेऽनुलोमप्रतिलोमजातामूर्धावसिक्तादयः । एतेषां धर्मश्च षड्विधः - अत्र च धर्मशब्दः षड्विधस्मार्तधर्मविषयः, तद्यथा - (१) वर्णधर्मः, (२) आश्रमधर्मः, (३) वर्णाश्रमधर्मः, (४) गुणधर्मः, (५) निमित्तधर्मः, (६) साधारणधर्मश्चेति । मिताक्षरा (याज्ञवल्क्यः १।१) ।

CC-0 Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

"सर्वधर्मसूत्राणां वर्णाश्रमधर्मोपदेशित्वात्" इत्युल्लिख्य वर्णाश्रमधर्मानुपदिशति। धर्मानुष्ठानादेव चित्तशुद्धिः, विशुद्धचेतो हि योगमार्गे गन्तुं समर्थम् योगादेवो-त्कृष्टतामाप्नुवन्ति जीवाः। योग इति कथनेन - (१) कर्मयोगः, (२) ध्यान-योगः, (३) भक्तियोगः, (४) ज्ञानयोगश्चेतिचत्वारोयोगा गृह्यन्ते। भगवत्या श्रुत्यापि धर्मस्यानिवार्यता दर्शिता। धर्मं चरः, धर्मेणसुखमासीत, धर्मान्नप्रमदितव्यमित्यादि। धर्म एव हि विश्वाधार इत्यस्मिन्विषये नकस्यापि द्वैधं मतं विषयस्यास्य समर्थनं वेदेनापि विहितम्, अतएवास्योच्चतायाः श्रेष्ठताया आदर्शतायाश्च वर्णनं विहितमेव सर्वैः। धर्मो विश्वस्य जगतः प्रतिष्ठाः, लोके धर्मिष्ठं प्रजा उपसर्पन्ति, धर्मेणपापमपनुदति, धर्मे सर्वं प्रतिष्ठितं तस्माद्धर्मं परमं वदन्ति। इत्थं धर्मस्य सर्वोत्कृष्टतायाः वर्णनं सर्वत्रोपलब्धम्। तत्त्वमेतत्सर्वं जगद्धारयति पालयत्यवलम्बयति तस्मादस्य त्रयोऽर्थाः प्रसिद्धाः। धारणं पालनमवलम्बनञ्चेते त्रयो विषया जगतः कृते सदैवापेक्षिता विद्यन्ते। अपेक्षित-शक्तिसमेतेनैकेन धर्मबलेन हि सर्वं जगत्सुस्थिररूपेण वर्तते।

ईश्वरस्य या शक्तिः सैव सर्वं जगद्धारयति, अर्थाद्भगवति विश्वधारण-समर्थशक्तिरन्तर्निहिता, एतद्विधा ईश्वरेच्छारूपा अलौकिकी शक्तिरेव धर्म इत्याहुः केचिन्मुनयः --

> या बिभर्ति जगत्सर्वम् ईश्वरेच्छा ह्यलौकिकी।
> सैव धर्मो हि सुभगे नेह कश्चन संशयः॥

---

(१) पुरुषार्थ-चतुष्टय पृ० ३९।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

भगवता व्यासेनापि धर्मस्य लक्षणमुक्तं यथा --

धारणाद्धर्ममित्याहुर्धर्मो धारयते प्रजाः ।
यत्स्याद्धारणसंयुक्तं स धर्म इति निश्चयः ।।[1]

जगद्धारणसमर्थत्वाद्धर्मः, शब्दोऽयं व्यापकः । सर्वत्र व्याप्तस्यास्यानेकार्थान्प्र-
दर्शयति कोशकारोऽपि --

स्याद्धर्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृषः ।[2]

निरुक्तन्तु नियम एव धर्म इति वदति, यो नियमः सर्वं जगन्नियम-
यति । एतादृशस्य नियमस्यावलम्बनमवश्य कर्तव्यम्, यस्मादैहिकस्य पारलौकिकस्य
च सुखस्यावाप्तिः । अत एव "सुखस्य मूलं धर्मः" इत्याह चाणक्यः[3] ।
"यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः"[4] इत्याह महर्षिं कणादस्तु । एतादृशस्य
धर्मस्य परिपालनादेव मानवानां मानवतायाः सार्वत्रिको विकासः सम्भवः ।
विकसितायां मानवतायां या शक्तिरुद्-भवति तस्याः संयोगादेवादर्शमयस्य
जनसमुदयस्य समुत्पत्तिः । वेदे न यस्यविधानं विहितं स एव धर्मस्तद्विपरीतस्त्व-
धर्मः, तथैवोक्तं श्रीमद्भागवतेनापि --

वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्ययः ।[5]

---

(१) महाभारतम् ।
(२) अमरकोशः १।४।२४ ।
(३) चाणक्यसूत्रम् १ ।
(४) वैशेषिकसूत्रम् ।
(५) श्रीमद्भागवतम् ६।१।४० ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

आदिमुनिर्मनुः धर्मस्य प्रमाणं प्रदर्शयति --

वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।
एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम्[1] ।।

धर्मप्रमाणविषये योगीश्वरोऽपि मनोर्मतमेव समर्थयति --

श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।
सम्यक्संकल्पजः कामो धर्ममूलमिदं स्मृतम्[2] ।।

प्रमाणस्यास्याधारेऽस्माकं धर्माः श्रुतिस्मृत्युक्ताः सन्तीति मन्यमानाः सनातनधर्मानुयायिनो मानवा स्तदनुरूपमेवाचरणमाचरन्ति । स्वधर्मपरधर्मविधर्मादयोऽनेकविधाधर्मा दृश्यन्ते । एतेषु परधर्मादीन्विहाय स्वधर्माश्रयणं कर्तव्यम्, स्वधर्मएवाभ्युदयस्य मूलकारणविशेषः । श्रीमद्भगवद्-गीतायां भगवान् श्रीकृष्णोऽप्याह --

स्वधर्मे निधनं श्रेयः परधर्मोभयावहः[3] ।

चराचराणां समुन्नतौ यः साधकः स्एव धर्मः, बाधकस्त्वधर्मः । मानवजीवनस्याशेषेषु कार्यजातेषु धर्माधर्मयोर्दृढः सम्बन्धो विद्यते । यत्र रजोगुणतमोगुणयोर्निवृत्तिः सत्वगुणस्य प्रवृत्तिः स्यात्तत्र धर्मस्याभिवृद्धिर्जायते । यत्र रजोगुणतमोगुणयोर्वृद्धिः सत्वगुणस्याभावो विद्यते तत्राधर्मस्याभिवृद्धिर्भवति ।

---

(१) मनुः २।१२ ।

(२) याज्ञवल्क्यः १।७ ।

(३) श्रीमद्भगवद्गीता ३।३५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

वृद्धिंगतस्याधर्मस्य विनाशार्थं भगवान्परमेश्वर एव समर्थः । अतो भगवान् श्रीकृष्णः स्वयमेवाह --

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय संभवामि युगे युगे[१] ॥

ईश्वरस्तु स्वयं सदैव धर्मरूपः, अतः स श्रीमद्भागवते स्वयमेव कथयति -- "धर्मोऽहं वृषरूपधृक्"[२] इति । सोऽयमीश्वरो धर्मरक्षकः, धर्मनिर्माता, निखिलानां धर्माणां मूलाधारश्च "धर्मगुब्धर्मकृद्धर्मी"[३] इति । अत एव धर्मं सर्वमेवप्रतिष्ठितं दृश्यते । तस्माद्धर्मोनातिक्रमणीयः, अर्थाद्धर्मरक्षणं सर्वैरेव विधेयम् सर्वतोरक्षितो धर्म एव सर्वान्रक्षति । तथैव विवृतं मनुस्मृतौ --

धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः ।
तस्माद्धर्मो न हन्तव्यो --------[४] ॥

"आचारः प्रभवो धर्मः" इत्युक्तत्वात्सदाचारादपि समुत्पद्यते धर्मः । शिष्टैराचरितः पारम्पर्यक्रमागतः सुपरिष्कृतश्चाचार एव सदाचारः । शिष्ट इति कथनेनात्र जितेन्द्रियाः शास्त्रोक्तकर्मनिष्ठा वेदधर्मशास्त्रज्ञा बुधा एव गृह्यन्ते ।

---

(१) श्रीमद्भगवद्गीता ४।७-८ ।
(२) श्रीमद्भागवतम् ११।१७।११ ।
(३) विष्णुसहस्रनामस्तोत्रम् ६४ श्लोकः ।
(४) मनुस्मृतिः ८।१५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

एतादृशानां धर्ममर्मज्ञानां विपश्चितां सर्वमेव जीवनं सदाचारमयं विद्यते । किन्तु शिष्टैराचरितमपि सर्वमेवाचरणं न तु सदाचारत्वे गणनीयम्, ते तु मिष्टान्न-भोजननृत्यगीतादिकञ्च कुर्वन्ति । अत एतैराचरिता दानजपयज्ञव्रतोपवासादयो धृतिःक्षमादमोऽस्तेयशौचादयश्चैते धर्मबोधका आचारा एव सदाचाराः । एतद्विधाः सदाचारा एव धर्मे प्रामाणिकाः । सर्वैश्वर्यादीनां धर्मस्य च मूलं स्रोतः सदाचारः, तस्मादेव सर्वे धर्माः प्रभवन्ति । एतादृशो धर्मोत्पादक आचारो वेदोक्तः स्मार्तश्च भवति, तस्मादयमपरिवर्तनीयः । अनादिकालादेवा-गतत्वात्सनातनश्च । एतदेवोक्तमादिमुनिना मनुनापि --

अस्मिन्धर्मोऽखिलेनोक्तो गुणदोषौ च कर्मणाम् ।[१]
चतुर्णामपि वर्णानामाचारश्चैव शाश्वतः ॥

भारतवर्षोऽयमनादिकालादेव सदाचारस्य प्रमुखकेन्द्ररूपेणावस्थितः । अस्मादेवान्येदेशा विदेशाश्च धर्मस्य सदाचारस्य च शिक्षामाप्नुवन्ति । अस्यां भारतभूमौ तत्राप्यार्यावर्ते आर्यजनानामेव प्राधान्यं विद्यते । एतेषामार्याणां परम्परागतः सुसंस्कृतो य आचारः कर्तव्यविशेषो वा स एव सदाचारः । अत एव मनुनाप्येतद्विधं लक्षणमुक्तं सदाचारस्य --

तस्मिन्देशे य आचारः पारंपर्यक्रमागतः ।
वर्णानां सान्तरालानां स सदाचार उच्यते ॥[२]

विश्वमानवानां सभ्यतायाः संस्कृतेः सदाचारस्य धर्मस्य च मूलं तु

---

(१) मनुस्मृतिः १।१०७ ।

(२) मनुस्मृतिः २।१८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

परमप्राचीनो वेद एव । अस्य प्राचीनतामेकस्वरेण स्वीकुर्वन्ति + सर्वेविद्वांस: । अस्मादेवात्युच्चतमा शिक्षावाप्ता विद्वद्भि: । सेवा शिक्षावैदिकब्राह्मणद्वारा-सर्वत्र प्रसारिता । अतो मनुनाप्येतदुक्तम् --

एतद्देशप्रसूतस्य सकाशादग्रजन्मन: ।
स्वं स्वं चरित्रं शिक्षेरन्पृथिव्यां सर्वमानवा: ।।[1]

ये ये देशादेशवासिनो वा वैदिकशिक्षाया विमुखा जाता:, ते सर्वे वैदिककर्मभिरुपनयनादि संस्कारैश्च हीनाजाता: । संस्काराभावेन ब्राह्मणानां याजनाध्यापनप्रायश्चित्ताद्यर्थंदर्शनाभावेन च ते सर्वे शनै: शनैर्लोके शूद्रत्वमापन्ना: । उक्तञ्चमनुना --

शनकैस्तु क्रियालोपादिमा: क्षत्रियजातय: ।
वृषलत्वं गता लोके ब्राह्मणादर्शनेन च ।।
पौण्ड्रकाश्चौड्रद्रविडा: काम्बोजा यवना: शका: ।
पारदा: पह्लवाश्चीना: किराता दरदा: खशा: ।।[2]

अतएव मानवानामुन्नतिरवनतिश्च तेषामेवाचरणाधीना, अर्था-त्सदाचारेणमानवानामुत्थानं दुराचारेणाध: पतनं निश्चितम्, अत एव सदाचार-रूपधर्मस्य परिपालनमनिवार्यरूपेण कर्तव्यमुदयेच्छुभिर्मानवैरित्याहमनु: --

आचाराद्विच्युतो विप्रो न वेदफलमश्नुते ।
आचारेण तु संयुक्त: संपूर्णफलभाग्भवेत् ।।[3]

---

(१) मनुस्मृति: २।२० ।
(२) ~~तत्रैव~~ मनुस्मृति: १०।४३-४४ । (३) मनुस्मृति: ~~तत्रैव~~ १।१०९ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

आचारनिष्ठामानवाः सर्वमेवात्युत्कृष्टतमं फलमाप्नुवन्तीत्याहादि-मुनिर्मनुः --

सर्वलक्षणहीनोऽपि यः सदाचारवान्नरः ।
श्रद्दधानोऽनसूयश्च शतं वर्षाणि जीवति[1] ।।

आचाराल्लभते ह्यायुराचारादीप्सिताः प्रजाः ।
आचाराद्धनमक्षय्यमाचारो हन्त्यलक्षणम्[2] ।।

आचारः परमो धर्मः श्रुत्युक्तः स्मार्त एव च ।
तस्मादस्मिन् सदा युक्तो नित्यं स्यादात्मवान् द्विजः[3] ।।

चेतनशीलेषु जीवेषु तद्विधः स्वभावोऽन्तर्हितः, यः सदैव न्यूनताया अनुभवं करोत्यथात्समुन्नत्यर्थं निरन्तरं प्रयतते । एतद्विधायाः कामनायाः परिपूर्तिकरो यः साधनविशेषः स एव धर्मः, मानवानां प्रथमोऽभीष्टोऽपि धर्म एव । उत्कृष्टकामनायां यो बाधक स त्वधर्मः । सांख्यकारिकायां महर्षिःकपिलो-धर्माधर्मयोः फलं प्रदर्शयति --

धर्मेण गमनमूर्ध्वं गमनमधस्ताद्भवत्यधर्मेण[4] ।

धर्मोऽपि द्विविधः - सिद्धधर्मः साध्यधर्मश्च । यः किमप्युपायान्तरं नापेक्षते स्वयमेव सिद्धरूपेण वर्तते स सिद्धधर्मः, यथा भगवान् श्रीकृष्णः

---

(१) मनुस्मृतिः ४।१५८ ।
(२) मनुस्मृतिः ४।१५६ ।
(३) मनुस्मृतिः १।१०७ ।
(४) सांख्यकारिका ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

कृष्णं धर्मं सनातनम्' पूर्णपरब्रह्म परमात्मैव सिद्धधर्मः । यतः सोऽयं परमात्मा पुरुषप्रयत्नेनासाध्यः सदैव सिद्धरूपो नित्यरूपश्च । अस्यैव शक्त्याधारे सूर्यादयो ग्रहाः, ससमुद्रा पृथ्वी-नक्षत्रमण्डलान्यपि सुस्थिररूपेण वर्तन्ते । अतः श्रुतयः स्मृतयश्चापि सिद्धधर्मरूपः परमेश्वरो हि जगतो मूलाधार इति प्रतिपादयन्ति, यथा --

द्यौः सचन्द्रार्कनक्षत्रा खं दिशोभूर्महोदधिः ।
वासुदेवस्यवीर्येण विधृतानि महात्मनः ॥

प्राणिनां तत्तत्कर्मफलप्रदातृत्वात्सर्वेषां फलानामपि साधनरूपः । भजनकीर्तनकथाश्रवणादिभिरिज्याध्ययनादिभिश्चोपायैरस्य साक्षात्कारो भवितुं शक्नोति । इज्याध्ययनादीनां कर्मणामयमेव श्रेष्ठो धर्मः, यद्योगेन बाह्यचित्तवृत्ति-निरोधेनात्मनो याथातथ्यज्ञानं भवति । यथाह्ययाज्ञवल्क्यः --

अयं तु परमो धर्मो यद्योगेनात्मदर्शनम्[१] ।

सिद्धधर्मरूपस्य परमात्मनः साक्षात्कारार्थं साक्षात्परम्परया वा उपयुक्तोमनुष्याणां प्रयत्नसाध्यः शास्त्रोक्तः प्रवृत्तिरूपो निवृत्तिरूपो वा य उपायविशेषस्तस्यानुष्ठानात्समुत्पन्नोऽपूर्व एव साध्यधर्मः । सिद्धधर्मरूपेण परमात्मना जगद्धारणार्थं ये नियमा विनिर्मिता-स्तेषामनुकूलो लोकस्याध्यात्मिक-समुन्नतेः साधनभूतो धर्मशास्त्रोक्तोऽनिषिद्धः प्रयत्नसाध्यो यः सदाचारः सोऽपि

---

(१) याज्ञवल्क्यः १।८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

साध्यधर्म एव । देशकालवर्णाश्रमाधिकारिभेदेन तेषां शक्त्यनुसारं भावनानुरूप-न्चास्यानिकानिरूपाणि शास्त्रोक्तानि, तेष्वेकस्य यथोचितानुष्ठानात्पुण्य-स्योत्पत्तिः । पुण्यप्रभावादैहिकं पारलौकिकञ्चानुत्तमं सुखमाप्नुवन्ति मानवाः । धर्मज्ञानं प्रमाणानुमानादिभिर्न सम्भवम्, यत स्तस्य कोऽपि हेतुर्न प्रत्यक्षरूपेणा-वस्थितः । यज्ञादिसत्कर्मप्रवृत्ताः केऽपि मानवा निश्चयेन स्वर्गतिमाप्नुवन्ति । ये स्वर्गं यान्ति तान्प्रत्यक्षं द्रष्टुं न केऽपि समर्थाः । एतादृश्यां परिस्थितौ वेद एव प्रत्यक्षप्रमाणरूपेण वर्तते [1]धर्माधर्मार्थिभिर्नित्यं मृग्यौ विधिनिषेधकौ अदृष्टतत्त्वज्ञानं मुख्यतया वेदवाक्यादेव सम्भवम् । वेदवाक्यञ्च - चोदना-लक्षणोऽर्थो धर्मः[2] योऽर्थो वेदोक्तविधिवाक्यद्वाराऽबोधितो वा निवर्तक-वाक्यद्वारानिषिद्धोऽस्त्यथार्द्विवर्जनीयरूपेण बोधितोऽस्ति स एवानर्थः, अनर्थ-एवाधर्मः । इत्थं धर्मलक्षणं कुर्वता जैमिनिनाऽधर्मलक्षणमपि सूचितम् । आप-देवोऽपि धर्मस्य लक्षणं प्रदर्शयति - "तत्र वेदेन प्रयोजनमुद्दिश्य विधीयमानोऽर्थो धर्मः[3], यथा यागादिः । इत्थं धर्माधर्मयोर्ज्ञानं भवति वेदादेव । विध्यर्थवाद-मन्त्रात्मा वेदो धर्मे मूलं प्रमाणमित्युक्तं मनुनापि --

वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्[4] ।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥

---

(१) श्लोकवार्तिकम् ।

(२) जैमिनीमीमांसासूत्रम् १।१।२ ।

(३) मीमांसान्यायप्रकाशः पृ० ४ ।

(४) मनुस्मृतिः २।६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

जगन्निर्माता परमात्मा न तु प्रकृत्यन्तर्गतः, जगत्तु प्रकृति सकाशादेव समुत्पन्नं तस्माज्जगदिदं प्रकृतिमण्डलान्तर्गतमेव । भूर्भुवादयो लोकास्तु ब्रह्माण्डस्यान्तर्गता एवं सप्तद्वीपवती पृथ्वी च । जगत्पतिना भगवता विशालं विश्वमिदं विरच्य जातोऽस्य सुव्यवस्थापनार्थं सर्वं प्रथमं धर्मतत्त्वं परिकल्पितम् । तत्त्वस्यास्य समादरं यत्नतः सर्वैर्विधेयमुपार्जनञ्च कर्तव्यम् । अस्योपार्जनं प्रवृत्तिमार्गेण निवृत्तिमार्गेण च सम्भवति । प्रवृत्तिमार्गेण साध्यो धर्मः प्रवृत्तिधर्मः, यथा पुरुषार्थत्रयसाधनरूपोधर्मः । निवृत्तिमार्गेण साध्यो निवृत्तिधर्मः, यथा मोक्षधर्मः । लोकसंग्रहणार्थं[1] जगतः कर्त्रा भगवता परमेश्वरेण सर्वप्रथमं प्रवृत्तिरूपधर्मप्रचारेच्छया मरीच्यादीन्प्रजापतीन् विरच्य तेभ्यो वेदोक्तस्य यज्ञादिप्रवृत्तिरूपधर्मस्य शिक्षा प्रदत्ता । पुनर्निवृत्तिरूपधर्मप्रचारार्थं सनकादीन् निवृत्तिमार्गपरायणान्मुनीन् विरच्य तेभ्यो ज्ञानवैराग्यरूपनिवृत्तिधर्मस्योपदेशो विहितः । इत्थं प्रवृत्तिनिवृत्तिरूपौ द्विविधावेव धर्मौ विश्वस्मिन्प्रचलितौ स्तः, तयोरेकस्यावलम्बनं चेतनाशीलजीवस्य कर्तव्यम् । तयोर्द्वयोरेव यथार्थज्ञानं धर्मशास्त्रादेव सम्भवम् ।

धर्मशास्त्रपरिचयः -

जगतः कर्त्रा भगवता परमेश्वरेण लोकोपकारार्थं स्वस्मिन् ज्ञानदीपे प्रतिभासमानः परम्परागतोऽखण्डो ज्ञानराशिर्वेदोऽभिव्यक्तो कृतः । वेदोऽयमुत्कृष्टज्ञानसम्पन्नानां कृते उपयुक्तो जातः, न तु सर्वसाधारणानां जनानां

---

(१) ~~अअअअअअअ~~ लोकानां स्वे स्वे धर्मे प्रवर्तनम्, उन्मार्गान्निवर्तनं च लोकसंग्रहः

CC.O Sampurnanand University Collection. Digitized by eGangotri

कृते । अतः करुणामूर्तिभिर्मन्वादिभिरन्यैर्महर्षिभिश्च सर्वसाधारणानामुपयोगार्थं व्यवहारोपयुक्तं वेदमूलकं धर्मशास्त्रं विनिर्मितम् । धर्ममर्मज्ञैः परमर्षिभिर्वैदिकज्ञानस्मरणाद्विनिर्मितत्वादेतच्छास्त्रं 'स्मृतिः' इति नाम्ना प्रसिद्धम् । तथोक्तं च मनुस्मृतौ मनुना -

श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः ।
ते सर्वार्थेष्वमीमांस्ये ताभ्यां धर्मो हि निर्बभौ[१] ।।

वेदधर्मशास्त्ररूपे एते श्रुतिस्मृती प्रतिकूलतर्केर्न विचारयितव्ये, सर्वविधकर्मसु योजनीये । यतस्ताभ्यां धर्मः (लोकाचारः, लोकव्यवहारः, लोकस्य प्रायश्चित्तरूपो वा भावः) एव प्रकटितो विद्यते ।

मानवाचारादीनां शासनं करोति यत् तच्छास्त्रम् । 'शासु अनुशिष्टौ' इत्यस्माद्धातोः 'सर्वधातुभ्यः ष्ट्रन्[२]' इत्युणादिसूत्रेण ष्ट्रन् प्रत्यये सति शास्त्रशब्दो निष्पद्यते । धर्मशास्त्रमेतन्न्यायशासनञ्च बोधयति ।

धर्मशास्त्रमखिललोकस्याचारशास्त्रम् । राजधर्मो लोकधर्मश्चास्त्यस्यान्तर्गतः । देशकालाधिकारिभेदेन केन केनोपायेन धर्मस्योपार्जनं विधेयमित्यस्य सर्वस्य ज्ञानं धर्मशास्त्रादेव सम्भवम् । लोकसमुन्नतिः, अपराधस्य दुःखस्य च

- - - - - - - - - - - - - - - - -

(१) मनुस्मृतिः २।१० ।
(२) म० कौ० (उणादिप्रकरणम्) ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

विनाशः, सर्वोच्चलक्ष्यप्राप्तिश्च धर्मशास्त्रज्ञानात्तदनुरूपाचरणाच्च । धर्मशास्त्रविहितकर्मनिष्ठा जना एव सर्वतः सततं च सिद्धिमाप्नुवन्ति ।

स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः[1] ।

ब्राह्मणादिषु वर्णेषु विभिन्नवर्गेषु च विभक्तानां सर्वेषां मानवानामाजीवनकर्तव्यस्य सर्वाङ्गपूर्णा शिक्षा धर्मशास्त्रादेवोपलब्धा । अतोऽस्य शास्त्रस्य महत्वमवर्णनीयम् । यल्लोकोपकारार्थं विश्वशान्त्यर्थं च पूर्णरूपेण सहायकम् । विशेषतोऽखिललोकस्याजीवनकर्तव्यस्यानुविधानं धर्मशास्त्रस्योद्देश्यं तथा चाङ्गिरसस्मृतौ -

यत्पूर्वमृषिभिः प्रोक्तं धर्मशास्त्रमनुत्तमम् ।
तत्प्रमाणन्तु सर्वेषां लोकधर्मानुवर्णनम्[2] ।।

लोकधर्म इति कथनेनात्र मिताक्षरायां विज्ञानेश्वरोक्ताः - (१) वर्णधर्मः, (२) आश्रमधर्मः, (३) वर्णाश्रमधर्मः, (४) गुणधर्मः, (५) निमित्तधर्म, (६) साधारणधर्मश्चेति षड्विधाः स्मार्तधर्मा गृह्यन्ते[3] । एते धर्मा बहुषु स्मृतिग्रन्थेषूल्लिखिता दृश्यन्ते । अत्र केषाञ्चित्स्मृतिकाराणां मतमुपस्थाप्यते ।

(१) वर्णधर्मः -

मनोर्मते ब्राह्मणवर्णस्य धर्मः -

अध्यापनमध्ययनं यजनं याजनं तथा[4] ।
दानं प्रतिग्रहं चैव ब्राह्मणानामकल्पयत् ।।

- - - - - - - - - - - - - - - - -

(१) श्रीमद्भगवद्गीता १८।४५ । (२) आ० स्मृतिः १।८ ।
(३) मिताक्षरा (याज्ञवल्क्यः १।१) (४) मनुस्मृतिः १।८८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

श्रीमद्भागवतेऽपि -

शमो दमस्तपः शौचं सन्तोषः क्षान्तिरार्जवम् ।
ज्ञानं दयाच्युतात्मत्वं सत्यं च ब्रह्मलक्षणम् [1] ।।

क्षत्रियधर्मस्य मनूक्तं स्वरूपम् -

प्रजानां रक्षणं दानमिज्याध्ययनमेव च ।
विषयेष्वप्रसक्तिश्च क्षत्रियस्य समासतः [2] ।।

श्रीमद्भागवतोक्त क्षात्रधर्मः -

शौर्यं वीर्यं धृतिस्तेजस्त्याग आत्मजयः क्षमा ।
ब्रह्मण्यता प्रसादश्च सत्यन्च क्षत्रलक्षणम् [3] ।।

श्रीमद्भगवद्गीतायां वैश्यधर्मवर्णनं यथा -

कृषिगौरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम् [4] ।

मनुप्रतिपादितो वैश्यधर्मः -

पशूनां रक्षणं दानमिज्याध्ययनमेव च ।
वणिक्पथं कुसीदं च वैश्यस्य कृषिमेव च [5] ।।

शूद्रधर्मस्वरूपं मनुस्मृतौ -

एकमेव तु शूद्रस्य प्रभुः कर्म समादिशत् [6] ।
एतेषामेव वर्णानां शुश्रूषामनसूयया ।।

- - - - - - - - - - - - - - - - - -

(१) भागवतम् ७।११।२१ । (२) मनुस्मृतिः १।८९ ।
(३) भागवतम् ७।११।२२ । (४) श्रीमद्भगवद्गीता १८।४४ ।
(५) मनुस्मृतिः १।९० । (६) मनुस्मृतिः १।९१ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

श्रीमद्भगवद्गीतायां शूद्रधर्मः -

परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम्[1] ।

योगीश्वरो याज्ञवल्क्यो याज्ञवल्क्यस्मृतौ वर्णधर्मानुपस्थापयति -

इज्याध्ययनदानानि वैश्यस्य क्षत्रियस्य च ।
प्रतिग्रहोऽधिको विप्रे याजनाध्यापने तथा ॥

प्रधानं क्षत्रिये कर्म प्रजानां परिपालनम् ।
कुसीदकृषिवाणिज्यपाशुपाल्यं विशः स्मृतम् ॥

शूद्रस्य द्विजशुश्रूषा तयाऽजीवन्वणिग्भवेत् ।
शिल्पैर्वा विविधैर्जीवेद् द्विजातिहितमाचरन्[2] ॥

श्रीमद्भागवते वर्णसङ्करानां धर्मः -

वृत्तिः सङ्करजातीनां तत्तत्कुलकृता भवेत् ।
अचौराणामपापानामन्त्यजान्तेऽवसायिनाम्[3] ॥

(२) आश्रमधर्मः -

(१) ब्रह्मचर्याश्रमः, (२) गृहस्थाश्रमः, (३) वानप्रस्थाश्रमः, (४) संन्यासाश्रमश्चेति चत्वार आश्रमाः प्रसिद्धाः । जीवनावधिं चतुर्धा विभज्यायुषः प्रथमे भागे (पञ्चविंशतिवर्षपर्यन्तं) ब्रह्मचर्याश्रमः । ब्रह्मचर्याश्रम-मुषित्वा ब्रह्मचर्यपालनं वेदाध्ययनादिकञ्च कर्तव्यम् । द्वितीयो गृहस्थाश्रमः, आश्रमेऽस्मिन् (पञ्चाशद्वर्षावधिके) दारसंग्रहणं सन्तानोत्पादनमहरहपञ्च-

- - - - - - - - - - - - - - - - -

(१) श्रीमद्भगवद्गीता १८।४४ । (२) याज्ञवल्क्यः १।११८-१२० ।
(२) भागवतम् ७।११।३० ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

महायज्ञानामनुष्ठानञ्चेत्यादीनि कर्माणि क्रियन्ते आश्रमस्यास्यार्थाद्गार्हस्थ्यस्य महत्वं सर्वाधिकं विद्यते । तदेवेङ्गितमादिमुनिना मनुना -

यथा वायुं समाश्रित्य वर्तन्ते सर्वजन्तवः ।
तथा गृहस्थमाश्रित्य वर्तन्ते सर्वे आश्रमाः ।।

यस्मात्त्रयोऽप्याश्रमिणो ज्ञानेनान्नेन चान्वहम् ।
गृहस्थेनैव धार्यन्ते तस्माज्ज्येष्ठाश्रमो गृही[१] ।।

तृतीयो वानप्रस्थाश्रमः । गृहस्थाश्रमानन्तरं वनप्रवेशः कर्तव्यः । वनप्रवेशोऽयं जराजर्जरशरीरस्य जातपौत्रस्य वा । तथा च मनुः -

गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः[२] ।
अपत्यस्यैव चापत्यं तदारण्यं समाश्रयेत् ।।

आयुषस्तृतीयो भागो वानप्रस्थाश्रमकालः । उक्तञ्च मनुना -

वनेषु च विहृत्यैवं तृतीयं भागमायुषः[३] ।

वानप्रस्थाश्रमिणा मृगादिचर्मणा वृक्षवल्कलेन वा च शरीराच्छादनं जटाश्मश्रुलोमनखधारणं मुन्यन्नादिभिर्वनोद्भवैः पवित्रैः शाकमूलफलैर्वाग्निहोत्रसाधनं नित्यं वेदाध्ययनञ्चेत्यादीनि कर्माण्यवश्य कर्तव्यानि ।

चतुर्थः सन्यासाश्रमः । तच्चोक्तं मनुना -- चतुर्थमायुषो भागं त्यक्त्वा सङ्गात्परिव्रजेत् परिव्रज्याश्रममनुतिष्ठता साशिखान्केशान्निकृन्त्य

----

(१) मनुस्मृतिः ३।७७-७८ ।

(२) मनुस्मृतिः ६।२ ।

(३) मनुस्मृतिः ६।३३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

यज्ञोपवीतं विसृज्य दण्डग्रहणं कमण्डलुधारणं योगाभ्यासादिना शरीर-शोषणञ्च विधाय मोक्षसाधनं कर्तव्यम् । प्रव्रज्याश्रमग्रहणाधिकारस्तु ब्राह्मणादिवर्णत्रयाणामेव ।

(३) <u>वर्णाश्रमधर्मः</u> -

वर्णविशेषाणामाश्रमविशेषेण सह सम्बद्धो धर्मः । उदाहरणञ्च यथा --

ब्राह्मणो बैल्वपालाशौ क्षत्रियो वाटखादिरौ ।
पैलवौदुम्बरौ वैश्यो दण्डानर्हन्ति धर्मतः[१] ॥

(४) गुणधर्मः -

विज्ञानेश्वरेण मिताक्षरायामस्यार्थः स्पष्टीकृतः, यथा - शास्त्रीयाभिषेकादिगुणयुक्तस्य राज्ञः प्रजापरिपालनादिः[२] ।

(५) निमित्तधर्मः -

विहिताकरणप्रतिषिद्धसेवननिमित्तं प्रायश्चित्तम् ।

(६) साधारण धर्मः -

योगीश्वरो याज्ञवल्क्यः साधारणधर्मस्य स्वरूपं प्रदर्शयति --

अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः ।
दानं दमो दया क्षान्तिः सर्वेषां धर्मसाधनम्[३] ॥

----

(१) मनुस्मृतिः २।४५ । (२) मिताक्षरा (या० १।१) ।
(३) याज्ञवल्क्यः १।१२२ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

मनुस्मृतौ मनुश्च --

धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्[१] ॥

उपर्युक्तानां सर्वविधानां धर्माणां मूलं श्रौतो धर्मशास्त्रमेव । श्रीमद्भगवद्गीतायां दैवी आसुरीचेति द्विविधा सम्पत्तिः प्रतिपादिता । दैवी देवतानां प्रकृतिः, आसुरी दानवानाम् । तयोर्मध्यस्था मानुषी । मानवाः कदाचिद्दैवी प्रकृत्यनुरूपमाचरणमाचरन्ति, कदाचित्त्वासुरी प्रकृत्यनुरूपम् । दैवीप्रकृत्यनुरूपादाचरणान्मोक्षप्राप्तिः, आसुरीप्रकृत्यनुरूपादाचरणाद्दुःखप्राप्तिः । उक्तञ्च --

दैवी सम्पद् विमोक्षाय निबन्धायासुरीमता[२५] ।

दैवीप्रकृत्यनुरूपाचरणस्य पथप्रदर्शकं हि धर्मशास्त्रम् । अतः शास्त्रमेतदसन्मार्गप्रवृत्तान्स्वमार्गविचलितान्वा मानवान्सन्मार्गं प्रदर्शयति । अतोऽस्य शास्त्रस्य ज्ञानं सर्वेषां कृते नितान्तमपेक्षितम् ।

श्रुतिस्मृती द्वे समानधर्मे, श्रुतिशब्देन वेदार्थो ज्ञायते । श्रवणमननाध्यापनविषया श्रुतिः । स्मृतिशब्दस्तु ईश्वरप्रकाशितवेदवाङ्मयाद्भिन्नार्थे प्रयुज्यते । स्मृतिस्त्वेषा स्मरणविषयिणी परम्परागतधार्मिकसाहित्यविशेषरूपा च । स्मृतिरिति कथनेन धर्मसूत्रादयोऽपि गृह्यन्ते । धर्मशास्त्रस्मृत्योर्न कोऽपि विभेदः । श्रौतसूत्रादयः सूत्रग्रन्था वैदिकसाहित्यान्तर्गताः ।

---

(१) मनुस्मृतिः ६।९२ । (२) श्रीमद्भगवद्गीता १६।५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

धर्मसूत्रादयः सूत्रग्रन्थास्तु स्मृतिसाहित्यान्तर्गताः । धर्मसूत्रेषु पुरातनं गौतमधर्मसूत्रम् । सूत्ररचनान्तरमेव स्मृतयो विरचिताः । स्मृतिषु प्राचीनतमा मनुस्मृतिः । स्मृतयो विशेषतः श्लोकेष्वाबद्धाः, तासु भाषा लौकिकी दृश्यते, ताधर्मसूत्रादधिकं व्यवस्थिताः सन्ति सुसंघटिताश्च । प्रारम्भिके युगे स्मृतयः स्वल्पसंख्यायामवस्थिताः किन्तु ताः शनैः शनैर्वृद्धिं गताः, अर्थात् स्मृतिकर्तॄणां विदुषां संख्या बहुला जाता । याज्ञवल्क्यानुसारं मुख्यस्मृतिकाराश्च विंशतिः सन्ति, ते चेमे --

(१) मनुः, (२) अत्रिः, (३) विष्णुः, (४) हारीतः, (५) याज्ञवल्क्यः, (६) उशनाः, (७) अङ्गिराः, (८) यमः, (९) आपस्तम्बः, (१०) संवर्तः, (११) कात्यायनः, (१२) बृहस्पतिः, (१३) पराशरः, (१४) व्यासः, (१५) शङ्खः, (१६) लिखितः, (१७) दक्षः, (१८) गौतमः, (१९) शातातपः, (२०) वसिष्ठश्चैते सर्वे धर्मशास्त्रप्रवर्तकाः । ते चेत्थं वर्णिता याज्ञवल्क्यस्मृतौ --

मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः ।
यमापस्तम्बसंवर्ताः कात्यायनबृहस्पती ॥
पराशरव्यासशङ्खलिखिता दक्षगौतमौ ।
शातातपो वसिष्ठश्च धर्मशास्त्रप्रयोजकाः ॥[१]

अग्निपुराणे वर्णिता धर्मशास्त्रकाराः --

मनुर्विष्णुर्याज्ञवल्क्यो हारीतोऽत्रिर्यमोऽङ्गिराः ।

----

[१] याज्ञवल्क्यस्मृतिः १।४-५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

वसिष्ठदक्षसंवर्तशातातपपराशराः ॥

आपस्तम्बोशनोव्यासाः कात्यायनबृहस्पती ।
गौतमः शङ्खलिखितौ धर्मंमिते यथाऽब्रुवन्[1] ॥

धर्मशास्त्रं विरच्य तन्माध्यमेनैव धर्मप्रचारकाः महर्षय इत्थं वर्णिताः सन्ति पराशरस्मृतौ --

श्रुता मे मानवा धर्मा वासिष्ठाः काश्यपास्तथा ॥
गार्गेया गौतमीयाश्च तथैवोशनसाः स्मृताः ।
अत्रेर्विष्णोश्च संवर्ताद्दक्षादङ्गिरसस्तथा ॥
शातातपाच्च हारीताद्याज्ञवल्क्यात्तथैव च ।
आपस्तम्बकृता धर्माः शंखस्य लिखितस्य च ॥
धर्मराजकृताश्चैव बृहस्पतिकृताश्च ये ।
कात्यायनकृताश्चैव तथा प्राचेतसान्मुनेः[2] ॥

इत्थं केचिदष्टादश केचिद् विंशतिः केचिदेकविंशतिः केचित्तु षट्त्रिंशत्स्मृतिकारा इति वर्णनमुपस्थापयन्ति, निर्णयसिन्धौ पञ्चविंशत्यधिकशतसंख्याकानामृषीणां वचनमस्त्युद्धृतम्, केचिद् विद्वांसस्त्वष्टाशीति सहस्राणि ऋषयः सन्ति ते सर्वे धर्मशास्त्रप्रवर्तका इत्याहुः ।

अष्टाशीति-सहस्राणि मुनयो गृहमेधिनः ।
पुनरावर्तिनो बीज-भूता धर्मप्रवर्तकाः ॥

इत्थं धर्मशास्त्रकाराणां संख्यायां संज्ञायामुपस्थापनक्रमे च न केऽपि

---

(१) अग्निपुराणम् १६२।१-२ । (२) पराशरस्मृतिः १।१२-१५

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

मंतव्यं प्रतिपादयन्ति, तथापि यावन्तोमुनयो धर्मशास्त्रं प्रवर्तयन्ति तेषां सर्वेषामेवोद्देश्यन्त्वेकं लोकधर्मानुवर्णनमेव । लोकधर्मोऽप्याचारो व्यवहारः प्रायश्चित्तं चेति त्रयो धर्माः सन्त्यन्तर्हिताः । तेषु व्यवहारधर्मस्तु राज्यतत्त्वमपि विवेचयत्यर्थाद्राज्यतत्त्वानुवर्णनन्तु व्यवहारधर्मान्तर्गतमेव । तत्त्वमेतदत्रापि विविच्यन्ते ।

राज्यतत्त्वविचारः -

निश्चितभूप्रदेशस्थानां नानाजातिषु वर्णेषु वर्गेषु च विभक्तानां मानवानां समुदये तादृशमेकं सुसंघटितं सर्वशक्तिसमेतं च शासनं परिकल्प्यते, यद्राज्यनाम्ना प्रसिद्धम्, यस्यादेशः सर्वमान्यः प्रतिकूलविचारकैश्चाभेद्यः । भूभागः, जनता, प्रभुता, शासनम्, आदेशश्चैतानि पञ्च राज्यस्य मूलतत्त्वानि । स्वाम्यमात्यादीनि तत्त्वानि तु राज्यनिर्धारकाणि राज्यप्रकृतिरूपाणि राज्याङ्गानि च । कोशकारस्यानुसारं सप्ततत्त्वानि सन्ति, तानि चैतानि --

(१) राजा, (२) मन्त्री, (३) मित्रम्, (४) कोशः, (५) राष्ट्रम्, (६) दुर्गम्, (७) बलञ्चैतानि सर्वाणि राज्यतत्त्वानि । एतानि चेत्थं वर्णितान्यमरकोशे क्षत्रियवर्गे --

स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि च ।
राज्याङ्गानि प्रकृतयः[१] - - - - - -।।

----

(१) अमरकोशः २।८।१७ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

कौटिल्योक्तानि राज्यतत्त्वानि --

(१) राजा राष्ट्रपतिर्वा, (२) मन्त्री, (३) जनता देशो वा (४) दुर्गम्, (५) कोशः, (६) दण्डः, (७) मित्रञ्च । तथा च कौटलीयार्थशास्त्रे --

"स्वाम्यमात्यजनपददुर्गकोशदण्डमित्राणि प्रकृतयः"[1] ।

याज्ञवल्क्योक्तानि राज्याङ्गरूपाणि सप्ततत्त्वानि --

(१) राजा राष्ट्रपतिः सर्वोच्चशासको वा, (२) अमात्या मन्त्रिपुरोहितादयः, (३) देशवासिनो जनाः, (४) दुर्गं नृदुर्गगिरिदुर्गादि, (५) कोशो रत्नकनकादिधनराशिः, (६) दण्डो हस्त्यश्वादि चतुरङ्गबलम्, (७) सहजकृत्रिमप्राकृतानि मित्राणि च । तथा च याज्ञवल्क्यस्मृतौ --

स्वाम्यमात्यौ जनो दुर्गं कोशो दण्डस्तथैव च ।
मित्राण्येताः प्रकृतयो राज्यं सप्ताङ्गमुच्यते[2] ॥

मनुस्मृतावपि --

स्वाम्यमात्यौ पुरं राष्ट्रं कोशदण्डौ सुहृत्था ।
सप्त प्रकृतयो ह्येताः सप्ताङ्गं राज्यमुच्यते[3] ॥

(१) स्वामी राजा राष्ट्रपतिर्वा, (२) अमात्यो मन्त्र्यादिः,

---

(१) कौटिल्यअर्थशास्त्रम् ६।१ । (२) याज्ञवल्क्यस्मृतिः १।३५३

(३) मनुस्मृतिः ६।२६४ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

(३) पुरं दुर्गवेष्टितं राजनगरम्, (४) राष्ट्रं देशः, (५) कोशः सुवर्णद्रव्यादि धनराशिः, (६) दण्डश्चतुरङ्गबलम्, (७) सुहृन्मित्रञ्चैतानि सप्ततत्त्वानि मनूक्तानि । एतानि सप्ततत्त्वानि विष्णुस्मृतावपि सन्ति वर्णितानि --

"स्वाम्यमात्यदुर्गकोशदण्डराष्ट्रमित्राणि प्रकृतयः"[१] ।

प्रकारेणानेन प्रकृतिरूपाणि राज्यतत्त्वानि प्रदर्शयन्ति धर्मशास्त्रकाराः । प्रदर्शितानामेतेषां तत्त्वानामुपस्थापनक्रमेनामनिर्देशने चैवादन्तरमुपलभ्यते, किन्तु तत्त्वसंख्यायां तु न केषाञ्चिदपि मतभेदः ।

राज्यमपि मानव इव शरीरं धारयति, मानवशरीरं हस्तपादादिभिरङ्गैर्विरचितम्, राज्यशरीरं तु स्वाम्यमात्यादिभिः सप्तभिरङ्गैर्विनिर्मितम् । यथा मानवानां सर्वाण्येवाङ्गानि जीवनार्थं सदैवोपयुक्तानि सन्ति, तद्वद्राज्याङ्गान्यपि राज्यस्य कृते नितरामपेक्षितानि दृश्यन्ते । येषामभावे न जीवति राज्यम् । राज्यस्य प्राणधारणशीलानि तानि सर्वाण्येव समानं महत्वं प्रतिपादयन्ति, अर्थात्स्वस्वविषये विभागे वा महत्त्वपूर्णं स्थानमाकलयन्ति, यस्मिन् येन यत्कार्यं साध्यते तस्मिन् तदङ्गं श्रेष्ठतमम् । पुनरेतेषां परस्परमविच्छिन्नसम्बन्धोऽपि विद्यते, यथा मनुष्यदेहाङ्गानामस्ति । मानवो हस्ताद्यङ्गहीनो भवेत्तदा तस्य का स्थितिः, राज्यमपि तद्वदेव । अङ्गेषु राजा शीर्षस्थानीयः, मनुष्यस्योत्तमाङ्गस्य यन्महत्वं विद्यते तद्विधमेव महत्वं राज्ये राज्ञो भवति । नेत्रं मन्त्रिणः, देशस्य जनानाञ्च सर्वविधां गतिं स्थितिं चावलोक्य

---

(१) विष्णुस्मृतिः ३।३३, अग्निपुराणम् २३३।१२, शान्तिपर्व ६९।६२-६३, कामन्दकः ४।१ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

तदनुकूलं कार्यं सञ्चालयन्ति ते तस्मान्नेत्रसंज्ञामाप्नुवन्ति । श्रोत्रं मित्राणि राष्ट्रस्य परराष्ट्रस्य च वस्तुस्थितिं श्रुत्वा तथ्यज्ञानमुत्पादयन्ति तस्मात्तानि श्रोत्रस्योपाधिं प्राप्नुवन्ति । एवमेवान्येषां कार्याण्यप्यवगन्तव्यानि । कोशो मुखम्, मनो बलम्, हस्तौ दुर्गम्, पादौ राष्ट्रम् । एतादृशं शरीरमवधार्य प्रशास्ति राज्यम् । विषयोऽयमित्थं वर्णितोऽस्ति शुक्रनीतौ --

सप्ताङ्गमुच्यते राज्यं तत्र मूर्धा नृपः स्मृतः ।।
दृगमात्यः सुहृच्छ्रोत्रं मुखं कोशो बलं मनः ।
हस्तौ पादौ दुर्गराष्ट्रे राज्याङ्गानि स्मृतानि हि ।।[१]

प्रकारेणानेन सप्ततत्त्वानां तेषां संज्ञायाः कार्यविषयस्य च निर्धारणं विहितं पौरस्त्यैराचार्यैः । पाश्चात्याविद्वांसस्तु राज्यनिर्धारकाणि चत्वारि तत्त्वान्येवोपस्थापयन्ति ।[२] तानि चेत्थं प्रदर्शितानि -- (१) क्षेत्रम्, (२) जनता, (३) एकता, (४) संघटनञ्च । क्षेत्रं देशः, देशस्याभावे राज्यमेवासम्भवम्, अतस्तेषां मते तत्त्वेषु देशस्यैवास्ति प्रथमं स्थानम्, महत्वञ्च सर्वाधिकम् । जनता देशवासिनो जनाः, तेषामभावेत्वावश्यकतैव न विद्यते राज्यस्य । अतः पाश्चात्या राजनीतिज्ञाः सर्वप्रथमं जनसंख्यामेव निर्धारयन्ति, जनसंख्याया आधार एव राज्यस्वरूपं कल्पयन्ति । एकता एकत्रितराजनैतिकशक्तिविशेषः, यस्माद्राज्यस्य सर्वोच्चतमा विधायिका भवति व्यवस्थापिता । संघटनं राजनैतिकम्, यद्राज्यस्योच्चपदस्थानामधिकारिवर्गाणां योगाद् भवति संघटितम् । संघटनमेतत्सर्वकारेण सह सम्बद्धम् । इत्थं चतुर्णां तत्त्वानां संघटनादेव राज्यस्योत्पत्ति-

---

(१) शुक्रनीतिः १।६१-६२ । (२) हिन्दूराज्यशास्त्रम् ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

रित्याहुः पाश्चात्याः, अवशिष्टानि दुर्गादीनि त्रीणि तत्त्वानि तु सर्वकारेण सह सम्बद्धतत्त्व एवान्तर्हितानि । पाश्चात्यानां विचारोऽयं न तु युक्तिसङ्गतः, यतो दुर्गादीनां त्र्याणां तत्त्वानां स्वभावकार्यविषयश्च पृथग्विधः, तस्मादेषां न केषुचिदपि तत्त्वेष्वन्तर्भावः । अतो राज्य-तत्त्वानां संख्याविषये पौरस्त्यैर्यन्मतमुपस्थापितमुपरितदेवसङ्गतमर्थाद्राज्यस्य सप्ततत्त्वान्येव प्रसिद्धानि । अतः प्रबन्धेऽस्मिन् तेषामेव विस्तृतं विवेचनं विधीयते ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

प्रथमपरिच्छेदः

राजतत्त्वस्य राज्यस्य समितेः सभायाश्च चिन्तनम्

राजोत्पत्तिकालात्प्राक्कालिकोजनसमाजः

समुन्नतिः शान्तिश्चैते द्वे सुखमूले, तस्मादेते सर्वत्र सदैवापेक्षिते । द्वयोरेतयोः प्रमुखाधारस्तु नियन्त्रित एवं शिष्टजनसमाज एव । एतद्विध-समाजोत्पत्त्यर्थं सर्वशक्तिसमेता सर्वाङ्गपूर्णा वा राज्यशक्तिर्नितरामपेक्षितेत्येष सिद्धान्तः सर्वमान्यः । किन्तु प्रारम्भिके युगे तु सिद्धान्तोऽयं न तु सार्थकः स्वाम्यमात्यादिभिर्युतस्य शक्तिविशेषस्यानावश्यकत्वात् । तात्कालिकोजन-समाजस्तु स्वयमेवासीन्नियन्त्रितो मर्यादितश्च । तस्मात्तस्मिन्युगे राज्यस्य राज्ञो दण्डस्य दण्डधरस्य चावश्यकतैव नानुभूता । तथैव प्रोक्तमथर्ववेदे -

"विराड् वा इदम् अग्र आसीत्"[१] ।

तदानीन्तना मानवास्तु धर्मेणैवासन्परस्परं संरक्षिताः परिपालिताश्च, तस्मादादर्शजीवनयापने पूर्णसहायकस्य तस्यैवानुगता भवन्ति स्म । धर्ममर्मज्ञानां तदनुष्ठानरतानाञ्च प्राचुर्यत्वाज्जगतितले प्रभुत्वञ्चासीत्तेषामेव । समाजोत्पन्ना-

---

(१) अथर्ववेदः ८।१०।१ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

नामशेषाणां समस्यानां धर्मानुकूलेनोपायेन समाधानं समाजोपयुक्तां व्यवस्थां च ते एव कुर्वन्ति स्म । धर्मानुरागिणां प्रभूतत्वाद्धर्मस्य तस्य विविध पक्षस्य धार्मिकमहत्त्वस्य चाऽसीद्व्यापक: प्रचार: प्रसारश्च । अतो धर्मानुष्ठानस्य मिथ: सहयोगस्य च भावना सर्वसाधारणेषु जनमानसेष्वप्यासीत्समुदिता । मानवमात्रेषु विकसितस्य धर्मस्य प्रभावेण शासकस्याभावेऽपि वातावरणं सर्वत्रशान्तं सामाजिकी स्थितिश्चासीत्पूर्णतां गता । आदर्शमयोऽयं जनसमाजोऽस्ति महाभारतेविवृत:[१] --

नैव राज्यं न राजासीन्न दण्डो न च दाण्डिक: ।
धर्मेणैव प्रजा: सर्वा रक्षन्ति च परस्परम् ।।
पालयानास्तथान्योन्यं नरा धर्मेण भारत ।

राजोत्पत्तिवर्णनम् -

कृतयुगारम्भे मानवमात्रेषु यद्विधो धार्मिको भावो विकसित: सुदृढश्चासीत् स शनै: शनै: शिथिलतां गत:, मानवा मोहवशमापन्ना:, तस्मात्कामक्रोधलोभादयोऽपि वृद्धिं गता:, कर्तव्याकर्तव्यभक्ष्याभक्ष्यादीनां विवेकोऽपि प्रायश: समाप्त:, विषयानुरक्तानां दुर्वृत्तानां बाहुल्याद्वेदो-विलुप्तप्राय:, तस्माद्यज्ञादिवैदिककर्मणां सनातनधर्मस्य च विनाशावस्था समुत्पन्ना; विविधोपद्रवाणामसुरक्षायाश्च स्थिति: सर्वत: प्रादुर्भूता, एतद्विधामनियन्त्रितां भयप्रदां च स्थितिं दृष्ट्वा सन्त्रस्ता दु:खिता च देवा

---

(१) शान्तिपर्व: ५९।१४-१५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

कृषयश्चानियन्त्रितलोकनियन्त्रणसमर्थशासकस्यावश्यकताया अनुभवं कुर्वन्ति, तदर्थं विधातुः शरणं गच्छन्ति लोकोत्पन्नां वास्तविकीं स्थितिं च विनिवेदयन्ति । लोकमर्मज्ञेन विधात्रापि स्वशरणागतान्देवादीन् प्रसाद्य लोकोपकारार्थं लक्ष्यसंख्यापरिमिताध्याययुक्तमत्युत्तमं नीतिशास्त्रं विनिर्मितम् । यस्मिन्नान्वीक्षिकी-त्रयीवार्तादण्डनीतयश्चैता विद्या आसन् वर्णिताः । यच्छास्त्रं पैतामहतन्त्र-शास्त्रमितिनाम्ना प्रसिद्धम्, यस्य प्रभावादसत्कार्यप्रवृत्ता अपि भविष्यन्ति सत्कार्योन्मुखाः, धर्ममार्गोन्मुखाश्च । इत्थं जगत्कर्तुः परमेष्ठिनोऽनुग्रहा-न्मर्यादितजनसमाजनिर्माणे पूर्णसहायकं नीतिशास्त्रमवाप्य देवादिभिः प्रसन्नताया-भावः प्रकटितः । विधिशास्त्रमवाप्य प्रसन्नाः किन्तु नियमप्रयोक्तुरनुपलब्ध्या दुःखिताश्च देवादयः शासकप्राप्तेरुद्देश्यमादाय भगवतो विष्णोः सकाशमगच्छन् । तत्र गत्वा लोककल्याणार्थं मनुष्येषु श्रेष्ठं शासनकार्ये समर्थं पुरुषं राजपदे-स्थाप्यताम् । शासकस्य व्यवस्था न तु क्रियते चेत्तदाऽनीश्वरस्यलोकस्य विनाशः प्रायो निश्चितः, इति प्रार्थयन्ते । देवा नामुक्तिरेषा सर्वथा समुचितेति मत्वा भगवता विष्णुनापि राजपदप्रदानार्थं विरजानामकस्य मानसपुत्रस्योत्पत्ति-र्विहिता, किन्तु तेन तत्पदं नत्वङ्गीकृतम् । तत्र सप्तमे पुरुषे वेनस्योत्पत्तिर-भूत् । अनेनैव राज्यं सन्चालितम् । अधार्मिकत्वात्प्रजापीडकत्वाच्चैष परमर्षिभि-र्मन्त्रपूतैः कुशैर्मारितः । देवैः परमर्षिभिश्च राजपदपरिपूर्त्यर्थंमृतस्यास्य बाहु-मन्थनं विधाय सुन्दरः सुसज्जितस्तथा वेदवेदाङ्गेषु पारगो दण्डनीतौ राजनीतौ च कुशलः पृथुरुत्पादितः । तस्मै राजपदञ्च दत्तं तैरेव । तत्पदप्राप्त्यनन्तरं तेनापि शपथग्रहणं कृतं यद्देवानां ऋषीणाञ्च समक्षं न जनसमक्षम् । देवादीन्

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

प्रति विहितः शपथः प्रजाजनैश्च स्वीकृतः । राज्ञा पृथुना कृतः शपथश्चैतादृशः -- शास्त्रनिर्धारितस्य परम्परागतस्य च धर्मस्य परिपालनम्, मानवमात्रेषु समानव्यवहारस्थापनम्, कामक्रोधादीनां दुर्गुणानां परस्त्रीसेवनसुरापानादीनां च दुर्व्यसनानाञ्च सर्वथा त्यागः, धर्मविचलितानामसन्मार्गप्रवृत्तानाञ्च समुचितपथप्रदर्शनञ्चैतानि मम कर्तव्यानि, कर्मणा मनसा वाचा चैतेषां परिपालनं करिष्यामि, पुनश्चैतादृशीं प्रतिज्ञां च करोमि यथा सततं वेदवचनं परिपालितं भविष्यतीति । ततो लोके तवाज्ञाया विरोधे कोऽपि न गमिष्यतीत्युक्त्वा भगवान्विष्णुश्च तस्मिन्नेव राजनि लीनोऽभूत् । अतो राजानं भगवतो विष्णोरवतारं मत्वा लोकेजनाः सदैव भवन्ति तं प्रति नतमस्तकाः[१] पूर्वमित्थमेव राज्ञउत्पत्तिर्दृश्यते, अस्योत्पत्तेरयं सिद्धान्तो दैवोत्याहुर्मुनयः । वृत्तान्तोऽयमेकः । अस्योद्गमस्यान्यो वृत्तान्तोऽपि शास्त्रेषूपलब्धः ।

राज्ञउत्पत्तेरपरो वृत्तान्तः -

अनीश्वराः प्रजा भवन्त्यनियन्त्रिताः, तस्माल्लोके मात्स्यन्यायः समुत्पततति, जलेमत्स्या इव लोके प्रजा विनश्यन्ति, मात्स्यन्यायं परिहृत्य सदैव शान्तिस्थापनं सर्वेषां परं कर्तव्यम्, एतदर्थमेकः सबलो विशुद्धश्च नियमो लोके नितरामपेक्षितः, यस्य प्रभावात्प्रजाजना नियन्त्रिता मर्यादिताश्च भवेयुरितिविचार्य स्वयमेकत्रितेन जनसमाजेन तादृशो नियमो विनिर्मितः, योऽनियन्त्रित-

---

(१) शान्तिपर्व ५९ अध्यायः ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

लोकनियन्त्रणे पूर्णसहायक आसीत् । समाजनिर्मितनियमद्वारा सुरक्षिताः प्रजाः बहुकालं यावत् ससुखमतिष्ठन्, परन्तु परिवर्तितकालप्रभावेण दुर्वृत्तानां बाहुल्यं जातम्, तैर्दुर्जनादिभिर्लोके विविधोपद्रवाणां दुर्व्यवहाराणाञ्चोपक्रमो विहितः । प्रचलितेन दुर्व्यवहारेण दुराचरणेन चाकुलिताः प्रजाः प्रजापतेः शरणं ययुः, शरणागतास्ता स्तं विनिवेदयन्ति भो भगवन् ? लोकेऽस्ति दुर्जनानां प्राबल्यं तस्मादनाचाराश्चौर्यसाहसबलात्कारादयोऽनेकोपद्रवाश्च वृद्धिं गताः, तेनानीश्वरा वयं विनाशावस्थां प्राप्ताः, अतोऽस्माकं समाजे तादृशस्य शासकस्यावश्यकता समुद्भूता, यः स्वशासनप्रभावाल्लोकोत्पन्नां भयदां स्थितिं निराकृत्य सर्वत्र शान्तिस्थापनादिकार्ये समर्थो भवेत्, यतो वयं सुरक्षिताः परिपालिताश्च भवेम, तस्यादरं सम्मानवञ्च करिष्यामः । प्रजानां तदीयं हृदयविदारकं निवेदनं श्रुत्वा जनमर्मज्ञेन विधात्रापि तदैव मनवे राजपदं दत्तम् । किन्तु तत्पदमस्वीकृतं मनुना । अस्वीकारकारणञ्चाह मनुः -- पापाद्भीतोऽस्म्यहम्, सम्प्रतिलोके पापाचरणरतानां दुर्जनानां प्राबल्यं दृश्यते, तस्मात्तान् दुष्टान् प्रतिशासनं कर्तुं दुष्करं वर्तते । पुना राज्यसञ्चालनार्थमर्थपूर्णकोशोऽपि सुतरामपेक्षितः, तस्य सुव्यवस्थापि नेदानीम्, अतो राज्यशासनं कर्तुमसमर्थोऽहमिति । एतद्विधेन मनोर्विचारेणोद्विग्नमनाजनाः सविनयं प्रार्थयन्ते राजन् ? भयं त्यज्यतां पापं पापाचरणशीलान् प्राप्स्यति नास्मान्, वयं भवतः सहयोगं करिष्यामः, कोशाभिवृद्ध्यर्थं पशूनां पञ्चाशत्तमं धान्याधन्यानां दशमं भागं कररूपेण प्रदास्यामः, उभयकुलानन्ददायिन्या मनोनयनानन्दकारिण्या कन्यया सहोद्वाहोऽपि भविष्यति भवतः, यथेन्द्रो देवान्रक्षति तथैवास्मान् सर्वतः

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

पाहि, भवता सुरक्षिताः प्रजा यं धर्मं चरिष्यन्ति तस्य चतुर्थांशस्तवापि भविष्यतीति । विविधोपद्रवपीडितानां जनानामेतद्विधया भावपूरितयोक्त्या प्रभावितो मनुरेवं राजपदमङ्गीकृत्य दुर्जनविनाशस्य धर्मसंरक्षणस्यचोद्देश्यमादाय विश्वपरिभ्रमणार्थं निर्ययौ । स्वतेजसा प्रज्वलितस्य महताबलेनावृतस्य मनोर्महत्व-पूर्णेन परिभ्रमणेन सन्त्रस्ता दुर्जनाः स्व स्वधर्मसन्निविष्टाः, शासकस्याभावे समुत्पन्नेन मात्स्यन्यायेन परिभूताः स्वधर्मविचलिताश्च सज्जना राजप्राप्तेः प्रभाविताः सन्तुष्टाश्च सञ्जाताः[1] ।

सिंहावलोकनतो राजतत्त्वोत्पत्तिविचारः -

राजा भवति प्रजापालनाय दृढप्रतिज्ञः । प्रजारञ्जनाद्राजेति सिद्धान्तोऽत्रापि समर्थः । यः स्वकीयेन प्रतापेन राष्ट्रियं प्रभावं वर्द्धयति स राजा । स एव राजा यः सततं प्रकृतीं रञ्जयति सुखयति सन्तुष्टयति च । यथाऽऽह्लादनाच्चन्द्रः सार्थकः, सूर्यः सन्तापजननात् सार्थकः, तथैव प्रजा-रक्षणाद्रञ्जनाच्च राजशब्दः सार्थकः । तथा हि कालिदासः --

यथा प्रह्लादनाच्चन्द्रः प्रतापात्तपनो यथा ।
तथैव सोऽभूदन्वर्थो राजा प्रकृतिरञ्जनात्[2] ॥

महाभारतेऽपि --

रञ्जिताश्च प्रजाः सर्वास्तेन राजेति शब्द्यते[3] ।

---

(१) शान्तिप० ६७ अध्यायः । (२) रघुवंशः ४।१२ ।
(३) शान्तिप० ५९।१२५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अस्योत्पत्तिविषये द्वौ वृत्तान्तावुपस्थापितावुपरि, तयोर्द्वयोः किञ्चिदन्तरमस्ति परिलक्षितम्, तच्चैतद्विधम् -- प्रथमे वृत्तान्ते जगतः प्रथमो राजा पृथुरुक्तः, स विरजावंशोत्पन्नः, विरजोत्पत्तिस्तु जगदीश्वरेण विहिता, पूर्वजोत्पत्तावीश्वरकारणत्वात्पृथोरुत्पत्तावपि स एव कारणरूपः। यद्यपि सामान्यतः पृथोरुत्पादनं वेनाङ्गाद्देवादिभिर्विहितम्, तस्य कर्तव्यनिर्देशोऽपि तैरेव कृतस्तथापि तस्मिन्कार्ये देवा ऋषयश्चासनीश्वरप्रेरिताः, अर्थाद्भगवत इच्छयैव पृथुरुत्पादितः, तस्योत्पत्त्यनन्तरमेव तस्मिन्राजनि तस्य प्रविशत्वात्। तद्यथा महाभारते शान्तिपर्वणि --

तपसा भगवान्विष्णु राविवेश च भूमिपम्[1]।

मनुस्मृतावप्यस्यैव वृत्तान्तस्योपलब्धं प्रायः समर्थनम् -- अराजके जगत्यनेके उपद्रवाः समुत्पन्ना, परस्परं मात्स्यन्यायः प्रचलति बलवत्तरा निर्बलान्पीडयन्ति विनाशयन्ति च। एतादृश्यां परिस्थितौ यत्नतो लोकरक्षणं विधातव्यम्, एतदर्थं सर्वशक्तिसमेतो रक्षको दाण्डिको वा नितान्तमपेक्षितः, इति विचार्य जगत्कर्त्रा परमेश्वरेण चराचर रक्षार्थ-इन्द्रवायुयमसूर्याग्निसोमवरुणकुबेराणां सारभूतानंशानाकृष्य राज्ञः सृष्टिर्विहिता। तद्यथा --

अराजके हि लोकेऽस्मिन्सर्वतो विद्रुते भयात्।
रक्षार्थमस्य सर्वस्य राजानमसृजत्प्रभुः॥
इन्द्रानिलयमार्काणामग्नेश्च वरुणस्य च।
चन्द्रवित्तेशयोश्चैव मात्रा निर्हृत्य शाश्वतीः[2]॥

---

(१) शान्तिप० ५९।१३० । (२) मनुस्मृतिः ७।३-४ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

द्वितीये वृत्तान्ते जगत आदिमो राजा मनुः । स परमेष्ठिना राजपदे नियुक्तः, किन्तु तदा तत्पदमस्वीकृतं तेन, यतो राज्यसञ्चालनन्तु कठिनं कार्यं तस्य कृते जनसमर्थनं सहयोगादिकञ्चापरिहार्यम्, तदुपलप्स्यते न वेत्याशयो मनोरासीत् । मनोर्विचारविद्भिः प्रजाभिश्च करादिदानस्यान्यसहयोगप्रदानस्य च प्रतिज्ञा कृता । मनुनापि जनानां सहयोगवचनप्राप्त्यनन्तरं दत्तं राजपदमङ्गीकृत्य राजकार्यारम्भो विहितः ।

राजपदे मनोर्नियुक्तिः प्रजाभिः कृता न तु विधात्रेत्याह कौटिल्यस्तु - लोके दुर्जनानां बहुलतया विविधोपद्रवाः समुद्भूताः, यत्र तत्र विध्वंसात्मकं कार्यमुत्पन्नम्, सर्वत्राशान्तेः प्रसरणं जातम्, जनसमाजे परस्परं मात्स्यन्यायः प्रचलितः । तदात्मरक्षणार्थं मात्स्यन्यायेन तिरस्कृताभिर्जनताभिर्वैवस्वतमनू राजपदे स्थापितः । शासनसञ्चालनार्थमर्पितकोशरूपेण दातत्वाद् धान्यादीनामंशदानेऽपि तावचनबद्धाः । तथा हि --

"मात्स्यन्यायाभिभूताः प्रजा मनुं वैवस्वतं राजानं चक्रिरे ।
धान्य षड्भागं पण्यदशभागं हिरण्यं चास्य भागधेयं प्रकल्पयामासुः"[१]

इत्थं राज्ञउत्पादनं केवलेन जनसमाजेन विहितमित्याहकौटिल्यः । किन्त्वनुग्रहे निग्रहे च समर्थत्वाद्राजा इन्द्रयमयोः स्वरूपं धारयति, अतोऽयेऽस्योपेक्षां तिरस्कारं वा कुर्वन्ति ते त्ववश्यं दैवदण्डमापन्नाभवन्ति, इति तु सोऽपि वदति, तस्माद्राज्ञउत्पत्ते दैवीसिद्धान्तस्तस्त्वप्रत्यक्षरूपेण तेनापि समर्थितो

---

(१) ~~[illegible]~~ ~~[illegible]~~ कौटिल्यअर्थशास्त्रम् १।१२ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

दृश्यते ।

शास्त्रप्रवर्तकप्रतिपादितानामुपर्युक्तानां वृत्तान्तानां वचनानाञ्चानु-
शीलनाद्राजा लोकरक्षणार्थं लोकधर्मसंस्थापनार्थञ्च दैवोत्पादितः सिद्धः ।
राज्ञउत्पत्तिस्तु दैवी तथापि राज्ञः प्रजानाञ्च सामञ्जस्यं सदैवापेक्षितं विद्यते ।
तस्मात्सोऽपि लोकसम्मतिमादायैव राज्यं सञ्चालयति । राजतन्त्रात्मकदेशे
राजानः संप्रत्यपि लोकसम्मत्यनुसारमेव राज्यं सञ्चालयितुं भवन्ति दृढप्रतिज्ञाः ।

राजोत्पत्तौ पाश्चात्यानां मतम् -

राज्ञ उत्पत्तिविषये पौरस्त्यैर्यो विचारः प्रस्तुतस्तस्मिन्पाश्चात्यानां
विदुषामपि प्रायः समर्थनं दृश्यते । राजशास्त्रप्रवर्तकेषु पाश्चात्येषु विद्वत्सु
हाब्स, लाक, रूसो एतेत्रयो विख्याताः । एतेषामेव मतमत्रोपस्थाप्यते । हाब्स
मतम् --

मानवाः सततं स्वार्थप्रेरिताः, जातेरस्याः प्राकृतिकोऽयं स्वभावः,
तस्मात्स्वार्थसिद्ध्यर्थमनुचितेष्वविहितेषु च कार्यजातेष्वपि भवन्त्येते प्रवृत्ताः ।
पुनः परस्परं द्रुह्यन्ति, दमननीतिमाकलयन्ति, सबला निर्बलान्पीडयन्ति,
द्रव्यादिकमपहरन्ति, शक्तिरेवाधिकारमूलेति च वदन्ति, प्रवृत्तिरेषा मानवमात्रे-
ष्वन्तर्हिता । राजोत्पत्तिकालात्प्रागस्या नियन्त्रणस्य न कापि व्यवस्था
विहिता । तस्मादेषोत्तरोत्तरं वृद्धिंगता । विकसितताया अस्याः प्रभावेण
परिस्थितिर्जटिला, अतोऽशेषा मानवा भयाकुलाः । तदैकत्रिता विचारशीलाः

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

समुत्पन्नायाः परिस्थितेः समाधानोपायं शोचन्ति, लोकोत्पन्नसमस्यासमाधान-समर्थं शक्तिसम्पन्नं राजतत्त्वं च कल्पयन्ति, यस्य तत्वस्यादेशः सर्वैः प्रजाजनैः पालनीयः, कार्यक्रमोऽपि सर्वमान्यः, न केषुचिदपि राज्ञ आदेशस्य विरोधाधिकारी विद्यते, इत्येतद्विधौ नियमोऽपि निबद्धः प्राकृतिकसमस्यया परिभूतेन जनसमुदयेनैकमत्येन । इत्थं राजोत्पत्तिं विधाय स्वान्तर्हिताधिकारोऽपि राजन्येव प्रत्यर्पितो जनसमाजेन[1] ।

लाकमतम् -

प्राचीनयुगे राज्ञो नियमस्य च न क्वापि व्यवस्था, तथापि न त्वराजकताया स्थितिः, जनसमाजः स्वयमेव मर्यादितो नियन्त्रितश्च, पारस्परिकसहयोगभावना मानवमात्रेषु समुदिता, तस्मात्सामाजिकं वातावरणमासीत् सर्वत्र सुखमयं शान्तिमयञ्च । किन्तु वातावरणमेतत्क्रमशः समाजनिर्गतत्वात् सामाजिकव्यवस्थार्थं जनसमाजेन राजसत्ता परिकल्पिता । पुनस्तदानीमेव जनसमुदयेन तादृशो नियमोऽपि निर्मितः यो राज्ञा प्रजाभिश्चानुसरणीयः, स चैतद्विधः - प्रजा राज्ञ आज्ञां तावत्पालयन्ति यावद्राजा जनान् जनानां धनादिकञ्च रक्षतीति । इत्थं लाकमहोदयेन राजानं प्रति प्रजानां विरोधावसरोऽपि दर्शितः । योऽधिकारो हाब्समहाभागेन न तु दत्तः[2] ।

रूसो महाभागस्य मतम् -

हाब्सलाकाभ्यां यन्मतमुपस्थापितमुपरि तयोर्द्वयोर्मतयोः समन्वयो

- - - - - - - - - - - - - - - - - -

(१) हिन्दुराज्यशास्त्रम् पृ० ३७ । (२) हिन्दुराज्यशास्त्रम् पृ० ३८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

दृश्यतेऽस्य मते प्रकटितः । प्रारम्भिके युगे प्राकृतिक्यावस्था शान्तिपूर्णा, अस्यामवस्थायां मानवाः स्वतन्त्राः सन्तुष्टाश्चासन्, मनुष्यजीवनं सुखमय-मासीदर्थात्तयुगमेवानुपमम्, तस्मात्तदानीन्तनी सामाजिकी व्यवस्था श्लाघनीया । परन्तु कालक्रमेण तद्युगं समाप्तम्, युगप्रभावाद्यत्फलमुपलब्धं तस्मादशेषा मानवा वञ्चिताः, सभ्यता नैतिकता च पतनंगता, पारस्परिकः सहयोगः प्रायः समाप्तः, जनसमाजेऽसमानताया विरोधस्य च भावः प्रस्फुटितः, कारणेनानेन जनजीवनं कष्टमयम्, अतो मानवाः प्राकृतिकमधिकारं त्यक्त्वा नागरिकमधिकारमिच्छन्ति प्रभुसत्तां च कल्पयन्ति, तस्यामेव सत्तायां व्यक्तिगतां सर्वां स्वतन्त्रतां स्थापयन्ति, तस्या स्वाधीनतां च स्वीकुर्वन्ति । इत्थमेव राज्ञ उत्पत्तिरभूदित्याह रूसो महाशयः । इत्थं पाश्चात्या विद्वांसोऽपि ईषत्तुशैली परिवर्तनं विधाय पौरस्त्यानामेव मतं स्वीकुर्वन्ति[१] ।

राज्ञ उत्पत्तेराधुनिकः सिद्धान्तः

अस्माकं जनसमाजे प्राचीनकालादध्यावद्राजनीतिज्ञानां विदुषां न्यूनता न कदाप्यनुभूता । यस्मिन्यस्मिन्युगे येषां येषां विदुषां समुदयोऽभूत्, तैः सर्वैं राजनीतौ स्वं स्वं मतमस्ति प्रतिपादितम् । आधुनिके युगेऽपि राजनीति-विषये सन्त्यनेके विचारकाः समुदिताः, तेऽपि प्राचीनानामाचार्याणां

(१) हिन्दुराज्यशास्त्रम् पृ० ३६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

मताधार एव स्वं स्वं विचारं प्रस्तुवन्ति । अर्वाचीनेषु विद्वत्स्वल्तेकर एकः प्रसिद्धः । राजनीतेर्बहवो विचारका अस्यैव मतानुगता दृश्यन्ते । राजोत्पत्ति-विषयेऽल्तेकरमतमस्त्येतद्विधम् -

प्राचीनयुगे आर्यजातयो बहुसदस्ययुते परिवारे निवसन्तिस्म, अथादार्याणां परिवारसंस्थाऽधिकतरा, होमरमहाशयमते आर्याणामेकस्मिन् परिवारे त्रिशताधिका जनाः संमिलिता भवन्तिस्म । एतद्विधे परिवारेऽपि मुख्यस्त्वेक एव, स एव तेषां सर्वेषां परिवारसदस्यानां भरणपोषणसंरक्षणादिसर्वविधकार्यसाधकः । पुनः स्वेषां परिवाराणां विक्रयस्य दण्डस्य वधस्य चाधिकारोऽपि तस्मिन्नेव । वैदिकसूत्रानुसारमेतद्विधोऽयमधिकारस्तु विशेषतः पितरि एवान्तर्हितः । इत्थं प्राचीनकाले आर्यसमाजे परिवारमुख्यस्य पदं राजतुल्यमासीत् । एतद्विधा कुटुम्बसंस्था चीरकालं यावत्प्रचलिता । किन्तु अस्यां संस्थायां स्थायित्वं नोपलब्धम्, क्रमशः संस्थैषा ग्रामसंस्थायां परिणता, आर्यपरिवाराणां वृद्धिबाहुल्यात् । यदा ग्रामसंस्था समुदिता तदा तस्यामेको मुख्योऽपि संस्थापितः, ग्राममुख्यो व्यवस्थितत्वात्परिवारमुख्यैश्च स्वान्तर्हितं सर्वमधिकारं तस्मिन्नेव ग्रामाधिपे प्रत्यर्पणं विहितम् । अधिकारमवाप्य ग्रामशासनञ्च सञ्चालितं तेन । पुनर्ग्रामसंस्थापि शनैः शनैर्विकसिता, क्रमेणानेन ग्रामान्मण्डलस्य (विशोः) मण्डलाज्जनसंस्थाया विकासोऽभूत् । अस्यामप्येकोऽधिपतिः संस्थापितः, स एव जनपतिरिति नाम्ना प्रसिद्धः, जनपतिरेव राजा । इत्थमेव राज्ञ उत्पत्तिरभूदित्याहुरर्वाचीना राजनीतिज्ञाः । आधुनिकानां राज-

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

शास्त्रकाराणामस्य सिद्धान्तस्यानुशीलनाद्राजोत्पत्तेर्मूलाधारस्तु संयुक्तपरिवार एव सिद्धः । राज्यस्य वर्तमानं स्वरूपमस्यैव परिवारस्य विकासपरिणाम एव । संयुक्तपरिवारे यो मुख्यः स पूजनीयः, अर्थात्परिवारसदस्या मुख्यस्यादरं सम्मानं पूजनञ्च कुर्वन्तिस्म । ग्रामसंस्थायां जनसंस्थायामपि प्रवृत्तिरेषा विकसिता । जनसंस्थाया ग्रामसंस्थाया वाधिपतिः पितृतुल्य एव, सिद्धान्तोऽयं शास्त्रप्रयोजकैः सर्वथा समर्थितः । राजा पालनपोषणसंरक्षणादिषु पितृसमानत्वादस्य राज्ये प्रजा निर्भयेन निवसन्ति विचरन्ति च यथा पितृगृहे पुत्रादयः । अतः पितृपुत्रयोर्यादृशः सम्बन्धः स्यात् तादृश एव सम्बन्धो राज्ञः प्रजानाञ्चेति[१] ।

निर्वाचनप्रक्रियया राज्ञ उत्पत्तिः

सर्वाः प्रजा विनाशाद्रक्षति राजा, सोऽयं क्षत्रिय एव न तु ब्राह्मणादयः । प्रजारक्षणसमर्थत्वात् क्षत्रियशब्दो लोके प्रसिद्धः । तथा च महाभारते -

ब्राह्मणानां क्षतत्राणात् ततः क्षत्रिय उच्यते[२] ।

महाकविः कालिदासोऽपि -

क्षतात्किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः[३] ।

- - - - - - - - - - - - - - - - -

(१) हिन्दुराज्यशास्त्रम् पृ० ४१ । (२) शान्ति० ५९।१२६ ।

(३) रघुवंशः २।५३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

राजनि विद्यते राजत्वममोघा राजशक्तिश्च भवत्यन्तर्हिता । शक्तिसम्पन्नत्वाद्राजा प्रजारक्षणे पालने च समर्थः । सामर्थ्यमेतत्प्रजाद्वारैवोपलब्धम् । एतद्विधशक्तियुतस्य राज्ञः समुत्पादनमपि प्रजाभिरेव विहितमर्थाद्राजा भवति लोकोत्पादितो लोकनिर्वाचितो वा । वेदेऽपि राज्ञो निर्वाचनस्यैव सङ्केतः प्राप्यते । यन्निर्वाचनं प्रजाभिरेव सम्पन्नं निर्वाचनकाले ताभिरुक्तञ्च - राज्याय वयं भवन्तं निर्वाचनं कुर्मः, एता दिशः पञ्चदेव्यश्चापि भवन्तमेवेच्छन्ति -

'त्वां विशो वृणतां राज्याय त्वामिमाः प्रदिशः पञ्चदेवीः'[1]

वैदिके युगे भद्रजनाः, सूताः, ग्रामाधिपतयः, दक्षारथकाराः कुशलधातुनिर्मातारश्चैते सर्वे राजकर्तारः समेत्य राज्ञो निर्वाचनं कुर्वन्तिस्म, ततो राजचिन्हस्वरूपं पर्णं पालाशमणिं वा राज्ञे प्रयच्छन्तिस्म । दत्तं राजचिन्हमादाय राजा स्वाशयं च प्रकथयति - राजपदप्रदातारश्चैते सदैव मदनुकूलाः सहयोगप्रदानतत्परा वा भवेयुरिति ।

ये धीवानो रथकाराः कर्मकारा ये मनीषिणः ।
उपस्तीन् पर्ण मह्यं त्वं सर्वान् कृण्वभितो जनान् ।।

ये राजानो राजकृतः सूता ग्रामण्यश्च ये ।
उपस्तीन् पर्ण मह्यं त्वं सर्वान् कृण्वभितो जनान्[2] ।।

तैत्तिरीयब्राह्मणे राजकर्तारः (रत्निन्) इतिशब्देनोच्यन्ते, ते चैकादशः -
(१) सेनापतिः, (२) राजपुरोहितः, (३) युवराजः, (४) राजमहिषी,

- - - - - - - - - - - - - - - - - - - -

(१) अ० वे० ३।४।२ । (२) अ० वे० ३।५।६-७, ऋग्वेदः १०।१७३

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

(५) सूत:, (६) ग्रामणी:, (७) क्षत्ता, (८) संग्रहीता, (९) भागदुघ:, (१०) अक्षावाप:, (११) गोविकर्तन: । एते राज्ञे राज्यं प्रयच्छन्ति -

"रत्निनामेतानि हवींषि भवन्ति, एते वै राष्ट्रस्य प्रदातार: ।"[1]

इत्थं वैदिककालेऽपि राजानो जननिर्वाचिता एव दृश्यन्ते, अर्थाज्जनमताधार एव राजपदं राज्यं चावाप्नुवन्तिस्म । अतस्तदानीन्तनकालादेव राजपदप्रदानकाले प्रजानां महत्वपूर्णा भूमिका विद्यते ।

रामायणकाले प्रजाभिर्वारद्वयं राज्ञो निर्वाचने स्वाधिकारप्रयोगावसर: प्राप्त: - रामाय युवराजपदप्रदानकाले, राज्ञो दशरथस्य मरणानन्तरमयोध्याया राज्ञो व्यवस्थापनकाले च । अनयोर्द्वयोरवस्थयो: प्रजाया: शक्तेरधिकारस्य च समुचित: परिचय: प्राप्यते । युवराजपदप्रदानार्थं राज्ञा दशरथेन नानानगरस्थानां सामन्तानां प्रजानामुच्चपदस्थानामधिकारिणामन्येषां भूपतीनाञ्च परिषदमामन्त्र्योक्तञ्च - वार्धक्येन क्लेशितत्वादहं राज्यभाराद् विश्राममिच्छामि, अतोऽनया सभया युवराजव्यवस्था विधातव्याऽर्थादस्य व्यवस्थापनाय स्वाभिमतं दीयतामिति । राज्ञो दशरथस्य तादृशं वचनं श्रुत्वैकत्रितेन जनसमाजेनैकमत्येन भरतं तिरस्कृत्य भगवन्तं श्रीरामं प्रति स्वाभिमतं प्रतिपादितम् । तथा च -

अनेकवर्षसाहस्रो वृद्धस्त्वमसि पार्थिव ।
स रामं युवराजानमभिषिञ्चस्व पार्थिवम्[2] ।।

तत: प्रभृति राजपदमानुवंशिकं जातम्, प्रजानामभिमतानुसारं राजपदप्राप्तिपरम्परा

- - - - - - - - - - - - - - - - - - -

(१) तै० ब्रा० १।७।३ (ध० शा० इ० भा० २, १९१ पृष्ठे उद्धृतमस्त्येतद्वचनम्)।
(२) रामायणम् २।२।२१ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

च प्रचालिता । प्रजानामधिकारप्रयोगस्यैकोऽयमवसरः ।

प्रजानामपरोऽवसरः - यदा राज्ञो दशरथस्य देहावसानं जातं तदा सर्वाः प्रजाः शोकसन्तप्ताः, राजसिंहासनं शून्यम्, तदा किंकर्तव्यविमूढा मार्कण्डेयमौद्गल्यवामदेवकश्यपकात्यायनगौतमादयो महायशो मुनयो मन्त्रिभिः सह राजपुरोहितवसिष्ठसन्निधौ गत्वा विनिवेदयन्ति महाभाग ! महाराजो दशरथः पुत्रशोकेन पञ्चत्वं प्राप्तः, राज्यमराजकं जातम्, अराजके राज्ये मत्स्या इव जनाः परस्परं भक्षयन्ति, धनधर्मादिकं सर्वं विनश्यति, पत्निपुत्रादयोऽपि भवन्ति पराधीनाः, अत एतादृश्यां परिस्थितौ शीघ्रमेव राज्यं सनाथं कर्तव्यम् । किन्तु संप्रत्ययोध्यायां न केषाञ्चिदपि राजकुमाराणामवस्थितिः, रामलक्ष्मणौ वनं गतवन्तौ भरतशत्रुघ्नौ केकयदेशे स्तः, तथापीक्ष्वाकुकुलोद्भवं कञ्चिदपि कुमारं राजसिंहासने विराजमानं विधेहीति । तथैव प्रोक्तं रामायणस्यायोध्याकाण्डे -

एकांस्थश्च महाराजो रामश्चारण्यमाश्रितः ।
- - - - - - - - - - - - - - - - - -
इक्ष्वाकूणामिहाद्यैव कश्चिद्राजा विधीयताम् ।
अराजकं हि नो राष्ट्रं विनाशं समवाप्नुयात् ।।[१]

राजर्षिः परीक्षित् तक्षकभक्षित इति श्रुत्वा सर्वतो महान् हाहाकारोऽभूत्, सर्वे विस्मितावस्थां प्राप्ताः, राज्यमनीश्वरं जातम्, अराजकराज्यदशां जानन्तो विबुधा नराश्च राज्ञो व्यवस्थापनोद्देश्यैनैकत्रिता जाता, समवेतजन-

- - - - - - - - - - - - - - - - - -

(१) रामायणम् २।६७।६-८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

समाजनिर्णयेन परीक्षितात्मजो जनमेजयो राजपदे विराजितः । अत्रापि राज्ञो निर्वाचनं प्रजाभिरेव सम्पादितम् । एतद्विधान्यनेकान्युदाहरणरूपाणि प्रमाणानि शास्त्रोपलब्धानि सन्ति, तस्माद्राज्ञ उत्पत्तिस्तु सर्वथा निर्वाचन-प्रक्रिययैव सिद्धा ।

यत्र परिस्थितिवशाद्राजसिंहासनं रिक्तं भवेत्तदा प्रजाजनाः स्वाधि-ष्ठितमधिकारं प्रयुज्य कञ्चिद्राजोचितगुणसम्पन्नं पुरुषं निर्वाचनप्रक्रियया राजसिंहासने स्थापयन्ति । विषयेऽस्मिन्नैतिहासिकान्युदाहरणान्यपि समुपलभ्यन्ते । तान्येतद्विधानि - कस्मिंश्चित्समये सुराष्ट्रवासिनोऽनीश्वरावस्थां प्राप्तास्तदा राज्ञो महत्त्वज्ञैस्तैः क्षत्रपो राजा रुद्रदामनो राजपदे निर्वाचितः । पालवंशसंस्थापको गोपालोऽपि जननिर्वाचित एव । अस्य निर्वाचनकाले विशेषतोऽमात्यानां ब्राह्मणानाञ्चासीत्प्रमुखा भूमिका । राज्ञो राज्यवर्धनस्य मरणानन्तरं मुख्यमन्त्रिणा भण्डिना मन्त्रिमण्डलसभाऽऽमन्त्रिता । तस्यां मन्त्रिणो न्याया-धिकारिणोऽन्ये बहव उच्चपदाधिकारिणश्चासन्समुपस्थिताः । विशिष्टजन-संमिलितया तया राजपदे हर्षवर्धनस्य निर्वाचनं विहितम्[१] । इत्थं राजशास्त्रप्रवर्तका राज्ञ उद्गमस्य विकासस्य च क्रमं दर्शयन्ति । निर्दिष्टक्रमानुसारं राजानो जन-निर्वाचिता एव दृश्यन्ते । निर्वाचितेन राज्ञापि जनभावनानुकूलमेव राज्यं कर्तव्य-मित्यप्यस्या निर्वाचनप्रक्रियाया अनुशीलनाद् भवति स्पष्टबोधः । किन्तु शास्त्रीया-भिषेकादि गुणयुतेनैव प्रजापालनं कर्तव्यमित्युक्तत्वात्प्रथमं राजोचितगुणोपार्जनं कर्तव्यं राज्ञा ।

---

(१) धर्मशास्त्र का इतिहास भाग - २, पृ० ५६१ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

राज्याभिषेकः -

राजा जननिर्वाचितः, जनसम्मतिमवाप्यैव राजपदं राज्यं चाप्नोति । परन्तु राज्ययोगमात्रेण राजत्वं नोत्पद्यते राजनि । राजत्वेन विना राज्यशासने प्रजापालने चनाधिकारः । अतो राजपद प्राप्त्यनन्तरं राज्ञा राजत्वोत्पत्ते रुपायोऽप्यवश्यं चिन्तनीयः । उपायस्तु राज्याभिषेकएवेत्याहुर्मुनयः । तस्माद्राजत्वप्राप्त्यर्थं राज्ञा राज्याभिषेकः संपादनीयः । शासनाधिकारस्तु विधिवदभिषिक्तस्यैवेत्याहमनुरपि --

ब्राह्मं प्राप्तेन संस्कारं क्षत्रियेण यथाविधिः ।
सर्वस्यास्य यथान्यायं कर्तव्यं परिरक्षणम्[1] ॥

ब्राह्मसंस्कारो ब्राह्मणैः कृतोऽभिषेकः। पूर्वराजनि मृतेसत्यथवा जीवत्यपि कारणान्तराद्राजपदविरिक्ते सत्यन्योऽभिषिच्यते । अभिषेकस्य कृते संपाद्यास्त्रयोयज्ञाः श्रुतिसम्मताः । तैर्विना न कोऽपि राजाराजत्वमाप्नोति । ते चैते -- (१) राजसूयः, (२) वाजपेयोऽश्वमेधो वा (३) सर्वमेधः । राजसूयो-राजनिराजोचितं गुणमर्याद्राजत्वमुत्पादयति । वाजपेयेन राजाराजर्षिपदं धर्माधिकारिपदं वाऽऽप्नोति । सर्वमेधस्त्वखिलजगतः शासनाधिकारं प्रयच्छति राज्ञे, अर्थात्सम्राट्पदमिच्छन्तो राजानो यज्ञमेनं सम्पादयन्ति । अभिषिक्तस्यैवाधिकारोऽस्यसम्पादने न त्वनभिषिक्तस्य[2] । यज्ञस्यास्य विधानादनेके राजभिः शासित-

---

(१) मनुस्मृतिः ७।२ । (२) शतपथब्राह्मणम् १३।७।१ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

मनेकखण्डखण्डितं वा भारतवर्षं सार्वभौमियुतंस्यादित्येतद्विषोऽत्युदाचविचार: शास्त्रकारेष्वपि प्रस्फुटित:[1] । परन्तु राज्याभिषेकस्तु राजसूयान्तर्गत एव "राज्ञ एव राजसूयम् राजा वै राजसूयेनेष्ट्वा भवति" इत्युक्तत्वाद्राज्ञ: कृत एव राजसूयविधानम्[2] । यस्यानुष्ठानाद्राजत्वोत्पत्ति: । वाजपेयस्तु राजसूयस्यैवपूरक: । वाजपेयोराजसूयस्य पूर्वाङ्गत्वाद्राजसूयात्प्रागेवानुष्ठीयते । विशेषतो राजसूयस्य त्रीण्यङ्गानि प्रसिद्धानि । तेषु प्रथमं यज्ञादिकम् द्वितीयमङ्गमभिषेक एव, तृतीयमुत्तराङ्गम् । अङ्गेष्वेतेष्वभिषेक एवाधिकं महत्वं प्रतिपादयत्यस्माद्राज्याधिकारोत्पत्तिर्निश्चितत्वात् । अयमपि शास्त्रोदितकाल एवानुष्ठेय: "प्राप्ते चाभिषेक काले आत्मानमभिषेचयेत्"[3] इत्युक्तत्वात् ।

अभिषेककाल: -

वैदिकेनाभिषेकाख्येन विशिष्टकर्मणा राजशब्दवाच्यपुरुषतत्संस्कारविशेषो राजाभिषेकशब्देनोच्यते । तत्र कालशुद्धि: सर्वथा विचारणीया । तमेव कालमाह --

नाभिषेच्यो नृपश्चैत्रे नाधिमासे च भार्गव ।
न प्रसुप्ते तथा विष्णौ विशेषात्प्रावृषि द्विज ।।
न च भौमदिने राम चतुर्थ्यां च तथैव च ।
नवम्यां नाभिषेक्तव्यश्चतुर्दश्यां च भार्गव ।।
ध्रुवाणि वैष्णवं शाक्रं दास्रपुष्यौ तथैव च ।
नक्षत्राणि प्रशस्यन्ते भूमिपालाभिषेचने[4] ।।

---

(१) मध्यकौ० ठनधिकार प्रकरणम् ५।१।४२ । (२) शतपथब्रा० ५।१।१।१२ (हिं०रा०त०ख० २ पृ० १२ उद्धृतम्) । (३) नी०म० पृ० ८ । (४) नी०म०पृ०२

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

मुहूर्तचिन्तामणावपि --

राजाभिषेकः शुभ उत्तरायणे गुर्विन्दुशुक्रैरुदितैर्बलान्वितैः ।
भौमार्कलग्नेशदशेशजन्मपैर्नो चैत्ररिक्तारनिशामलिम्लुचे ॥
शाक्रश्रवःक्षिप्रमृदुध्रुवोडुभिः शीर्षोदये वोपचये शुभे तनौ[1] ।
पापैस्त्रिषष्ठायगतैः शुभग्रहैः केन्द्रत्रिकोणायधनत्रिसंस्थितैः ॥

अभिषेकप्रदातॄणां पूजा -

अभिषेकस्याङ्गान्यनेकानि कृत्यानि सन्ति प्रदर्शितानि । तेष्वभिषेकदातृपूजाचैकं प्रमुखं कृत्यम् । अभिषेकग्रहणात्प्राग्राजाभिषेकप्रदातॄणां (राजपददातॄणां) पूजां तेभ्योहविर्दानञ्च कुर्यात् । हविर्होतृष्वेकादशरत्निनः प्रसिद्धाः । ये राजपदप्रदातृष्वपि परिगणिताः, प्रसङ्गाच्च एवात्रापि विविच्यन्ते[2] - (१) सेनानीः - सेनायाः प्रधानाधिपतिः, (२) पुरोहितः - शास्त्रज्ञ आचारनिष्ठश्च ब्राह्मणः, (३) राजन्यः - युवराजः (यो राज्यस्योत्तराधिकारमाप्नोति), (४) महिषी - राजपत्नी, सा राज्ञोऽर्धाङ्गिनी । राजा यदि पत्नीहीनो भवेत्तदा भवत्यर्धाङ्गहीनः, अङ्गहीनराज्ञो राजकीयेष्वभिषेकादिधार्मिककृत्येषु नाधिकारः, तस्मादभिषेकादौ पत्न्याः सहभागित्वं सर्वथापेक्षितम्, अर्थाद् वामभागस्थया पत्न्यासहाभिषेकग्रहणं कुर्याद्राजा । एतद्विवृतं रामायणेऽपि --

---

(१) मुहूर्तचिन्तामणिः, राजाभिषेकप्रकरणम् ।

(२) शतपथब्राह्मणम् ४।३।१ (हिन्दूराज्यतन्त्रम् २ भाग १३ पृष्ठोद्धृतम्) ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

रामं रत्नमये पीठे ससीतं सन्यवेशयत्[1] ।

तथा च महाभारतेऽपि --

उपवेश्य महात्मानं कृष्णां च द्रुपदात्मजाम्[2] ।

वाजपेयाश्वमेधादियज्ञेषु तु परिवृत्ता वावृता: पत्न्यश्चापि भवन्ति सहभागिन्य:, न त्वन्येषु धार्मिककृत्येषु त्वेतामध्यमाधापत्न्य: सम्मिलिता । "माहिष्या परिवृत्त्या च वावातामपरां तथा[3]" "परिवृक्त्या राज्ञो मध्यमपत्न्या[4]" इत्थमभिषेके पत्न्यपि भवति पूजिता ।

(५) सूत: - राजप्रासादे राज्ञो वंशावलीं विरुदावलीं (विरुदं) वा श्रावयति । कौटिल्येनास्य वार्षिकं वेतनमपि सूचितं यत् १००० राजतं पणमस्ति । पौराणिककाले तु सूत: पुराणस्य कथाया वा वाचक आसीत् । राज्ञोहर्षवर्धनस्य राज्यकालेऽपि सूतस्य चर्चोपलब्धा, तदार्य राज्योद्भवं शुभाशुभं सर्वमेव विवरणं लिखति स्म । खारवेलशिलालेखे सूतो राज्योत्पन्नं वार्षिकं घटनावृत्तान्तं पृथक् पृथक् लिखति, इत्युल्लेखोऽस्ति । यस्मिन्काले यत्किमपि कार्यसाधको भवेत्थापि राज्याभिषेके तु पूजनीय एव ।

(६) ग्रामणी: - ग्रामाधिपति:, ग्राममुख्यो वा । सोऽयं विशेषतो वैश्य एव "मारुत: सप्तकपालो वैश्यस्य ग्रामण्यो गृहे[5]" इत्युक्तत्वात् ।

---

(१) रामायणम् ६।१२८।६० । (२) शान्ति० ४०।१४ ।

(३) रामायणम् १।१४।३५ ।

(४) शतपथब्राह्मणम् १३।५।२।५-८ (हिन्दूराजतन्त्रम् २ भाग १४ पृष्ठोद्धृतम्)

(५) शुक्लयजुर्वेदमैत्रायणीसंहिता २।६।५(हिन्दूराजतन्त्रम् २ भा० १६ पृष्ठोद्धृतम्)

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

(७) क्षत्ता - क्षत्रियजात्युत्पन्नो विशिष्टपुरुषः ।

(८) संग्रहीता - राजकोषाध्यक्षः । यः कोश ग्राह्यं करादिकं सङ्कलयति । कौटिल्यस्त्वयं सन्निधाता इत्याह । तैत्तिरीयसंहितायां "संग्रहितुः - - - - रश्मिग्राहेणः", इत्युल्लेखोऽस्ति । एष व्याघ्रनियन्त्रो ग्राहको वेत्याहुः केचित् । कुत्रचिदयं राजुकेन सह सादृश्यं जनयति ।

(९) भागदुहः - करविभागाध्यक्षः । यो भागग्रहणं करोति । भागइतिकथनेन धान्यादीनां षष्ठांशादिकं गृह्यते । समाहर्तेति शब्देनोच्चारितोऽयं कौटलीयार्थशास्त्रे ।

(१०) अक्षावापः - सर्वकारतोद्यूतादिक्रीडानियन्त्रण व्यवस्था विधीयते, पुनः क्रीडोपलब्धफलांश ग्रहणाञ्च करोति सर्वकारः, एतदर्थमेको-ऽधिकारी नियुज्यते सत्वक्षावापएवेत्याहुर्टीकाकाराः । नायं द्यूतविभागाध्यक्षः, राज्येद्यूतविभागस्तु न केषाञ्चिदपि दृष्टिपथमायाति, तस्मादेषोऽक्षपटलाख्योऽधिकारीत्याहकौटिल्यः । राज्यस्यायव्ययनिरीक्षणार्थं व्यवस्थापनार्थञ्चैकोऽधिकारी व्यवस्थाप्यते, सोऽयं तदेव कार्यं संपादयतीति ।

(११) गोविकर्ता - वनविभागाध्यक्षः । वनस्य वन्यजन्तूनाञ्च संरक्षणसंवर्धनादिकमस्य कर्तव्यम् । मेगास्थिनीजेन त्वेष वन्यानां व्याघ्रादि हिंस्रकजन्तूनां शुकादिबीजनाशकानां विहङ्गमानां नियन्त्रणं सत्यावश्यके व्यापादनञ्च कृत्वा जनानां जनपालितगोमहिषादिपशूनां धान्याधन्नानाञ्च संरक्षणं करोतीति, इत्युक्तम् ।

CC-0 Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अभिषेकारश्चैते वैदिककाले मणिं च प्रयच्छन्तिस्म राज्ञे, तस्मान्मणिदातेति नाम्नाऽऽसन् विख्याताः । ब्राह्मणकाले त्वेते रत्नीति नाम्ना प्रसिद्धाः । रामायणकाले तु राजकर्तेति नाम्ना विश्रुताः 'समेत्य राजकर्तारो भरतं वाक्यमब्रुवन्' [१] । तत एतैरेव राज्यस्योच्चपदं जातिविशेषस्य वर्गविशेषस्य वा प्रतिनिधित्वं च गृहीतम् । पुरोहितः सर्वथा ब्राह्मण एव तस्मात्तेनाशेषाणां ब्राह्मणजातानां प्रतिनिधित्वं स्वीकृतम् । राजन्येन क्षत्रियाणाम्, ग्रामणी-वैश्य एव तस्मात्तेन वैश्यानाम्, रथकारेण कर्मकारेण वा शूद्राणां प्रतिनिधित्वं स्वीकृतम् । अत्र वर्गाणां प्रतिनिधित्वमपि वर्णैरिव स्वीकृतं दृश्यते । कस्मिंश्चित्समये सेनापतिः पुरोहितः संग्रहीता भागदुघोऽक्षावाप गोविकर्ता चैते प्रतिनिधयः सम्मानिते मन्त्रिपदेऽप्यासन् संस्थापिताः ।

राजा जननिर्वाचितस्तस्मान्निर्वाचनसमये (अभिषेककाले) जनानां (राजपदप्रदातृणां) सम्मानं संपूजनं सर्वथा कर्तव्यं राज्ञा, शास्त्रीयोऽयं नियमः । किन्तूत्तरोत्तरं जनानां संख्या वृद्धिंगता, तस्मादभिषेके सर्वेषां मतादानं सर्वेषां समादरणञ्चासंभवम्, अतो वाध्यत्वेन प्रतिनिधेः सिद्धान्तोऽङ्गीकृतः । तदनुसारं तेषामेवार्चनं विहितम् । पूजनक्रमे वैश्यशूद्राणां प्रतिनिधयोऽपि संपूजिताः ।

'ग्रामण्यो गृहान् परेत्य मारुतं सप्तकपालं पुरोडाशं निर्वपति विशो वै मरुतो वैश्यो वै ग्रामणीस्तस्मान् मारुतो भवत्येतद्वाऽस्यैकं रत्नं यद् ग्रामणीस्तस्मादेवैतेन सूयते तं स्वमनपक्रमिणं कुरुते' [२] ।

---

(१) रामायणम् २।७९।१ । (२) शतपथब्रा० ५।३।१।६ (हि० रा० त० २भा० १७ पृष्ठोद्धृतमेतत्) ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

महाराजेन युधिष्ठिरेणापि स्वस्य राज्याभिषेककाले जनप्रतिनिधीनां पूजा विहिता 'अर्चयित्वा समासदः'[1] तत्र ब्राह्मणादीनां सर्वेषां वर्णानां प्रतिनिधयो निमन्त्रिता आसन् ।

आमन्त्रयध्वं राष्ट्रेषु ब्राह्मणान् भूमिपानथ ।
विशश्च मान्यान् शूद्रांश्च सर्वानानयतेति च ॥[2]

भगवतो श्रीरामचन्द्रस्य प्रस्तावितयौवराज्याभिषेककाले तु तत्कालकृतव्यवस्थानुसारमृषिभिर्वृद्धाभ्यामात्यैर्भिरन्यैर्ब्राह्मणैश्च सह पौरजानपदानां विविधव्यवसायरतानामापणिकानाञ्च समुदायोऽप्यासीत्समुपस्थितः ।

उदतिष्ठत रामस्य समग्रमभिषेचनम् ।
पौरजानपदाश्चापि नैगमश्च कृताञ्जलिः ॥[3]

उदतिष्ठत उपस्थितमित्यर्थः, गोविन्दराजकृतोऽयमर्थः । रामस्य राज्याभिषेकेऽभिषेकदातृषु कन्याश्चासन् संमिलिता ।

ऋत्विग्भिर्ब्राह्मणैः पूर्वं कन्याभिर्मन्त्रिभिस्तथा ।
योधैश्चैवाभ्यषिञ्चंस्ते संप्रहृष्टैः सनैगमैः ॥[4]

इत्थं स्त्रीजातीनामपि प्रतिनिधित्वमङ्गीकृतं महामुनिना वाल्मीकिना स्त्रीजातीष्वप्यविवाहितायाः कन्याया एवाधिकारः सुरक्षितः । अन्यैः शास्त्रप्रयोजकैस्त्वभिषेके स्त्रीजातीनां स्थानं न तु स्वीकृतम् । इत्थमुपरि विवेचितात्राज-

---

(१) सभाप० १३।४, २६ ।   (२) सभाप० ३३।४१-४२ ।
(३) रामायणम् २।१४।५२ ।   (४) रामायणम् ६।१२८।६३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

कर्तृन्स्वस्याभिषेककाले संपूजयति राजा, पूजितैरेतैरेव भवत्यभिषिक्तोऽपि। अभिषेकप्रदाने पूर्णाधिकारत्वादेतेषामस्तित्वं सर्वथा स्वतन्त्रं सततमक्षुण्णं च विद्यते। वस्तुतस्तु वैदिककालिकसमितेरङ्गविशेषा एते, अथादेतेषामुत्पत्तिस्थानन्तु वेदोक्ता समितिरेव सिद्धा। पुनः स्वयोऽभिषिक्तस्तस्यैवानुज्ञानुमोदका अनुगताश्च भवन्ति तेऽपि। इत्थं राज्ञः प्रजानाञ्च परस्परं सामञ्जस्यं सदैव विद्यते।

अभिषेककाले आकाशादीनां पूजा

अनश्वरराज्यकामो राजाऽऽकाशादीनां वरुणादिदेवानाञ्च पूजनं तेभ्यो बल्यर्पणञ्च कुर्यादभिषेककाले। यतः पूजितास्ते स्वान्तर्हितं गुणांशं राज्ञेऽपि प्रयच्छन्ति। राजोचितं गुणमवाप्य राजापि चीरकालं यावद्राजश्रियमाप्नोत्यथाद्राज्ये तस्यावस्थितिः स्थिरतां याति। पूजनीयेष्वाकाशः सूर्यो वा पृथ्वी, पर्वताः, जाह्नवेते मुख्याः। एतेष्वभेद्यत्वमच्छेद्यत्वञ्च विद्यते, तस्मादेते स्थिररूपाश्च सन्ति। यथैते सन्ति नित्या निश्चलाश्च तथा भवति प्रजारञ्जको राजापि। पुनः, वरुणः, इन्द्रः, अग्निः, बृहस्पतिश्चैतेऽपि सन्ति शाश्वता अमोघशक्तिसमेताश्च, राज्ञः कृते स्थिरं राष्ट्रं कल्पयन्ति। तथा चाथर्ववेदे -

ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवं विश्वमिदं जगत्[१]।
ध्रुवासः पर्वता इमे ध्रुवो राजा विशामयम्।।

- - - - - - - - - - - - - - - - -

(१) अथर्ववेदः ६।८८।१ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

ध्रुवं ते राजा वरुणो ध्रुवं देवो बृहस्पतिः ।
ध्रुवं त इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवम् ॥[1]

एतेषां गुणान्गृहीत्वा स्वराज्यं स्वासनञ्च स्थिरं कारयेद्राजा । एतेभ्य आकाशादिभ्योऽधोनिर्दिष्टा गुणा उपलभ्यन्ते -

(१) द्यौः - आकाशः सूर्यो वा, एतौ द्वाविव स्वयमेव प्रकाशवन्तौस्तः, एतयोर्यद्विधं तेज उपलब्धं तद्राज्ञाप्युपार्जनीयम् । तस्मात्तादृशो राजा स्थिरतामाप्नोति ।

(२) पृथ्वी - अस्यां क्षमाशीलता सहनशीलता धारणपोषणादयोऽनेकेऽप्युक्ता गुणा भवन्त्यन्तर्हिताः, ते सर्वे राज्ञः कृतेऽप्यपेक्षिताः । पृथिव्यामन्तर्हिता गुणा राजन्यपि सन्ति चेत्तादृशो राजा ध्रुवः ।

(३) पर्वताः - ध्रुवाः सन्ति स्वं स्वं स्थानं न कदापि त्यजन्ति यथा तथैव युद्धादौ राज्ञापि स्वासनं स्थानं वा न तु त्याज्यम् ।

(४) जगत् - स्वां मर्यादामनुशासनञ्च न त्यजति यथा तथैव राज्ञापि तद्विधो गुणविशेषो ग्रहीतव्यः ।

(५) विशां राजा ध्रुवः - प्रजारञ्जको राजा परैरप्यमर्दनीयः, तस्मात् स्थायित्वञ्चाप्नोति ।

प्रजारञ्जनाद्राजशब्दः सार्थकः, अतः प्रजारञ्जने सामर्थ्योत्पादनं यत्नतः कर्तव्यं राज्ञा । गुणेषु सर्वश्रेष्ठोऽयं गुणः, एतद्विधगुणसम्पन्नो राजा सर्वोत्तमः, एतादृशस्य राज्ञः कृत इन्द्रादयो देवा अपि सततं सहयोगं शक्तिप्रदानञ्च

- - - - - - - - - - - - - - - - - - -

(१) अथर्ववेदः ६।८८।२ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

कुर्वन्ति । शक्तिदायकेषु (१) बृहस्पतिः, (२) इन्द्रः (३) वरुणश्चैते प्रसिद्धाः । सर्वविधज्ञानवर्चोब्राह्मबलादिप्राप्त्यर्थं बृहस्पतेः, शूरतावीरतादिसर्वोत्तमक्षात्रियबल-प्राप्त्यर्थमिन्द्रस्य, सर्वश्रेष्ठतायै वरुणस्य पूजा विधेया । विशेषतोऽभिषेककाले वरुणपूजात्वपरिहार्या, यतः स कर्मपतिर्धर्मपतिश्च, तस्य पूजनाद्राजापि धर्मकर्म-योर्नियमस्य च रक्षणे समर्थः, अर्थाद्वरुणान्तर्हितो गुणो राजन्यप्युत्पद्यते । यो धर्मं रक्षति स एव सर्वश्रेष्ठः, यस्मिन्राज्ये धर्मो रक्षितस्तद्राज्यं सर्वोत्तमम्, तस्याधिकारी च धर्मरक्षक एव । तथैव प्रोक्तं शतपथब्राह्मणे -

'अथ वरुणाय धर्मपतये, वारुणं यवमयं चरुं निर्वपति तदेनं वरुण एव ---- तस्माद् वरुणाय धर्मपतये ।'[1]

पूजितानामेतेषामनुमतिश्चापेक्षिता, ययानुमत्या राजाभिषेकाधिकारमाप्नोति । अनुमतिस्तु वर्णानां वर्गाणाञ्चापेक्षिता । वस्तुतः पृथिव्या अनुमतिरनिवार्या ।

'अथानुमत्याऽष्टाकपालेन पुरोडाशेन प्रचरतीयं वाऽनुमतिः ---- ।'[2]

जलसंग्रहणम्

पृथिव्यादीनामनुमतिप्राप्त्यनन्तरमभिषेचनीयजलसंयोजनं विधेयम् । तत्संपादनञ्च गङ्गायमुनाद्यनेकनदीतडागकूपासारनिर्झरसमुद्रेभ्यो मन्त्रोच्चारणतः कर्तव्यम् । मन्त्राश्च -

---

(१) शतपथब्रा० ५।३।३।६ (हि०रा०त० २ भा० १६ पृष्ठोद्धृतम्) ।

(२) शतपथब्रा० ५।२।३।४ (हि० रा० त० २ भा० १८ पृष्ठोद्धृतम्) ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

स्वराजस्थ राष्ट्रदा राष्ट्रममुष्म दत्त[1] ।

वृषसेनोऽसि राष्ट्रदा राष्ट्रममुष्म देहीति[2] ।

जलं राजत्वप्रदायकं राजकीयशक्त्युत्पादकञ्च सिद्धम्, तस्माच्छास्त्रप्रयोजका मुनय अपि नद्यादयो राष्ट्रदा इत्याहुः । इत्थं वास्तविकराजत्वोत्पादकत्वादभिषेके जलस्यैव महत्वं सर्वाधिकं विद्यते ।

अथाभिषेकप्रयोग:

पूर्वदिने पुरोहितोऽत्युच्चतोरणकदलीस्तम्भमण्डितायामभिषेकशालायां धान्योपरि यवोपरि वा सौवर्णं नवकलशं यथाविधिसंस्थाप्य यथासंभवं गङ्गाद्यनेकतीर्थजलेनापूर्य सर्वौषधिसर्वगन्धसर्वरत्नसर्वबीजपञ्चपल्लवान् क्षिप्त्वा श्वेतवस्त्रैः पुष्पमालादिभिश्चावेष्ट्य तत्समीपे एकं पञ्चगव्ययुतजलपूर्णं मृन्मयकुम्भं घृतपूर्णं कनककुम्भं दुग्धेन राजतं दध्ना ताम्रं मधुना मार्तिकं कुशोदकेन च शतच्छिद्रं मार्तिकं पुनः सौवर्णमन्यांश्च नदीसमुद्राद्यनेकतीर्थोदकपूर्णान् कलशान्स्थापयेत् । तत ऐन्द्रीं शान्तिमन्द्रशान्तिप्रयोगलिखितेन प्रकारेणाग्निस्थापनादीनि पूर्वाङ्गानि च कृत्वा हवनञ्च कुर्यात् । होमदेशेऽपि सुवर्णकलशं स्थापयेत्, तस्मिन् संपातां च क्षिपेत् । राजा च सितचन्दनपुष्पवस्त्रसर्वालङ्कारयुतोऽग्नेर्दक्षिणत उपविश्य सांवत्सरप्रभृतिभिर्दैवज्ञैः सदस्यमुख्यैः पुरोहितैश्च हूयमानाग्नेर्निमित्तानि पश्येत् ।

---

(१) शतपथब्राह्मणम् ५।३।४।२१ ।

(२) शतपथब्राह्मणम् ५।३।४।६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

एवं पुरोहित: प्रधानहोमं समाप्येन्द्रशान्त्युक्तेनैव प्रकारेण ब्रह्मोत्थापननमस्कारा- न्तान्युत्तराङ्गानि कृत्वा सुगन्धतैलादिना कृतस्नानं राजानं स्नानशालायामा- नीयासन उपवेश्यानेकस्थानाहृताभिर्मृद्भि: पूर्वस्थापितेन पञ्चगव्ययुतेन जलकुम्भेन च स्नपयेत् । अभिषेकदिने च कृतनित्यक्रियो राजा प्राङ्मुख आसन उपविश्येष्टदेवान् ध्यात्वा नमस्कृत्य च सङ्कल्पं कुर्यात् । तत: स्थापितानां गणेशादिदेवानां पूजां वस्त्रद्रव्यादिभिर्ब्राह्मणवरणं च कृत्वा मधुपर्ककेयूरकुण्डलकण्ठाभरणाङ्गुलीयकादिभि: साम्वत्सरपुरोहितौ त्रीन् ऋग्यजुर्वेदौ ब्राह्मणक्षत्रियवैश्यशूद्रानमात्यान् चतुर्वर्णमुख्यान् सामगं चैकं विप्रममात्यमन्यच्चैकमन्यतमं वेदविदं च संपूज्यासन उपवेशयेत् । तदैव राजापि भद्रासन उपविशेत् । भद्रासनन्तु हैमं राजतं ताम्रं दारिकाष्ठनिर्मितं वैकहस्तोच्चमायतं च कार्यम् । ततो ब्राह्मणोऽमात्य 'तेजोऽसी'[1]ति मन्त्रेण पूर्व- स्थापितेन घृतपूर्णहैमकुम्भेन प्राच्यां स्थित्वा भद्रासनोपविष्टं राजानमभिषिञ्चेत् । क्षत्रियोऽमात्य 'आप्यायस्वे'[2]ति मन्त्रेण दुग्धपूर्णेन रौप्यकुम्भेन दक्षिणत: स्थित्वा । वैश्योऽमात्यो 'दधिक्राव्णो'[3]ति मन्त्रेण दधिपूर्णेन ताम्रकुम्भेन पश्चिमत: स्थित्वा । छन्दोगामात्यो 'मधुवाता'[4] इत्यृचेन मधुपूर्णेन मृत्कुम्भेनोत्तरत: स्थित्वा । पुन: स एव 'देवस्यत्वे'[5]ति मन्त्रेण कुशोदकपूर्णेन मृत्कुम्भेन तत्रैव स्थित्वा । तत: पुरोहित: संपातयुतेन हैमकुम्भेन राजसूयाभिषेकमन्त्रैरभिषिञ्चेत् । मन्त्राश्च शुक्लयजुर्वेदे -

- - - - - - - - - - - - - - - - - -

(१) शुक्लयजुर्वेदसंहिता १६।६, २२।१ । (२) शुक्लयजुर्वेदसंहिता १२।११२ ।
(३) ,, २३।३२ । (४) ,, १३।२७ ।
(५) ,, ९७ ६।३० ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

सोमस्य त्वा द्युम्नेनाभिषिञ्चाम्यग्नेर्भ्राजसा सूर्यस्य वर्चसेन्द्रस्येन्द्रियेण ।
क्षत्राणां क्षत्रपतिरेध्यति दिद्यून्पाहि ।। इमं देवा असपत्नं सुवध्वं
महते क्षत्राय महते ज्यैष्ठाय जानराज्यायेन्द्रस्येन्द्रियाय । इममुमुष्य
पुत्र ममुष्यै पुत्रमस्यै विश एष वोऽमी राजा सोमोऽस्माकं
ब्राह्मणानां राजा ।।[1]

एवं देवस्यत्वाद्यन्येपि मन्त्राः सन्ति वेदोक्ताः । ततो वेदादिशास्त्राभिज्ञोऽन्यो ब्राह्मणो भद्रासनस्थमेव राजानं शतच्छिद्रसौवर्णकलशेनाभिषिञ्चेत् । तस्मिन्कलशे 'या ओषधी' रितिमन्त्रेण सर्वौषधीनां जलं क्षिपेत् । 'रथे तिष्ठे' ति मन्त्रेण गन्धस्योदकम् । 'आब्रह्मन् ब्राह्मणो' ति मन्त्रेण बीजानामुदकम् । 'पुष्पवती' त्यथर्वणमन्त्रेण पुष्पाणामुदकम् । तेनैव मन्त्रेणानेकफलानामुदकम् । 'आशुः शिशान' इति मन्त्रेण रत्नानामुदकम् । 'ये देवाः पुरः सदे' ति मन्त्रेण कुशानामुदकम् । ततोऽन्य ऋग्वेदी ब्राह्मणो गोरोचनया 'गन्धद्वारे' ति मन्त्रेण राज्ञः शिरः कण्ठं च लिम्पेत् । ततः समीचीना ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा अनुलोमाश्च यथालाभं गङ्गायमुनाद्यनेकतीर्थजलपूर्णैः पूर्वासादितैरनेककलशैः स्वस्वशाखीयैर्मन्त्रैरभिषिञ्चेयुः । शूद्रा अनुलोमादयश्च तूष्णीमेवाभिषिञ्चेयुः । एतस्मिन्नेवकाले वादकाः शङ्खभेर्यादीनि विविधानि वाद्यानि वादयेयुः । ब्राह्मणा वेदमन्त्रपाठं वन्दिनश्च स्तुतिपाठं कुर्युः । ततः साम्वत्सरः सर्वकुम्भमध्यस्थापितहेमकुम्भोदकं कुशैर्गृहीत्वा सुरास्त्वामभिषिञ्चन्त्वित्यादिभिरशीत्युपरशतैः श्लोकैरभिषिञ्चेन् मन्त्रान्ते ।

- - - - - - - - - - - - - - - -

(१) शुक्लयजुर्वेदसंहिता १०।१७-१८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

ततो राजा शुद्धजलेन स्नात्वा श्वेतोष्णीषादिवस्त्राणि धृत्वादर्शे आज्ये च प्रतिबिम्बं दृष्ट्वा तदाज्यपात्रं ससुवर्णं ब्राह्मणाय दत्वा दधिदूर्वादिमङ्गलद्रव्याण्यालम्भ्य ब्राह्मणान् वस्त्रालङ्कारादिभिः पूजयेत् । ततो देवज्ञो ललाटे पट्टं मूर्ध्नि मुकुटं च बध्नीयात् । पट्टलक्षणं तु देवीपुराणे -

सर्वस्नानमलङ्कारं रोचनाख्यं च पट्टकम् ।
वृद्ध्याद्व्यङ्गुलमङ्गुल्याऽऽषट्त्रिंशदङ्गुलावधिः ॥
वृत्तं वा चतुरस्त्रं वा पद्मकत्रिकगर्भितम् ।
वत्सेशपद्ममत्स्येभगोस्वस्तिकविनायकैः ॥[1]
श्रीश्रीवृन्दावराहेण स्वामिदेवी शुभान्वितम् ।

रामायणेकिरीटबन्धनचर्चोपलब्धा -

ब्रह्मणा निर्मितं पूर्वं किरीटं रत्नशोभितम्[2] ।

ततः पुरोधाः शुभलग्ने मुहूर्ते वा राजानं राजसिंहासन उपवेशयेत् । सिंहासनञ्चोत्तरोत्तरक्रमेण वृषमार्जारतरक्षुसिंहव्याघ्राणां चर्मसंस्थाप्य तदुपरि बहुमूल्यवस्त्रेणाच्छाद्य निर्मेयम् । ततो द्वारपालः सिंहासनोपविष्टाय राज्ञेऽमात्यानुच्चाधिकारिवर्गान् पौरान् वणिजः प्रकृतीश्च क्रमेण दर्शयेत् । राजाप्याभिषेचकेभ्यः साम्वत्सरपुरोहितादिभ्यो भूहिरण्यद्रव्यवस्त्राजाश्वगोजाविगृहादीनि दत्वा प्रसादयेत् । ततः सुगन्धचन्दनादिभिरलङ्कृतो दधिदूर्वादीनि मङ्गलद्रव्याण्यालभ्य सशरचापहस्तोऽग्निं प्रदक्षिणीकृत्य गुर्वादीन् नत्वा महावृषं सवत्सां गां च स्पृशेत् । ततः

- - - - - - - - - - - - - - - - - -

(१) नीतिमयूखः ६ पृष्ठोद्धृतम् ।
(२) रामायणम् ६।१२८।६५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

पुरोधा लक्षणान्वितमश्वं महागजं च तत्रानाय्य सर्वौषधियुतेन कलशजलेन संस्नाप्य वस्त्रपर्याणसुवर्णालङ्कारादिभिरलङ्कृत्याश्वं राज्ञः पुरत आनीयाश्वशान्त्युक्तैः 'जयाश्व त्वं मया राज्ञः---' इत्यादिभिर्मन्त्रैरभिमन्त्रयेत् । ततो गजशान्त्युक्तैः 'श्रीगजस्त्वं कृतो राज्ञा---' इत्यादिभिर्मन्त्रैरेवं विद्गजाभिमन्त्रणं कुर्यात् । ततो राजा तं गजमारुह्य गजारुढैरेवान्यैर्मुख्यामात्यसामन्तसांवत्सरगुरुपुरोहितादिभिः सह महापथेन स्वपुरं (राजधानीं) परिभ्रम्य देवतायतनानि च गत्वा देवान् संपूज्य प्रणम्य पुनर्गजारूढो गजारूढैरेव तैरमात्यादिभिः सह स्वगृहमागत्य गजादवतीर्य गजादवतीर्णैरमात्यादिभिः सहान्तर्गृहं प्रविश्य तान् सर्वानन्यांश्च यथा विभवं दानमानसत्कारप्रियवचनादिभिः सत्कृत्य विप्रान् संभोज्य ब्राह्मणेभ्यो भूयसीं दक्षिणां च दत्वा स्वस्तिवाचनं कारयित्वा सर्वान् विसर्जयेत् । ततो मित्रपरिवारादिभिर्युतोऽतिप्रसन्नमना भुञ्जीत । तथा चाग्निपुराणे -

पालयिष्यति वः सर्वान् धर्मस्थान् व्रतमाचरेत् ।
संवत्सरं स वृणुयात् पुरोहितमथ द्विजम् ॥

मन्त्रिणश्चाखिलान्मज्ञान्महिषीं धर्मलक्षणाम् ।
संवत्सरं नृपः काले ससंभारोऽभिषेचनम् ॥

- - - - - - - - - - - - - - - - - -

परिभ्रमेद्राजमार्गे बलयुक्तः प्रदक्षिणम् ।
पुरं विशेच्च दानाद्यैः प्राच्य सर्वान् विसर्जयेत् ॥[1]

- - - - - - - - - - - - - - - - - -

(१) अग्निपुराणम् २१८ अ० ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

राज्याधिकारग्रहणमभिषेकसमाचारप्रसारश्च

अभिषेकानन्तरमभिषिक्तो राजा किरीटोष्णीषवस्त्राभूषणादिकं कृत्वा पुरोहितदत्तं धनुर्धारयति । यद्धनुः परितो राजानं रक्षति । सर्वतो रक्षितो राजापि प्रजा राष्ट्रं च पालयति । तस्मात्पुरोहितो राज्ञे धनुः प्रयच्छति मन्त्रोच्चारणात् । मन्त्रश्च शुक्लयजुर्वेदे -

क्षत्रस्योल्बमसि क्षत्रस्य जरायवसि क्षत्रस्य योनिरसि क्षत्रस्य नाभिरसीन्द्रस्य वार्त्रघ्नमसि मित्रस्यासि वरुणस्यासि त्वयायं वृत्रं वधेत् । दृवासि रुजासि क्षुमासि । पातैनं प्राञ्चं पातैनं प्रत्यञ्चं पातैनं तिर्यञ्चं दिग्भ्यः पात । (१)

इत्थं राज्याधिकाररूपं धनुः समर्प्य मनुष्येषु देवतासु च राज्ञोऽभिषेकस्य व्यापकः प्रचारः प्रसारश्च कार्यः । एतदर्थमास्मिन्मन्त्रमुच्चार्यते यस्मान्मानवा देवाश्च भवन्ति सूचिताः । यस्याः सूचनायाः सर्वेष्वभिषेकस्य भवति स्पष्टबोधः । विशेषतः सूचितेष्वग्निः, इन्द्रः, मित्रावरुणौ पूषा, आकाशः, पृथिवी, अदितिश्चैते देवाः प्रसिद्धाः ।

आविर्मर्या आवित्तो अग्निर्गृहपतिरावित्त इन्द्रो वृद्धश्रवा आवित्तौ मित्रावरुणौ धृतव्रतावावित्तः पूषा विश्ववेदा आवित्ते द्यावा पृथिवी विश्वशंभुवा आवित्तादितिरुरुशर्मा । (२)

- - - - - - - - - - - - - - - -

(१) शुक्लयजुर्वेदसंहिता १०।८ ।   (२) शुक्लयजुर्वेदसंहिता १०।९ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

(१) अग्निर्गृहपतिः - गृहपालकः, स ब्राह्मणः, ब्राह्मणानां प्रतिनिधिश्च, सोऽयं ज्ञापितः, प्रतिनिधिर्ज्ञापितत्वात्सर्वे सदस्या अपि ज्ञापिता स एवार्थाद् भवन्ति सर्वे ब्राह्मणाः सूचिताः ।

(२) इन्द्रो वृद्धश्रवाः - वृद्धं श्रवो धनं यस्य स वृद्धश्रवाः, अयं क्षत्रियः क्षत्रियाणां प्रतिनिधिश्च, स आवेदितः, अयमावेदितत्वात्सर्वे क्षत्रिया अपि भवन्त्यावेदिताः ।

(३) मित्रावरुणौ धृतव्रतौ स्तः, तावपि सूचितौ ।

(४) पूषा विश्ववेदाः, स सर्वज्ञो धनाधिपश्च, सोऽप्याविष्टः ।

(५) विश्वशंभुवे द्यावापृथिवी सूचिते ।

(६) सर्वत्र सुखदायिनी अदितिश्च भवति ज्ञापिता ।

राज्यसञ्चालनविषये राज्ञः कृत एतेषामग्न्यादीनामनुमोदनं समर्थनं वा सततमपेक्षितं तस्मादेतेषामानुकूल्यप्राप्त्यर्थं भवन्त्येते ज्ञापिताः ।

राजपुरोहितयोः संवादः

संवादोऽयमभिषेकात्प्राक् संपद्यते । प्रथमं पुरोधा राजानमित्थं सम्बोधयति राजन् ! त्वं क्षत्रियाणामुत्पत्तिस्थानमसि, वीरता त्वयि केन्द्रिता, तस्मात्त्वापकारे न केऽपि गमिष्यन्ति, त्वमपि न केषाञ्चिदप्यपकारं करिष्यसि, नियमं पालयिष्यसि, सर्वमनिष्टं निवारयिष्यसि, तस्माच्चिरकालं राज्योपभोगं करिष्यसि । अत्युत्तमगुणसम्पन्नो राजा साम्राज्याय भवति योग्यः । विद्युदग्न्याद्यनेकोत्पातादकालमरणाच्च प्रजारक्षणं भवतः कर्तव्यं तस्मात्तत्पालनं कुरु । हे

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

राजन् ! तेजसे ब्रह्मवर्चसे चाश्विनोर्वैद्यकर्मणा त्वामभिषिञ्चाम्यहम्, बलायान्नाद्याय च सरस्वत्याभिषक्कर्मणा भवन्तमभिषिञ्चामि, सामर्थ्याय सर्वसमृद्ध्यै कीर्त्यै चार्थात्सर्वार्थाय इन्द्रस्य वीर्येण त्वामभिषिञ्चामि । ततोऽध्वर्युर्यजमानं (राजानं) स्पृष्ट्वा गायति हे यजमान ! त्वं प्रजापतिरसि, श्रेष्ठप्रजापतिरसि, प्रजापतयो बहवः, तत्र सर्वोत्तमोऽसि, प्रजापतिपदप्राप्त्यै त्वामहमभिषिञ्चामि प्रजापतिर्मव तदर्थं त्वामभिषिञ्चामि । पुनस्त्वं सुश्लोकोऽसि, सुमङ्गलोऽसि, सत्यनिष्ठोऽसि तस्मात्प्रजारञ्जनसमर्थोऽसि, अतस्तदर्थमेव त्वामभिषिञ्चामि । तथा च शुक्लयजुर्वेदे -

> क्षत्रस्य योनिरसि क्षत्रस्य नाभिरसि मा त्वा हिंसीन्मा मा हिंसीः । निषसाद धृतव्रतो वरुणः पस्त्यास्वा साम्राज्याय सुक्रतुः । मृत्योःपाहि विद्योत्पाहि । देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । अश्विनोर्भैषज्येन तेजसे ब्रह्मवर्चसायाभिषिञ्चामि सरस्वत्यै भैषज्येन वीर्यायान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेण बलाय श्रियै यशसेऽभिषिञ्चामि । कोऽसि कतमोऽसि कस्मै त्वा काय त्वा । सुश्लोक सुमङ्गल सत्यराजन् ।[१]

अत्र पुरोहितेन यदुक्तं तस्योत्तरमाह राजा -

> शिरो मे श्रीर्यशो मुखं त्विषिः केशाश्च श्मश्रूणि । राजा मे प्राणो अमृतं सम्राट् चक्षुर्विराट् श्रोत्रम् । जिह्वा मे भद्रं वाङ् महो मनो मन्युः स्वराड् भामः । मोदाः प्रमोदा अङ्गुलीर-

---

(१) शुक्लयजुर्वेदसंहिता २०।१-४ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

ङ्गानि मित्रं मे सहः । बाहू मे बलमिन्द्रियं हस्तौ मे कर्मवीर्यम् ।
आत्मा क्षत्रमुरो मम । पृष्ठीर्मे राष्ट्रमुदरमंसौ ग्रीवाश्च श्रोणी ।
ऊरु अरत्नी जानुनी विशो मेऽङ्गानि सर्वतः । नाभिर्मे चित्तं
विज्ञानं पायुर्मेऽपचितिर्भसत् । आनन्दनन्दावाण्डौ मे भगः सौभाग्यं
पसः । जङ्घाभ्यां पद्भ्यां धर्मोऽस्मि विशि राजा प्रतिष्ठितः ।
प्रति क्षत्रे प्रतितिष्ठामि राष्ट्रे प्रत्यश्वेषु प्रतितिष्ठामि गोषु ।
प्रत्यङ्गेषु प्रतितिष्ठाम्यात्मन्प्रति प्राणेषु प्रतितिष्ठामि पुष्टे
प्रति द्यावापृथिव्योः प्रतितिष्ठामि यज्ञे[१] ।

अस्यायं भावः - अभिषिक्तो राजा इन्द्ररूपमात्मानं सर्वात्मकं पश्यन्नाह - मम शिरः शोभाजनकमस्तु, मे मुखं यशोऽस्तु, केशाः दीप्तिजनकाः सन्तु, मुखवायुर्वचनं तदमृतमस्तु, चक्षुरिन्द्रियं सम्राटरूपमस्तु, श्रोत्रेन्द्रियं विविधं राजमानमस्तु, मे रसनेन्द्रियं कल्याणदायकमस्तु, वागिन्द्रियं पूज्यमानमस्तु, मनः क्रोधरूपमस्तु, क्रोधः राजमानोऽस्तु, अङ्गुलय आनन्दरूपाः सन्तु, अङ्गानि प्रकृष्टहर्षोत्पादकानि भवन्तु, मम मित्राणि रिपुनाशकराणि भवन्तु । मम पृष्ठप्रदेशो देशवत्सर्वेषामाधारोऽस्तु, ममोदरं स्कन्धौ कण्ठदेशाः कटिदेशौ सक्थिनौ हस्तदेशौ जानुनी चेत्यादीन्यङ्गानि प्रजाः सन्तु । मे नाभिस्थानं ज्ञानरूपमस्तु, गुदेन्द्रियं विज्ञानं ज्ञानजनितसंस्काराधारमस्तु, स्त्रीप्रजननं प्रजारूपमस्तु, मे वृषणावानन्दनन्दौ भवताम्, लिङ्गं सौभाग्यमस्तु, जङ्घाभ्यां पद्भ्यां चाहं धर्मोऽस्मि, धर्मरूपत्वादहं प्रजायां प्रतिष्ठितोऽस्मि । अहं क्षत्रियजातौ प्रतिष्ठायुक्तो भवामि, राष्ट्रे गोषु अश्वेषु करपादाद्यवयवेषु आत्मनि पञ्चसु प्राणेषु समृद्धौ स्वर्गेहलोकयोः सर्वेषु

- - - - - - - - - - - - - - - - -

(१) शुक्लयजुर्वेदसंहिता २०।५-१० ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

यज्ञेषु चाहं तिष्ठामि ।

संवादादस्मादिदं ज्ञायते राजनि देवत्वमन्तर्हितम्, तस्माद्राजाऽत्युच्चतमया भावनया प्रेरितः, प्रजास्वारोग्यबलसुखशान्तिधनधान्यविद्याज्ञानादिभिवृद्ध्यर्थं सदैव भवति यत्नशीलः, अतो राजा प्रजानामाशापुञ्जः, विश्वासस्य केन्द्ररूपः, विकासस्य मूलाधारः, राष्ट्रस्य एकताया प्रतीकः । प्रजानां हितचिन्तकत्वाचासु नवीनमुत्साहं शक्तिविशेषं चोत्पादयति । प्रजानां राष्ट्रस्य च समुन्नतौ राजशक्तिर्नितरामपेक्षिता, तस्माद्राजा राष्ट्रस्य प्रजानान्च प्राणभृदेवास्य सक्रियतायामेव जीवति राष्ट्रम्, अत एव प्रजा एनमभिषिन्चन्तीति ।

इन्द्रादिदेवानां चरित्रस्यानुकरणम्

इन्द्रः, सूर्यः, अनिलः, यमः, वरुणः, चन्द्रः, अग्निः, पृथिवी चैतेषामष्टानां देवश्रेष्ठानामंशा भवन्त्यन्तर्हिता राजनि । अत एतेषां वीर्यस्यानुरूपमाचरणन्चाचरति राजा ।

(१) यथेन्द्रो राजा श्रावणादींश्चतुरो मासान् यवगोधूमधान्याद्यन्नसिद्धये वर्षत्येवमिन्द्राचरणमनुतिष्ठन् राजा स्वदेशस्थान्सर्वान् जनानाभिलषितार्थैः सन्तोषयति ।

(२) दिवाकरः स्वकीयैः किरणैर्मार्गशीर्षाद्यष्टमासानल्पमल्पं रसमोषचापेन गृह्णाति यथा, तथैव राजा शास्त्रीयं धान्याद्यंशरूपं करमपीडयन्नैव प्रजाभ्य आदत्ते । एतदस्यार्कव्रतम् ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

(३) यथा प्राणाख्यो वायुः सर्वजन्तुष्वन्तः प्रविश्य विचरत्येवं गुप्तचरद्वारेण स्वपरमण्डलजालेषु चिकीर्षितार्थज्ञानार्थमन्तः प्रवेष्टव्यम् । यस्मादेतन्मारुतं व्रतम् ।

(४) यथा यमो मरणकाले सर्वेष्वेकमेव नियमं प्रयुज्य प्रजा नियमयति, तथैव राजाप्यपराधकाले रागद्वेषपरिहारेण प्रजा नियन्त्रयति । एतद्याम्यं व्रतमस्य ।

(५) यो वरुणपाशेन बन्धयितुमिष्टः सोऽवश्यमेव यथाकालं वरुणपाशेन बद्ध एव यथा, तथैव लोके राज्ञा पापकारिणो भवन्ति दण्डिताः शासिताश्च । एतद्राज्ञो वारुणं चरितम् ।

(६) यथा पूर्णचन्द्रं दृष्ट्वा सर्वे मनुष्या भवन्त्यानन्दिता हर्षिताश्च, तथैव राजदर्शनेनामात्यादयोऽशेषाः प्रजाजनाश्च तुष्टिमाप्नुवन्ति । इत्थं यो राजा प्रजासु तुष्टिमुत्पादयति स चान्द्रव्रतिकः ।

(७) यथाग्निः पापकारिणामसहनः स्यात्तथा प्रतिकूलेषु दुष्कार्यप्रवृत्तेषु दुर्जनेषु च राजा प्रचण्डो भवेत् । एतदस्याग्निसंबन्धिव्रतम् ।

(८) यथा पृथिवी सर्वाण्युच्चावचानि स्थावरजङ्गमान्युत्कृष्टापकृष्टानि च समं कृत्वा धारयति, तद्वद्राजापि सधनान् निर्धनान् गुणिनोऽवगुणिनोऽनाथादींश्च सर्वानेव दानमानसत्कारादिना यथासंभवं सममेव विधाय पालयति पोषयति च ।

तथा च मनुस्मृतौ मनुः -

इन्द्रस्यार्कस्य वायोश्च यमस्य वरुणस्य च ।
चन्द्रस्याग्नेः पृथिव्याश्च तेजो वृत्तं नृपश्चरेत् ।।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

वार्षिकांश्चतुरो मासान्यथेन्द्रोऽभिप्रवर्षति ।
तथाभिवर्षेत्स्वं राष्ट्रं कामैरिन्द्रव्रतं चरन् ॥

- - - - - - - - - - - - - - - - - -

यथा सर्वाणि भूतानि धरा धारयते समम् [1] ।
तथा सर्वाणि भूतानि बिभ्रतः पार्थिवं व्रतम् ॥

इन्द्रादीनामष्टानां लोकपालानामाचरणमाचरति राजेत्याह शुक्राचार्योऽपि[2] - देवराजस्येन्द्रस्याशेन प्रभावितत्वाद्राजा स्थावरजङ्गमात्मकस्य जगत आधिपत्यमाप्नोति । पुनर्यथा वायुर्गन्धस्य प्रेरकस्तथा राजा प्रजानां सदसत्कर्मप्रेरकः । यथा सूर्योऽन्धकारं विनस्य प्रकाशं वितरति तथैव राजाऽधर्ममुन्मूल्य धर्म प्रवर्तयति (संस्थापयति) । यथा यमः पापाचरणान् जनान् दण्डयति तथा राजा दुष्कर्मप्रवृत्तान् दण्डयति, अर्थाद् दुर्वृत्तेषु दण्डप्रदानाद्राजा यमतुल्यः । यथाग्निर्विशुद्धत्वाद् दहनशक्तिसंपन्नत्वाच्च दत्तमर्पितं वा सर्वं वस्तु भस्मसात्करोति तथैव राजापि रक्षणोद्देश्येन दत्तं सर्वं करादिकमात्मसात्करोति । अत एवाग्निरूपोऽपि भवति राजा । यथा वरुणो जलरूपेणामृतरसेन निखिलं जगत्पोषयति तथा राजा स्वस्य वैभवेन प्रजाः पालयति पोषयति च । तस्माद् वरुणरूपोऽपि राजा । यथा चन्द्रः स्वांशुभिर्जनानाह्लादितान् करोति तथा राजा प्रजाजनान् पालनपोषणरक्षणादिभिः सानन्दान्करोति । यथा कुबेरो धनार्जने रक्षणे च कुशलः, तथा राजा कोशवृद्धौ रक्षणे च समर्थः । अतो राज्ञि धनाधिपत्वं च विद्यते । इत्थमष्टानां देवानां यद्यत्कर्मकीर्तितं तत्तदवश्यमनुकरणीयं राज्ञा । यदि यो राजा

- - - - - - - - - - - - - - -

(१) मनुस्मृतिः ९।३०३-३११ । (२) शुक्रनीतिः १।७१-७५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

तन्नाचरति तदा स राज्यसञ्चालनविधौ न कदापि सफलतामाप्नोति, राजशब्द एव निरर्थकतामेति । पुनरेतदतिरिक्ता अन्ये पित्रादिसप्तगुणा अपि राज्ञः कृते नितरामपेक्षिताः । यदि यस्मिन्नेते गुणा सन्ति समुदिताः स एव राजपदे योग्यः, नोचेन्न ।

पिता माता गुरुर्भ्राता बन्धुर्वैश्रवणो यमः ।
नित्यं सप्तगुणैरेषां युक्तो राजा न चान्यथा[1] ।।

राजपदाधिकारः

ब्राह्मणस्याध्यापनयाजनादीनि क्षत्रियस्य प्रजारक्षणादीनि वैश्यस्य पशुपालनादीनि शूद्रस्य द्विजसेवनादीन्यवश्यकर्तव्यानि कर्माणि शास्त्रोदितानि । प्रजारक्षणे रञ्जने च समर्थः क्षत्रिय एव, अतो रक्षणं तदुद्देश्येन शस्त्रास्त्रधारणञ्चास्य कर्मसु प्रकृष्टतमं कर्म । क्षत्रियादितरेषां वर्णानां न त्वेतत्कर्म । उक्तञ्च -

प्रधानं क्षत्रिये कर्म प्रजानां परिपालनम्[2] ।

मनुस्मृतावपि -

ब्राह्मं प्राप्तेन संस्कारं क्षत्रियेण यथाविधिः
सर्वस्यास्य यथान्यायं कर्तव्यं परिरक्षणम्[3] ।।

---

(१) शुक्रनीतिः १।७७ । (२) याज्ञवल्क्यस्मृतिः १।११९ ।
(३) मनुस्मृतिः ७।२ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

प्रजापालनं रक्षणञ्च क्षत्रियस्यैव प्रमुखं कर्तव्यं तस्माद्राजपदाधिकारोऽपि तस्यैव न त्वन्येषां वर्णानामित्याहुर्भूयांसः शास्त्रप्रयोजकाः । यदि यः कोऽपि वा वर्णः शासनादिकार्ये समर्थो भवेत्स एव राजपदाधिकारी, न तत्पदं कस्यचिद् वर्णविशेषस्य वर्गविशेषस्य वाऽऽत्मीयमपितु राजोचितगुणसम्पन्नव्यक्तिविशेषस्यैवेत्याह मन्वर्थमुक्तावल्यां भट्टोपनामधेयः कुल्लूकः + - 'राजशब्दोऽपि नात्र क्षत्रियजातिवचनः किन्त्वभिषिक्तजनपदपुरपालयितृपुरुषवचनः ।'[1]
विषयस्योपोद्बलकान्यन्यान्यप्युदाहरणान्युपलभ्यन्ते - 'राजा राजसूयेन यजेत' इतिवचनाद्राज्ञ एव राजसूययज्ञेऽधिकारः, नत्वन्येषां व्यक्तिविशेषाणाम् । राजसूयस्यैका प्रमुखाङ्गरूपाऽवेष्टिस्तस्यां ब्राह्मणादीनां त्रयाणामेव वर्णानामधिकारो विद्यते, अतो राजसूयसम्पादको राजा यस्य कस्यापि वर्णस्य भवितुं शक्नोति । अतोऽत्रापि राजपदे न कोऽपि वर्णो निश्चितः । हरिवंशपुराणे ब्राह्मणकुलोत्पन्नानां राज्ञामस्ति विशदं वर्णनम्, तैश्चिरकालं यावद्राज्यं कृतं साम्राज्यञ्च स्थापितम् । शुङ्गसाम्राज्यसंस्थापकः पुष्यमित्राख्यो ब्राह्मण एवासीत् । कण्ववाकाटककदम्बादिब्राह्मणवंशोद्भवानां राज्ञां राजकार्यवर्णनमस्ति तत्र[2] । प्रकथनानामेतेषामनुशीलनाद्राजपदे न कोऽपि वर्णाः प्रतिबन्धिता दृश्यन्ते । राजा यः कोऽपि वा वर्णस्तथापि राजपदे वेदादिशास्त्रज्ञ एवार्हति । यो वेदादिसर्वशास्त्रवित् स एव सेनापत्यं राज्यं दण्डप्रणेतृत्वं सर्वभूम्याधिपत्यञ्चावाप्तुं योग्यः ।

----

(१) मन्वर्थमुक्तावली (मनुस्मृतिः ७।१) ।

(२) हरिवंशपुराणम् ३।२।३५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

सैनापत्यं च राज्यं च दण्डनेतृत्वमेव च ।
सर्वलोकाधिपत्यं च वेदशास्त्रविदर्हति[1] ।।

राजोचितगुणयुताः सन्ति चेत्सर्वे वर्णा भवन्ति । राजपदाधिकारिणः । पालवंशस्य संस्थापको गोपालः शूद्र एवासीत् सोऽपि राजपदे संस्थापितः इत्युक्तं कुमारिलभट्टेन । यद्यपि कलियुगेऽधिकतरा राजानः शूद्रा एवाथ वा शूद्रस्याचरण-माचरन्ति, पुनर्युगनिषिद्धमश्वमेधादिकन्च कुर्वन्ति किन्तु यत्र शूद्रो राजा भवेत्तत्र नवसेदित्याहुर्मन्वादयस्तु --

न शूद्रराज्ये निवसेन्नाधार्मिकजनावृते[2] ।

वस्तुतः यत्र शूद्रो राजा तत्र निवासो नैव कर्तव्यः, इत्युक्तत्वाच्छूद्राय राजपदप्रदानं नोचितम् । पुनर्वेदादिशास्त्रविदेव राजपदे योग्यः, इति शास्त्रीयो नियमश्चास्ति, किन्तु शूद्रस्य तु वेदाध्ययने नाधिकार स्तस्मादपि शूद्रो नैव राजपदाधिकारीति ।

स्त्रीणामपि राजपदाधिकारो विद्यत इत्याह व्यासः - विजितदेशस्य राजसिंहासने विनिर्जितानां राज्ञां भ्रातृपुत्रपौत्रादयः स्थापनीयाः, तेषामभावश्चेत्तदा पुत्र्यश्चापि भवन्त्यभिषिक्ताः ।

भ्रातृनपुत्रांश्च पौत्रांश्च स्वे स्वे राज्येऽभिषेचय ।
कुमारी नास्ति येषां च कन्यास्तत्राभिषेचय[3] ।

---

(१) मनुस्मृतिः १२।१००।

(२) मनुस्मृतिः ४।६१।

(३) शान्ति० ३४।३१-३३।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

राजतरङ्गिण्यामपि सुगन्धाप्रभृतिभिः स्त्रीभिः कृतं राज्यमस्ति वर्णितम्[1]। राज्ञः शुभाकरस्य मरणानन्तरं तस्यैव पुत्री दण्डीमहादेवी राजपदे संस्थापिता, सा "परमभट्टारिका महाराजाधिराजपरमेश्वरी" इत्युपाधिना च विभूषिता[2]। पुनरग्निवर्णराज्ञो महिषी राज्ञोमरणानन्तरं स्वयमेव राजसिंहासनमुषित्वा परम्परागतानाममात्यादीनां सहयोगेन राज्यं कृतवती[3]। स्त्रीकृतराज्यस्यै तादृशान्यनेकान्युदाहरणानि प्राप्यन्ते, अतः स्त्रीणामपि राजपदे पूर्णाधिकारो दृश्यते।

राजपदेज्येष्ठस्यैवाधिकारः

विजेतुनिर्वाचितस्य चोदाहरणं विहाय राजपदाधिकारो बहुधानवंशिकः, विशेषतो ज्येष्ठपुत्रस्यैव। शतपथब्राह्मणे दाशपुरुषान्तमविच्छिन्नक्रमेण गतस्य राजपदाधिकारस्यास्त्युल्लेखः[4]। राजमरणात्कारणवशाद् वा राजपदविरिक्ते सति सामान्यतस्तत्पदं ज्येष्ठपुत्रस्य कृते सुरक्षितम्, इत्येतद्विधं प्रचलनं श्रुतिकाले स्मृतिकाले चाप्यखण्डितम्। ऋग्वेदेनापीन्द्रस्य ज्येष्ठपदस्य वर्णनं बहुवारं कृतम् "इन्द्रज्येष्ठाय सुक्रतो"[5]। इन्द्रेण स्वपौरुषेण प्राप्तं तत्पदं देवैरस्वीकृतम्। तस्मात्तत्रापि

---

(१) राजतरङ्गिणी ५।२४५ एवं ६।३३२ (ध० इ० २ भाग ५६५ पृष्ठ)।

(२) धर्मशास्त्र का इतिहास, भाग-२, पृ० ५६५।

(३) रघुवंशमहाकाव्यम् १६।५५,५७।

(४) शतपथब्राह्मणम् १२।६।३।१।

(५) ऋग्वेद, १।५।६।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

समर्थनप्राप्त्युद्देश्येन गुरोराचार्यत्वेन द्वादशाहयज्ञानुष्ठानं विहितम्, अनुष्ठितस्यैतस्य प्रभावादेव तज्ज्येष्ठ्यं पदं देवताभिश्च समर्थितम् । यज्ञविधिनानुमोदितं तत्पदं सर्वमान्यं च जातम् । पुनः पुत्रस्तु ज्येष्ठ एव, तस्मात् पित्र्यर्जितं सर्वं धनं राज्यं चाप्नोति । ज्येष्ठ एव राजपद प्रदानार्हः, विषयेऽस्मिन्यास्काचार्यस्य निरुक्ते देवापिशन्तन्वोः कथानकमस्त्येकम् - अनुजेनशन्तनुनाबलाद्राजपदं गृहीतं कारणेनानेन विरक्तोऽग्रजोदेवापिस्तपस्तप्तुमारब्धवान् । शन्तनोः शास्त्रीयक्रमविरुद्धव्यवहारादस्मात्सर्वे प्रजाजना रुष्टा जाताः । शास्त्रोदितनियमोल्लङ्घकत्वात्तस्य शासनकाले विविधोपद्रवाः समुत्पन्नाः, द्वादशवर्षपर्यन्तं वृष्टिश्च नाभूत् । वृष्ट्यभावेनानेकोपद्रवेन च पीडिताः शन्तनोरसङ्गतकर्मणा क्रुद्धाश्च जनास्तस्य समीपं गत्वा कथयन्ति भो राजन् ? अग्रजप्राप्योऽधिकारो भवतापहृतः, स अत्र शास्त्रीया मर्यादा उपेक्षिता, अत एव लोके एतादृशी स्थितिः समुद्भूता, तस्माद्येनोपायेन लोकव्यथा विनश्यति सर्वत्र शान्तिश्च जायते तदुपायमेव कुरु । प्रजानामेतद्वचनं श्रुत्वा शन्तनुनापि तत्क्षणादेव राजपदमग्रजाय दत्तम् । राजपदप्राप्त्यनन्तरं लोकमर्मज्ञेन देवापिनापि लोकोत्पन्नसमस्यानिवारणोद्देश्येन यज्ञारम्भः कृतः । यस्यप्रभावाल्लोककल्याणकारिणी वृष्टिर्निश्चिता, उपद्रवाश्च नाश्यन्तीति[१] । कथानकादस्माद्राज्याधिकारो ज्येष्ठस्यैवेत्यवगम्यते । मध्यमादयो बलाद्गृह्णन्ति चेत्त पापभागिनो भवन्त्यसफलाश्च ।

मोहवशमापन्नाः केचिद्राजानो ज्येष्ठपुत्रं विहाय कनिष्ठायापि राजपदं प्रयच्छन्ति । विषयेऽस्मिन्नैतिहासिकान्युदाहरणान्यपि प्राप्यन्ते यथा -- राजा

---

(१) निरुक्तम् २।१० ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

ययातिना ज्येष्ठपुत्रं यदुं विहाय कनिष्ठाय पुरुनाम्ने पुत्राय राजपदं दत्तम्[1]।
पुनर्गुप्तवंशस्य सम्राजा चन्द्रगुप्तेनापि कनिष्ठपुत्राय समुद्रगुप्ताय राजपदं प्रदत्तम्।
एवं समुद्रगुप्तेनापि कनिष्ठायैव राज्याधिकारः प्रत्यर्पितः। इत्थं शास्त्रीयं
नियमं त्यक्त्वापि केचिदनधिकारिणेऽपि राज्यभारमर्पयन्ति। किन्तु शास्त्रमर्मज्ञेन
राजा दशरथेन त्वनेकं व्यवधानादिकं तिरस्कृत्यापि ज्येष्ठपुत्राय भगवते श्रीरामाय
युवराजपदं दत्तम्, न त्वन्येभ्यो भातादिभ्यः। विषयोऽयं रामायणेऽपि चर्चितः —

त्वया यतः प्रजाश्चेमाः स्वगुणैरनुरञ्जिताः।
तस्मात्त्वं पुण्ययोगेन यौवराज्यमवाप्नुहि[2]॥

कौटिल्योऽपि ज्येष्ठपुत्रं प्रति समर्थनं जनयति --

बहूनामेकसंरोधः पिता पुत्रहितो भवेत्[3]।
अन्यत्रापद ऐश्वर्यं ज्येष्ठभागि तु पूज्यते॥

इत्थं भूयांसः शास्त्रप्रणेतारो राजपदे ज्येष्ठस्यैवाधिकारो विहित इत्याहुः। पुत्रोत्पत्त्यनन्तरं 'ना पुत्रस्य लोकोऽस्ति' इति श्रुतेः पुण्यलोकाभावपरिहारो भवति। ज्येष्ठ एव धर्मजः, अन्ये मध्यमादयस्तु कामजाः। ज्येष्ठो यदि धार्मिको गुणसम्पन्नश्च भवेत्तदा सकुलं वर्धयति, लोके भवति पूज्यतमश्च। पुनर्ऋणापनयनाद्युपकारं च करोति, येन जातेनामृतत्वं प्राप्नोति पिता। कारणैरित्यादिभिः पुत्रेषु ज्येष्ठ एव श्रेष्ठतम स्तस्मात् पितुः सकाशाद्राज्यं सर्वं धनादिकन्वाप्नोति --

---

(१) आश्रमवा० प० ७८।४ । (२) रामायणम् २।३।४० ।
(३) कौ० १।१६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः[1] ।
पितॄणामनृणश्चैव स तस्मात्सर्वं मर्हति ॥

ज्येष्ठो यद्यन्धक्लीबबधिरपतितोन्मत्तजडमूकपादविकलो वा भवेदथवान्येन-केनापि कारणेन दोषेण चासमर्थः स्यात्तदा तत्पदं भवति भ्रातृगतम्, अर्थादन्धक्लीबादयो राज्याधिकारं पितृधनञ्च नाप्नुवन्ति । ते तु केवलं ग्रासाच्छादनभागिनः । तथैव प्रोक्तं याज्ञवल्क्यस्मृतौ --

क्लीबोऽथपतितस्तज्जः पङ्गुरुन्मत्तको जडः ।
अन्धोऽचिकित्स्य रोगाद्या भर्तव्याः स्युर्निरंशकाः[2] ॥

धृतराष्ट्रेणापि राजपदं न तु प्राप्तमन्धत्वात्[3] । ज्येष्ठो यद्यन्धत्वादि-दोषदूषितो भवेत्तदा तत्पदं भ्रातृगतं पुत्रगतं वा । अर्थात् तयोर्यो गुणाधिकः समर्थश्च स्यात्स एव राज्याधिकारीत्याह शुक्राचार्यः --

ज्येष्ठोऽपि बधिरः कुष्ठी मूकोऽन्धः षंढ एव यः ।
स राज्यार्हो भवेन्नैव भ्राता तत्पुत्र एव हि[4] ॥

यदि द्वावेव समर्थौ तदा तत्पदे पुत्रस्यैवाधिकारोऽखण्डितः, न त्वनुजस्य । यद्यग्रजस्यानुजो राजपदं प्राप्नोति तस्य मरणानन्तरमनुजस्यैव ज्येष्ठपुत्रस्तत्पदाधिकारी न त्वग्रजस्य पुत्रः । पाण्डोर्मरणानन्तरं तस्यैव पुत्रेण युधिष्ठिरेण राजपदं प्राप्तं

---

(१) मनुस्मृतिः ९।१०६ ।

(२) याज्ञवल्क्यस्मृतिः २।१४० एवं मनुस्मृतिः ९।२०१ ।

(३) म० भा० आ० वा० प० १०९।२५ ।

(४) शु० नी० १।३४३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

न तु धृतराष्ट्रपुत्रेण दुर्योधनेन ।

राज्योत्तराधिकारिक्रमः

पुत्राद्वादशविधाः, तेष्वौरसस्यैव राजपदे प्रथमोऽधिकारः स वयसा ज्येष्ठो वा कनिष्ठो भवेत् । यदि सवर्णायाः कनिष्ठायाः पुत्रोऽवस्थायां ज्येष्ठापुत्रापेक्षया ज्येष्ठो भवेत्तदा तस्यैवाधिकारः । यदि सवर्णयोर्भार्ययोरेकस्मिन्समये पुत्रौ जातौ तदा ज्येष्ठापुत्रस्याधिकारः । यदि ज्येष्ठायां युगलपुत्रावुत्पन्नौ तदा पूर्वोत्पन्नस्यैवाधिकारः । सन्दर्भेऽस्मिन्सोमदेवः -- औरसपुत्र एव राज्याधिकारमाप्नोति, तदभावे सहोदरभ्राता, तस्याप्यभावे सपत्नानुजः । तस्मिन्नप्यसति चेद् वंशजः, सप्तपुरुषान्तः कश्चित्पुरुषः, स च नास्ति चेत्कुल्यः सप्तपुरुषाच्चतुर्दशपुरुषान्तः कश्चित् । सोऽपि नोपलब्धस्तदा पुत्रिका पुत्रः । तदप्यभावेऽन्यः कश्चिन्निर्वाचितोऽपि राजपदमाप्नोति । एतेषु पूर्वः पूर्वः बलियांसः - "सुत सोदर सपत्न पितृव्य कुल्य दौहित्रा गन्तुकेषु पूर्वपूर्वाभावे भवत्युत्तरस्य राज्यपदावाप्तिः"[१] ।

राजगुणाः

राजोचितगुणसम्पन्नपुरुषस्यैव राजपदे पूर्णाधिकारत्वादत्रप्रथमं राज्ञः

---

(१) नी० वा० राजरक्षासमुद्देशः ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

कृतेऽपेक्षितगुणविवेचनं सर्वथाप्रासङ्गिकम् । तस्माद्गुणा विविच्यन्ते । गुण-विवेचकेषु मनुयाज्ञवल्क्यौ प्रसिद्धौ । तयोर्मते गुणाश्च द्विविधाः -- आन्तरिका बाह्याश्चेति । विनम्रता, कुलीनता, सत्यवादिता, पवित्रता, धर्मपरायणता, पटुता, मृदुता, सहनशीलता, शास्त्रज्ञता चेत्यादयः सदैवापेक्षिता आन्तरिकाः । बाह्यगुणेषु मन्त्रिपुरोहितयाज्ञिकसचिवविभागाध्यक्षचिकित्सकादिस्थापनक्रियायां चातुर्यम्, प्रजारक्षणपालनपोषणराज्यशासनधर्मसंस्थापनादौ निपुणत्वम् युद्धविषये सन्धिविग्रहादौ च प्रवीणत्वञ्चेतिविशिष्टाः । शास्त्रोदिताः सन्त्यनेकेगुणाः किन्तु गुणेष्वेकस्तु सर्वोत्कृष्टः, यस्यावलम्बनाद्राजानो निखिललोकाधिपत्यमाप्नुवन्ति न कदापि क्षीणतां यान्ति, गुणस्त्वात्मसंपदेवेत्याह कौटिल्यः --

आत्मवांस्त्वल्पदेशोऽपि युक्तः प्रकृतिसम्पदा ।[1]
नयज्ञः पृथिवीं कृत्स्नां जयत्येव न हीयते ।।

कौटिल्योक्ता अन्ये गुणास्तु मनुयाज्ञवल्क्याभ्यां प्रोक्तगुणैः सह प्रायः समानाः । कार्यज्ञानाभिकाङ्क्षा, विद्याध्ययनप्रवृत्तिः, धारणाशक्तिः, सुविचारणा, सत्कार्ये श्रद्धा चेत्यादयो राज्ञः कृते सततमपेक्षिता बौद्धिकगुणाः सन्ति चर्चिता दशकुमारचरिते[2] । अग्निपुराणे शक्यसामन्तताथा अनेके गुणाः सन्ति प्रदर्शिताः --

शक्यसामन्तता चैव तथा च दृढभक्तिता ।
दीर्घदर्शित्वमुत्साहः शुचितास्थूललक्षिता[3] ।।

---

(१) कौ० ६।१ । (२) दशकुमारचरितम् ८ ।
(३) अग्निपुराणम् २३९।१ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

शास्त्रविहितकार्यसम्पादनम्, सत्यनिर्णयः, बाह्यमान्तरिकं च पावित्र्यम्, इन्द्रियनिरोधः, सर्वासु प्रजासु समानव्यवहारः, वर्णाश्रमधर्मरक्षा, वेदादिशास्त्राभ्यासश्चेत्यादय अत्युत्कृष्टा गुणा गौतमेनोक्ताः[1] । एकसप्ततितमे शान्तिपर्वाध्याये षट्त्रिंशद्गुणानां वर्णनमस्ति ते सर्वे यत्नत उपार्जनीया राज्ञा --

इयं गुणानां षट्त्रिंशत्षट्त्रिंशद्गुणसंयुता ।
यान् गुणांस्तु गुणोपेतः कुर्वन्गुणमवाप्नुयात्[2] ।।

कामन्दकेन शास्त्रज्ञता बुद्धि धीरता दक्षता प्रगल्भता धारयिष्णुता चेत्यादीना मूनविंशति गुणानां वर्णनं विहितम् । किन्तु गुणेषु दानशीलता, सत्यता, पराक्रमश्चैते त्रय उत्कृष्टाः, त्रिष्वेवैतेष्वन्ये गुणा भवन्त्यन्तर्भूताः । अत एतेषामनुसरणादन्ये गुणा भवन्ति स्वत उपलब्धाः, इति चाह सः ।

त्यागः सत्यञ्च शौर्यञ्च त्रय एते महागुणाः ।
प्राप्नोति हि गुणान्सर्वानेतैर्युक्तो नराधिपः[3] ।।

मानसोल्लासे विद्याध्ययनादीनां चतुश्चत्वारिं-शद्गुणानामुल्लेखोऽस्ति, तेषु सत्यवादिता, क्षमाशीलता, त्यागभावः, शास्त्रज्ञता, पराक्रमश्चैते पञ्चोच्चतमाः प्राप्त्यमेतेषामन्येऽपि प्राप्यन्ते[4] । एवं परशुरामप्रतापे षण्णवतिगुणानां चर्चोपस्थापिता । प्रकारेणानेन राजगुणान्प्रदर्शयन्ति विद्वांसः, किन्तु गुणप्रदर्शन विषये न केषाञ्चिदप्यैकमत्यम् । गुणसंख्यायामुपस्थापनक्रमे च सामञ्जस्यं

---

(१) गौ०ध०सू० २।२।२६ । (२) शान्ति० ७१।२ ।
(३) का० नी० सा० ४।२४ । (४) मानसोल्ला० २।१।२-८
(ध०शा०इ० भा०२ पृ० ५६७) ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

नोपलब्धम्, तथाप्याशयस्तु विदुषां समान एव दृश्यते ।

राजदोषाः

राजगुणान्प्रदर्शयन्तो दोषज्ञा राज्ञो दोषानपि प्रदर्शयन्ति । दोषेष्वपि नास्तिकता, असत्यता, क्रोधश्चेत्यादयश्चतुर्दशदोषाः सर्वनाशकराः । ते च रामायणे --

> नास्तिक्यमनृतं क्रोधं प्रमादं दीर्घसूत्रताम् ।
> अदर्शनं ज्ञानवतामालस्यं पञ्चवृत्तिताम् ॥
> कच्चित्त्वं वर्जयस्येतान्राजदोषांश्चतुर्दश[1] ॥

एतान्दोषान्परित्यज्य गुणावलम्बनं कर्तव्यं राज्ञा । गुणानुसरणेनैव राज्ञः कीर्तिर्लोके जलेतैलबिन्दुरिव विस्तीर्यते । एतद्विपरीताचारवतोऽजितेन्द्रियस्य नृपस्य जले घृतबिन्दुरिव कीर्तिर्लोके संक्षिप्यते ।

वृद्धसेवा -

वृद्धसेवयाऽत्युत्कृष्टतां याति राजेत्याहुर्मुनयः । वयसा तपसा वेदादि-शास्त्रज्ञानेन च वृद्धानां ब्राह्मणानां ज्ञानवृद्धानामन्येषां वर्णानाञ्च सुवर्णरत्नार्थ-प्रियवचनादिभिः सेवा सततं कर्तव्या राज्ञा । सेवैषा राज्ञः सर्वतः समृद्धिकरी ।

---

(१) रामायणम् २।१००।६५-६७ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

वृद्धसेवको राजा राक्षसैरपि पूज्यतेऽर्थात् तैरपि तस्य हितं क्रियते । उक्तञ्च --

> वृद्धांश्च नित्यं सेवेत विप्रान्वेदविदः शुचीन् । [1]
> वृद्धसेवी हि सततं रक्षोभिरपि पूज्यते ॥

एवञ्च --

> साधुपूजापरो राजा माहात्म्यं प्राप्यभूतले । [2]
> स्वर्गगतस्ततो देवैरिन्द्राद्यैरपि पूज्यते ॥

वृद्धानां व्रतविद्याधिकानां साधूनाञ्च सेवया विशेषतो विनयमाप्नोति राजा । विनीतात्मा हि न कदाचिदपि नश्यति । हस्त्यश्वरथधनधान्यवस्त्रा-लंकारादि परिच्छदयुक्ता अपि वेननहुषनिमिसुमुखादयो बहवो राजानोऽविनयान्नष्टाः । वनस्था निष्परिच्छदाः (करितुरगकोशादिरहिता) अपि पृथुमन्वादयो बहवो राजानो विनयेनैव राज्यं प्राप्तवन्तः । पुनः कुबेरश्चापि विनयादेव धनाधिपत्यं प्राप । एवं विनयेनैव गाधिपुत्रो विश्वामित्रः क्षत्रियः संस्तेनैव देहेन दुर्लभं ब्राह्मण्यं चैव नन्विनः प्राप्तवान् ।

> पृथुस्तु विनयाद्राज्यं प्राप्तवान्मनुरेव च । [3]
> कुबेरश्च धनैश्वर्यं ब्राह्मण्यं चैव गाधिजः ॥

इन्द्रियजयः

---

(१) नासिका, (२) नयने, (३) जिह्वा, (४) त्वक्, (५) श्रोत्रञ्चैतानि

---

(१) मनुस्मृतिः ७।३८ । (२) हारितः ।

(३) मनुस्मृतिः ७।४२ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

पञ्च ज्ञानेन्द्रियाणि । (१) हस्तौ, (२) पायुः, (३) उपस्थः, (४) जिह्वा, (५) पादौ चेतानि पञ्च कर्मेन्द्रियाणि । मनस्तु बुद्धिकर्मेन्द्रियसहकारितयो भयात्मकम् । गन्धरूपरसस्पर्शशब्दाश्चैते क्रमेण नासिकादीनां पञ्चानां विषयाः । हस्तादीनि पञ्च क्रमेणादानोत्सर्गानन्दरसास्वादविहारादि कर्मसाधनानि । एतेषामेकादशेन्द्रियाणां विषयासक्तिनिवारणे सर्वकालं यत्नं कुर्याद्राजा । यतो यो जितेन्द्रियः स एव प्रजाः स्ववशे स्थापयितुं शक्नोति न तु विषयोपभोग-व्यग्रः । तथा च मनुस्मृतौ --

इन्द्रियाणां जये योगं समातिष्ठेद्दिवानिशम् ।
जितेन्द्रियो हि शक्नोति वशे स्थापयितुं प्रजाः[१] ।।

शास्त्रप्रतिपादितकर्तव्यानुष्ठानात्, विषयविरक्त्याः, कामादिरि-वर्गत्यागाच्चेन्द्रियजयः, अत एतेत्र्य उपायाः सर्वतोहितेच्छुभिर्महीपालैः सततं चिन्तनीयाः स्मरणीयाश्च ।

शत्रुषड्वर्गत्यागः -

कामक्रोधलोभमानमदहर्षाख्याः षड्रिपवः । एतान्विजित्य परित्यज्य वा राज्यं च राजपदं चाखण्डितं कर्तव्यं राज्ञा । यदि मनस्येतेषां प्राबल्यं भवेत्तदा मानवाः स्वस्य नैसर्गिकं रूपं विहाय पशुत्वं यान्त्यर्थाच्छत्रुषड्वर्गवशगा विचारविवेक-शून्या बुद्धिहीना भ्रष्टाचाररताश्च भवन्ति । एतादृशा मानवाः शीघ्रमेव विनाशा-

---

(१) मनुस्मृतिः ७।४४ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

वस्थामाप्नुवन्ति । कोऽयं सामान्यानां जनानां कृतेत्वतिशय हानिकरोऽस्ति- चेद्राज्ञ: कृते तु किं परं नस्यात् । अतो राजा विद्याविनयादिन्द्रियनिग्रहाच्च राजपदप्राप्तुं नार्हति, अपितु शत्रुषड्वर्गदमनादेव । वर्गस्यास्यवशादजितेन्द्रिया भूयांसो महीपाला विनाशं गता: । विषयस्यास्योदाहरणानि च यथा -- भोजवंशीयदाण्डक्याख्यो राजा कामवशेन ब्राह्मणकन्यायामासक्त: सन् ब्राह्मण- शापाद् बन्धुराष्ट्रादिभि: सह विनाशं गत: । एवं जनमेजयाख्यो राजाप्येवमेव क्रोधाद् ब्राह्मणै: सह कलहं कुर्वन् तेषां शापाद् विनष्ट: । तथा पुरुरवाख्यो राजा लोभेन प्रजाभि: सहाधिककरादिधनग्रहणान्नष्ट: । एवमेवलङ्काधिपतिना दशाननेनाभिमानेन भगवतो श्रीरामस्य प्रियासीताबलादपहृता, तस्मादेककारणा- त्सोऽपि विनष्ट: । पुनर्दुर्योधनेनाप्यभिमानेनैव पाण्डवानां राज्यभागोऽपहृत: स तस्मादेककारणान्नष्ट: । तथा च हैहयवंशस्य राजाकार्तवीर्यार्जुनो मदेन जमदग्निं प्रत्यपराधं कृतवान्, ततस्तस्य पुत्रात्परशुरामान्मारित: स: । वातापीत्याख्यो दानवोऽपि हर्षेण नष्ट: । तथा यादवकुलञ्च हर्षेणैव विनष्टम् । इत्थमरिवर्ग वशगा एते चान्ये च बहवो भूपाला: सबन्धुराष्ट्रा विनाशं गता: । कामादीन् षट् शत्रून् दूरात्त्यक्तवन्तो जितेन्द्रिया: परशुरामाम्बरीषनाभागादयो राजानश्चिरकालं यावद्धराया उपभोगं कृतवन्त: । तथा चोक्तं कौटलीयार्थशास्त्रे --

एते चान्ये च बहव: शत्रुषड्वर्गमाश्रिता: ।
सबन्धुराष्ट्रा राजानो विनेशुरजितेन्द्रिया: ।।
शत्रुषड्वर्गमुत्सृज्य जामदग्न्यो जितेन्द्रिय: ।
अम्बरीषश्च नाभागो बुभुजाते चिरं महीम् [1] ।।

---

(१) कौटिल्यअर्थशास्त्रम् १।५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

दुर्व्यसनान्यतिशयकष्टदायकानि -

अविजितेभ्यः कामक्रोधादिभ्यः शत्रुभ्योऽतिशयदुःखजनकानि विविधानि दुर्व्यसनान्यपि समुत्पद्यन्ते । तानि चैतानि -- (१) मृगया, (२) द्यूतक्रीडा, (३) सकलकार्यविघातिनी दिवानिद्रा, (४) परदोषकथनम्, (५) स्त्रीसंभोगः, (६) नृत्यप्रेम:, (८) गीतादिष्वासक्तिः, (९) वादनादिविषयेष्वनुरक्तिः, (१०) वृथाभ्रमणान्येतानि सुखेच्छाप्रभवाणि दशव्यसनानि कामजानि ।

(१) अविज्ञातदोषाविष्करणम्, (२) साहसम् (बलात्कारः), (३) द्रोहः (छद्मवधः), (४) अन्यगुणासहिष्णुता, (५) परगुणेषु दोषाविष्करणम्, (६) परार्थानामपहरणं देयानामदानं च, (७) वाक्पारुष्यम् (आक्रोशादि), (८) दण्डपारुष्यम् (ताडनादि) एतान्यष्टव्यसनानि क्रोधाद् भवन्ति । तथा च मनुस्मृतौ --

मृगयाक्षो दिवास्वप्नः परिवादः स्त्रियो मदः ।
तौर्यत्रिकं वृथाट्या च कामजो दशको गणः ॥
पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम् ।
वाग्दण्डजं च पारुष्यं क्रोधजोऽपि गणोऽष्टकः[१] ॥

कामजनितेषु दशव्यसनेषु प्रसक्तो राजा धर्मार्थाभ्यां हीयते । क्रोधजेष्वासक्तस्तु प्रकृतिकोपाद्देहनाशं बन्धुबान्धवार्थादि सर्वनाशं च प्राप्नोति, नात्र

---

(१) मनुस्मृतिः ७।४७-४८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

संशय: । अत एतानि कामजानि क्रोधजानि चाष्टादश व्यसनानि यत्नतस्त्यजेद्राजा । एतयो: कामक्रोधजव्यसनसंघयोर्मूलं कारणन्तु लोभ एव, अस्मादेवैतद्गणद्वयं निष्पद्यते, तस्माल्लोभत्यागं सर्वप्रथमं कुर्याद्राजा, इत्याह मनुस्मृतौ मनु: --

द्वयोरप्येतयोर्मूलं यं सर्वे कवयो विदु: ।
तं यत्नेन जयेल्लोभं तज्जावेतावुभौ गणौ [1] ।।

किन्तु लोकेऽस्मिन् दुर्लभान्तदु:खोत्पादका: परलोके चासहनीयनरकहेतुभूता: कामक्रोधलोभास्त्रयस्त्रय एव शत्रवो यत्नतस्त्याज्या इत्युल्लेखोऽस्ति श्रीमद्भगवद्गीतायाम् --

त्रिविधं नरकस्येदं द्वारं नाशनमात्मन: ।
काम: क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् [2] ।।

उपर्युक्तेषु कामजव्यसनेष्वपि मद्यपानम्, द्यूतादिक्रीडा, स्त्रीसंभोग:, मृगया चैतानि चत्वारि बहुदोषत्वादतिशयदु:खजनकानि । तथैव क्रोधजव्यसनेष्वपि दण्डपारुष्यम्, वाक्पारुष्यम्, अर्थदूषणञ्चैतानि त्रीणि दोषबहुलत्वादत्यधिककष्टदायकानि । एतानि सप्तव्यसनानि सर्वस्मिन्नेव राजमण्डले प्रायेणावस्थितानि । पुनरेतेष्वपि पूर्वंपूर्वं व्यसनान्युत्तरोत्तरात्कष्टतराणि -- द्यूतान्मद्यपानं कष्टतरं यतो मद्यपानेन मत्तस्य संज्ञाया: शरीरस्य धनस्य च विनाशसंभवो दृश्यते द्यूते तु यदा कदा धनञ्च प्राप्यते तत्प्राप्त्याभानन्दोऽपि जायते । स्त्री संभोगव्यसनाद् द्यूतमेव कष्टदायकम्, द्यूते वैरोद्भव धननाशादयोनीति शास्त्रोक्ता: सन्ति बहवो दोषा:,

---

(१) मनुस्मृति: ७।४९ । (२) श्रीमद्भगवद्गीता १६।२१ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

स्त्रीव्यसने स्वपत्नीगमे त्वपत्यौत्पत्यादि गुणयोगोऽप्यस्ति । मृगयास्त्रीव्यसनयोः स्त्रीव्यसनं दुष्टतरम्, स्त्रीव्यसने (परस्त्रीगमने) धर्मलोपशक्तिहीनादयो बहवो दोषा दृश्यन्ते, मृगयायान्तु व्यायामेनारोग्यादि गुणयोगोऽप्यस्ति, इत्थं कामजचतुष्कस्य पूर्वंपूर्वं दोषा गुरुतराः । क्रोधजेषु त्रिष्वपि वाक्पारुष्या-द्दण्डपारुष्यं दुष्टतरम्, यतो दण्डपारुष्ये साधनोपायरहिता हस्तपादाद्यङ्गच्छे-दादयो दोषाः सन्ति, वाक्पारुष्ये तु दानमानसेवनादिभिः क्षमयितुं शक्यते । अर्थदूषणाद्वाक्पारुष्यं कष्टतरम्, यतो मर्मपीडाकरस्य वाक्प्रहारस्य नास्त्यौषधम्, अर्थदूषणन्तु प्रचुरतरार्थदानात्समाधानं भवति । प्रकारेणानेन क्रोधजेष्वपि पूर्वं पूर्वं व्यसनं दुष्टतरं ज्ञेयम् ।

मानवानां विशेषतो राज्ञां कृतेऽतिशयदुःखकारणेमृत्युव्यसनेस्तः, ते द्वे लोकस्यास्य कृते समाने, किन्तु परलोकस्य कृते तु व्यसनमेव कष्टतरं नरकपात-हेतुत्वादर्थाद् व्यसनप्रसक्तो नराधमो मृते सति रौरवादिनरकं गच्छति । अव्यसनी-मृते तु शास्त्रनिषिद्ध सुरापानादित्यागात्स्वर्गफलमाप्नोति । तथैव प्रोक्तं मनुस्मृतौ --

> व्यसनस्य च मृत्योश्च व्यसनं कष्टमुच्यते ।
> व्यसन्यधोऽधो व्रजति स्वर्यात्यव्यसनी मृतः ॥[1]

अत इह परत्र चातिशय कष्टदायकानि सुरापानादीनि महापातको-पपातकरूपाणि दुर्व्यसनानि यत्नतस्त्यजेद्राजा ।

---

(१) मनुस्मृतिः ७।५३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

विद्याध्ययनम् -

विद्याध्ययनादुत्कृष्टजीवननिर्मित्यां पूर्णसहायका ज्ञानं बुद्धिर्विवेका-दयश्चात्युत्तमागुणाः समुदयन्त्यध्येतरि । येषां प्रभावात्स्वान्तर्हिता जीवना-धोगतेर्हेतवः कामक्रोधादयः शत्रवो विषयप्रसक्त्यादिदुर्गुणाः सुरापानादिदुर्व्यसन-विशेषाश्च विलयं यान्ति, राज्ञः कृतेऽपरिहार्यो विनयभावोऽप्युत्पद्यते, वासना-बद्धेन्द्रियाण्यपि भवन्ति विजितानि । विजितात्मा हि राज्यं सञ्चालयितुं समर्थः । अतो राज्ञा विद्याग्रहणं सर्वथा कर्तव्यम् । विद्यास्वप्यान्वीक्षिकी त्रयी वार्ता दण्डनीतिश्चैताश्चतस्रः सर्वोत्तमाः । तथा चाहकौटिल्यः --

आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्चेति विद्याः[1] ।

दशकुमारचरिते --

चतस्रो राजविद्याः - त्रयी वार्तान्वीक्षिकी दण्डनीतिः[2] ।

मानवमतानुयायिनस्तु त्रयी वार्ता दण्डनीतिश्चेति तिस्रो विद्येत्याहुः, आन्वीक्षिकी तु त्रय्यामेवान्तर्भूता, तस्या एवैका विशिष्टा शाखा न तु पृथङ् रूपा सा, अतोऽस्याः पृथगुल्लेखोऽनत्यावश्यकः । वार्तादण्डनीतिश्चेति द्वे विद्ये स्तः, इति वदन्ति बार्हस्पत्याः । दण्डनीतिरेका विद्येति कथयन्ति शुक्राचार्यस्यानुयायिनः । तेषां मते राज्ञः कृते लोकव्यवहारोपयुक्ता विद्या नितराम-पेक्षिता, त्रयी तु न तादृशी, अस्या अध्ययनेन त्वात्मज्ञानं भवत्यात्मज्ञानेन तु राजकार्य

---

(१) कौटलीयमर्थशास्त्रम् १।२ । (२) दशकुमारचरितम् ८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

न संभम्, तदर्थन्तु शासनशास्त्रस्य (दण्डनीतिः) व्यावहारिकं ज्ञानमपेक्षितम् । पुनः शासन शास्त्रन्तु सर्वासां विद्यानां प्रमुखं स्थानं मूलं कारणञ्च भवतीत्यङ्गीकृतं नीतिज्ञैस्तैः, तस्मात्तस्यैवाध्ययनं कर्तव्यं राज्ञेति[1] । गौतमस्तु द्वे विधे स्वीकरोति -- त्रय्यामान्वीक्षिक्यां वाऽभिविनीतः[2] ऋग्यजुः सामात्मकास्त्रयो वेदास्त्रयी । अथर्ववेदस्तेष्वन्तर्भवति । आन्वीक्षिकी तर्कविद्या । एतयोः सम्यक् शिक्षितो भवेद्राजेति । शुक्रनीतौ तु द्वात्रिंशद्विद्यानां वर्णनमस्ति यथा -- (१) ऋग्वेदः, (२) यजुर्वेदः, (३) सामवेदः, (४) अथर्ववेदश्चैतेचत्वारोवेदाः, (५) आयुर्वेदः, (६) धनुर्वेदः, (७) गान्धर्ववेदः, (८) तन्त्राणिचैतेउपवेदाः, (९) शिक्षा, (१०) व्याकरणं (११) कल्पः, (१२) निरुक्तं, (१३) ज्योतिषं, (१४) छन्दश्चैतानिषडङ्गानि वेदानां (१५) मीमांसा, (१६) तर्कशास्त्रं (१७) सांख्यशास्त्रं, (१८) वेदान्तः, (१९) योगशास्त्रम्, (२०) इतिहासाः, (२१) पुराणानि, (२२) धर्मशास्त्रं, (२३) नास्तिकदर्शनम्, (२४) अर्थशास्त्रं, (२५) कामशास्त्रं, (२६) शिल्पशास्त्रम्, (२७) अलङ्कारशास्त्रं, (२८) काव्यानि, (२९) देशभाषा, (३०) अक्षरौचितोक्तिः, (३१) यवनमतम्, (३२) देशादिधर्मा चैता द्वात्रिंशद् विद्याभि संज्ञिताः[3] ।

पुरुषार्थसाधनोपायभूतानां विद्यानां धर्मस्य च चतुर्दशस्थानानीत्याह योगीश्वरो याज्ञवल्क्यः --

---

(१) कौटलीयार्थशास्त्रम् १।२ ।

(२) गौतमधर्मसूत्रम् २।२।३ ।

(३) शुक्रनीतिः ४।३।२६-३० ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश[1] ॥

केचिदष्टादशमहाविद्या उपस्थापयन्ति, तासु चतुर्दशविद्यास्तु राज्ञी र्यौः शासनसम्बद्धे कौत्सर्षिणाप्यधीताः । ताश्चाष्टादशविद्याश्चैताः --

१- (क) ऋग्यजुःसामाथर्वाख्याश्चत्वारो वेदाः ।

(ख) शिक्षाकल्पव्याकरणादीनि षडङ्गानि ।

(ग) पुराणम्, न्यायः, मीमांसा, धर्मशास्त्रं चैतान्युपाङ्गानि (अत्रोपपुराणानां पुराणेषु, वैशेषिकदर्शनशास्त्रस्य न्यायदर्शने, वेदान्तस्य मीमांसायाम्, रामायणमहाभारतयोः सांख्यादि दर्शनस्य च धर्मशास्त्रे अन्तर्भावः ॥)

(घ) आयुर्वेदः, धनुर्वेदः, गान्धर्ववेदः, अर्थशास्त्रं चैते चत्वार उपवेदाः ।

(अत्र नीतिशास्त्रम्, अश्वशास्त्रम्, गजशास्त्रम्, शिल्पशास्त्रम्, पाकशास्त्रन्चैतेषमर्थ-शास्त्रेऽन्तर्भावः) एता अष्टादशविद्या निगमहाविद्याः ।

२- एवं १२० आगमविद्या अपि सन्ति --

(क) १८ संहिताः

(ख) १४ सिद्धान्ताः

(ग) ६ कल्पाः

(घ) १० यामलं (दृष्टिविज्ञानादीनि नैमित्तिकविज्ञानशास्त्राणि)

(ङ०) ८ डामरम् (उपसंहारसमेतान्याचारशास्त्राणि)

(च) ६४ तन्त्राणि (मणिविज्ञानमन्त्रविज्ञानादीनि)

---

(१) याज्ञवल्क्यस्मृतिः १।३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

३- ततः ६४ कलाः सन्ति शास्त्रोदिताः --

(१) हावभावादिसंयुक्तं नर्तनम्, (२) अनेकवाद्ययन्त्रनिर्माणे तद्वादने च ज्ञानम्, (३) स्त्रीपुंसोर्वस्त्रालङ्कारसन्धानम्, (४) अनेकरूपाविर्भावविधिज्ञानम्, (५) शय्यायां पुष्पादिग्रथनम्, (६) द्यूताद्यनेकक्रीडाभिर्मनोरञ्जनम्, (७) अनेकासनैरतिज्ञानम्, (८) फलपुष्पादीनामासवादिमादकपदार्थनिर्माणज्ञानम्, (९) कीलककण्टकादीनामुत्पाटनं, व्रणोद्भेदनञ्च, (१०) लवणादिरससंयोगादन्नादि पाचनम्, (११) वृक्षफलादीनां संरक्षणं संवर्धनञ्च, (१२) पाषाणभेदनं तद्भस्मकरणं सुवर्णभस्मनिर्माणञ्च, (१३) गुणादिनिर्माणम् , (१४) सुवर्णादिधातूनामोषधीनाञ्च संयोगक्रियाज्ञानं प्रयोगक्रियाज्ञानञ्च, (१५) धातुसांकर्ये पार्थक्यकरणम्, (१६) धात्वादीनामपूर्वरीत्या संयोगकरणम्, (१७) क्षारनिष्कासनज्ञानम्, (१८) पदादिन्यासतः शस्त्रसन्धानाविक्षेपज्ञानम्, (१९) मल्लयुद्धादिज्ञानम्, (२०) अभिलक्षितदेशे यन्त्राद्यस्त्रनिपातनम्, (२१) गजाश्वरथगत्या युद्धस्यायोजनम्, (२२) वाद्यसंकेततो व्यूहरचनादि ज्ञानम्, (२३) पद्मासनादिभिर्मत्स्यकूर्मादिमुद्राभिश्च देवतातोषणम्, (२४) रथसन्चालनज्ञानम्, (२५) गजाश्वादेर्गतिशिक्षा, (२९) मृत्तिकाकाष्ठपाषाणधातुना भाण्डनिर्माणम्, (३०) चित्रलेखनम्, (३१) वास्तुविद्याज्ञानं (प्रासादनिर्माणम्), (३२) घट्याद्यनेकयन्त्रनिर्माणम्, (३३) विविधवाद्ययन्त्रनिर्माणम्, (३४) रक्तकृष्णपीतादिभिर्विविधवर्णैर्वस्त्रादिरञ्जनम्, (३५) जलवायुवह्निसंयोगनिरोधैर्वाष्पयन्त्रनिर्माणम्, (३६) नौकारथादियानानां निर्माणम्, (३७) सूत्रादिभी रज्जुनिर्माणम्, (३८) अनेकतन्तुसंयोगैः पटबन्धः, (३९) रत्नानां वेधादिसदसज्ज्ञानम्, (४०) कृत्रिम-

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

स्वर्णरत्नादि निर्माणम्, (४१) स्वर्णादिरत्नपरीक्षा, (४२) स्वर्णालंकार-निर्माणम् (४३) चर्मणां मार्दवादिक्रियाज्ञानम्, (४४) पशुचर्माङ्गनिर्हाराक्रिया-ज्ञानम्, (४५) दुग्धदोहनघृतनिर्माणादिक्रियाज्ञानम्, (४६) वस्त्रसीवनादिज्ञानम्, (४७) बाहुवादिभिर्नदीतरणम्, (४८) गृहभाण्डादेर्मार्जनादिकलाज्ञानम्, (४९) वस्त्रक्षालनं संमार्जनञ्च, (५०) केशकर्तनम्, (५१) तिलादीनां तैलनिष्कासनम्, (५२) सीराद्याकर्षणे वृक्षाद्यारोहणे च ज्ञानम्, (५३) मनोऽनुकूलसेवाज्ञानम्, (५४) वंशतृणादीनां पात्रनिर्माणम्, (५५) काचसीसकादीनां पात्रनिर्माणम्, (५६) जलसेचनं संहरणं निष्कासनञ्च, (५७) लोहास्त्रशस्त्रनिर्माणम्, (५८) गजाश्ववृषभोष्ट्राणां पृष्ठोपरिस्थापनयोग्यपल्ययनादि निर्माणम्, (५९) शिशुसंरक्षणे धारणे क्रीडने च ज्ञानम्, (६०) अपराधिजने मारणताडनादिक्रिया-ज्ञानम्, (६१) नानादेशीयवर्णानां सम्यग्लेखनम्, (६२) ताम्बूलपत्रस्थापनक्रिया-ज्ञानम्, (६३-६४) शीघ्ररूपेण विलम्बे न च कलोत्पादनन्वितः सर्वाः क्रियाः कलाः स्मृताः ।

चतुः षष्टिकला ह्येताः संक्षेपेण निदर्शिताः । [१]
यां यां कलां समाश्रित्य तां तां कुर्यात्स एव हि ।।

जैनग्रन्थे द्विसप्ततिकला वर्णिताः [२] (कलाविषयोर्विषये विदुषामेतद्विधो मतभेदोऽस्ति, किन्त्वधिकानां मतेकलाश्चतुःषष्ठिमिताः, विद्याश्चतस्र एव । राजनीतौ विशिष्टं स्थानं प्राप्तवन्तौ मनुकौटिल्यावपि विद्याश्चतस्र एव दर्शयतः । चतस्रो विद्याः स्वीकृत्यतासामध्ययनमाध्यमं चाह मनुस्मृतौ मनुः --

---

(१) शुक्रनीतिः ४।३।६७-२०१ । (२) हिन्दूराज्यशास्त्रम् पृ० ३३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

त्रैविद्येभ्यस्त्रयीं विद्यां दण्डनीतिं च शाश्वतीम् ।
आन्वीक्षिकीं चात्मविद्यां वार्तारम्भांश्च लोकत: ॥[१]

राज्ञाध्ययनीयाश्चैतासु विद्यास्वेवोपर्युक्ता: सर्वा विद्या: कलाश्च भवन्त्यन्तर्निहिता: । तस्मादेताश्चतस्रो धर्मार्थादि पुरुषार्थ साधने सर्वोत्कृष्ट-ज्ञानोत्पादने राज्यसञ्चालनसम्बन्धि विशिष्टज्ञानोत्पादने च प्रमुखकारणरूपा: । एतासु त्रय्येवोच्चतमा । ऋग्यजुसामाख्यास्त्रयो वेदास्त्रयी । अथर्ववेदेतिहासादयोऽपि त्रय्यन्तर्गता:, (१) उच्चारणादीनामुपदेशकं कात्यायनादिभिर्विरचितं शिक्षा-शास्त्रम्, (२) आश्वलायनादिभिर्विनिर्मितं यज्ञयागादीनां क्रमिकविधानस्योपदेशकं कल्पशास्त्रम्, (३) शब्दशुद्ध्यादीनामुपदेशकं पाणिन्यादिभि: कल्पितं व्याकरण-शास्त्रम्, (४) शब्दार्थनिर्वचनस्योपदेशकं यास्काचार्यरचितं निरुक्तशास्त्रम्, (५) ग्रहगत्यादीनां प्रतिपादकं ब्रह्मणा निर्दिष्टं ज्योतिषशास्त्रञ्चैतानि षड्ङ्गानि । एतानि वेदस्य हस्तपादाद्यङ्गेषु परिगणितानि, अथदितेभ्योहस्तपादाद्यङ्गानां कार्यं यद्भवेत्तदेव संपद्यते ।

छन्द: पादौ तु वेदस्य हस्तौ कल्पोऽथपठ्यते ।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥
शिक्षाघ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ॥[२]

एषा षडङ्गा त्रयी ब्राह्मणादि वर्णानां ब्रह्मचर्याद्याश्रमाणाञ्च सर्वधर्मं निरूप्य कर्तव्याकर्तव्योपदेशञ्च विदधाति । एतदनुरूपमत्युच्चमायामार्यमर्यादा-

---

मनुस्मृति: ७।४३
(१) [illegible] । (२) छन्द [illegible]शास्त्रम् ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

यामवस्थिता वर्णाश्रमधर्मनिरतास्त्रयोक्तेन धर्मेण पालिता रक्षिताश्च प्रजाजनाः सदैव कुर्वन्ति सुखानुभवम् । एतदेवोक्तं कौटिल्येन --

व्यवस्थितार्यमर्यादः कृतवर्णाश्रमस्थितिः ।[1]
त्रय्या हि रक्षितो लोकः प्रसीदति न सीदति ।।

प्रकृतिपुरुषयोस्तत्त्वज्ञानोत्पादकं महामुनिकपिलोपदिष्टं सांख्यशास्त्रम्, तत्त्वज्ञानोत्पादकं महेश्वरोपकल्पितं योगशास्त्रम्, लोकव्यवहारस्य विशिष्ट-ज्ञानोत्पादकं गर्गादिभिरुपदिष्टं दर्शनशास्त्रम्, चार्वाकप्रदर्शितं नास्तिकदर्शनञ्चेता-न्यान्वीक्षिकीति नाम्ना प्रसिद्धानि । एषाऽऽन्वीक्षिकी समुचितं मार्गं प्रदर्श्य लोकमुपकरोति, लोके प्रकृष्टं ज्ञानं वितरति, सुखदुःखादौ बुद्धिं यथार्थतायामवस्थाप-यति । अतः सा सर्वासां विद्यानां प्रदीपरूपा, समस्तानां कर्मणां प्रारम्भात्समाप्त्यन्तं प्रतिभाया विवेकस्य चोत्पादने साधनरूपा, वैदिकलौकिकादीनां सर्वेषां धर्माणामाधाररूपा च ।

प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम् ।[2]
आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता ।।

कृषिपशुपालनवाणिज्यानामुपदेशकं वार्ताशास्त्रम् । लोकजीवननिर्वाहोप-युक्तसाधनानां धान्यपशुहिरण्यताम्रादीनामुत्पादने ज्ञानोत्पादकमेतत् । ज्ञानस्यास्य प्रयोगाऽऽपार्जितधनधान्यादिभिः स्वपक्षं परपक्षं च वशीकरोति राजा ।

"कृषिपाशुपाल्ये वाणिज्या च वार्ता । धान्यपशुहिरण्यकुप्यविष्ट-

---

(१) कौटलीयार्थशास्त्रम् १।२ । (२) कौटलीयार्थशास्त्रम् १।१ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

प्रदानादीपकारिकी । तया स्वपक्षं परपक्षं च वशीकरोति कोशदण्डाभ्याम्[1] ।

आन्वीक्षिकीत्रयीवार्तानां योगक्षेमसाधने दण्ड एव मुख्यः । तत्सम्बद्धा नीतिरिय दण्डनीतिः । अस्या आधार एव राज्य व्यवस्था भवति सञ्चालिता संरक्षिता च, अस्या अभावे न जीवति राज्यं लोकश्च । राज्ञो दण्डव्यवस्थया सुरक्षितो लोक स्व स्व मर्यादायां भवति मर्यादितो धर्मानुष्ठान-रतश्च ।

चतुर्वर्णाश्रमो लोको राजा दण्डेन पालितः ।
स्वधर्मकर्माभिरतो वर्तते स्वेषु वेश्मसु[2] ।।

एतासां विद्यानां कलानाञ्चाध्ययनं विधायोत्कृष्टजीवननिर्माणं कुर्याद्राजा । एतद्विधस्योन्नतमज्ञानसम्पन्नस्य राज्ञः सत्प्रयास एव राष्ट्रस्य सर्व-विधानां पक्षाणां विकासः संभवः ।

प्रजापालनं राज्ञः कर्तव्यम् -

प्रजापालनमेव राज्ञः प्रधानं कर्तव्यमेतद्धर्मान्तरेभ्यः प्रकृष्टो धर्मश्च क्षत्रियस्य परो धर्मः प्रजानामेव पालनम्[3] इत्युक्तत्वात् । प्रायोऽशेषैः शास्त्रप्रयोजकैर्मतमेतत्समर्थितम् । चौरारिवञ्चकान्यायिनो लोकघातकाः, एतेभ्योऽग्निजलोल्कापातदुर्भिक्षादिभिश्च प्रजानां तासां धनस्य च रक्षणं

---

(१) कौटलीयार्थशास्त्रम् १।३ । (२) कौटलीयार्थशास्त्रम् १।३ ।
(३) मनुस्मृतिः ७।१४४ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

प्रजापालनस्य तात्पर्यम् ।

तत्प्रजापालनं प्रोक्तं त्रिविधं न्यायवेदिभिः[1] ।
परचक्राच्चौरभयाद् बलिनोऽन्यायवर्तिनः ।।

प्रसङ्गेऽस्मिन् गौतमः — "राज्ञोऽधिकं रक्षणं सर्वभूतानाम्, न्याय्यदण्डत्वम् ।"[2] सर्वविधानां प्राणिनामश्वत्थादीनां स्थावराणाञ्च सर्वतो रक्षणम्, शास्त्रीयनियमस्याधारे वर्णाश्रमव्यवस्थायाः परिपालनम्, पथभ्रष्टेभ्यः सन्मार्गप्रदर्शनम्, न्यायोचितदण्डप्रदानञ्चाभिषिक्तस्य राज्ञो विशिष्टं कर्तव्यम् । अरक्षमाणस्यार्थात्कर्तव्यहीनस्य भूपतेर्बिलस्थानां मूषकादीनां यादृशी स्थितिः स्यात् तादृश्येव स्थितिर्भवति । इदमेवास्माकं सुरक्षितं निवासस्थानमिति मत्वा मूषकमण्डूकादयो बिले निवसन्ति, किन्त्वकस्माच्चैव भवन्ति व्यालभक्षिताः, तथैवारक्षमाणं शत्रोरविरोद्धारं च पार्थिवं विनाशयति पृथिवी, अर्थादरक्षको राजा शीघ्रमेव विनाशावस्थामाप्नोति । उक्तञ्च महाभारते —

भूमिरेतौ निगिरति सर्पो बिलशयानिव ।
राजानं चाविरोद्धारं ब्राह्मणं चाप्रवासिनम्[3] ।।

अतः प्रजापालनं शत्रोस्तिरस्कारञ्च यत्नतः कुर्याद्राजा । धर्मशास्त्रोक्तविधानेन प्रजापालको राजा परिपालितप्रजोपार्जितपुण्यात्षड्भागं गृह्णाति, यस्माद्भूम्यादिदानेभ्योऽधिकं फलञ्च लभते । तस्मात्प्रजासु यथा

---

(१) बृहस्पतिः (राजनीतिप्रकाशः, पृ० २५४) ।

(२) गौतमधर्मसूत्रम् २।१।७-८ । (३) शान्ति० २३।१५ ।

CC-0 Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

पिता तथैवस्यात् । तच्च यथा --

पुण्यात्षड्भागमादत्ते न्यायेन परिपालयन् ।
सर्वदानाधिकं यस्मात्प्रजानां परिपालनम्[1] ।।

नारदेन षड्विधानि राज्ञः कर्तव्यानि प्रतिपादितानि । तानि चैतद्विधानि -- (१) प्रजापालनम्, (२) वर्णाश्रमधर्मरक्षणम्, (३) दुष्टदमनम्, (४) न्यायस्यसुव्यवस्थाकरणम्, (५) परितोराष्ट्ररक्षणम्, (६) देशस्य जनानाञ्च रक्षणोद्देश्येन युद्धकरणञ्चैतानि प्रमुखाणि । अवशिष्टान्यन्यानि त्वेतेष्वेवान्तर्भूतान्यस्यमते ।

केचिदाचार्याः पञ्चविधानि कर्तव्यानि प्रदर्शयन्ति, यानि यज्ञ-रूपाणि सन्ति । तानि च यथा (१) दुर्जनेभ्यो दण्डप्रदानम्, (२) सज्जनानां सत्कारः, (३) धर्मोपार्जितधनेनकोशवर्धनम्, (४) न केषुचिदपि पक्षपातकरणम्, (५) राष्ट्ररक्षणञ्चैतानि सर्वपापोपशमनानि कर्तव्यानि । उक्तञ्च --

दुष्टस्य दण्डः सुजनस्य पूजा, न्यायेन कोशस्य च संप्रवृद्धिः ।
अपक्षपातोऽर्थिषु राष्ट्ररक्षा पञ्चैव यज्ञाः कथिता नृपाणाम्[2] ।।

अन्यच्च --

दुष्टदण्डः सतां पूजा धर्मेण च धनार्जनम् ।
राष्ट्ररक्षा समत्वं च व्यवहारेषु पञ्चकम् ।।
भूमिपानां महायज्ञाः सर्वकल्मषनाशनाः[3] ।

---

(१) याज्ञवल्क्यस्मृतिः १।३३५ । (२) अत्रिः २८ मूलो० ।
(३) विष्णुधर्मोत्तरपुराणम् ३।३२३(२५-२६) ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

शुक्राचार्येण तु केवले द्विविधे कर्तव्ये समुपस्थापिते --

नृपस्य परमो धर्मः प्रजानां परिपालनम् ।
दुष्टनिग्रहणं नित्यं च नीत्याऽतो विना ह्युभे ।।[1]

इत्थं केचिद् द्विविधानि केचित्पन्चविधानि केचित्षड्विधानि केचित्वनेकविधानि कर्तव्यान्युपदिशन्ति, न केषाञ्चिदपि मतैक्यमुपलभ्यते, तथापि मूलं कर्तव्यन्तु सर्वेषामेकमेव, तत्प्रजापालनम् । एतदपि बहुविधैरुपायैः परीक्ष्यः सम्भवम् । तेषामधो निर्दिश्यन्ते ।

शत्रुदमनेन प्रजापालनम् -

राज्ये यदि शत्रूणां दुर्जनानां वा प्राबल्यं भवेत्तदा सुशासनं न सम्भवम् । तस्याभावे प्रजा भवन्त्यनेकोपद्रवपीडिताः । तदा तासां रक्षणं कर्तव्यं राज्ञा । तदर्थं प्रथमं मारुताचरणमाचरेद्राजा मारुतो स यथा सर्वप्राणिष्वन्तः प्रविश्य विचरति, तथैव गुप्तचरादिभिः स्वमण्डलेषु शत्रुमण्डलेषु च शत्रोर्गतिः स्थितेः शक्तेः क्रियाकलापादीनाञ्चान्वेषणं ज्ञानञ्च कर्तव्यम् । ततो येनोपायेन तस्य विनाशः सम्भवः स एवावलम्बनीयः । यदि युद्धमेव तस्य विनाशस्य दमनस्य वा कारणमस्ति तदा तदपि स्वीकर्तव्यम् । प्रजारक्षणोद्देश्येन कृतं युद्धन्तु धर्मानुकूलमेव । धर्मयुद्धे कश्चिन्मरणं गच्छति चेत्तदा स सद्गतिमाप्नोति । समानाधिकहीनबलैर्युद्धार्थमाहूतोराजा प्रजारक्षणादिकं

---

(१) शुक्रनीतिः १।१४ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

स्वं कर्तव्यं कुर्वन् युद्धान् न निवर्तेत, क्षात्रं धर्मं स्मरता क्षत्रियेणावश्यं योद्धव्यम् । प्रजारक्षणाय युद्धेष्वपराङ्मुखत्वं राज्ञोऽत्यन्तं स्वर्गादि श्रेयः साधनम् । मिथः स्पर्धमाना राजानो युद्धेष्वन्योन्यं हन्तुमिच्छन्तः प्रकृष्टया शक्त्या संमुखीभूय युद्धमानाः स्वर्गं गच्छन्ति । यद्यपि युद्धस्य दृष्टं फलन्त्वस्ति, नत्वदृष्टमिति चेन्न, यतोऽपराङ्मुखत्व नियमकारणात्स्वर्गफलन्तु निश्चितमेव ।

आहवेषु मिथोऽन्योन्यं जिघांसन्तो महीक्षितः ।
युध्यमानाः परं शक्त्या स्वर्गं यान्त्यपराङ्मुखाः ॥[६]

युद्धमेतद्विधमथाद्धर्मयुद्धमप्युपायान्तरसम्भवेसति न प्रयोज्यम् । यदा सामदानभेदैरन्यैश्चाप्युपायैर्यदि शत्रवो यथास्थितिं नायान्ति तदा युद्धेनापि शत्रुदमनं विधाय प्रजापालनं कर्तव्यं राज्ञा । ब्राह्मणादीनां प्रजानां गवादीनां पशूनाञ्च रक्षणं राज्ञः परं कर्तव्यम्, कर्तव्यपालनाय युद्धमानाराजानः स्वर्गतिमाप्नुवन्ति । तद्यथा महाभारते --

प्रजानां पालने युक्ता धर्ममुत्तममास्थिताः ।
गोब्राह्मणार्थे युद्धयन्तः प्राप्तागतिमनुत्तमाम् ॥[२१]

भयेभ्यः प्रजारक्षणम् -

प्रजासु विविधेभ्यः पक्षेभ्यो भयमुत्पद्यते, तथापि पञ्चविधानि भयानित्वत्युत्कटानीत्याह नीतिज्ञः कामन्दकः । तानि चैतानि -- (१) कर्मचारिभ्य उत्पन्नं भयम्, (२) चौरभयम्, (३) शत्रुभयम्, (४) राज्ञः प्रिय-

CC.O Sampurnanand University Collection. Digitized by eGangotri

टिप्पणी: अग्रिमपृष्ठेऽपि

CC.O Sampurnanand University Collection. Digitized by eGangotri

कर्मेभ्यः समुत्पन्नं भयम्, (५) लुब्धान्नृपतेरुत्पन्नं भयञ्चैतेभ्यः प्रजा भवन्ति सततं भीताः । शक्तिसम्पन्नेभ्यो कर्मेभ्यो निर्गतत्वादे तेषां परिहारो निर्बलेभ्यः सर्वसाधारणजनेभ्यो न संभवः । अत एतेषां भयप्रदानां कार्णां सामादिभिरूपायैर्दमनं कृत्वा भयाकुलाप्रजानिर्भया विधेया राज्ञा । तथथा --

आयुक्तकेभ्यश्चौरेभ्यः परेभ्यो राजवल्लभात् ।
पृथिवीपतिलोभाच्च प्रजानां पञ्चधाभयम् ।।
पञ्चप्रकारमप्येतदपोह्यं नृपतेर्भयम्[3] ।

अनाथादीनां रक्षणम् -

गुरुकुलान्निवृत्तानामधीतवेदानां ब्राह्मणानां पुरोहितानां याज्ञिकानाञ्च वस्त्रद्रव्यादिना यथाकालं सत्कारं दीनानाथवृद्धबालपङ्गवन्धबधिरोन्मत्तातुरासमाध्यरोगग्रस्तगर्भवत्यसहायविधवानामन्नधनवस्त्रौषधनिवासस्थानादिभिर्नित्यमेव सहयोगं कुर्याद्राजा ।

कृपणानाथवृद्धानां विधवानाञ्च योषिताम् ।
योगक्षेमञ्च वृत्तिञ्च नित्यमेव प्रकल्पयेत्[4] ।।

ये पङ्गवन्धादिकारणेन वस्त्रान्नादीन्युपभोग्यवस्तून्युपार्जयितुम-

समक्षा-----------------------------

पूर्वपृष्ठस्याग्रे -------

(१) मनुस्मृतिः ७।८६ । (२) शान्ति० २१।२६ ।
(३) कामन्दकीयनीतिसारः ५।८२-८३ । (४) शान्ति० ८७।२४ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

समर्था स्ते तदर्थं राज्ञे विनिवेदयन्ति, निवेदितेन राज्ञापि तेषां वास्तविकीं स्थितिं ज्ञात्वा यथोचितसहयोगः कर्तव्यः । राज्ञोऽनुग्रहेण पालिता रक्षिताश्च तेऽपि तस्यानुज्ञापालनं कुर्युः । पुनरेतेषामप्राप्तव्यवहाराणाञ्च धनद्रव्यादिकं यद्भवेत्तदपि रक्षणीयं राज्ञा । अप्राप्तवयस्कानां धनादिरक्षणमाव्यवहार-प्रापणात्कर्तव्यम् । "रक्षं बालधनमाव्यवहारप्रापणात्[1]" इत्युक्तत्वात् । कौटिल्यस्तु बालधनं देवधनञ्च ग्रामवृद्धा रक्षन्ति वर्धयन्ति च न राजेत्याह । असहायानां स्त्रीणाञ्च रक्षकस्तु राजैव न त्वन्ये वृद्धादयः । यासां स्त्रीणां रक्षकः पतिकुले पितृकुले च न कोऽपि विद्यते तदा तासां पालनं रक्षणञ्च कर्तव्यं राज्ञा । उक्तञ्च --

पक्षद्वयावसाने तु राजा भर्ता प्रभुः स्त्रियाः ।

दुर्भिक्षादौ प्रजारक्षणम् -

दुर्भिक्षादौ दैवीप्रकोपे च बीजान्नवस्त्रौषधद्रव्यादिभिरापद्ग्रस्तेभ्यः प्रजाभ्यो यथासंभवं सहयोगः प्रदातव्यः । वस्तुतआपज्जनकं दुर्भिक्षादिकञ्च जलानलामयशलभादिभ्यः समुत्पद्यते । आपतितापन्निवारणाय यावद्धनान्नादिक-मपेक्षितम्, तावद्धनादिकं नोपलभ्यमर्थादार्थिकसंकटे सति मित्रराष्ट्रादावश्यक-द्रव्यान्नादिकमादाय जनानामापन्निवारणमवश्यकर्तव्यं राज्ञा । विशेषत आपज्जनकेषु ईतयः प्रसिद्धाः ताश्च षड्विधाः --

---

(१) गौतमधर्मसूत्रम् २।१।४८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अतिवृष्टिरनावृष्टिर्मूषकाः शलभाः शुकाः ।
अत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः[1] ॥

एवञ्च कामन्दकः--

हुताशनो जलं व्याधिर्दुर्भिक्षो मरकस्तथा । इति पञ्चविधं दैवं[2]--- ।

यदेताभ्यः प्रजा भवन्ति पीडितास्तदेतासां धनान्नवस्त्रौषधादिभिर्यत्नतो रक्षणं कर्तव्यं राज्ञा । अतिवृष्ट्यनावृष्ट्यादिभिरसह्यं दुर्भिक्षमापतति लोके, एतादृशानां दुर्भिक्षाणामुदाहरणान्यप्युपलभ्यन्ते - पुरा राज्ञो रोमपादस्य शासनसमयेऽङ्गदेशवासिनो दुर्भिक्षग्रस्ता जाताः । तस्यामवस्थायां तत्र धान्याधन्न विनाशकानां शलभादिकीटविशेषाणामागमनेनोत्पन्नं तद्दुर्भिक्षमित्याहुः केचित्, किन्तु रामायणेत्वनावृष्ट्या समुत्पन्नं तदित्युल्लेखोऽस्ति --

अनावृष्टिः सुघोरावै सर्वभूतभयावहा ।
अनावृष्ट्यां तु वृत्तायां राजादुःखसमन्वितः[3] ॥

राज्ञः शन्तनोः शासनकालेऽपि द्वादशवर्षपर्यन्तं वृष्टिर्नाभूत् वृष्ट्यभावेन घोरं दुर्भिक्षं जातम्[4] । तदा सर्वकारतो दुर्भिक्षपीडितेभ्यो गण्डकास्था मुद्राप्रदत्ता, एवं वस्त्रान्नादिकञ्च दत्तम् । राजतरङ्गिण्यामपि दुर्भिक्षस्य दुर्भिक्षे राज्ञः सहयोगस्य च चर्चोपलब्धा । दक्षिणभारतस्य काञ्चीपुर्यामपि द्वादशवर्षान्तं दुर्भिक्षं जातम्, तत्रापि यथा सम्भवं सहयोगः कृतः सर्वकारेणेति वर्णनमस्ति मणिमेखलायाम्[5] । इत्थं दुर्भिक्षो दैवी प्रकोपे च जनानां

---

(१) रा०नी०प्र०, पृ० ४४७ । (२) का०नी० सा० १३।२० ।
(३) रामायणम् १।६।७-८ । (४) निरुक्तम् (ध०शा०इ०भा०२ पृ० ५५७) ।
(५) म० मे० अ० २८ (ध० शा० इ० भा०-२, पृ० ५५७) ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

सहयोगं पुरापि राजानः कुर्वन्तिस्म एतद्विधं प्रचलनमद्याप्यथावदस्ति ।

मनुनोपदिष्टं राज्ञोदैनिकं कर्तव्यम् -

राज्ञानुष्ठितेन दैनिककर्मणापि प्रजा भवन्ति संरक्षिताः परिपालिताश्च, तस्मात्तत्प्रदर्शनमप्यनिवार्यमितिमन्यमानाः शास्त्रप्रयोजका राज्ञा प्रत्यहमनुष्ठेयं कर्तव्यमप्युप देशयन्ति । तदुपदेशकेषु मनुरेवोत्कर्षतां याति, अतोऽत्रापि प्रथमं तस्यैवमतोपस्थापनं युक्तिसङ्गतमिति मत्वोपस्थाप्यते -- रात्रेः पश्चिमयाम उत्थाय मूत्रपुरीषोत्सर्गादि शौचविधिं कृत्वाग्निहोत्र - हवनादिकं विधाय ब्राह्मणान्पूजयित्वा वास्तुलक्षणायुक्तां सभां प्रविशेद्राजा । सभायां समुपस्थितो राजा दर्शनार्थमागताः सर्वाः प्रजाः प्रियवचनदर्शनादिभिः प्रतिनन्द्य विसर्जयेत् । ततो मन्त्रिभिः सह राज्यसञ्चालनसम्बन्धीन्यशेषाणि कार्याणि चिन्तयेत् । पुनर्मन्त्रभेदकारिभिरनुपलक्षिते देशे पञ्चाङ्गं मन्त्रं विचारयेत् । मन्त्रितं मन्त्रं मन्त्रिभ्योऽन्ये न जानन्ति चेद्राजा सर्वत्र सफलतामत्यद्भुतं सुखञ्चाप्नोति, अतो मन्त्रो गोपनीयः । ततो मध्यदिने धर्मार्थादीन् पुरुषार्थान् चिन्तयेत् । एवं कन्यादानस्य तथा राजकुमारस्य च शिक्षण रक्षणादि विषय विचारं कुर्यात् । पुनः परराष्ट्रे दूतसंप्रेषणं गुप्तचरप्रस्थापनं प्रारब्धकार्यशेषं समापयितुं च चिन्तयेत् । एवमात्मरक्षार्थमन्तः पुरस्त्रीणां क्रियाकलापं सखीदास्यादिना निरूपयेयतः स्त्रीणामतिविषमव्यवहारत्वात् । तथा हि --

शस्त्रेणवेणीविनिगूहितेन विदूरथं वै महिषी जघान ।
विषप्रदिग्धेन च नूपुरेण देवी विरक्ता किल काशिराजम् ।।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

एवमष्टविधानि कर्माणि चिन्तयेत्, तानि च यथा -- (१) प्रजाभ्यः शास्त्रोक्तकरग्रहणम्, (२) ब्राह्मणेभ्यो भृत्यवर्गेभ्यो दीनानाथेभ्यश्च वस्त्रान्न द्रव्यादि दानम्, (३) अमात्यानां सचिवाद्युच्चपदस्थानां विभागाध्यक्षाणाञ्च प्रत्यक्षाप्रत्यक्षकार्याणामनुशीलनं तथ्यज्ञानोत्पादनञ्च, (४) लोकप्रचलितायाः शास्त्रविरुद्धक्रियायाः प्रतिषेधकरणम्, (५) अमात्यादिभिः कृतः कार्यविशेषो निर्णयो वा संदिग्धो लोकप्रतिकूलो वा भवेच्चेत् तद्विशुद्ध्यर्थं तेभ्य आज्ञाप्रदानम्, (६) निरन्तरं लोकव्यवहारस्येक्षणम्, (७) व्यवहारपराजितेभ्यो दुष्कार्य-प्रवृत्तेभ्यो दुर्जनेभ्यश्च यथोचितदण्डप्रदानम्, शास्त्रोक्तधनग्रहणञ्च (८) पापकारिणं तथासद्वृत्तं प्रति प्रायश्चित्तस्योपदेशकरणञ्चैतान्यष्टविधानि कर्माणि तत्त्वत-श्चिन्तनीयानि । तच्चौशनसोक्तम् --

आदाने च विसर्गे च तथा प्रेषनिषेधयोः ।
पञ्चमे चार्थवचने व्यवहारस्य चेक्षणे ॥
दण्डशुद्ध्योः सदा युक्तस्तेनाष्टगतिको नृपः ।
अष्टकर्मा दिवं याति राजा शक्राभिपूजितः ॥

इत्थं सर्वं राजकार्यं विधाययुधाभ्यासादिना व्यायामं विधाय मध्यान्हिकं कृत्यञ्च निर्वाह्य भोक्तुमन्तः पुरं प्रविशेत् । भोजनागारं गत्वा-त्मतुल्यैः परिचारकैः सुपरीक्षितं विषापहैर्मन्त्रैर्मन्त्रितं सुभोजनं कुर्यात् । सर्वेषु भोज्यपदार्थेषु विषनाशकौषधप्रक्षेपणमनिवार्यम् विषहरणानि रत्नानि च सदैवावधार्याणि । कृतभोजनो राजा राज्ञीभिः सह क्रीडेत् । ततो विहृत्य

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

पुना राजकार्याणि चिन्तयेत्[१] ।

कौटिल्यमते राज्ञो दैनिकं कर्तव्यम् -

दिनमानं रात्रिमानञ्चाष्टधा विभज्य दिवसस्य (१) प्रथमे भागे रक्षाविधानमायव्ययसम्बन्धिकार्यं विवरणञ्च शृणुयात् । (२) द्वितीये पौरजानपदानां कार्याणि पश्येत् । (३) तृतीये स्नानं विद्याध्ययनं भोजनञ्च कुर्यात् । (४) चतुर्थे विभागाध्यक्षाणां कार्यविवरणं पश्येत्, पुनस्तत्रैव तेभ्य आवश्यकं निर्देशनञ्च दद्यात् । (५) पञ्चमे मन्त्रिभिः सह मन्त्रणं गुप्तचरैः सह गुह्यवार्ता च । (६) षष्ठे स्वेच्छानुसारं विहारं । (७) सप्तमे हस्त्यानामश्वानां रथानां शस्त्रास्त्रादीनाञ्च निरीक्षणम् । (८) अष्टमे भागे सेनापतिना सह सैन्यसञ्चालनसम्बन्धि कार्यं युद्धसम्बन्धिकार्यं विचारञ्च कुर्यात् । ततो दिनान्ते सन्ध्यावन्दनादिकं विधेयम् । पुनः (१) प्रथमे रात्रिभागे गूढपुरुषैः सह गुह्यविषयवार्ताम् । (२) द्वितीयेऽध्ययनं भोजनञ्च । (३) तृतीये गीतवाद्यादिकं श्रुत्वा (४-५) चतुर्थे पञ्चमे च शयनं कुर्यात् । (६) षष्ठे पटहादीनां वाद्यविशेषाणां घोषेण प्रबुद्धो राजा शास्त्रमितिकर्तव्यतां च चिन्तयेत् । (७) मन्त्रणं गुप्तचरप्रेषणञ्च कुर्यात् । (८) अष्टमे ऋत्विगाचार्यपुरोहितादिभ्यो मङ्गलपाठं श्रुत्वाशीर्वादञ्चादाय गां वृषभं च प्रदक्षिणी कृत्य सभाभवनं गच्छेत्[२] ।

प्रकारेणानेन मनुकौटिल्यौ राज्ञो दैनिकं कर्मप्रतिपादयतः । किन्त्वेतयो

---

(१) मनुस्मृतिः ७।१४५-१५५, २१६-२२२ । (२) कौटलीयार्थशास्त्रम् १।१९

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

नैत्वैकमत्यम् । एवमेव भूयांसो नीतिज्ञा राज्ञः कर्तव्यमुपदिशन्ति किन्तु न केऽप्यैकमत्यं जनयन्ति । केचित्वहोरात्रं त्रिंशन्मुहूर्तेषु विभज्य यस्मिन्यत्कार्यमुचितं तद्विधाय कालं यापयेन्न स्त्रीमद्यसेवनादिभिरित्याहुः । यथाकालं सर्वं राजकार्यं समाप्य सम्यग्रूपेण प्रजापालकोराजेहकीर्तिं प्रेत्य च स्वर्गमाप्नोति । अतस्तस्य कृते यज्ञाद्यन्यधर्मानुष्ठानस्य नैव प्रयोजनम्, यतः प्रजापालनादेव स्वर्गादि फलं सिद्ध्यति । राज्ञः सुशासनेनैव प्रजा भवन्ति सुखिनः, प्रजासुखे राजन्यापि सुखानुभूतिः, प्रजानां दुःखे सोऽपि दुःखितः । अतः सुशासने यत्नशीलो भवेद्राजा । अस्मादेव प्रजा भवन्ति रञ्जिताः । प्रजारञ्जनमेवात्र राज्ञां धर्मः सनातनः ।

सरस्वती भवन पुस्तकालय
आगत संख्या 166840
सम्पूर्णानन्द संस्कृत विश्वविद्यालय

कृषिव्यवस्था -

मानवानां प्राणरक्षकाणि धान्याधन्नानि प्राणपोषकाण्याम्रपनसादीनि फलान्यनेकानि कन्दमूलानि विविधानि शाकानि वस्त्रोत्पादनाधाररूपसूत्रदानि कार्पासतूलशणादीनि च कृष्या एव प्रभवन्ति । अतोऽस्याः सुव्यवस्थां विधाय जनान् कृषिफलान्वितान् कुर्याद्राजा । एतदर्थमुपर्युक्तानां सर्वेषां वस्तूनामधिकोत्पादनं कर्तव्यम् । तदर्थं बीजबीजाङ्कुरपोषकतत्त्वानाम्, बीजानामङ्कुराणाम् बीजघातककीटनाशकौषधस्य, कुद्दालादीनां कृषेरुपकरणानाम्, जलस्य कृषिविशेषज्ञानां च सुप्रबन्धो विधातव्यः । विशेषतो धान्याधन्नानि तु मानवानां प्राणधारकाण्येव । अत एतेषामभिवृद्धिर्नितरामपेक्षिता । एतदर्थं विशेषरूपेण जलाधारादयो व्यवस्थापनीयाः, जलमेवान्नोत्पत्तेर्मूलकारणत्वात् । यत्र क्षेत्रं पर्याप्तजलोपेतं तदेकस्मिन्वर्षे वारद्वयं धान्यमुत्पादयति "तस्माद् द्विः संवत्सरस्य सस्यं पच्यते" । शुक्लयजुर्वेदे धान्य-

---

(१) लोकेगोमयादीनां रासायनिकपदार्थानाञ्च प्रयोगो दृश्यते ।

CC-0 Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

यवमाषादीनां द्वादशविधानामन्नानामुल्लेखोऽस्ति यथा --

'व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे प्रियङ्गवश्च मेऽणवश्च मे श्यामाकाश्च मे नीवाराश्च मे गोधूमाश्च मे मसूराश्च मे यज्ञेन कल्पन्ताम्[१] ।'

बृहदारण्यकोपनिषदि दशविधानां धान्यानां चर्चोपलब्धा -- 'दशविधानि ग्राम्याणि धान्यानीति' ।

एतेषां सर्वविधानां धान्यानां कृते जलमेवापेक्षितं विद्यते । अपेक्षितजलाभावे धान्यस्य नाभिवृद्धिः । अतः कुल्यादीनां नवनिर्माणं विधायापि कृषिविकासः कर्तव्यः । कृषिविस्तारस्योद्देश्येन निर्मितानां कुल्यानामुल्लेख ऋग्वेदेऽप्युपलब्धः । अस्माद् वैदिककालेऽपि कृषिविकासभावना समुदितैव दृश्यते । वैदिककालिकी तद्विधा भावना संप्रत्यपि जाग्रदवस्थायामेवोपलब्धा । एवमेव शुक्रनीतावपि वापीकूपतडागादीनां निर्माणवर्णनमस्ति, यन्निर्माणं कृषिविकासस्योद्देश्येनैव कृतमासीत् ।

कूपवापीपुष्करिण्यस्तडागाः सुगमास्तथा ।
कार्याः खाताद् द्वित्रिगुणविस्तारपद्यान्विका[२] ।।

प्रकारेणानेन सम्प्रत्यपि कृषिविकासं विधाय प्रजानां सहयोगं कुर्याद्राजा ।

पशुपालनम् -

गोमहिषोष्ट्रवराहाजावीकादयोऽनेके भवन्ति पशवः । एतेभ्यो दुग्ध-

---

(१) शुक्लयजुर्वेदः १८।१२ । (२) शुक्रनीतिः ४।४।६३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

दधिघृतमांसचर्मादीनि मानवजीवनस्य कृते सदैवापेक्षितान्यत्युत्तमानि वस्तून्युपलभ्यन्ते । अत एतेषां पालनस्य सुव्यवस्था यत्नतः कर्तव्या । पुनः पशुधनं राष्ट्रवृद्धिकरं राष्ट्रियं धनमिति वदन्ति विद्वांसः । तस्माद्धनस्यास्य संरक्षणं संवर्धनञ्च सर्वथा कर्तव्यम् । पशुविकासार्थं स्थानासनस्य प्रचारणस्य च सुप्रबन्धोऽपि विधेयः । प्रचारार्थं कश्चनोऽपि भूभागोऽकृष्टस्तृणीकादिभि रुपेतो नाति विषमश्च कल्पनीयः । एतादृशो भू-प्रदेशोऽपि ग्रामजनेच्छया राजेच्छया वा विचारणीयः । उक्तञ्च याज्ञवल्क्येन --

ग्राम्येच्छया गोप्रचारो भूमिराजवशेन वा ।[१]

पशुपालनस्यावश्यकव्यवस्थार्थमेकोगोऽध्यक्षाख्योऽधिकारी नियुज्यते । राज्ञो निर्देशानुसारं तत्संबन्धीनि सर्वविधानि कार्याणि सञ्चालयति सः । पालन-मन्थनदोहनादिकार्यनियुक्तानां कार्यकर्तृणां कार्यनिरीक्षणं घासान्नलवणजलादीना-मावश्यकपदार्थानां सुव्यवस्थाकरणञ्चेत्यादीनि सर्वाणि कार्याणि तस्यैव कर्तव्यान्त-र्गतानि । इत्थमुपयुक्ते स्थलेस्थलोचितपशुपालनस्य समुचितां व्यवस्थां विधाय यथा सम्भवं पशुधनात् सर्वान् जनान् सुसमृद्धान् कुर्याद्राजा ।

वाणिज्यव्यवस्था -

यथासम्भवं बहुविधवस्तुपेता बहुविधा आपणा बहुषु स्थलेषु व्यवस्था-पनीयाः । यस्माद्देशस्य विभिन्नभागेष्ववस्थिताः सर्वसाधारणा जना अपि क्रय-विक्रयादौ सौकर्यानुभवं कुर्युः, यत्रेप्सितवस्त्वाभावो नस्यात् । स्वस्यदेशस्य जनानान्वा-

---

(१) याज्ञवल्क्यस्मृतिः २।१६६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

वश्यकतापरिपूर्तिकराणि सर्वविधानि वस्तूनि स्वदेशे स्वोत्पादितानि सन्ति चेत्तान्येव स्थापनीयान्यापणे न तु विदेशादानीतानि । यदि स्वदेशोत्पन्नैर्वस्तुभिर्जनानामावश्यकता न तु पूर्णतां याति तदा विदेशादानीतानां वस्तूनां संस्थापनादपि जनानामावश्यकतापूर्तिं कुर्यात्राजा । क्रयविक्रयादिकार्ये प्रचलितानां तुलाशासनमानादीनां परिमाणनिर्णायकसाधनविशेषाणां सर्वेष्वापणेषु समुचितव्यवस्था कर्तव्या । वञ्चकापाणिकेभ्यः प्रजानां वञ्चनमर्थात् शोषणं नस्यादित्युद्देश्येनापणेषु स्थाप्यानामशेषाणां वस्तूनां देशकालपरिस्थित्यनुरूपं मूल्यनिर्धारणं परिमाणमापकानां तुलादीनां परीक्षणञ्च कर्तव्यम्, तदपि सभ्यैः सह प्रतिषाण्मासिकं कार्यम्, येनपरीक्षणेनापणाः सुव्यवस्थिता जायन्ते । मनुस्मृतौ मनुनाप्येतदेवोक्तम् --

तुलामानं प्रतीमानं सर्वं चास्यात्सुलक्षितम्[१] ।
षट्सु षट्सु च मासेषु पुनरेवपरीक्षयेत् ॥

क्रयविक्रयादिव्यवहारसौकर्याय विनिर्मितानां देशोदितनियमाबद्धानां तोलदण्डशासनप्रस्थादीनां मुद्रादि चिन्हितानां द्रम्मनिष्कादीनाञ्च यः कूटं करोत्यर्थान्नियमसिद्धाद् देशप्रसिद्धपरिमाणाद् वान्यथार्थान्न्यूनत्वमाधिक्यं वा द्रम्मादेरव्यावहारिकत्वं ताम्रादि गर्भत्वं वा विदधाति, यश्चतत्सर्वं जानन्नपि तान्येव कूटसाधनानि व्यवहरति अथवा तेषामेव प्रयोगे समर्थयत्यथवातान्येव प्रयोक्तुमापणिकान् प्रेरयति चेत्तावुभावुत्तमसाहसदण्डप्रदानार्हौ भवतः । पुनर्नाणकपरीक्षार्थमेकः कर्मचारी नियुज्यते, सोऽयं कूटकृतं द्रम्मादिकं सम्यगिति ब्रूते सम्यक् च द्रम्मादिकं कूटमिति कथयति चेत्सोऽप्युत्तमसाहदण्डभाक् । उक्तञ्च याज्ञवल्क्ये नापि --

---

(१) मनुस्मृतिः ८।४०३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

तुलाशासनमानानां कूटकृन्नाणकस्य च ।
एभिश्च व्यवहर्ता यः स दाप्योदममुत्तमम् ॥[1]

इत्थं व्यापारविषयेऽपि सुव्यवस्थां विधाय प्रजारक्षणं राज्ञः कर्तव्यम् ।

सार्वजनीनानां कूपतडागयातायातादीनां निर्माणम् -

मानवजीवने बहूनां विषयाणामावश्यकता विद्यते । ये जीवननिर्वाहार्थं सहायका भवन्ति । येषामभावे जीवनं दुःखमयं सिद्ध्यति । आवश्यकविषयेषु निम्नलिखिता विषयाः प्रमुखतां जनयन्ति -- (१) कूपः- प्राणिमात्रस्य कृते जलपानार्थं नितरामपेक्षितः, (२) तडागः - क्षेत्रेषु वाटिकायाञ्च जलसिञ्चनार्थं निर्मीयते, सत्यावश्यके पानं कर्तुमपि शक्यते तडागजलम्, अन्यजलाभावे तदेव पिबन्ति मानवाः । पुनर्जलं जीवनमेवेत्याहुर्विद्वांसः, यस्याभावे न तु जीवन्ति प्राणिनः, अतोऽस्य सुव्यवस्थायां विशेषविधः प्रबन्धः कर्तव्यः । (३) मार्गः - यस्मान्मानवा गमनमागमनञ्च कुर्वन्ति, अस्मान्मानवानां कृते महांल्लाभो जायते । मार्ग इति कथनेन 'मोटर' मार्ग 'रेल' मार्गादयो बहुविधा मार्गा गृह्यन्ते । (४) औषधालयः - यत्रौषधोपचारो विधीयते । तेऽपि भवन्ति बहुविधाः । (५) देवालयः, (६) अनाथालयः, (७) धर्मशाला, (८) विश्रामस्थलम्, (९) व्यायामस्थलम्, (१०) वृक्षारोपणञ्चैतेषां जीवननिर्वाहोपयुक्तविषयाणां निर्माणं विकासञ्च विधाय जनान् सुखसमन्वितान् कुर्याद्राजा । जनानां सुखोपकरणानां शालाप्रपातडागादीनां निर्माणमवश्यकर्तव्यं राज्ञोऽत्युक्तं महाभारत-कारेणापि --

---

(१) याज्ञवल्क्यस्मृतिः २।२४०-२४१ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

शालाप्रपातडागानि देवतायतनानि च ।
आवसथाश्चैव कर्तव्यं नृपसत्तमैः[1] ॥

भारतवर्षे वचनस्यास्यानुसरणं कुर्वन्तो दयादाक्षिण्यादिभिर्गुणैर्युक्ता बह्वो राजान् आसन् । तैश्चैतद्विधानां बहूनां बहुविधानां विषयाणां निर्माणं कृत्वा प्रजानामुपकारो विहितः । विषयेऽस्मिन्ननेकान्युदाहरणान्यप्युपलभ्यन्ते --

अशोकाख्येन राज्ञा मानवानां पशूनाञ्चकृते चिकित्सकस्य चिकित्सालयस्य च, तथा यातायातस्य जलाधारादीनाञ्च निर्माणस्य सुव्यवस्था कृता । राज्ञा सातकर्णिनापि तडागमन्दिरादीनां निर्माणं कृतम् । रुद्रदामनेन राज्ञापि सुदर्शनाख्यस्य महती जलाशयस्य पुनर्निर्माणं कृत्वा राज्ये जलस्य सुव्यवस्था कृता[2] । इत्थं प्राक्कालिका राजानोऽपि निर्माणादि विकासकार्ये संलग्ना दृश्यन्ते । प्रचलनमेतत् तदनन्तरैः शासकैश्चापि प्रचालितम् । निर्माणस्य क्रमोऽयं सदैवापेक्षितोऽपि विद्यते । सार्वजनीनानामुपर्युक्तानां कूपतडागयातायातादीनां निर्माणं विधायदेशस्य जनानाञ्च समुत्थानं कुर्याद्राजा ।

प्रजापालनादौ पौरुषस्य महत्वम् -

प्रजापालनस्य यावन्त उपायामाध्यमावोपस्थापिता उपरि तेषु सर्वेषु पुरुषार्थोऽपेक्षितः । पौरुषं सर्वत्रापेक्षितं तथापि प्रजापालनादौ तु तस्यावश्यकताऽपरिहार्या विद्यते । यतः प्रजापालनं कठिनं कार्यम्, कार्येऽस्मिन् विविधाः

---

(१) म० भा० (अनुशासनप०) । (२) धर्मशास्त्र का इतिहास भा०२ पृ० ६०३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

समस्या अनेकानि व्यवधानानि काठिन्यानि च समायान्ति, आपतितान्येतानि काठिन्यादीनि निराकृत्य नीतेर्नियमस्य योजनायाश्चार्थात्प्रजापालनसम्बद्धानां सर्वविधानां कार्यक्रमाणां कार्यान्वयनं कर्तव्यं राज्ञा । एतदर्थं गहनमध्ययनं चिन्तनं मननञ्चापेक्षितम् । एतद्विधानि प्रजापालनस्य कृतेऽनिवार्याणि सर्वाणि कार्याणि पुरुषार्थेनोक्तानि । अतो राजनि पौरुषं सर्वथाऽऽवश्यकम् । पुरुषार्थहीनो राजा न किमपि कार्यं साधयितुं क्षमः सर्वं कार्यं पौरुषस्यैवाधीनम् । भाग्यमेव-परमर्थात्सर्वोत्कर्षेण वर्तते तस्मादेव सर्वविधानि कार्याणि सिद्ध्यन्तीति मन्य-मानाः पौरुषहीना राजानो न तु प्रजापालने रञ्जने च समर्थाः । अतः कार्येऽस्मिन्पौरुषस्य महत्वं सर्वाधिकं विद्यते ।

पुरुषार्थ एव देशस्य राज्ञः प्रजानाञ्च समुन्नतेः प्रमुखाधारः । देवैः पौरुषेणैवामृतं लब्धं पौरुषेणैव दानवानां विनाशो विहितः पौरुषेणैव लोकयोर्द्वयोः श्रेष्ठपदं प्राप्तं देवराजेनेन्द्रेण । पुरुषार्थहीनाः क्लीबाः पुरुषाः केवलं भाग्यमुपासते, पुनः पुनर्ग्रहस्थितिं विचारयन्ति किन्तु तादृशा भाग्योपासका न किमपिफलमाप्नुवन्ति तेषां न किमपि कार्यं सिद्ध्यति ये सोत्साहा उद्यम-शीलाश्च सन्ति तेषां कृते न किमप्यसाध्यमपितु सर्वमेव साध्यम् । अतो राज्ञा पुरुषार्थेनैव प्रजापालनं विधाय देशस्यात्मनश्चोन्नतिर्विधातव्या । विषयोऽयं महाभारतेऽपि विवृतः --

उत्थानेनामृतं लब्धमुत्थानेनासुरा हताः ।
उत्थानेन महेन्द्रेण श्रैष्ठ्यं प्राप्तं दिवीह च ।।[1]

---

(१) शान्ति० ५८।१४ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

हीना: पुरुषकारेण गणयन्ति ग्रहस्थितिम्[1] ।

धीमन्तो वन्द्यचरिता मन्यन्ते पौरुषं महत्[2] ।

राजपदविकास: -

शुक्रनीतौ अष्टविधानि राजपदानि दर्शितानि, येषु पूर्वपूर्वादुत्तरोत्तराणि श्रेष्ठतराणि । तान्यपि भूपरिमाणस्यायस्य शक्त्यादीनां चाधार एव विकसितानि, अर्थाद्राज्ञा शासितो भूभाग: कत्यस्ति, कियल्लाभ:, राज्ञ: शक्त्यादिगुणाश्चारित्रिक गुणाश्च कीदृशा:, एतेषामाधार एव परं परं पदमाप्नुवन्ति राजान: । पदानि चैतद्विधानि -- (१) सामन्तपदम्, (२) माण्डलिकपदम्, (३) राजपदम्, (४) महाराजपदम्, (५) स्वराट, (६) सम्राड्, (७) विराट, (८) सार्वभौमपदञ्च । सामन्तमाण्डलिकौ राज्ञोऽधीनौ । य: शतग्रामान्तं प्रभुत्वं विस्तारयति, प्रजोत्पीडनेन विना १००००० रुकलक्षातो ३००००० लक्षत्रयं यावद् वार्षिकमुपार्जनं करोति चेत् स सामन्त: । यो मण्डलं शासतिलक्षत्रयाद्दशलक्षान्तं धनागमं करोति स माण्डलिक: । यस्य वार्षिकआयोदशलक्षातो विंशतिलक्षान्तोऽस्ति स राजा । यो विंशति लक्षात: पञ्चाशल्लक्षामितमायं करोति स भवति महाराजोपाधिविभूषिता । ततो यस्याय: कोटि पर्यन्त: स स्वराटपदमाप्नोति । ततो यस्योपार्जनं दशकोटिपरिमितमस्ति

---

(१) ऋग्वेद: ८।१६।१ ।

(२) अथर्ववेद: ३।४।१ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

स सम्राटपदमाप्नोति । ततो यस्याय: पञ्चाशत्कोटिपर्यन्तोऽस्ति स विराडित्यु-
पाधिना विभूषित: । यस्यायस्ततोऽधिको भवेत् स सार्वभौमपदमाप्नोति ।
तद्यथा --

लक्षकर्षमितो भागो राजतो यस्य जायते ।
वत्सरे वत्सरे नित्यं प्रजानां त्वविपीडनै: ।।
सामन्त: स नृप: प्रोक्तो यावल्लक्षत्रयावधि: ।
तदूर्ध्वं दशलक्षांतो नृपो माण्डलिक: स्मृत: ।।
पञ्चाशल्लक्षपर्यन्तो महाराज प्रकीर्तित: ।।
तदूर्ध्वं तु भवेद्राजा यावद् विंशति लक्षक: ।
ततस्तु कोटिपर्यन्त: स्वराड् सम्राट् तत: परम् ।।
दशकोटिमितो यावद् विराट् तु तदनन्तरम् ।।
पञ्चाशत्कोटिपर्यन्तं सार्वभौमस्तत: परम्[1] ।

इत्थं शुक्राचार्येणोपार्जनस्याधार एव राज्ञ: पदोन्नतिर्दर्शिता, किन्तु ऋग्वेदेन त्वेतद्विध आधारनत्वङ्गीकृत: । ऋग्वेदे तु पराक्रमो यज्ञयागादयोऽपि पदोन्नते: प्रमुखाधारविशेषा दृश्यन्ते । राजमहाराजैकराटसम्राटसार्वभौमचक्रवर्तीत्येतानि पदानि ऋग्वेदादि ग्रन्थोल्लिखितानि । पदेष्वेतेषु राजपदस्य स्थानं निम्नं चक्रवर्तिपदं तूच्चतमम् । राजसूययज्ञसम्पादनाद्राजपदं वाजपेययज्ञसम्पादनेन तु सम्राटपदमाप्नोति राजा । ऋग्वेदे एकराडित्यस्यपदस्यास्ति वर्णनम्, तदिन्द्रेणोपलब्धम्[2] । वर्णनादस्मादिदं ज्ञायते ऋग्वेदकाल एवैकच्छत्रोराजा कल्पित: । यस्याधीना भवन्त्यनेके राजान: । अथर्ववेदेऽपि वर्णितमास्ति पदमेतत् --

---

(१) शुक्रनीति: १।१८३-१८७ । (२) ऋग्वेद: ८।१६।१ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

आ त्वा गन्राष्ट्रं सह वर्चसोदिहि प्राङ्० विशां पतिरेकराट् त्वं विराज ।[1]

पराक्रमाच्चोच्च पदमाप्नुवन्ति राजान इत्युल्लेखोऽस्ति, शतपथब्राह्मणे[2] - वृत्रासुरमारणात्प्रागिन्द्रः केवलमिन्द्र आसीत्, किन्तु वृत्रवधानन्तरंत्विन्द्रेण महेन्द्र-पदमाप्तम् । एवमेव राजपदासीना राजानोऽपि विजयं कुर्वन्ति चेत्तस्मादुच्चं महाराजपदमाप्नुवन्ति । कुत्रचिच्चक्रवर्तिपदमप्युल्लिखितं दृश्यते, तत्तु सार्वभौमपद-समानम्, सार्वभौमपदन्तु चक्रवर्तिपदात्पूर्वमेव विकसितम् । पदमेतदपि विजयादेव भवत्युपलब्धम् । इत्थमुत्कृष्टपदन्तु पराक्रमादेव संभवम् । मान्धाता, धुन्धुमारः, हरिश्चन्द्रः, पुरुरवा, भरतः, कार्तवीर्यश्चेत्यादिभिर्नृपतिभिः पराक्रमेणैवोच्चतमं चक्रवर्तिपदमुपलब्धम् । समुद्रगुप्तः, चन्द्रगुप्तः, अशोकः, पुष्यमित्रः प्रवरसेनश्चेत्यादयो राजानोऽपि चक्रवर्तिसदृशाः ।

शुक्लयजुर्वेदवर्णितानि राजपदानि -

वेदस्यास्य पञ्चदशतमेऽध्याये पञ्चमन्त्राः सन्ति, तैरिष्टका प्रार्थिता, प्रार्थनायामस्यामेव राजपदं वर्णितम्, यथा - हे इष्टके पूर्वायां दिशित्वमसि राजमानावसवोऽष्टौदेवा भवन्ति तवाधिकं पालयितारः । दक्षिणस्यां दिशित्वं विराट्रुपेण तिष्ठसि तवाधिपतयो भवन्ति रूद्रादेवाः । पश्चिमेत्वं सम्राडसि तवादित्या देवा सन्ति रक्षकाः । उत्तरेत्वं स्वराडसि मरुतो देवाः पालयितारो भवन्ति भवत्याः । ऊर्ध्वमधिपत्न्यसित्वम्, तवाधिपतयो भवन्ति विश्वेदेवाः ।

---

(१) अथर्ववेदः ३।४।१ । (२) शतपथब्राह्मणम् १।६।४।२१ एवं ६।३।४।८

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

इत्थं पञ्चभिर्मन्त्रैः पञ्चविधा राजानः सन्ति प्रदर्शिताः । मन्त्राश्च यथा --

(१) राज्ञसि प्राची दिग्वसवस्ते देवा आधिपतयः - - - - ।

(२) विराडसि दक्षिणा दिग्रुद्रास्ते देवा आधिपतयः - - - - ।

(३) सम्राडासि प्रतीची दिगादित्यास्ते देवा आधिपतयः - - - ।

(४) स्वराडस्युदीची दिङ्मरुतस्ते देवा आधिपतयः - - - - ।

(५) आधिपत्न्यसि बृहती दिग्विश्वे ते देवा आधिपतयः[१] - - - ।

इत्थं राजपदस्य राज्यस्य च विकासस्तु वैदिककालाद् ब्राह्मणकालपर्यन्तमेव दृश्यते प्रायः । तदानीमेव साम्राज्यभौज्य वैराज्यराज्यादीन्यनेकविधानि राज्यानि स्थापितानि विकसितानि च । राज्येष्वेतेषु ये शासका निर्वाचिता त एव सम्राड्राजादिभिः पदैर्विभूषिताः । तेषां सम्राडादीनां राज्यं कुत्रासीत्, कु कीदृशस्य राज्यस्य कोऽधिपतिरित्यस्य विषयस्य विवेचनं ब्राह्मणग्रन्थोपलब्धं तदेवात्राप्युपस्थाप्यतेपूर्वस्यां दिशि प्राच्यैः साम्राज्यं स्थापितम्, तत्र शासकोऽपि सम्राडेवाभिषिक्तः, अर्थात्साम्राज्यं सम्राडोपाधियुतशासकान्वितम् । दक्षिणेदाक्षिणात्यानां ये राजान् आसन् तेषामभिषेकस्तु भौज्यायार्थाद् दाक्षिणात्यैर्दक्षिणस्यां भौराज्यं स्थापितम् । पश्चिमे प्रतीच्यैः स्वाराज्यं परिकल्पितम्, तस्मिन् यो नियुक्तः स स्वराट्पदान्वितः । उदीच्यामुत्तरकुरुभिर्मद्रैश्च वैराज्यं निर्मितम्, तस्य राज्यस्य राजा विराट्पदभूषितः । मध्यदेशस्थानां कुरुपाञ्चालानामुशीनराणाञ्च ये राजान् स्तेषामभिषेकस्तु राज्यायविहितस्तैरर्थान्मध्यदेशे राज्यं स्थापितं तत्र शासकेनापि राजपदमेवावाप्तम् । तद्यथा --

----

(१) शुक्लयजुर्वेदः १५।१०-१५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

साम्राज्याय तस्मादेतस्यां प्राच्यां दिशि ये के च प्राच्यानां राजानः साम्राज्यायैव तेऽभिषिच्यन्ते । तस्मादेतस्यां दक्षिणस्यां दिशि ये के च --- राजानो भौज्यायैव तेऽभिषिच्यन्ते । तस्मादेतस्यां प्रतीच्यां दिशि ये के च नीच्यानां येऽपाच्यानां पाराज्यायैव तेऽभिषिच्यन्ते । तस्मादेतस्यामुदीच्यां दिशि ये के च परेण हिमवन्तं जनपदा उत्तरकुरव उत्तरमद्रा इति वैराज्ये न तेऽभिषिच्यन्ते । तस्मादेतस्यां ----- नाचक्षते ।[1]

वेदब्राह्मणाभ्यां सम्राडादिपदविषये यन्मतमुपस्थापितमुपरि तन्न समानार्थकम् - यजुर्वेदेन पश्चिमे प्रतीच्यानां शासकः सम्राडित्युक्तम् । ऐतरेय-ब्राह्मणस्तु पूर्वे प्राच्यानां शासकः सम्राट् प्रतीच्यानां तु स्वराडित्याह । इत्थं द्वयोर्मतमसमञ्जसम्, किन्त्वस्यसमाधानमित्थमेव भवेद्राजा जरासन्धः सम्राट्पदासीन इत्युल्लेखोऽस्ति पुराणादिषु किन्तु तेन न तु सम्राट्पदं गृहीतम्, स तु केवल-मासीद्राज्य समूहस्याध्यक्षमात्रम् । जरासन्धेन सञ्चालितानि राज्यानि तु संघ-रूपाण्यासन् । चेदिराजः शिशुपालोऽप्यासीत्संघस्यैव नायकः । अन्येषां राज्ञामपि संस्थापनं विधाय सर्वेषां रक्षणं सर्वत्र शान्तिस्थापनं सम्राजः कर्तव्यमित्युक्तं महाभारतकारेण, किन्तु जरासन्धस्तु न तु सर्वेषां रक्षकः, अपि तु भक्षक एवासीत् । यतोऽस्तेन चेदिराजं विहायान्ये राजानो दासरूपाः कृताः । तद्वदेव शुक्लयजुर्वेदमन्त्रद्रष्टा महर्षियाज्ञवल्क्यो मिथिलायां निवसति स्म, मिथिलानगरी मगधदेशात्पूर्वस्यामस्त्यतो यजुर्वेदेन सम्राजः स्थानं पश्चिम-दिगित्युक्तम् । एवमैतरेयब्राह्मणकर्ता मगधदेशात्प्रतीच्यां निवसतिस्म, अतस्तेन

---

(१) ऐतरेयब्राह्मणम् ८।१४।२।३ (हि० रा० शा० पृ० १६६) ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

स्वभावत: साम्राज्यायाभिषिक्तानां सम्राजां राज्यं प्राच्यां प्रोक्तम्, अर्थात्
स्मिन्समये मगधदेशसाम्राज्यत्वात्तस्य शासकोऽपि सम्राडेवासीत् । मगधदेशो याज्ञ-
वल्क्यस्याश्रमस्थलात्पश्चिमे वर्तते, अत सम्राज: साम्राज्यन्च प्रतीच्यामेव दर्शितं
याज्ञवल्क्येन । ऐतरेयब्राह्मण कर्तुर्निवासस्थानात्पूर्वं दिश्यस्ति मगधदेश: तस्मात्तेन
समाजश्च पूर्वस्मिन्नेव वर्तन्त इत्युक्तम्[१] ।

सायणाचार्योक्तानिराज्यानि राजपदानि च -

राज्यसाम्राज्यवैराज्यादीनां राज्यानां सम्राडादीनां राज्ञां सम्बन्धेऽपि स्वमतं दर्शयति सायणाचार्य: -- योस्मिन्राज्ये कोशस्याधिपत्यमस्ति तद्राज्यं प्रोक्तम्, तस्य शासको राजपदान्वित: । धर्मेण पालितं यद्राज्यं तत्साम्राज्यं तस्य स्वामी सम्राट् । राजभिरन्यै सह यस्य विशिष्ट: सम्बन्धो विद्यते तद् वैराज्यम्, तस्य शासको विराट्पदयुक्त: । एतानीहलोकेन सह सम्बद्धानि महाराज्यादीनि तु परलोकेन सह सम्बन्धजनकानि । श्रीधरस्वामिना श्रीमद्भागवतपुराणटीकायां साम्राज्यभौराज्यादीनां राज्यानां माध्यात्मिकोऽर्थ: कृत: -- तत्र तेन साम्राज्यं सार्वभौमपदमर्थात् सार्वभौमपदविभूषितेन राज्ञाशासितं राज्यमित्युक्तम् । स्वाराज्यमिन्द्रपदम्, भौज्यं सार्वभौमपदम् । सम्राट्विराडादीनिपदानि सार्वभौमपदान्तर्हितानि । ये राजान एते: सम्राडादिभि: पदैर्विभूषिता अर्थात्सम्राडादिभि: शब्दै स्तूयन्ते ते सर्वेषां पूजनीया वन्दनीयाश्च । तथा च महाभारतेशान्तिपर्वणि --

---

(१) हि० रा० शा०, पृ० २०१ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

राजा भोजो विराट् सम्राट् क्षत्रियो भूपतिर्नृपः ।
य एवं स्तूयते शब्दैः कस्तं नार्चितुमिच्छति ॥[1]

एते राजानो महाभारतकाले विभिन्नस्थाने राज्ये वाऽऽसन्विख्याताः । विदर्भदेशे कुन्तिभोजः, मालवदेशे (धारानगर्यां) राजाभोजः । एतौ द्वावेव देशौ दक्षिणप्रदेशान्तर्गतौ । भोजस्तु दाक्षिणात्यानां राज्ञामुपाधिः, अर्थाद्दक्षिण-प्रदेशस्य राजानो भोजोपाधिना प्रसिद्धाः, दक्षिणे राज्यं तु भौज्यमेव, एतद्वैदिक-कालादेवागतं नाम । पश्चिमे सुराष्ट्रमस्ति, सुराष्ट्रे स्वराडित्युपाधिना युतो राजा राज्यं सञ्चालयति स्म, तेन सञ्चालितं तद्राज्यं स्वाराज्येति नाम्ना प्रसिद्धम् । उत्तरप्रदेशे वैराज्यमासीत्, तस्मिन् विराडित्युपाधियुतो राजा राज्यं करोतिस्म, तद्राज्यं विराटराज्यम्, संप्रत्येतद्राज्यं नेपालदेशस्य पूर्वप्रदेशे वर्तते, यद् विराटनगर-मिति नाम्ना प्रसिद्धम् ।

राजरक्षा -

राजा परमोच्चशासकः परमशक्तिसम्पन्नश्च । अस्य संरक्षकत्वमवाप्यैव जीवतिलोकः, अस्य नेतृत्व एव लोकोराज्यं च वृद्धिमेति अत एतादृशस्यसर्वशक्ति-समेतस्य राज्ञः सर्वतो रक्षणं सर्वैर्का कर्तव्यम् । यद्यपि राज्ञो विनाशस्तु बहुपक्षातः सम्भवः, तथापि तेभ्यः सदाभयं नोत्पद्यते, किन्तु राजस्त्रियो राजबन्धवो राज-पुत्राश्चैते त्रयस्तु सदैव भयोत्पादकाः प्राणघातका एव । एतेष्वपि स्त्रीजातयस्त्वधमाः,

---

(१) शान्ति० ६८।५४ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अथदिताभ्योऽधिकं कष्टमुत्पद्यते । यद्यपि स्त्रियः दधिरोदधिवद् विषामृत-स्थानरूपाः, अर्थादमृतरूपमानन्दं च प्रयच्छन्ति पुरुषेभ्यः, तस्मादमृताय (स्त्रीसुखाय) प्रायः सर्वेपुरुषा भ्रमन्ति, किन्तु राजानस्त्वेतासु भवन्ति विशेषरूपेणासक्ताः । कामवशेन तासां कुटिलं स्वभावं भयानकं चरित्रं च न जानन्ति । काममोहिता न केऽपि पुरुषाः स्त्रियं स्ववशे स्थापयितुं शक्नुवन्ति "स्त्रीणां वशोपायो देवानामपि दुर्लभः"[१] । विशेषतोऽवरुद्धाः स्त्रियः स्वामिनं नाशयन्ति, वशीकरणमारणमोहनादिकं यत्किमपि कार्यं कर्तुमग्रेसरन्ति, अत एतासां स्त्रीणां कारणादेव कामासक्ता बह्वो राजानो विनाशं गताः । विषयेस्मिन्नधिकान्युदाहरणान्यप्युपलभ्यन्ते --

श्रूयते हि किल आत्मनः स्वच्छन्दवृत्तिमिच्छन्ति विषविदूषित गण्डूषेण मणिकुण्डला महादेवी यवनेषु निजतनुजराज्यार्थं जघान राजानमङ्गम् । विषालक्तकदिग्धेनाधरेण वसन्तमतिः शूरसेनेषु सुरतविलासं, विषोपलिप्तेन मणिना वृकोदरी दशार्णेषु मदनार्णवं, निशितनेमिना मुकुरेण मदिराक्षी मगधेषु मन्मथविनोदं, कबरीनिगूढेनासिपत्रेण चन्द्ररसा पाण्ड्येषु पुण्डरीकमिति[२] ।
अन्यच्च --

लाजान्विषेण संयोज्य मधुनेति विलोभितः ।
देवी तु काशिराजेन्द्रं निघान रहोगतम् ॥
विषदिग्धेन सौवीरं मेखला मणिना नृपम्[३] ।
नूपुरेण च वैरन्त्यं जारुषं दर्पणेन च ॥

---

(१) नी० वा० (राजरक्षासमुद्देशः) । (२) नी० वा० (राजरक्षासमुद्देशः) ।
(३) का० नी० सा० ७।५२-५३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अत: स्त्रीजातिभ्य: सावधानो भवेद्राजा, एवं भ्रातृभ्य: पुत्रेभ्यश्चापि, एतेऽपि मदोन्मत्ता गजा इव निरङ्कुशा भवन्त्यभिमानिनश्च । तस्मादसत्कार्येऽपि तत्परतां दर्शयन्ति, पितरं भ्रातरं वापि विनिघ्नन्ति । एतद्विधा दृष्टान्ताश्च प्राप्यन्ते --

देवीगृहगतं भ्राता भद्रसेनममारयत् ।
मातु: शय्यान्तरे लीन: कारूषन्चौरस: सुत: [1] ।।

विषादिभ्योऽपि यत्नतो राजरक्षणं कर्तव्यम् । विश्वसनीयै: पाचकै: पचितं विषापहैर्मन्त्रैरभिमन्त्रितं विषविनाशकौषधयोजितं विषविज्ञै: सुपरीक्षितमन्नमद्याद्राजा । विषपरीक्षणन्चाग्नौ पतगेषु च कर्तव्यम्, अर्थाद् भोज्यपदार्थान् अग्नौ प्रक्षिपेत् विहगेभ्यश्च दद्यात्, ततस्तेषां लक्षणानि विचारयेत् ।लक्षणन्च --

धूमार्चिर्नीलता वह्ने: शब्दस्फोटश्च जायते [2] ।
अन्नेन विषदिग्धेन वयसां मरणं भवेत् ।।

शुक्रनीतावपि --

विषदोषभयादन्नं विमृशेत् कपिकुक्कुटै: ।।
हंसा: स्खलन्ति कूजन्ति भृङ्गा नृत्यन्ति मायूरा: ।
विरौति कुक्कुटो माद्येत् क्रौंचो कैरौचते कपि: ।।
हृष्टरोमा भवेद् बभ्रु: सारिका वमते तथा ।
दृष्ट्वैवं सविषं चान्नं तस्माद् भोज्यं परीक्षयेत् [3] ।।

---

(१) का०नी०सा० ७।५१ । (२) का०नी०सा० ७।१६ ।
(३) शुक्रनीति: १।३२६-३२८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

इत्थं परीक्षितान्न भोजनेन विषघ्नरत्न धारणेन चात्मरक्षणं कुर्याद्राजा । एतदर्थं राज्ञा यानाशनविहारादिषु सर्वास्ववस्थासु सावधानतावलम्बनीया । सवधानतया राजा भवति सुरक्षितः ।

कीदृशो राजा राजसत्तमः -

यस्य राज्ञ आरब्धानि सर्वविधानि कार्याणि निर्विघ्नेन समाप्यन्ते, यस्मिन्राज्ये सर्वाः प्रजाः पितुर्गृहे पुत्रा इव निर्भयाः सन्ति सर्वत्र शान्तं वातावरणमस्ति, प्रजा अभयेन स्वं धनं न निगूहन्ति, अर्थान्न चौरादीभ्यो भयम्, यस्य राज्ञः प्रजा न्यायमन्यायं धर्ममधर्मञ्च जानन्ति, यस्मिन्राज्ये राज्ञा संरक्षिता परिपालिताश्च प्रजाजनाः स्वकर्मनिरता,अनासक्ता,जितेन्द्रियाः,शिक्षिता,विनीता, नीतिज्ञा आज्ञापालका ऐश्वर्यशालिनो दानशीलाः कर्तव्यपरायणाश्च सन्ति तादृशो राजा राजसत्तमः कथितः । तथा च महाभारते --

आरब्धान्येव कार्याणि न पर्यवसितानि च ।
यस्य राज्ञः प्रदृश्यन्ते स राजा राजसत्तमः ।।

वश्या नेया विनीताश्च न च संघर्षशीलिनः[१] ।
विधेयदानरुचयो नरा यस्य स पार्थिवः ।।

उपर्युक्तगुणसम्पन्नाः प्रजाजनाराज्ञः कारणादेव भवन्ति, अर्थाद्राजा शास्त्रोदितगुणयुतो स्वधर्मनिरतः कर्तव्यपालको दण्डनीत्यां च कुशलोऽस्ति चेज्जना

---

(१) शान्ति० ५७।३२-३६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अपि तादृशा एव, अतो मर्यादितजनसमाजनिर्माणे राजैव मूलं कारणम् । यो राजा शास्त्रोक्तं दण्डं प्रयुज्य जनसमाजं मर्यादितं करोति स एव युगमुख्यं सत्ययुगं प्रवर्तयति ।

राजा कालस्य कारणम् -

यदि राजा शास्त्रोक्त विधिना प्रजापालनदण्डप्रणयनादिकं स्वं कर्तव्यं पालयति तदा सर्वाः प्रजा अधर्मनिवृत्ताः स्व स्व धर्मप्रवृत्ताश्च भवन्ति । यदा सर्वे वर्णाः स्व स्व धर्मोन्मुखा मर्यादिताश्च भवन्ति तदा कालश्रेष्ठं कृतयुगं प्रवर्तते । सम्यक्सञ्चालिताया दण्डनीतेः प्रभावात्प्रवर्तितं कृतयुगं प्रवृत्त धर्मस्यैव प्रभावं वर्धयति, अधर्मस्तु न कुत्रापि विद्यतेऽस्मिन्युगे, सर्वेषां जनानां मनस्तु धर्म एव रमते, योगक्षेमाः स्वयमेव सिद्धयन्ति, वैदिकानि सर्वाणि कर्माणि भवन्ति सार्थकानि सद्गुणयुतानि च, भासत्वादिसर्वे कालाः सुखदायकाः, जनानां स्वरवर्णमनांसि च सदैव प्रसन्नतां यान्ति, सर्वेजनाःभवन्ति निरामयाः, व्याधयो न कुत्रापि दृश्यन्ते, न कोऽप्यल्पायुः, न का अपि स्त्रियो विधवाः, न केऽपि मूर्खा दुष्टाश्च, सर्वविधान्यन्नान्योषधयश्चाकृष्टक्षेत्रादधार्त्कर्षणेन विनाप्युत्पद्यन्ते त्वक्पत्रफलमूलादीनि च भवन्ति सरसानि, इत्थं सर्वं जगद्भवति धर्ममयम्, सत्ययुगस्यैवैते सर्वे गुणाः ।

यदा राजा दण्डनीते स्त्रीनंशान्पालयति चतुर्थांशं त्यजति तदा त्रेता प्रवर्तते । यदा त्रेतायुगस्य प्रारम्भो भवेत्तदा धर्मस्यां शत्रयम धर्मस्यांशे एकोवशिष्यते, कर्षणादेवान्नानि फलानि चोत्पद्यन्ते नाकर्षणात् ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

यदा राजा धर्मस्य दण्डनीतिर्विधांशं त्यजति तदा द्वापरं नामयुगं प्रवर्तते, तदा जना अपि धर्माधर्मयोरर्धांशमात्रस्यानुयायिन:, कर्षणादप्यन्नफलादिकमधर्मेवोत्पद्यते ।

यदा राजा धर्मं दण्डनीतिं वा त्यक्त्वा स्वेच्छाचरणरत: स्वसुखानुकूलराज्यसन्चालको वा भवेत्तदा भवति कले: प्रवेश: । कलावधर्मस्यैव सर्वत्र प्रभाव: सर्वथा धर्मस्याभावो दृश्यते, सर्वेषां मानवानां मन: स्वधर्मात्सत्कर्मणश्च भवति विचलितम्, शूद्रा भैक्ष्येण ब्राह्मणा: सेवका जीवन्ति, सर्वत्रानाचारो भ्रष्टाचारो वा वृद्धिमेति, न केषाञ्चिदपि योग: क्षेमश्च, वर्णसंकराणां भवत्यभिवृद्धि:, सर्वाणि वैदिककर्माणि भवन्ति गुणहीनानि, ऋतव: कालाश्च दु:खदायका:, जनारोगशोकदुर्भिक्षादिभिर्भवन्ति ग्रस्ता:, मानवानां स्वरवर्णमनसां प्रायो ह्रासो दृश्यते, जना अल्पायुषा, अकाल एव मरणं यान्ति विधवानां भवत्याधिक्यम्, जना: क्रूरा जायन्ते, मेघो न सर्वत्र वर्षति, फलौषधान्नानां न प्राचुर्यम्, पुनस्तान्यपि न तु सरसानि सर्वविधा रसा: प्राय: क्षयं यान्ति । इत्थमेव राजा चतुर्णामेव युगानां सृष्टिं विदधाति । अत एव कालकारणं राजेत्याहुर्विद्वांस: । तथैव प्रोक्तं महाभारते --

कालो वा कारणं राज्ञो राजा वा कालकारणम् ।
इति ते संशयो मा भूद्राजा कालस्य कारणम् ।।
दण्डनीत्यां यदा राजा सम्यक्कात्स्न्र्येन वर्तते ।
तदा कृतयुगं नाम काल: श्रेष्ठ: प्रवर्तते ।।

- -

राजा कृतयुगस्रष्टा त्रेताया द्वापरस्य च ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

युगस्य च चतुर्थस्य राजा भवति कारणम्[1] ।।

नीतिमान्राजैव वास्तविकः -

इत्थं कृतयुगस्य प्रवर्तकस्तु राजैव, अत यो नीतिमान् धर्मशीलश्च भवेत् स एव राजा, अर्थात्तस्मिन्नेव विद्यते वास्तविकं राजत्वम् । लोके द्विविधा राजानो दृश्यन्ते - नीतिमन्तोऽनीतेरनुगामिनश्च । नीतिमन्तस्तु लोकपूजिताः, ये शास्त्रोक्तां नीतिं विहायानीतिमनुसरन्ति ते त्वनान्याः । यो नीतिमान्-बलसम्पन्नश्च स एव सर्वतो धनोपार्जनसमर्थः, अथवा राजलक्ष्म्या सुशोभितः । नीतिशास्त्रस्याज्ञानेन राजा पतनं गच्छति, महता दोषेण युक्तो भवति । निकृष्टोऽयं दोषः सदाभय-मुत्पादयति, शत्रून् संवर्धयति, सैन्यबलं शक्तिञ्च विनाशयति । अतो राज्ञा सदैव नीतेरनुसरणं कर्तव्यम् ।

स्वाराध्यो नीतिमान्राजा दुराराध्यस्त्वनीतिमान् ।
यत्र नीतिबले चोभे तत्र श्रीःसर्वतोमुखी ।।
अनीतिरेव सच्छिद्रं राज्ञो नित्यं भयावहम् ।
शत्रुसंवर्धनं प्रोक्तं बलह्रासकरं महत्[2] ।।

दैवांशराजा -

महाभारते दैवांशस्य राज्ञो लक्षणं प्रदर्शितमस्ति - परमर्षिभिर्लोकस्या-वश्यकतानुकूलस्य साक्षाद्धर्मरूपस्य राज्ञ उत्पादनं विधाय "अयं धर्मो भविष्यति"

---

(१) शान्ति० ७०।६-२५ । (२) शुक्रनीतिः १।१५,१७ ।

CC-0 Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

इत्युक्त्वास्य लक्षणञ्च कृतम्, यथा --

यस्मिन्धर्मो विराजेत तं राजानं प्रचक्षते[1] ।

यः शीलसंपन्नः शास्त्रोदितगुणयुतो धार्मिकभावनया प्रेरितो (धार्मिक)श्च भवेत् स एव राजा देवांशः । शुक्रनीतौ शुक्राचार्येण देवांशरूपस्य राज्ञः सुस्पष्टं लक्षणं प्रतिपादितम्, तथा --[2]

स्वान् दुर्गुणान् परित्यज्य ह्यतिवादां स्तितिक्षते ।
दानैर्मानैश्च सत्कारैः स्वप्रजारक्षकः सदा ॥
दान्तः शूरश्च शस्त्रास्त्र कुशलोऽरिनिषूदनः ।
अस्वतन्त्रश्च मेधावी ज्ञानविज्ञानसंयुतः ॥
नीचहीनो दीर्घदर्शी वृद्धसेवी सुनीतियुक् ।
गुणिजुष्टस्तु यो राजा स ज्ञेयो देवतांशकः ॥

अस्यायं भावः -- यो राजा स्वान्तर्हितान्सर्वान् दुर्गुणान्परित्यजति, अपमानातिवादनिन्दादींश्च सहते, दानमानसत्कारादिभिः सदैव प्रजाः पालयति पोषयति रञ्जयति च, इन्द्रियाणि जेतुं समर्थः, दानशीलः, शूरः, शस्त्रास्त्रविद्यायां निपुणः, ज्ञानविज्ञानादिभिः सुसम्पन्नः, शत्रुनाशनसमर्थः, उच्छृङ्खलतारहितः, धारणाशक्तिसम्पन्नः, नीचगुणादिरहितो दुर्जनानां सम्पर्करहितो वा, दूरदर्शी, वृद्धोपासकः, सुनीतिज्ञश्च भवेत् एव स देवतांशकः । एतादृशो राजा विद्वद्भिरपि सेवनीयः । एतद्विपरीतो राजा-राक्षसांशः कथितः ।

विपरीतस्तु रक्षोंऽशः स वै नरकभाजनः[3] ।

----

(१) शान्ति० ९१।१२ । (२) शुक्रनीतिः १।८३-८५ ।
(३) शुक्रनीतिः १।८६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

गुणभेदेनराजभेदाः -

शुक्रनीतौ सत्वादि गुणाधारे राजभेदा दर्शिताः । सत्वरजस्तमश्चैतेत्रयोगुणाः शास्त्रप्रतिपादिताः एतेषामाधार एवोत्तममध्यमावमाश्च भवन्ति राजानः । ये सत्वगुणसंपन्ना स्तेतूत्तमाः । ये रजोगुणयुता स्ते मध्यमाः । तमोगुणयुतास्त्वधमाः प्रोक्ताः । यो राजा स्वधर्मनिरतः, प्रजापालकः, सर्वविषयज्ञानुष्ठानशीलः, जेतुं समर्थः, दानशीलः, क्षमाशीलः, शूरः, विजितेन्द्रियः, विरक्तप्रकृतिश्चैतैर्गुणैर्युतो भवेत् स सात्त्विकः कथितः । एतेभ्यो विपरीतगुणयुतस्तु तामसः प्रोक्तः । तामसगुणोपेतोऽधमोराजा निर्घृणो मदोन्मत्तो हिंसकः सत्यवर्जितश्च भवति । मृते सति नरकं याति । यो राजा दाम्भिकः, लुब्धः, विषयासक्तः, वन्चकः, मूर्खः, कपटकर्मकृत्, कलहप्रियः, दुर्जनप्रियः, स्वेच्छाचरणशीलः, अनीतिमान्, कपटान्तरश्चास्ति स राजसः प्रोक्तः ।

यो हि स्वधर्मनिरतः प्रजानां परिपालकः ।
नीचप्रियः स्वतन्त्रश्च नीतिहीनश्छलान्तरः[१] ।

अधार्मिको राजा दण्ड्यो भवति -

यो राजामात्यसभ्याधिकारिणां मतं विचारं परामर्शं वा नेच्छति, अधार्मिक भावनया प्रेरितत्वात्स्वेच्छयास्वतन्त्ररूपेण वा शासनं सन्चालयति

---

(१) शुक्रनीतिः १।३०-३४ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

चेत्तदा राज्येऽनर्थाः समुत्पद्यन्ते, अमात्यादि सर्वाः प्रकृतयोऽपि भिन्नतां यान्ति, राज्ञः सहयोगादिकं निर्दिष्टं कर्मत्यजन्ति, राष्ट्रमेव विच्छिन्नावस्थामाप्नोति । शुक्रनीतावपि --

प्रभुः स्वातन्त्र्यमापन्नो ह्यनर्थायैव कल्पते ।
भिन्नराष्ट्रो भवेत्सद्यो भिन्नप्रकृतिरेव च ॥[1]

स्वेच्छाचरणशीलो राजा भवत्यधार्मिकः, राजा यदधार्मिको भवेत्तदा तस्य राज्यस्य प्रजाजना अप्यधर्मपरा एव । पापिष्ठानां प्राचुर्येण राज्यमेव पापमयम् । पापकारणान्मेघोऽपि यथा कालं न वर्षति, वृष्ट्यभावे धान्यधनानि फलमूलौषधादीनि च न तु पर्याप्तानि । यदा प्राणरक्षकाणां धान्यादीनामभावोभवेत्तदा लोके विविधोपद्रवा जायन्ते, तदा राजा राज्यं धनजनादिकं च सर्वं विनश्यति । दुर्जनाः शत्रवस्तु वृद्धिं यान्ति ।[2] सन्दर्भेऽस्मिन्नारदः - यो राजा स्वतन्त्ररूपेण राजकार्यं करोति मन्त्रिसचिवादीन् न पृच्छति तेषां मुखाद्धिताहितं न शृणोति, प्रजानां धनमपहरति वैतादृशो राजा चोर एव ।

हिताहितं न शृणोति राजा मन्त्रिमुखाच्च यः ।
स दस्यू राजरूपेण प्रजानां धनहारकः ॥[3]

प्रसङ्गेऽस्मिन्स्वमतं प्रतिपादयति मनुः[4] -- यो राजा विचारेण विना स्वराष्ट्रियान् सर्वान्प्रजाजनान् धनग्रहणताडनमारणादिकष्टेन पीडयति, तादृशोऽधार्मिकः स शीघ्रमेव पुत्रबान्धवादि सहितो विनश्यति । यथान्न

---

(१) शुक्रनीतिः २।४ । (२) शुक्रनीतिः ४(मिश्रप्रकरणम् ६०-६१) ।
(३) शुक्रनीतिः २।२५७ । (४) मनुस्मृतिः ७।१११-११२ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

जलाद्याहार निरोधादिना शरीरशोषणात्प्राणभूतां प्राणाः क्षीयन्ते, तथैव राजाप्यधर्मेण राष्ट्रपीडनात्प्रजापीडनाद्वा मन्त्र्यादिप्रकृतिकोपाद् विनश्यतीति नात्र संशयः ।

एतादृशोऽधार्मिको राजैव दण्ड्यो भवति । राजा यावद्धर्मपरायणः प्रजापालकश्च भवेत्तावदण्ड्यः, यदा प्रजापीडनराष्ट्रकर्षणाद्यपराधं करोति तदा दण्डनीयः । प्रजापीडनाद् वेननहुषादयो बहवो राजानो दण्डिताः । दण्डेष्वप्यधार्मिकस्य राज्ञः कृते प्राणदण्ड एवोचितः, वेनेन राज्ञा प्राणदण्ड एवोपलब्धः । तथा श्रीमद्भागवते --

इत्थं व्यवसिता हन्तुमृषयो रूढमन्यवः ।
निजघ्नुर्हुङ्कृतैर्वेनं हतमच्युतनिन्दया[1] ॥

महाभारतेऽपि --

तं प्रजासु विधर्माणं रागद्वेषवशानुगम् ।
मन्त्रपूतैः कुशैर्जघ्नुरृषयो ब्रह्मवादिनः[2] ॥

इत्थमधार्मिका राजानः प्रायो मृत्युदण्डमेवावाप्नुवन्ति । किन्तु कस्मिंश्चिदपराधविषये धनदण्डो विधीयते चेयत्रापराधे राजव्यतिरिक्तोजनः एककार्षापणदानरूपेण दण्डनीयो भवेत्तस्मिन्नेवापराधे राजा पणसहस्रं दण्डनीयः ।

कार्षापणं भवेद्दण्ड्यो यत्रान्यः प्राकृतो जनः ।
तत्र राजा भवेद्दण्ड्यः सहस्रमिति धारणा[3] ॥

----

(१) श्रीमद्भागवतम् ४।१४ । (२) शान्ति० ५९।१०० ।
(३) मनुस्मृतिः ८।३३६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

इत्थं राजा सर्वसाधारणपुरुषस्यापेक्षायामत्यधिक दण्डेन दण्डितः, राज्यस्य सर्वोच्च पदासीनत्वात् प्रजानामधिपतित्वाच्च। दण्डादागतं धनन्त्वप्सु स्थापनीयं ब्राह्मणेभ्यो वा दातव्यम् --

ईशो दण्डस्य वरुणो राज्ञां दण्डधरो हि सः ।
ईशः सर्वस्य जगतो ब्राह्मणो वेदपारगः ॥[१]

यद्यपि राजा सर्वदेवमयः, अपरिमितशक्तिसम्पन्नः, दण्डधारित्वात् प्रजानां प्रमुखश्च, पुनः पालको नाशको नियामकश्च, तथापि नियन्त्रितो भवति सः। शास्त्रविरुद्धाचरणेऽसमर्थः। राजपदन्तु सर्वोच्चं परमपवित्रञ्च, अत्युत्कृष्टमेतत्पदं स्वीकृत्य तत्र स्थित्वा न किमप्यसत्कार्यं कर्तुं वाञ्छनीयम्। पदस्यास्योच्चतां श्रेष्ठतामादर्शतां च ज्ञात्वैव शास्त्रोदितं मार्गमवलम्ब्य जनभावनानुकूलं राज्यं कर्तव्यं राज्ञा।

गणतन्त्रात्मकं राज्यम् -

वैदिके युगे केवलमासीद्राजतन्त्रात्मकं राज्यम्। राज्येनानेन शासिताः प्रजाजनाः शनैः शनैर्विविधेषु वर्गेषु विभक्ताः। वर्गगतभावनया प्रेरिता स्ते राज्यमपि स्वतन्त्रमेवेच्छन्ति वर्गेषु प्रवर्धमाना इच्छैषा न तु रुद्धा। फलतः लोके बहूनि बहुविधानि राज्यानि स्थापितानि। तेषु गणतन्त्रात्मकं राज्यं बहुचर्चितम्। इत्थं प्राचीन भारते राजतन्त्रात्मकराज्यकालादेव गणतन्त्रात्मक

---

(१) मनुस्मृतिः ९।२४५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

राज्यस्य विकासोजातः । गणराज्ये गणभावनानुकूलमेव राज्यशासनं प्रचाल्यते । गणशब्देन समूहः संघस्तथा समाजोऽपि गृह्यते । गणशब्दस्यानेकार्थत्वाद्गणसन्चालितराज्यान्यप्यनेकनामभिः प्रसिद्धानि, यथा - गणराज्यम्, समूहराज्यम्, संघराज्यम्, समाजराज्यं (प्रजातन्त्रराज्यं) च । सर्वाण्येवैतानि गणसन्चालितानि । गणशब्दस्य वास्तविकार्थस्तु समूह एव तस्माद्गणराज्यस्यार्थोऽपि समूहसन्चालितराज्यमेव सिद्ध्यति ।

गणतन्त्रराज्यस्योत्कृष्टतावर्णनम् -

प्रजातन्त्रं लोकतन्त्रं गणतन्त्रन्चैतेशब्दाः पर्यायवाचकाः, तस्मात्स्वेच्छया प्रयुज्यन्ते । अत्र तु गणशब्दस्य प्रयोगो विहितः । स्वतन्त्राधिकारप्राप्त्यर्थं गणतन्त्रमिच्छन्ति जनाः, अर्थाद्गणराज्ये सर्वाः प्रजाः स्वतन्त्राः, स्वतन्त्ररूपेणैव स्वाधिकारं प्रयुज्य स्वच्छन्दं जीवनं यापयन्ति । पुना राज्यमेतद्विधं बहुगुणोपेतं तस्मादस्य सद्गुणान् ये जानन्ति ते सर्वे भवन्त्यस्मिन्नेवाकर्षिताः । जनाकर्षका गणतन्त्रराज्येष्वतर्हिता गुणाश्चैतादृशाः -- राज्येऽस्मिन् गुप्तचरामात्यगुप्तमन्त्रान्यवलादानप्रदानआयव्ययसमदानभेददण्डादयो राज्यस्य कृते नितरामपेक्षिता विषयाः सदैव सुव्यवस्थिताः । संघबद्धा जनाः सबलाः सोत्साहाः पुरुषार्थोपेताश्च भवन्ति तस्माच्च रत्नकनकादि बहुमूल्यार्थोत्पादनादावपि सक्षमाः, यस्मादुत्पादनाद्देशस्य जनानान्चोत्थानं सर्वथा सम्भवम् । गणराज्येष्वनुरक्तानां सुव्यवस्थितां वृत्तिकल्पितां समुन्नतिं चालोक्य तैः सह परपुरुषा अपि मित्रतामिच्छन्ति । राज्येऽस्मिन्प्रजानां

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

गुणान् कार्याणि चाक्लोक्य सर्वेषां यथोचितमादरं सम्मानञ्च विधीयते। गुणकर्मणो यथार्थं मूल्याङ्कनं भवति, मूल्याङ्कनस्याधारएव समुचितवृत्ति-प्रदानव्यवस्थोपकल्पिता। पारम्पर्यक्रमागता धर्मकर्मव्यवहारादयोऽपि नोपेक्षन्ते परम्परानुसारं शास्त्रानुसारं वा सम्पाद्यन्ते। असन्मार्गप्रवृत्ता: सन्ति चेद् भ्रातृ-पुत्राश्च भवन्ति दण्डिता:। विनयाचारादीनामत्युच्चतमा शिक्षा सर्वसाधारणेषु जनसमाजेष्वपि भवति प्रचारिता प्रसारिता च। उच्चशिक्षाप्रदानेन गुणसम्पन्नानां प्रजानामत्युत्कृष्टाया जनशक्तेश्चोत्पादनं विधीयते। प्रजाजनाद्राष्ट्रिय कोशस्य सम्पत्तेश्च संरक्षणसंवर्धनादौ सदैवोन्मुखान् विधीयते। कोशस्य समुन्नतावेव प्रजानां समुन्नतिरित्येतादृशी भावना सर्वेषु जनमानसेषु समुदिता। बुद्धिमतां शास्त्रज्ञानां शस्त्रास्त्र विद्यानिपुणानां पराक्रमशीलानां च सततं समादरणं स्वागतञ्च करोति राज्यम्। धनोपार्जनविद्योपार्जनादिकं बहुविधं स्वतन्त्रताया: फलमुपार्जयन्ति जना:। स्वतन्त्रतया धनोपार्जनलेखनप्रवचनाध्ययनादिषु न कोऽपि प्रतिबन्धो विद्यते, तस्माद्गणराज्ये बहवो धनाढ्या: शास्त्रपारगा विद्वांसो विविधो-द्योगशीलाश्च भवन्ति, एतेभ्यो नानाविपन्मग्ना अपि परित्राणमाप्नुवन्ति। क्रोधाद्भेदाद्भयप्रदानाद्दण्डप्रयोगात्कर्षणान्निग्रहाद्वधाच्चापि दु:खदायकान् शत्रुवर्गान् स्ववशे स्थापयति राज्यम्। अतएवंतद्विधं राज्यं लोके बहुभि: स्वीकार्यम्। वर्णितमेतन्महाभारते शान्तिपर्वणि --

गणानां वृत्तिमिच्छामि श्रोतुं मतिमतां वर ।।
यथा गणा: प्रवर्धन्ते न भिद्यन्ते च भारत ।
अरीन्हि विजिगीषन्ते सुहृद: प्राप्नुवन्ति च ।।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

चारमन्त्रबलादानैः सामदानविभेदनैः ।
क्षयव्ययभयोपायैः कर्षयन्तीतरेतरम् ।।
अर्था ह्येवाधिगम्यन्ते संघातबलपौरुषात् ।
बाह्याश्च मैत्रीं कुर्वन्ति तेषु संघातवृत्तिषु ।।
क्रोधो भेदो भयो दण्डः कर्षणं निग्रहो वधः ।
नयन्त्यरिवाशं सद्यो गणान्भरतसत्तम[1] ।।

पाणिनिना प्रोक्तानि गणराज्यानि -

गणसंघशब्दौ भिन्नार्थप्रतिपादकावित्याहुः केचिदाचार्याः, किन्तु महामुनिः पाणिनिस्तु शब्दावेतौ समानार्थकौ तस्मात्स्वेच्छया केचिद्गणशब्दस्य प्रयोगं कुर्वन्ति चेत्केचित्तु संघशब्दस्येत्याह । गणसञ्चालितं गणराज्यं संघसञ्चालितं संघराज्यम् । वस्तुतस्तु द्वे एव राज्ये प्रजातन्त्र द्योतके[2] । पाणिनिना गणराज्यविषये यन्मतमुपस्थापितं तत्कात्यायनेन[3] नीतिशेन कौटिल्येनापि[4] समर्थितं दृश्यते । विशेषतः पाणिनिर्वाहीकप्रदेशस्थानामायुधाजीविसङ्घानां (गणानां) वर्णनमुपस्थापयति । वाहीकप्रदेश इति कथनेन सिंधपञ्चाबादयः प्रदेशाः प्रसिद्धाः । एते प्रदेशा नदीप्रदेशाः । तथा च महाभारते --

पञ्चानां सिंधुषष्ठानां नदीनां येऽन्तराश्रिताः[5] ।

---

(१) शान्ति० १०८।६-७,१२,१५-२२ । (२) पाणिनिकालः (इ०पू० ६००) ।
(३) कात्यायनकालः (इ० पू० ४००) ।
(४) कौटिल्यकालः (इ० पू० ३००) हिन्दूराज्यतन्त्र १ भा० ३३ पृष्ठोद्धृतोऽयं कालः
(५) कर्ण्प० ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

व्याख्यातारो वाहीकप्रदेशस्यैतद्विधां व्याख्यां कुर्वन्ति यथा --

"शतद्रुर्विपाशिरावती वितस्ता चन्द्रभागेति पञ्चनद्यः सिंधुः षष्ठस्तन्मध्यदेशो वाहीक इति तद्व्याख्यातारः" ।

एवञ्च --

"वाहीकेषु य आयुधाजीविसंघस्तद्वाचिनः - - - क्षौद्रक्यः, मालव्यः - - -" [1]

एतेषु प्रदेशेषु आयुधाजीविगणाः संघा वा निवसन्ति स्म । ते चेत्थं वर्णिताः -- (१) वृकैः[2], (२) दामनिः[3], (३) त्रिगर्तषष्ठः, योऽस्मिन् षड्वर्गा अन्तर्हिताः । ते चैते -- (क) कौण्डोपरथः (ख) दाण्डकी, (ग) क्रौष्टुकिः, (घ) जालमानिः, (ङ०) ब्रह्मगुप्तः, (च) जालकिश्चैते षड्वर्गाः प्रसिद्धाः । तथा च --

आहुस्त्रीगर्तषष्ठांस्तु कौण्डोपरथदाण्डकी ।
क्रौष्टुकिर्जालमानिश्च ब्रह्मगुप्तोऽथ जालकिः ॥[4]

(४) पर्श्वादि, (५) यौधेयादि[5] । एते सर्वे शस्त्रास्त्रादिभिर्जीवनं यापयन्ति । इत्थमायुधाजीविसंज्ञयाप्रसिद्धा एते । कौटिल्यस्त्वेते शस्त्रोपजीविन इत्याह । पाणिनिना एते शस्त्रादीन् प्रयुज्य जीवनं यापयन्तीत्युक्तं किन्त्वेतदर्थं न तु स्वीकुर्वन्त्यन्ये आचार्याः, ते तु एते वर्गा युद्ध-कौशलं जानन्ति शस्त्रास्य विधायां

---

(१) सि० कौ० पृ० ३०४ । (२) वृकाट्टेण्यण् ५।३।११५ ।

(३) दामन्यादित्रिगर्तषष्ठाच्छः ५।३।११६ । (४) सि० कौ० (तद्धितेषु स्वार्थिकाः

(५) पर्श्वादियौधेयादिभ्योऽणञौ ५।३।११७ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

निपुणा: सन्ति तस्माच्छस्त्रोपजीविन इत्युपाधिं प्राप्नुवन्तीत्याहु: । अतो निष्कर्षस्त्वेष एव - एते युद्धविशारदा आसन्, एतेषां जीवनं युद्धमयमेवासीत्, यतो एते सदैव स्वतन्त्रतामिच्छन्ति स्म । तदर्थं शस्त्रास्त्रप्रयोगादिकं यत् किमपि कार्यं कर्तुमग्रेसरन्ति स्म ।

'आयुधाजीविसङ्घान्ञ्यड्वाहीकेष्वब्राह्मणराजन्यात्'[1] । पाणिनीयमेतत्सूत्रम्, अस्यानुसारं सङ्घेषु ब्राह्मणक्षत्रियाभ्यामितरा जातयो भवन्ति सम्मिलिता: । किन्त्वन्यत्र तु सर्ववर्णा वर्गा: सर्वा जातयो वा सङ्घान्तर्गता इत्युल्लेखो दृश्यते । एतै: सञ्चालितानि राज्यान्येव गणराज्यानि । एतदतिरिक्तान्यन्यान्यपि प्रजातन्त्रद्योतकानि गणराज्यानि प्रोक्तानि महामुनिना पाणिनिना तेषां नामानि चैतानि --

(१) मद्र:[2], (२) वृजि:, (३) राजन्य:[3], (४) अन्धकवृष्णय:[4], (५) महाराज:[5], (६) भर्गश्चैतेऽपि[6] गणा गणराज्यं सञ्चालयन्ति । अथवैतै: प्रजातन्त्रराज्यं स्थापितम् । प्रजातन्त्रराज्यस्थापकेष्वन्धकवृष्णय: प्रसिद्धा: ।

----

(१) ५।३।११४ (तद्धितेषु स्वार्थिका: सिद्धान्तकौमुदी) ।

(२) मद्रवृज्यो: कन् ४।२।१३१ (तद्धितेषु [illegible] शैषिका: सिद्धान्तकौमुदी) ।

(३) राजन्यादिभ्यो वुञ् ४।२।५३ (तद्धितेषु रक्ताद्यर्थका: सिद्धान्तकौमुदी:)

(४) राजन्यबहुवचनद्वन्द्वेऽन्धकवृष्णिषु ६।२।३४ (सिद्धान्तकौमुदी:स्वरप्रक्रिया:) ।

(५) महाराजाट्ठञ् ४।३।९७ (सिद्धान्तकौमुदी: तद्धितेषु शैषिका:) ।

(६) न प्राच्यभर्गादि यौधेयादिभ्य: ४।१।१७८ (सिद्धान्तकौमुदी: तद्धितेष्वपत्याधिकार:) ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

१३१

कौटिल्योक्तानि गणराज्यानि -

कौटिल्यो राजनीतौ विशिष्टएवासीत्, किन्त्वयं प्रजातन्त्रस्यासमर्थको निरङ्कुशभावनया प्रेरितश्चासीदिति वक्तुं शक्यतेऽर्थशास्त्रस्याध्ययनात् । तथाप्यनेन गणराज्यवर्णनमपिविहितं तस्मादस्मिन्विदुषि प्रजातान्त्रिक विचारोऽपि समुदितो दृश्यते । इत्थं कौटलीयार्थशास्त्रे निरङ्कुशनीतौ प्रजातान्त्रिकभावस्याश्चर्यमय: समन्वय: समुपलब्ध: ।

गणराज्यस्य महत्त्वं सर्वाधिकं विद्यते, यतो दण्डमित्रप्राप्ते: संघप्राप्तिरेवोत्तमा । संघटितं संस्थैव संघ:, संघटितत्वात्सर्वशक्तिसम्पन्न:, तस्मादेतद्विधस्य राज्यस्य विनाशो बलवद्भ्य: शत्रुवर्गेभ्योऽपि न सम्भव: । तथा च --

'संघलाभो दण्डमित्रलाभानामुत्तम:, संघा हि संहतत्वादधृष्या: परेषाम्'[१]

वार्ताशस्त्रोपजीविनो राजशब्दोपजीविनश्चेति द्विविधानां गणानामुल्लेखो विहित:, नीतिज्ञेन कौटिल्येन । येगणा: कृषिवाणिज्यशस्त्रास्त्रादिभिजीवनं यापयन्ति ते चैते -- (१) काम्बोजा:, (२) सुराष्ट्रगणा:, (३) क्षत्रिया:, (४) श्रेण्यादयश्च । ते चेत्थं वर्णिता: कौटलीयार्थशास्त्रे --

'काम्बोजसुराष्ट्रक्षत्रियश्रेण्यादयो वार्ताशस्त्रोपजीविन:'[२] ।

राजोपाधिधारणशीलागणाश्च यथा - (१) लिच्छविक:,(२) व्रजिक:, (३) मल्लक:, (४) मद्रक:, (५) कुकुर:, (६) कुरु:, (७) पान्चालश्च ।

---

(१) कौटलीयार्थशास्त्रेन ११।१ । (२) कौटलीयार्थशास्त्रेन ११।१ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

१३२

कौटलीयार्थशास्त्रे चैत्थं वर्णिता: सन्त्येते --

"लिच्छविकव्रजिकमल्लकमद्रककुकुरकुरुपान्चालादयो राजशब्दोपजीविन:"[1]

काम्बोज: -- वार्ताशस्त्रोपजीविषु काम्बोजगणानां प्रथमं स्थानं दृश्यते । एतेषां मूलनिवासस्थानं पूर्वोऽफगानिस्तानाख्ये देशे आसीत् । गण-राज्यमेतद्राज्ञोऽशोकस्याधीनमासीत्।यास्काचार्यस्यानुसारं काम्बोजानां मातृभाषा संस्कृतमेव[2] ।

सुराष्ट्रगणराज्यम्-- सुराष्ट्रस्यार्थस्तु शोभनं राष्ट्रम् । कठियावाडाख्ये प्रदेशे सुराष्ट्रगणानां निवासस्थानमासीत् । द्वितीयशताब्दीपर्यन्तमस्य राज्यस्या-स्तित्वमासीत्, तदनन्तरं प्राय: समाप्तमेव । मौर्यसाम्राज्यानन्तरं समुदितमेतत्[3] ।

क्षात्रियश्रेण्यादीनि गणराज्यानि -- एतानि सिंधप्रदेशेऽवस्थितानि । क्षात्रियगणराज्यमेकं विशिष्टम् । श्रेणयस्त्वनेके सन्ति तै: शासितानि राज्यान्य-प्यनेकानि ।

बौद्धकालिकं गणराज्यम् -

बौद्धकाले द्विविधं राज्यमासीत् प्रचलितम् -- राजतन्त्रात्मकं गणतन्त्रात्मकं चेति । गणराज्येषु शाक्यलिच्छविविदेहमल्लेत्याख्यानि राज्यानि प्रसिद्धानि ।

शाक्यगणराज्यम् -- अस्य राजधानी कपिलवस्तु (नैपालस्य पश्चिम-

---

(१) कौटलीयार्थशास्त्रम् ११।१ । (२) हिन्दूराजतन्त्रम् पृ० ६६ ।
(३) हिन्दूराज्यतन्त्रम् पृ० ६७ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

तराइ प्रदेशे वर्तते) बौद्धसाहित्यैनास्य राज्यस्य विस्तृतं विवेचनं विहितम्, महत्वन्चात्यन्तं प्रदर्शितम् । भगवान् बुद्धोऽप्यस्यैव वंशस्यासीत् । जन्मस्थलन्चास्य कपिलवस्तु एव । राज्येऽस्मिन्बहून्यल्पराज्यानि सम्मिलितान्यासन् । बहूनां बहुविधानां राज्यानां संयोगादेतद्विनिर्मितम् । राज्यमेतद्राजतन्त्रात्मकमेवा-थाँन्निर्वाचितपुरुष एव राजपदमाप्नोति स्म । निर्वाचनन्तु प्रजातान्त्रिक-पद्धत्यनुसारमेव भवति स्म । वंशस्यास्य प्रधानस्तु शुद्धोदन एव । स एव प्रजातान्त्रिक विधिनाराजपदे निर्वाचित: । तस्मिन्राज्ये सर्वोच्चैका राज्यव्यवस्थापिका सभाऽऽसीत् परिकल्पिता, यस्या: सभाया: पन्चशतजना: ५०० सदस्या आसन् । तेषां सभा राजधान्यां विनिर्मिते सभाभवने सन्चालिता भवतिस्म । तद्भवनमप्यति सुन्दरं बहुचर्चितन्चासीत् । तस्यां सभायां राजा शुद्धोदनोऽपि समुपस्थाय राज्यसन्चालनसम्बन्धितसर्वविधविषयमुपदिशति स्म । उक्तन्च --

"सर्वं शाक्यगण सन्निपत्यैव मीमांसते राजाशुद्धोदन:, शाक्यगणेन सार्धं संस्थागारे निषण्णोऽभूत्"[1] ।

लिच्छविगणराज्यम् - लिच्छविगणशासकोऽपि प्रजातान्त्रिकभावनयाऽभिप्रेरित एव भवितुमर्हति । राज्येऽस्मिन् चत्वारोऽधिकारिण: प्रमुखा: -- (१) राजा (अध्यक्ष:), (२) उपराज: (उपाध्यक्ष:), (३) सेनापति:, (४) भाण्डागारिकश्चेति । एतेषु चतुर्षु यो मुख्य: स भाण्डलिकशब्देनाप्युच्चार्यते । एतैरेव चतुर्भि: सर्वं राज्यशासनं सन्चाल्यते स्म । राज्यस्यास्य राजधानी वैशाली

---

(१) हिन्दूराज्यतन्त्रम् पृष्ठ - ५५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

(मुजफ्फरप्रदेशे वर्तते) । राज्यसभायां ७७०७ सदस्यसंख्याऽऽसीत्, सर्वे सदस्या राजशब्देनोच्यार्यन्ते स्म । १६८००० तात्कालिकी जनसंख्या निश्चिता तस्मिन्राज्ये ।

विदेहगणराज्यम् -- राज्यस्यास्य राजधानी मिथिला, प्रसिद्धैषा नगरी । राज्यमेतत्पूर्वं राजतन्त्रात्मकमासीत् किन्तु बौद्धकाले गणतन्त्रं जातम् ।

मल्लगणराज्यम् -- राज्यमेतदति विशालमासीत् । तस्माद्भागद्वये विभाजितम् -- कुशीनाराराज्यम्, पावाराज्यञ्चेति । नेपालेऽपि मल्लगणराज्यमासीत् । शनैः शनैः मल्लानां स्वतन्त्रमस्तित्वं प्रायः समाप्तम् । मल्लकाले तूत्कृष्टं स्थानमासीदेतेषाम् । अस्यवाम राज्यस्य मन्त्रिपरिषदि चत्वारः सदस्या आसन् ।

गणराज्यमपि द्विविधम् -

महाभारतकाले राजतन्त्रात्मकराज्यस्यापेक्षायां गणराज्यस्य बाहुल्यं दृश्यते । गणशब्दः सङ्घमपि बोधयति । संघश्च द्विविधः -- कुलसंघो गणसंघश्चेति । शाक्यानां राज्यं कुलसङ्घराज्यम् । बहूनि बहुविधानि कुलराज्यानि मिलित्वैव गणराज्यमुत्पद्यतेऽर्थाद्गणसंघराज्ये भवन्त्यनेकानि कुलानि संमिलितानि । यत्र कुलराज्यं प्रचलितं तत्र कुलवृद्ध एव राजा, अध्यक्षो नायको वा भवति न त्वन्यः । तस्य प्रभुत्वं केवलं कुल-व्याप्यम् । भरतपाञ्चालेक्ष्वाकुवैदेहादीनि बहूनि कुलराज्यान्यासन्महाभारतकाले । भारते शनैः शनैः प्रभुत्वविस्तारक्रमो वृद्धिंगतः, शक्तिसम्पन्नेन

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

त्रिचत्वारि कुलराज्यान्येकी कृत्यैकं वृहदाकारं गणराज्यं स्थापितम् । कानिचिद्गणराज्यानीत्थं निर्मितानि, कानिचित्तु स्वभावतः सिद्धानि । गणराज्येषु यादवकुकुरभोजान्धकवृष्णिराज्यानि प्रसिद्धानि । उक्तञ्च महाभारते--

यादवाः कुकुरा भोजाः सर्वेचान्धक वृष्णयः[१] ।

वृष्णिगणराज्यम् -

वृजिकसंघो वृष्णिसंघो वा, वृष्णिसंघस्यार्थाद् यादवगणराज्यस्याध्यक्षो नायको वा भगवान् श्रीकृष्ण एवासीत् । गणेऽस्मिन्राज पदासीनो न कोऽपि दृश्यते, केवलं गणनायक एवासीत् । गणस्यास्य विवेचनं विस्तृतमस्ति महाभारते । तस्यैवसाशंशोऽत्रापि प्रस्तूयते --

वृष्णिगणनायको भगवान् श्रीकृष्णोनारदं प्रत्युवाच -- समये समये वृष्णिवंश आपन्मग्नो दृश्यते किंकारणमत्र, अस्य समाधानो पायश्च कः ? पुनरैश्वर्यादिकं यदस्तिमदधीनं तस्यार्धांशो बन्धुवर्गेभ्यः प्रयच्छामि, अर्धांशस्योपभोगं करोम्यहम् । तथापि कठोरं वचनं वदन्ति बान्धवाः, बन्धुभिरुक्तमेतद्वचनं ममहृदयं दहति, ममाग्रजो बलदेवोबलसम्पन्नः, गदे सौकुमार्यमस्ति, प्रद्युम्नस्तु रूपेण प्रमत्तः, किन्त्वहन्त्वसहायोऽस्मि, एतादृश्यां परिस्थितौ मया किं कर्तव्यम् । तथा च --

दास्यमैश्वर्यवादेन ज्ञातीनां वै करोम्यहम् ।
अर्धभोक्तास्मि भोगानां वाग्दुरुक्तानि च क्षमे ।।

---

(१) शान्ति० ८१।२९ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अरणीमग्निकामो वा मथ्नाति हृदयं मम ।
वाचा दुरुक्तं देवर्षे तन्मे दहति नित्यदा ॥
बलं सङ्कर्षणे नित्यं सौकुमार्यं पुनर्गदे ।
रूपेण मत्तः प्रद्युम्नः सोऽसहायोऽस्मि नारद[1] ॥

भगवतः श्रीकृष्णस्यै तद्विषयाऽभिव्यक्त्यैदं ज्ञायते -- वृष्णिसंघो बहुनायकान्वितः । सर्वे नायका स्वं स्वं प्रभुत्वं विस्तारयन्ति व्यवस्थापिकायां सभायामपि बहुनायकत्वाद् बहुविधो विवादः समुत्पद्यतेः सभायां समागतप्रस्तावस्य नौचितोनिर्णयः, पुनर्जनसमाजोत्पन्नानां समस्यानामपि यथा कालं यथोचितं समाधानं न भवति, तस्मादेव श्रीकृष्णोभगवान् चिन्तितो दृश्यते । पुनर्वृष्णि-संघोऽन्धकसंधेनाप्यन्वितः, द्वावैव संघौ सक्रियावास्ताम्, अन्धकसंघस्य नायकोऽक्रूरः, वृष्णिसंघस्य तु श्रीकृष्णाक्रूरौ द्वावैव मुख्यौ । पुनर्द्वयोः संघयोर्व्यवस्थापिका त्वेकैव । एकस्यां सभायां वह्वोऽध्यक्षाः समुपस्थिता भवन्ति, तेषां विचारो बहुविधः, तस्मान्मतैक्यं नायाति, मतैक्या भावे परस्परं कलहस्योत्पत्तिः, वातावरणमशान्ततां याति । अतएवापि श्रीकृष्णश्चिन्ताकुलः । एतद्विषया समस्यया चिन्तितं श्रीकृष्णं प्रत्युपदिशति महामुनिर्नारदः --

अनायसेन शस्त्रेण मृदुना हृदयच्छिदा ।
जिह्वामुद्धर सर्वेषां परिमृज्यानुमृज्य च[2] ॥

गणनायकेनानायसशस्त्रेण सर्वेषामुपकारः कर्तव्य इत्याह नारदः । अनायसशस्त्रञ्चैतद्विधम् --

---

(१) शान्ति० ८२।५-७ । (२) शान्ति० ८२।१९ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

शक्त्यान्नदानं सततं तितिक्षा दम आर्जवम् ।
यथार्हप्रतिपूजा च शस्त्रमेतदनायसम्[1] ।।

स्वसामर्थ्यानुसारं धनान्नादिदानं सहनशीलतासंयम:सरलताऽन्यस्यय-थोचितसत्कारश्चैतत्सर्वमनायसशस्त्रं ज्ञेयम् । गणमुख्येनैतद्विधेन शास्त्रेण गुण-विशेषेण वा स्वजनानां स्वगणेन सहसम्बद्धानां सर्वासां प्रजानामुद्धारो विधातव्य: । अर्थाद्गणाध्यक्षाणां कृते उपर्युक्ता गुणा सदैवापेक्षान्ते एतद्विधगुणसम्पन्न एव प्रजारक्षणे पालने च समर्थ: ।

अप्रियवाक्यवदनरतानां क्षुद्रजनानां यद्विधं कुटिलाभिप्राययुतं दुर्वचनं तथाऽसद्०कल्पोऽपि भवेत् तत्सर्वं सद्वचने न सद्व्यवहारेण च विनश्य तादृशानां तुच्छजनानां मनसो वचसो हृदयस्य च शमनं (वशीकरणम्) कर्तव्यम् । ज्ञाति-भेदात्संघस्यैव विनाश: सम्भव:, अतो-येनोपायेन संघ: संरक्षितो विकसितश्च स एवोपाय: शोचनीय: । पुनर्यस्माद्धनस्या युर्बायशसश्च वृद्धि: स्वपक्षस्य चोत्थानं तदेव विधातव्यम् । तथा च शान्तिपर्वणि --

ज्ञातीनां वक्तुकामानां कटूनि च लघूनि च ।
गिरात्वं हृदयं वाचं शमयस्व मनांसि च ।।
भेदाद्विनाश: संघानां संघमुख्योऽसि केशव ।
यथा त्वां प्राप्य नोत्सीदेदयं संघस्तथा कुरु[2] ।।

वैराज्यद्वैराज्ययोर्गुणदोषवर्णनम् -

यत्राभिषेकादिगुणयुतो राज्यसन्चालको राजा न तु विद्यतेऽथचिद्राज्य-

---

(१) शान्ति० ८२।२१ । (२) शान्ति० ८२।२२,२५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

मस्ति राजहीनं तद्वैराज्यमित्याहुर्मुनय: । एकस्मिन्समये एकस्मिन्राज्ये द्वावेव राजानौ शासनं कुरुतोऽर्थाद् यद्राज्यमस्ति राजद्वययुतं तद्द्वैराज्यम् । एतद्विधं राजद्वययुतं राज्यन्तु शीघ्रमेव विनाशावस्थामाप्नोति, यतो द्वौ राजानौ द्विविध-शक्तिसम्पन्नौ भवत:, ते द्वे स्वशक्ती एकस्मिन्नेव स्थले केन्द्रिते भवत:, द्वयो: समानरूपयो: शक्त्यो: परस्परसंघर्षेण, पक्षयोर्द्वयोर्द्वेषानुरागाभ्यां वा समाप्तिमेति । तथा चोपवर्णितं कौटलीयार्थ शास्त्रे --

"द्वैराज्यवैराज्ययोर्द्वैराज्यमन्योन्यपक्षद्वेषानुरागाभ्यां परस्परसंघर्षेण वा विनश्यति"[1] ।

पुराऽवन्त्यां द्वैराज्यशासनमासीत्प्रचलितम्, तत्र विन्दानुविन्दौ द्वावेव शासकावास्ताम्, परं तावेव पारस्परिकया ईर्ष्यया द्वेषेण वैमनस्येन स्पर्धया च विनाशं गतौ । तथा च --

विन्दानुविन्दावावन्त्यौ सैन्येन महतावृतौ[2] ।
जिगाय समरे वीरावाश्विनेय: प्रतापवान् ।।

ईश्वीय षष्ठशताब्दीमेवं सप्तमशताब्द्यां नैपालदेशस्य काष्ठमण्डपेऽपि द्वैराज्यशासनमासीत्, तत्र लिच्छविवंशस्य ठकुरी (क्षत्रिय) वंशस्य च द्वावेव राजानावास्ताम् ।

वैराज्यं प्रजातन्त्रात्मकं लोकतन्त्रात्मकं गणतन्त्रात्मकं वा राज्यम् । राज्येऽस्मिन्नभवति वैदिकविधिनाभिषिक्तोराजा । प्रजा: स्वयं लोकानुमत-राज्यसञ्चालनतत्परस्य लोकमर्मविदश्च नायकस्य शासकस्य वा मनोनयं कृत्वा तस्यैव

---

(१) महाभा० स० प० ३१।१० उद्यो० प० १६५ । (२) कौ० ८।२ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

माध्यमेन स्वानुकूलं शासनं सन्चालयन्ति । प्रजानुमोदितमेतद्विधं राज्यशासनमेवो-त्कृष्टतमम् । अस्यामेव शासनव्यवस्थायां स्थायित्वं विद्यते प्रजानां स्नेहो ममता सद्भावश्चापि । अतो द्वैराज्याद् वैराज्यमेवोत्तममित्याहु: कैचिदाचार्या: । आचार्यवर्याणामेतन्मतं न तु समीचीनमित्याह नीतिज्ञो कौटिल्य: । यतो द्वैराज्यन्तु पितापुत्रयोर्भ्रात्रोर्वा भवितुं शक्नोति न त्वन्ययो: सम्बन्धहीनयोर्द्वयो: । तयोर्द्वयोरात्मसम्बन्धत्वात्परस्परसंघर्षस्य द्वेषानुरागयोश्चाभाव:, तस्मादपि द्वैराज्यशासनव्यवस्थायां न कश्चिदपि दोष:। वैराज्ये तु पारम्पर्यक्रमागत: शास्त्रोक्त विधिनाऽभिषिक्तो राजा न कोऽपि विद्यतेऽपितु निर्वाचितशासिक एव । निर्वाचितेषु शासकेषु जननायकेषु वा राज्यं राष्ट्रं राष्ट्रियतान्च प्रति सद्भावोऽनुरागश्चात्यल्प:, पुन: सेवाकालश्च निर्धारित: । कारणैरेतै-रधिककरादानमनुचितदण्डग्रहणान्च कुर्वन्त्यस्माद्राज्यं भवति ग्रसितम् । धनाधिकं प्राप्नुवन्ति चेद्राज्यं विक्रेतुमपि शक्नुवन्ति । आपतिते सति संकटे तादृशेभ्य: शासकेभ्यो न केऽपि संरक्षिता:, एतादृश्यां परिस्थितौ तु जननिर्वाचिता: शासकास्तु स्वं रक्षणादिकं सर्वमेवकार्यं राज्यं च परित्यज्याप्यपगच्छन्ति चेत्या-दयो बह्वो दोषा दृश्यन्ते वैराज्ये । अतएव वैराज्याद् द्वैराज्यमेवोत्कृष्टतमम् । एतदित्थं वर्णितं कौटलीयार्थ शास्त्रे --

"वैराज्यं तु प्रकृतिचित्तग्रहणापेक्षि यथास्थितमन्यैर्भुज्यत इत्याचार्या: । नेति कौटिल्य:, पितापुत्रयोर्भ्रात्रोर्वा द्वैराज्यं तुल्ययोगक्षेम-मात्यावग्रहं वर्तयेतेति । वैराज्ये तु जीवत: परस्याच्छिद्य नैतन्मम" इति मन्यमान: कर्शयत्यपवाह्यति, पण्यं वा करोति विरक्तं वा परित्यज्याप गच्छतीति"[1] ।

---

(१) कौटलीयार्थशास्त्रम् ८।२ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

गणराज्यविनाशकारणानि -

अत्र प्रथमं गणराज्यस्य गुणान्प्रदर्श्यास्य विनाशकारणानि प्रस्तूयन्ते । गुणाश्च -- दुर्वृत्तानां राज्योद्भवानां चौर्यसाहसव्यभिचारादीनामसत्कार्याणां नियन्त्रणस्य सुव्यवस्थामर्यादितनियन्त्रितजनसमाजनिर्माणस्य समुचितप्रबन्धः, न्यायस्य न्यायालयस्य दण्डस्य पर्याप्तकोशस्य यातायातस्य स्वास्थ्योपचारस्य शिक्षायाः सैन्यबलस्य च यथोचितव्यवस्थेत्यादयो बह्वोऽत्युत्कृष्टा गुणा अपि भवन्त्यन्तर्हिता गणराज्ये । पुनः परस्परं सेवाभावः सर्वेषु जनमानसेषु विद्यते । न केषु चिदप्यसमानताया भावो दृश्यते । राज्यस्य सर्वाङ्गीण विकासस्य कृतेऽपेक्षितानि सर्वविधानि वस्तूनि सुव्यवस्थितान्युपलब्धानि च । एतदतिरिक्ताः केचिदान्तरिक दोषाश्च सन्ति शास्त्रोक्ताः, येभ्यो गणराज्यानि विनाशावस्थामाप्नुवन्ति । ते चैते -- गणराज्यस्य व्यवस्थापिकायां बहवः सदस्या भवन्त्येकत्रिताः । बहुत्वाद्राज्यस्य नीतिनिर्धारणादौ सामन्जस्यं नायाति, अर्थान्मतभेदो जायते । पुनर्मन्त्रणाविधिश्च नोचितः, मन्त्रोऽपि बहुसंख्यायां विधीयते, बहुविचारयुतानां समासदां समुदये मन्त्रितस्य मन्त्रस्य भेदः सर्वथा निश्चितः, मन्त्रभेदकारणादेव गणराज्यं विनश्यति । तथोक्तं महाभारते --

भेदमूलो विनाशो हि गणानामुपलभ्यते ।[1]
मन्त्रसंवरणं दुःखं बहूनामिति मे मतिः ।

---

(१) शान्ति० १०८।८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

गणराज्यस्य न्यायव्यवस्था -

गणतन्त्रराज्यान्यनेकान्येतत्पूर्वमेवोक्तम् । त्रिचत्वारि कुलानि मिलित्वैवैकं गणराज्यं निष्पद्यते । तेषां गणराज्यानां गणोत्पादक कुलराज्यानाञ्च नियमस्तु (विधिविशेषस्तु) पृथक् पृथगेव, अर्थात्प्रत्येकं राज्यं राज्यप्रकृत्यनुरूपया न्यायव्यवस्थयान्वितम् । राज्यानामेतेषां यो यो धर्मः सोऽपि मान्यो रक्षणीयश्च । संघबद्धाः संघनियमविच्युता भवेयुर्यदा तदा तान् संघनियमात्स्वधर्माच्च प्रच्युतान्यथापराधं दण्डयित्वा स्व स्व धर्मे स्थापयेद्राजा गणाध्यक्षो वा । तथा च प्रोक्तं याज्ञवल्क्यस्मृतौ --

> कुलानि जातीः श्रेणीश्च गणान्जानपदानपि ।
> स्वधर्माच्चलितान्राजा विनीय स्थापयेत्पथि ॥ (१)

स्वधर्मानुकूलो यो धर्मः सामयिकः सोऽपि पालनीयः, तथा राज्ञा निर्दिष्टो धर्मोऽपि यत्नतो रक्षणीयः । उक्तञ्च --

> निजधर्माविरोधेन यस्तु सामयिको भवेत् ।
> सोऽपि यत्नेन संरक्ष्यो धर्मो राजकृतश्च यः ॥ (२)

मनुस्मृतावपि --

> जातिजानपदान्धर्मान्श्रेणीधर्मांश्च धर्मवित् ।
> समीक्ष्य कुलधर्मांश्च स्वधर्मं प्रतिपादयेत् ॥ (३)

---

(१) याज्ञवल्क्यस्मृतिः १।३६१ । (२) याज्ञवल्क्यस्मृतिः २।१८६ ।
(३) मनुस्मृतिः ८।४१ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

कुलराज्ये कुलन्यायालयोऽपि व्यवस्थित:, तस्मिन् कुलिक: (कुलश्रेष्ठ:) एव न्यायाधीश: । यत्र कुलशासनं गणशासनञ्च मिश्रितं भवेत् तत्र न्यायालयस्तु कुलिक एव व्यवस्थित: । वृष्णिसंघ एतद्विधेन न्यायालयेनान्वित:, अर्थात् वृजिसंघो मिश्रित आसीत्, अत: कुलिक न्यायालयान्वित: ।

कुलिकासार्थमुख्याश्च पुरग्रामनिवासिन: ।
ग्रामपौरगणश्रेण्यश्चातुर्विद्यश्च वर्गिण: ।।
कुलानि कुलिकाश्चैव नियुक्ता नृपतिस्तथा ।।[1]

कुलिकन्यायालयेऽष्टानां कुलिकानामेक: समूह आसीत्, स एव न्यायसम्बन्धि सर्वविधं कार्यं सञ्चालयति स्म । योऽष्टकुलक इति नाम्ना प्रसिद्ध: । अष्टकुलके इति कथनेनाष्टौ न्यायकर्तारो बुध्यन्ते । भृगुवचनादिदमपि ज्ञायते सर्वेषां गणराज्यानां न्यायालये न्यायकार्यसञ्चालका अष्टौ न्यायाधीशा न्यायकर्तारो वा नियुज्यन्ते । विधिशास्त्रस्याचार्या एते स्वगणोत्पन्नसर्वविधविवादस्य शास्त्रीयनियमस्याधारे निर्णयं कुर्वन्तिस्म ।

वणिग्भि: स्यात्कतिपयै: कुलभूतैरधिष्ठितम् ।[2]

न्यायालयनिश्चित विषयस्य (विवादस्य) पुनर्विचारव्यवस्थापि गणराज्ये व्यवस्थिता दृश्यते यथा -- कुलन्यायालयनिर्णीतविषयस्य पुनर्विचारश्रेण्यां श्रेणीनिर्णीतविषयस्य तु गणन्यायालयेऽर्थात्कुलन्यायालयाच्छ्रेणीन्यायालय उच्चतम: । एवमेवान्यदपि ज्ञेयम् । यो न्यायालय उच्चस्तर: स एव निम्नस्तरन्यायालयनिश्चितविषयं पुनर्विचारयति । तथा चाह बृहस्पति: --

---

(१) वीरमि० (परिभाषापरिस्कार: पृ० ६) ।

(२) वीरमित्रो० (परिभाषापरिष्कार: पृ० ३१) ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

कुलश्रेणिगणाध्यक्षा: प्रोक्ता निर्णयकारिण: ।
येषामग्रे निश्चितस्य प्रतिष्ठतूत्तरोत्तरा ॥
विचार्यं श्रेणिभि: कार्यं कुलैर्यन्न विचारितम् ।
गणैश्च श्रेण्यविख्यातं गणाज्ञातं नियुक्तकै: ॥
कुलादिभ्योऽधिका: सभ्यास्तेभ्योऽध्यक्षोऽधिक: कृत: ।
सर्वेषामधिको राजा धर्म्यं यत्नेन निश्चितम् ॥

गणराज्यानां सूची -

पुरा भारते बहूनि गणराज्यानि (प्रजातन्त्रराज्यानि) सन्चालितान्यासन् । तेषां विवरणमत्र यथासंभवं प्रस्तूयते -- महामुनिना पाणिनिना प्रदर्शितानि गणराज्यानि --

		पाणिनीयं सूत्रम्
१-	वृकगणराज्यम्	वृकाट्टेण्यण् ५।३।११५ ।
२-	दामनिराज्यम्	दामन्यादित्रि० ५।३।११६ ।
३-	कौण्डीपरथराज्यम्	,, ,, ,, ,,
४-	दाण्डकिराज्यम्	,, ,, ,, ,,
५-	कौष्टकिराज्यम्	,, ,, ,, ,,
६-	जालमानिराज्यम्	,, ,, ,, ,,
७-	ब्राह्मगुप्तराज्यम्	,, ,, ,, ,,
८-	जानकिराज्यम्	,, ,, ,, ,,

(१) वीरमि० (परिभाषापरिस्कार: पृ० ३०) ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

९- पर्श्वराज्यम् — पर्श्वादियौधेयादि० ५।३।११७ ।

१०- यौधेयराज्यम् — ” ” ” ”

११- मद्रराज्यम् — मद्रवृज्योः कन् ४।२।१३१ ।

१२- वृजिराज्यम् — ” ” ” ” ”

१३- राजन्यराज्यम् — राजन्यादिभ्यो वुञ् ४।२।५३ ।

१४- अन्धकराज्यम् — राजन्यबहुवचन० ६।२।३४ ।

१५- वृष्णिराज्यम् — राजन्यबहुवचनद्वा० ६।२।३४ ।

१६- महाराजराज्यम् — महाराजाट्ठञ् ४।३।९७ ।

१७- भर्गराज्यम् — न प्राच्यभर्गादियौधेया० ४।१।१७८ ।

१८- यौधेयराज्यम् — ” ” ” ” ”

१९- अरिष्टराज्यम् — अरिष्टगौडपूर्वे च ६।२।१०० ।

कौटिल्योक्तानि गणराज्यानि -

१- लिच्छविगणराज्यम्, कौटलीयार्थशास्त्रम् ११ ।

२- व्रजिराज्यम्, कौटलीयार्थशास्त्रम् ११ ।

३- मल्लगणराज्यम् -- कौटलीयार्थशास्त्रम् ११ ।

४- मद्रगणराज्यम् -- कौटलीयार्थशास्त्रम् ११ ।

५- कुकुरगणराज्यम् -- कौटलीयार्थशास्त्रम् ११ ।

६- कुरुगणराज्यम् -- कौटलीयार्थशास्त्रम् ११ ।

७- पाञ्चालगणराज्यम् -- कौटलीयार्थशास्त्रम् ११ ।

८- काम्बोजगणराज्यम् -- कौटलीयार्थशास्त्रम् ११ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

९- अश्वारोपणम् — [illegible] २९१।१-३० ।

१०- गजारोपणम् — " " " "

११- [illegible] — [illegible] २११।१५ ।

१२- वृक्षारोपणम् — " " " " "

१३- [illegible] — [illegible] ३।२।५६ ।

१४- [illegible] — [illegible] ३।१३४ ।

१५- [illegible] — [illegible] - २।२९३ ।

१६- [illegible] — [illegible] ४।१६० ।

१७- [illegible] — [illegible] ३।४।९०० ।

१८- [illegible] — " " " " "

१९- [illegible] — [illegible] ४।२।४०० ।

[illegible] -

१- [illegible] — [illegible] ४१४ ।

२- [illegible] — [illegible] ४१५ ।

३- [illegible] --- [illegible] ४१५ ।

४- [illegible] --- [illegible] ४१५ ।

५- [illegible] --- [illegible] ४१५ ।

६- [illegible] --- [illegible] ४१६ ।

७- [illegible] --- [illegible] ४१६ ।

८- [illegible] --- [illegible] ४१६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

९-	सुराष्ट्रगणराज्यम्	--	कौटलीयार्थशास्त्रम् ११ ।
१०-	क्षात्रियगणराज्यम्	--	कौटलीयार्थशास्त्रम् ११ ।
११-	श्रेणीगणराज्यम्	--	कौटलीयार्थशास्त्रम् ११ ।

महाभारतोक्तानि गणराज्यानि -

१-	माधवगणराज्यम्	--	शान्ति० ८२।२६ ।
२-	भोजगणराज्यम्	--	शान्ति० ८२।२६ एतदतिरिक्तानि तु पाणिनिना कौटिल्येन चोक्तानि ।

हिन्दूराज्यतन्त्रोद्धृतानि गणराज्यानि -[१]

१-	अग्रश्रेणीगणराज्यम्	२-	अंध्रगणराज्यम्
३-	अंबष्ठगणराज्यम्	४-	अवन्ती राज्यम्
५-	आभीरगणराज्यम्	६-	अर्जुनायनगणराज्यम्
७-	औदुम्बरगणराज्यम्	८-	उत्तरकुरुगणराज्यम्
९-	उत्तरमद्रगणराज्यम्	१०-	उत्सवसंकेतगणराज्यम्
११-	कठगणराज्यम्	१२-	कर्पटगणराज्यम्
१३-	काकगणराज्यम्	१४-	कुणिंदगणराज्यम्
१५-	केरलपुत्रगणराज्यम्	१६-	कोलीयगणराज्यम्
१७-	कौण्डिवृषगणराज्यम्	१८-	क्षुद्रकगणराज्यम्
१९-	गान्धारगणराज्यम्	२०-	गोपालवगणराज्यम्

(१) हिन्दूराज्यतन्त्रम् प्रथम खण्ड काशीप्रसाद जायसवाल ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

२१- नामाकगणराज्यम् २२- ग्लौचुकायनगणराज्यम्

२३- चिक्कलिनिकायगणराज्यम् २४- दद्दिाणमल्लगणराज्यम्

२५- नीसगणराज्यम् २६- नैपाल द्वैराज्यम्

२७- पटलगणराज्यम् २८-पितिनिक्कगणराज्यम्

२९- पुलिन्दगणराज्यम् ३०- पुष्यमित्रगणराज्यम्

३१- प्रस्थलगणराज्यम् ३२- प्रार्जुनगणराज्यम्

३३- बुलिगणराज्यम् ३४- ब्राह्मणक: (जनपद:)

३५- भगलगणराज्यम् ३६- मालवगणराज्यम्

३७- मौसिकानिगणराज्यम् ३८- मौरिसगणराज्यम्

३९- मौञ्जिगणराज्यम् ४०- यौनगणराज्यम्

४१- राष्ट्रिकगणराज्यम् ४२- वस्तिगणराज्यम्

४३- वामरथगणराज्यम् ४४- विदेहगणराज्यम्

४५- शाक्यगणराज्यम् ४६- शायण्डगणराज्यम्

४७- शालंकायतगणराज्यम् ४८- शिबि जनपद:गणराज्यम्

४९- शूद्रगणराज्यम् ५०- तियपुतगणराज्यम्

५१- सात्वतगणराज्यम् ५२- सनकानीकगणराज्यम्

५३- सापिण्डिनिकायगणराज्यम् ५४- सौभूतिगणराज्यम् ।

एतानि एतदतिरिक्तान्यन्यान्यपि गणराज्यानि भारतवर्षे सञ्चालितानि दृश्यन्ते । तेषां सर्वेषां वर्णनमसम्भवमस्मिन्प्रबन्धे । अत: कानि चिद्गणराज्यान्युपरि वर्णितानि सन्तीति ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

गणराज्यसम्बन्धे मदीयो विचार: --

गणनायक: सर्वविधगुणसम्पन्न: स्थापनीय:, इत्याहु: शास्त्रप्रयोक्ता: । शास्त्रकारेषु कौटिल्योऽप्येक:, राजनीतावस्य विशिष्टं स्थानं विद्यते, स चाह --

सङ्घमुख्यश्च सङ्घेषु न्यायवृत्तिर्हित: प्रिय: ।
दान्तो युक्तजनस्तिष्ठेत्सर्वचित्तानुवर्तक: ॥[१]

गणमुख्येन धर्मस्य परम्परागताचारस्य स्वकर्तव्यस्य न्यायस्य च पालनं कर्तव्यम् । विशेषतो न्यायविचारो विधातव्य:, यतो न्यायेन विना न केऽपि जीवन्ति, राज्यं च सर्वथा विनश्यति । वस्तुतस्तु प्रजातन्त्रस्य रक्षक एव न्याय: । एतद्विधमेव मतमस्ति राजनीतिज्ञानाम् । मतमेतत्प्रजाभिश्च स्वीकार्यम् । गणराज्यमिच्छन्तो जना: शास्त्रीयमतानुकूलं नायकं निर्वाचयन्ति । जननिर्वाचितोऽध्यक्षोऽपि सर्वेषु समानं भावं प्रदर्शयति, सर्वेषां चित्तं विकासकार्येऽनुवर्तयति, अर्थात्सत्कार्ये प्रवर्तयति, अन्यायात्याचारभ्रष्टाचारादीन् निवर्तयति, दुर्वृत्तेभ्यो दण्डं प्रयच्छति, शिक्षास्वास्थ्ययातायातादीनां जनजीवनस्य प्राथमिकाधाराणां विशेषव्यवस्थां विदधाति, राज्यं प्रजाश्च नशोषयति, अनुचितं दण्डं न केभ्योऽपि प्रयच्छति, स्वयमेव दासत्वं स्वीकरोति, प्रजा दासरूपा इति न स्मरति । पुनर्वरिष्ठानां धर्ममर्मज्ञानां शास्त्रज्ञानां शास्त्रज्ञानां राजनीतिज्ञानां च विदुषां परामर्शमादायैव गणं सञ्चालयति । यथा यादवगणनायकेन भगवताश्रीकृष्णेन सर्वधर्मविद: सर्वविदश्च महामुनेर्नारदस्य परामर्शमादायैव वृष्णिगणसञ्चालनं विहितम् । तथा च --

---

(१) कौटलीयार्थशास्त्रम् ११।१ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

नासुहृत्परमं मन्त्रं नारदार्हति वेदितुम् ।
अपण्डितो वापि सुहृत्पण्डितो वापि नात्मवान् ।।

स ते सौहृदमास्थाय किंचिद्वक्ष्यामि नारद ।
कृत्स्नां च बुद्धिं संप्रेक्ष्य संपृच्छे त्रिदिवंगम ।।

ममैवं क्लिश्यमानस्य नारदो मयत: सदा[1] ।
वक्तुमर्हसि यच्छ्रेयो ज्ञातीनामात्मनस्तथा ।।

कारणैरित्यादिभि: प्रजातन्त्रराज्यमत्युत्कृष्टतमं दृश्यते । गणराज्यस्य (गणसम्बद्धा:) प्रजा अपि नैतिकगुणसम्पन्ना: सदाचारशीला धर्मपरायणा: कर्मनिष्ठाश्च भवन्ति । समानताया: स्नेहस्य परस्परं सहयोगस्य च भाव: सर्वासु प्रजासु विद्यते । कृषिवाणिज्यादिषु विविधेषूद्योगेषु च निपुणा भवन्ति ता: । आर्थिकसमुन्नतावपि सदैव दत्तचित्ता दृश्यन्ते । जनानामेतद्विधया भावनया राष्ट्रियकोशोऽपि पूर्णतां याति । पूर्णकोशान्वितस्य देशस्य विकास: सर्वथा सिद्ध: । कौटिल्यो 'वार्ताशस्त्रोपजीविन' इत्याह, अस्याशयस्तु -- गणराज्यस्य प्रजा: कृष्यादौ शस्त्रास्त्र विद्यायान्च कुशला भवन्ति स्म, रणादौ शूरतां वीरतां च प्रदर्शयन्तिस्मेति । प्रजातन्त्रराज्ये सैनिका अपि सुव्यवस्थिता अनुशासिता कर्तव्यपरायणाश्च दृश्यन्ते । कौटिल्यमते सर्वा: प्रजा अपि सैनिकसदृशा भवन्ति । पुन: सर्वा: प्रजा: स्वतन्त्रास्तस्माद्राज्यं च स्वतन्त्ररूपेणैव विकसति। इत्थं विकसितं राज्यं सर्वशक्तिसम्पन्नम्, तस्मात्परैरजेयममर्दनीयन्च ।

गणराज्यस्य कर्मचारिणोऽपि नैतिकगुणान्विता अनुशासनशीला:

---

(१) शान्ति० ८२।३-१२ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

सततं स्व स्व कर्तव्योन्मुखा यथा कालस्वकार्यसंपादनरता उत्कोचग्रहणादि भ्रष्टाचारविमुखा: संघस्योत्थानकार्यतत्पराश्च भवन्ति । प्रकारेणानेन गण-राज्यस्यात्युत्तमान् गुणान् प्रदर्शयन्ति राजनीतिज्ञा विद्वांस: । किन्तु ते एव पुनर्दोषानपि प्रतिपादयन्ति । दोषाश्च -- गणराज्ये सर्वा: प्रजा: स्वतन्त्रा:, स्वतन्त्ररूपेणैव सदा विचरन्ति, पूर्णरूपेण स्वतन्त्रा: अराजका: प्रजा: स्वेच्छाचरणशीला असत्कार्यं प्रवृत्ताश्च भवन्ति । अराजकं राज्यमेव पापमयम् । तथा च --

न हि पापात्पापतरमस्ति किंचिदराजकात्[१] ।

सर्वत्र सततमशान्तं वातावरणं समुत्पद्यते, सर्वसाधारणाशक्तिहीना जना सदैव भयभीता दु:खाकुलाश्च भवन्ति । अतो लोकतन्त्रात्मकराज्याद्राज-तन्त्रात्मकराज्यमेव श्रेयस्करमित्याहुर्बहवो राजशास्त्र प्रवर्तका विद्वांस: । मदीये विचारेऽपि लोकतन्त्रात्मक (गणतन्त्रात्मक) राज्याद्राजतन्त्रात्मकं प्रजातन्त्र-राज्यमेव प्रजाजनानां कृते श्रेयस्करम् । यत: प्रजा: पूर्णस्वतन्त्रा न भवन्ति तस्मिन्राज्ये । अस्वतन्त्रा: (राजप्रदत्तसामाजिक बन्धनान्विता:) प्रजाजना न किमपि दु:खकारणं मात्स्यन्यायादिकमुत्पादयितुं समर्था: । अर्थात्सर्वे जना राज्योक्त नियमाबद्धास्तस्योपेक्षाणं कर्तुं न केऽपि शक्नुवन्ति । उपेक्षां कुर्वन्ति चेत्सर्वथा दण्डनीया: । पत्तननियमोऽयं राज्ञ: प्रजानाञ्च संयुक्तया सहमत्यैव निर्मीयते । अस्यैव नियमस्याधारे प्रजानां सहयोगं परामर्शं सम्मतिं चादायैव राज्यं सञ्चालयति राजापि । जनानुकूलेनार्थाज्जननिर्वाचितेन राज्ञा

---

(१) शान्ति० ६७।७ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

[illegible]

[illegible]

---

(१) कारिका ४१० ।

सन्चालितं राज्यमेव मङ्गलमयं विद्यते सदैव । तथैव प्रोक्तं महाभारतेऽपि --

स चेत्समनुपश्येत समग्रं कुशलं भवेत्[1] ।

अस्माकं पूर्वजाकृष्णयोऽपि राज्ञोऽभावे न केऽपि सुरक्षिता इति मन्यन्तेस्म, तस्मात्तेऽपि राजान्वितं प्रजातन्त्रमेवेच्छन्ति स्म । इत्थं राज्ञोऽनिर्वार्यता विषये न केषाञ्चिदपि द्वैधं मतम् । उक्तञ्च महामुनिना व्यासेन --

तस्माद्राजैव कर्तव्यः सततं भूतिमिच्छता ।
न धनार्थी न दारार्थस्तेषां येषामराजकम्[2] ।।

अतः प्राचीनकालादद्ययावद्भारतेवर्षे राज्ञोराष्ट्रपतेर्वा निर्वाचन-परम्पराऽस्ति प्रचलिता ।

समितिः सर्वोत्कृष्टासंस्था -

वैदिके युगे सर्वोच्चैकासार्वजनीनासंस्थाऽऽसीत्परिकल्पिता । समित्यभिधेयासंस्था लोकसंमत्यनुकूलत्वेन राष्ट्रियजीवनस्य सर्वविधानि कार्याणि सन्चालयति स्म । राष्ट्रस्योत्कृष्टतमायामस्यां समितौ सर्वासां प्रजानां सबला-शक्तिरासीदेकत्रिता । अर्थादस्यां सर्वेषां विशामासीत्प्रतिनिधित्वम् । विश इत्येष शब्दो वेदे प्रजा बोधयति, अतः समितौ सर्वाः प्रजा भवन्ति समुपस्थिताः, अथवा तासां प्रतिनिधयः । तदानीं प्रतिनिधित्वस्याप्यासीत्प्रचलनम्, समितौ तु प्रतिनिधय एव समुपस्थाय स्वं कार्यं सक्रियरूपेण सम्पादयन्ति स्म । किन्तु ऋग्वेदे

(१) शान्ति० ६७।८ । (२) शान्ति० ६७।१२ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

"विशस्त्वा सर्वा वाञ्छन्तु मास्वद्राष्ट्रमधि भ्रशत्"[1] । इत्युक्तत्वाद्राज्ञो निर्वाचनादौ तु सर्वे विश एव भवन्त्येकत्रिता: । एकत्रितो जनसमाजो राज्ञो निर्वाचनं निर्वाचितस्य राज्ञ: स्थायित्वस्योपायञ्च कल्पयति । निर्वाचनादौ तु जनसमाजो भवत्येकत्रित-स्तथाप्ययं समित्यन्तर्गत एवाधात्तस्या निर्देशने तयैवोक्तं कार्यं करोति । अतोऽत्र-जनसमाजोऽपि समितेरेवोपोद्बलक: । तस्मात्प्रजाशब्देनापि समितिरेवेङ्गिता । इत्थं सर्वत: पुष्टतां गताया अस्या: प्राधान्यं तदानीमासीत्सर्वमान्यम् ।

राज्ञोनिर्वाचनादीनि कार्याणि समित्यन्तर्गतानि -

राजनैतिकं सामाजिकं धार्मिकञ्चेत्यादीन्यनेकानि कार्याणि वेदोक्तानि, एतानि सर्वाण्येव समित्यन्तर्गतानि । कार्येष्वेतेषु राजनैतिकं कार्यन्तु विशेषमहत्व-प्रतिपादकम् । कार्यमेतदप्यनेकशाखोपशाखादिभिरुपेतम् । तासां सर्वासां सञ्चालनन्तु समितेरेव संभवम् । समिते: सञ्चालनीयेषु कार्येषु राज्ञोनिर्वाचनं महत्वपूर्णम् । यत: समितिरेव राज्ञे राजपदं प्रयच्छति, राजानं राजपदान्निष्कासयति । कारण-वशात्पदच्युतमसमर्थतया विरोधादिना वा पदान्निर्गतं निष्कासितं वा राजानं पुन: पदेस्थापयत्येषा । एतद्विवृतमथर्ववेदेऽपि --

श्येनो हव्यं नयत्वा परस्मादन्यक्षेत्रे अपरुद्धं चरन्तम् ।
अश्विना पन्थां कृणुतां सुगं त इमं सजाता अभिसंविशध्वम् ।।[2]

एतद्विधाधिकारसंपन्नेषा, तस्मादस्या: महत्वमुत्कृष्टतां चैकस्वरेण

---

(१) ऋग्वेद: १०।१७३।१ । (२) अथर्ववेद: ३।३।५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

गायन्ति वेदाः । त्वां विशो वृणतां राज्याय[1] । ध्रुवाय ते समितिः कल्पतामिह[2] । इत्युक्त्वाग्निर्वाचनक्रियया राज्ञे राजपदप्रदानं विधाय तस्मिन्पदे तस्य स्थायित्वमनुकल्पयत्येषा । राजनीतिराज्यव्यवस्थायाश्च मूलाधाररूपेणा समितिस्तस्माद्विशेषतो राज्यस्य मन्त्रं (नीतिनिर्धारणविषयं) चिन्तयति । राज्ये सर्वेषामेकमत्यं सर्वेषु समानं भावमेकतां चेच्छति, न केषु केषाञ्चिदपि पक्षपातमसमानं भावमन्विच्छति । एष एव भाव ऋग्वेदेऽपि प्रस्फुटितः, अर्थाद् य आशय ऋग्वेदस्यास्ति तस्याशयस्य परिपालनं समितेः कर्तव्यमतः स्वं कर्तव्यन्तु पालयत्येवैषा । ऋग्वेदस्याशयस्त्वित्थं प्रकटितः --

संगच्छध्वं संवदध्वं संवोमनांसि जानताम् ।
समानो मन्त्रः समितिः समानी समानं मनः सह
चित्तमेषाम् । समानं मन्त्रमभिमन्त्रयेवः समानेन
वो हविषा जुहोमि[3] ।।

धार्मिककार्याण्यपि समितेरधीनानि । कार्येष्वेतेषु कानि चित्समितेस्ततो निर्देशितानि कानिचित्तु स्वयमेव सञ्चालयति समितिः । स्वसञ्चालितेषु कार्येषु शास्त्रार्थः, शास्त्रीयं वक्तव्यम्, शास्त्रीयं प्रवचनञ्चेते विषया महत्त्वपूर्णाः । धार्मिकसामाजिकार्थिकराजनैतिकादिषु कार्येषु वेदानां वेदमूलकानां धर्मशास्त्रादि-शास्त्राणां कोऽस्त्याशयः कस्मिन्विषये कस्यास्ति किं मतम् । विशेषतो राजनीतौ शास्त्रप्रवर्तकानां कीदृशोऽस्ति दृष्टिपातः, कुत्र कुत्र किं किं कथयन्ति ते, एतत्सर्वं

---

(१) अथर्ववेदः ३।४।२ । (२) अथर्ववेदः ६।८८।३ ।

(३) ऋग्वेदः १०।१९१।२-३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

ज्ञातव्यं तया, अतस्तदर्थमेवार्थाच्छास्त्रीय ज्ञानोत्पादनार्थं विदुषां समामाह्वयति समितिः। सभायां समुपस्थिताः शास्त्रमर्मज्ञाः केचिद् विद्वांसः शास्त्रार्थं कर्तुं केचित्तु शास्त्रीयं वक्तव्यं दातुमिच्छन्ति। समितिश्च विदुषामिच्छानुकूलां व्यवस्थां विदधाति। ततस्तेषु केचिच्छास्त्रीयं प्रवचनादिकं प्रतिपादयन्ति, केचित्तु शास्त्रज्ञतां विद्वत्तां श्रेष्ठतां वा प्रदर्शयन्ति, प्रखरपाण्डित्योपेताः केचिद्दोषज्ञास्त्वकुण्ठित-ज्ञानसम्पन्नोऽहं मां जेतुं मत्समक्षं प्रतिवादं कर्तुं वा न कोऽपि समर्थः, यदि यो मद्-विरुद्धं विवादं करोति सोऽवश्यं शक्तिहीनो तिरस्कृतो वा भविष्यतीत्युक्त्वाभिमानञ्च दर्शयन्ति। तथथा पारस्करगृह्यसूत्रे --

अभिभूरहमागमविराड् प्रतिवाश्या:[१]।

विषयस्यास्योदाहरणम् -- श्वेतकेतुः सर्वविधशास्त्रमर्मज्ञ आसीत्, चतुर्विंशति तमे वयसि वेदधर्मशास्त्रन्यायदर्शनादीनां शास्त्राणामध्ययनं समाप्य शास्त्रज्ञानं सम्पाद्य पान्चालानां समितिं सम्प्राप्तः "पान्चालानां परिषदमाजगाम" तत्र दर्शनविषयेण सह सम्बद्धाः पन्च प्रश्नाः समुपस्थापिताः तेषु प्रश्नेषु समुपस्थित-विद्भिरनेके विविध- तर्कविशेषा विचाराश्च प्रस्तुता आसन्। इत्थं विद्यापीठस्य कार्यमपि सन्चालयति स्म समितिः। एतद्विधं शास्त्रीयं प्रवचनादिकन्तु विकसितजनसमाज एव संभवम्। अत एतस्याः समितेः कालोऽपि ऋग्वेदस्यान्तिम काल एव सम्भवः, यतो वैदिककालस्यान्तिम कालस्तु विकसितावस्थां संप्राप्तो दृश्यते, तदानीन्तने काले तु बहवो विद्वांसोऽपि समुद्भूता आसन्, शिक्षायाः प्रचारः प्रसारोऽप्यासीत्,

---

(१) पारस्करगृह्यसूत्रम् ३।१३।४ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

जनसमाजेऽप्यनेकानि विकासकार्याणि प्रारम्भितान्यासन् ।

समितेरध्यक्षस्तु राजैव -

कस्यान्चिदपि समितावध्यक्षस्तु नितरामपेक्षितः, अस्यामप्यध्यक्षो व्यवस्थित एव । एषा समितिस्तु राष्ट्रिया, राष्ट्रियनीतिनिर्धारणं सर्वं राजकार्यंचिन्तनन्चास्यामेव, अतोऽस्या अध्यक्षताग्रहणन्तु राज्ञैव कर्तव्यम् । अध्यक्षोऽयम् "ईशानः" इति शब्देनोच्यार्यते "अस्याः पर्षद ईशानः सहसा सुदुष्टरो जन" इत्युक्तत्वात् । समितौ राज्ञ उपस्थितिरनिवार्या, तस्य कर्तव्यत्वात् । पुनर्यस्मिन्राजनि वास्तविकं राजत्वं विद्यते तादृशो राजा समितेरध्यक्षता ग्रहणन्तु करोत्येव । तथथा ऋग्वेदस्य नवमण्डलस्य द्विनवतितमे सूक्ते --

[2]

परिषयेव पशुमान्तिहोता राजानः सत्यः समितीयानः ।

यदि राजा समितिं न गच्छति, समितेरध्यक्षतां नाङ्गीकरोति तदा तस्मिन्वास्तविकी राजशक्तिर्नोपलब्धा, अर्थाच्छक्तिहीनो राजाध्यक्षतामस्वीकरोति, शक्तिसम्पन्नस्तु स्वीकरोत्येव । समितेरस्तित्वं तु राज्ञोऽध्यक्षतायामेव । तात्कालिका राजानस्त्वनिवार्यरूपेण समितेरध्यक्षतां स्वीकुर्वन्ति स्म । यथा पान्चालानां समितौ राजा प्रवाहण सदैव समुपस्थितो दृश्यते ।

समितेः संघटनम् -

---

(१) पारस्करगृह्यसूत्रम् ३।१३।४ । (२) ऋग्वेदः ९।९२।६ ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

वेदादिशास्त्रज्ञानां दार्शनिकानां राजनीतिज्ञानां ब्राह्मणादिवर्णानां वर्णानाञ्च ये प्रतिनिधयस्तेषां ग्रामाधिपानाञ्च समुदय एव समितिः, अर्थादेते सर्वे भवन्ति समितेः सदस्याः। वस्तुतस्तु देशस्थानां सर्वविधानां जातीनां वर्णानाञ्च प्रतिनिधित्वं भवति तत्र। यद्यप्यथर्ववेदे बहव्यः समितयः सन्ति प्रदर्शिताः[१], तथाप्यत्रतु ताः सर्वा न तु चर्चिताः, अत्र तु केवलं केन्द्रीयसमितेः संघटनात्मकं स्वरूपं प्रदर्श्यते। तत्संघटनमपि ग्रामसमितेर्विकसितं रूपमङ्गीकरोति, अर्थात्केन्द्रीयसमितेः संघटनस्य मूलाधारस्तु ग्रामसमितिरेव। ग्रामसमितेः केन्द्रीय-समितौ प्रतिनिधित्वमनिवार्यम्। बहूनां जनानां निवासस्तु ग्राम एव, जनानां बाहुल्यात्समितेर्बहुतायतनन्तु स्वाभाविकमेव। ग्रामसमितेः प्रचुरतया केन्द्रीयसमितौ ग्रामसमित्याप्रेषितानां प्रतिनिधीनां प्राचुर्यन्तु स्वभावतः सिद्धम्। अतो ग्रामसमितितो गतानां सदस्यानामाधिक्यात् बहुमतमपि तेषामेव, अत एव ग्राम-समितिः केन्द्रीयसमितेराधाररूपा। प्रकारेणानेन ऋग्वेदकाले समुदितेयासमितिः सूत्रकालमागत्य सभायां परिणता "अथातः सभाप्रवेशनम्"[२] इत्युल्लिखितत्वात्। ततः प्रभृति समिते आस्तित्वन्तु समाप्तमेव।

सभा - राज्यस्य सर्वोच्चासंस्था -

वैदिककाले सभासमित्यभिधानं संस्थाद्वितयमासीत्सक्रियम्। एते द्वे एव

---

(१) ये ग्रामा यदरण्यं याः सभा अधि भूम्याम्।
ये संग्रामाः समितयस्तेषु चारु वदे मते ॥ (१२।१।५६)।

(२) पारस्करगृह्यसूत्रम् ३।१३।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

संस्थे राजपदप्रदानार्थं सर्वविधेषु राजकार्येषु पूर्णसहयोगप्रदानार्थञ्च सततमास्तां कार्यशीले । एतयोर्द्वयोरुत्पत्तेः स्थानन्तु प्रजापतिरेवार्थात्प्रजापतेर्दुहितृत्वावेवैतेऽत्युक्तमथर्ववेदेन --

सभा च मा समितिश्चावतां प्रजापतेर्दुहितरौ संविदाने ।
येना संगच्छा उपमास शिक्षाच्चारु वदानि पितरः संगतेषु[1] ।।

समासमितिश्चैते द्वे राष्ट्रिये संस्थे, एते राज्ञो दुहितृरूपे, अतोऽनयोः संरक्षणं संवर्धनञ्च पुत्री यथा पितृगृहे भवति रक्षिता पालिता च तथैव कर्तव्यं राज्ञा । एतयोर्भावो विचारश्च समानः क्रियाकलापोमतञ्चैकविधम्, अतो राष्ट्रियं सर्वविधं कार्यञ्चैकमत्येन साधायतः एते । प्रजारञ्जकाय राज्ञे सर्वतः सहयोगं राज्यसञ्चालनविधौ सततं सुसम्मतिं च प्रयच्छतः । अनयोः समासमित्योर्ये सभासद एतैः सर्वैः समायां समुपस्थाय मर्यादितरूपेण राष्ट्रस्य हितचिन्तनं विधातव्यम् । एतयोः समितिस्तुपर्यूर्ध्वं वर्णिता, इतः परं समायां वर्णनं विधीयते । सभैषा राज्ञोराष्ट्रस्य च सदैव हितकरी । अस्याश्चिन्तनमत्युत्कृष्टमधिकारो विचारश्चोच्चतमः, तस्मादेषा सर्वोच्चा ।

सभास्वतन्त्राधिकारसम्पन्ना -

राज्यशासनं जनमतानुकूलं कल्पनीयम्, एतदर्थं राज्ये संस्थापिताः सर्वविधाः स्वतन्त्राधिकारसम्पन्ना विधातव्याः । वेदेनाप्येतदेवमतमङ्गीकृतम् । लोकमतानुकूलराज्यसञ्चालनार्थं राज्ये भवन्त्यनेकविधाः सभाः परिकल्पिताः, तासु ग्रामसभा,

---

(१) अथर्ववेदः ७।१२।१ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

नगरसभा, राष्ट्रसभा चैतास्तिस्रः प्रमुखां भूमिकामावहन्ति । एता स्तिस्र एव स्वस्य स्वस्य स्थानस्य विकासार्थं सुव्यवस्थापनार्थञ्च भवन्ति निरन्तरं कार्यशीलाः स्वतन्त्ररूपेण स्वं स्वं कार्यं साधयन्ति च, अर्थाद्ग्रामसभाग्रामस्य नगरसभा नगरस्य राष्ट्रसभा राष्ट्रस्यैव धार्मिकं, सामाजिकं राजनैतिकञ्चेत्यादिकं सर्वविधं कार्यं सम्पादयन्ति । राष्ट्रीया सभा तु स्वतन्त्रां राष्ट्रीयां नीतिं निर्धारयति राज्यसञ्चालनसम्बन्धिनियमं च विरचयति । राष्ट्रसभया यद्विधो राष्ट्रीयो नियमो निर्मितो भवेत्तेनैव नियमेनाबद्धा भवन्त्यन्याः सभाः, अर्थादस्या एवाधीनं स्थित्वा तस्या एव नीतिं निर्देशनञ्चानुमोदयन्ति, राष्ट्रसभया प्रदत्तनियमस्याधार एव निर्दिष्टं विकासादिकं कार्यं चिन्तयन्ति । राष्ट्रसभा प्रजारक्षकस्य राज्ञः पुत्रीतिसिद्धा, अर्थाद्राजाऽस्याः पितृस्थानीयः । पितापुत्रीं जनयति ततः पालयति पोषयति च किन्तु न करोत्युपभोगन्तु तस्याः, पुनः पुत्री न पितृशासिता, नपितु-रधिकारान्तर्गता च, तां प्रत्यधिकारः शासनं च कस्यचिद्ग्रहीतुरेव । सभायागतिश्चैतादृश्येवार्थात्सा न राज्ञोऽधीना, पितृतुल्यत्वात्केवलं तस्याज्ञां निर्देशनञ्च पालयति । अस्या अस्तित्वमेव स्वतन्त्रं विद्यते, तस्माद् विधानमपि स्वतन्त्रं रचयति, तस्यैवाधार एव सर्वं कार्यं साधयति । अथर्ववेदोऽप्याह "सभा च समितिश्च प्रजापतेर्दुहितरौ" दुहितृशब्दोऽयमत्र विशेषं महत्त्वं प्रतिपादयति । शब्दस्यास्य व्युत्पत्तिं प्रदर्शयति यास्काचार्यः "दुहिता दूरे हिता"[१] दूरं स्थित्वापि पितुर्हितं चिन्तयति दुहिता । तद्वदेव सभापि न राज्ञोऽन्तिको, अर्थाद् विचारसिद्धान्तक्रियाकलापादिषु भिन्नतां जनयति, अर्थात्तस्याः कार्यं राजकार्यात्पृथग् विधमुक्तां प्रति न राज्ञो नियन्त्रणमपि, तथापि राज्ञो राष्ट्रस्य च सदाहितं चिन्तयति । सभायाः सभासदोऽपि स्वतन्त्रा एव, स्वतन्त्ररूपेण निर्भयेन च सभायां स्वं स्वं विचारं तथ्य-

---

(१) निरुक्तम् ३।१।४ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

विषयन्वोपस्थापयन्ति । "संविदाने" इत्युक्तत्वात्सभायामैकमत्यमपेक्षितं सभासदाम्, यदि तदसम्भवं भवेत्तदा बहुमतेनापि सभायां समुपस्थापितप्रस्ताव-स्यनिर्णयो विधातव्य: । तस्यां निर्णीतोविषयो राज्ञापि सर्वथा स्वीकार्य: । इत्थं स्वतन्त्राधिकारमादाय जीवति सभा[१] ।

सभाया: सभासदो राज्ञ: पितृस्थानीया: -

"चारु वदानि पितर: सङ्गतेषु" वेदवचनमेतत्, अस्याशयस्त्वेष एव - हे पितर: ! (सभाया: सभासद:) सभायामन्यत्र चाहं सद्विषयं प्रतिपादयिष्यामि, सर्वासु प्रजासु च सद्व्यवहारं करिष्यामीति । इत्थमत्र पितृशब्दस्य प्रयोगोऽस्ति सभासद: "पितर:" इत्युच्यन्ते, अर्थादेतेषां भवति पितृशब्देन सम्बोधनम् । सभा राज्ञो दुहितेत्युपर्येवोक्तं पुन: सभासदस्तु कथं पितृशब्देनोच्चार्यन्ते, शब्दोऽयमत्रा-सङ्गतो दृश्यते, तथाप्यत्र पितृशब्दस्य ग्रहणमेवोचितम्, यत: पितृशब्दस्यार्थस्तु रक्षक उत्पादकोऽपि, द्वावेवार्थावत्रसार्थकौ, सभासदोराजानं निर्वाचयन्ति राजपदे-स्थापयन्ति च तस्मादेते उत्पादका: । प्रकारेणानेन तस्योत्पादनं विधाय तस्मै सर्वत: सहयोगं समुचितं परामर्शं च दत्त्वा रक्षणं कुर्वन्त्यथास्मिन्पदे तस्य स्थायित्वं कल्पयन्ति, अतस्ते भवन्ति रक्षका अपि । उत्पादनाद्रक्षणाच्च पितृ-शब्द: सार्थकतां याति, तदेव कार्यं ते कुर्वन्त्यत स्ते पितृतुल्या: पितृस्थानीया वा, अतएवैतेषामत्र पितृशब्देनोच्चारणं सर्वथा सङ्गतमेव ।

---

(१) अथर्ववेद: (७।१२।१ (मातृभूमि और स्वराज्य शासन, सातवलेकरकृतव्याख्या) ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

नरिष्टा सभा -

सभाया अस्या वर्णनमथर्ववेदोपलब्धम्, यथा -- "विद्म ते सभेनाम नरिष्टा नाम वा असि"[1] । नरिष्टाया द्वावेवार्थौ प्रदर्शयति पं०श्रीपादोदामोदर-सातवलेकर: -- नरै: इष्टा, नरा नेतारश्च यदिच्छन्ति तेभ्य एतत्प्रयच्छति, अथवा नराणां नेतृणान्च भवति प्रिया इष्टा वा या सभा सा नरिष्टा । एतद्विधां सभां सततमिच्छन्ति प्रजाजना: । यत: सभैषा प्रजानामनुकूलतां याति । जनभावनानुकूलया-एतया सभयैव प्रजानां सर्वविधा: समस्या ज्ञात्वा तासां समाधानोपायं चिन्तयति राजा । इत्थं सभाया माध्यमेनैव जनानां भवति समस्याया: समाधानम् तस्माद् भवन्ति प्रजा दु:खमुक्ता: । दु:खस्याभाव एव जनसमाजे भवति सुखस्य शान्तेश्च समुदय: । एतद्विधं सभायामहत्वं जानन्तो जना: नकदाप्यस्या उपेक्षां कुर्वन्त्यथात्सदैव स्थितिमिच्छन्ति, इत्यैकोऽर्थ: ।

अस्या अपरोऽर्थ: -- न रिष्टा, या सभा न कमपि विनाशयति, यस्या विनाशं कर्तुं न कोऽपि समर्था: सा न रिष्टा । एतादृश्या विनाशरहिताया: सर्वविधशक्तिसमेताया: जनभावनानुकूलमयाश्च सभाया: संस्थापनात् प्रजाया भवति सर्वत: संरक्षणम्, लोकस्यानुकूलतां गतस्य राज्ञोऽपि । अत: प्रजा अस्या: समाप्तिं नेच्छन्ति, यथास्थितिमिच्छन्ति, संरक्षणे संवर्धने च प्रयत्नशीला भवन्ति । प्रजाभि: संस्थापितायास्तासां सद्भावनया सहयोगेन च सबलतां गताया अस्या विनाशं कर्तुं

---

(१) अथर्ववेद: ७।१२।२ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

राजाप्यसमर्थः । इत्थमेषा राज्ञः प्रजानाञ्च कृते सर्वथाऽपेक्षिता, तस्मान्न कदापि विनाशावस्थामाप्नोति । अतएवास्याः, नरिष्टा, इत्येतन्नाम सर्वथा सार्थकं दृश्यते[1] ।

पौरसभा -

पुरस्थानां जनानां समूहः पौरः । मित्रमिश्रस्तु "पौरः पुरवासिनां समूहः[1]" इत्याह । पौराणां सभा पौरसभा । सभेयं राजनगरादितरेषु नगरेष्व-पि भवति संस्थापिता । एषा सार्वजनिकी सामूहिकी वा । समूहः संघटनं बोधयति । संघटनान्यपि बहूनि बहुविधानि भवन्ति संघटितानि । तान्यप्यनेकैर्नामभिर्भवन्ति विख्यातानि यथा -- वणिगादीनां संघटनं "पूगः" इति नाम्ना प्रसिद्धम् ।

समूहो वणिजादीनां पूगः संपरिकीर्तितः[2] ।

किञ्चित्संघटनं तु संघशब्देनाप्युच्चार्यते --

आहर्तसंगतानां तु समूहः संघ उच्यते[3] ।

केचित्समूहा गणशब्देनाप्युच्चार्यन्ते । इत्थं संघटनानि पूगः, गणः संघश्चैतैर्नामभिर्भवन्त्युच्चारितानि । एते सर्वे पूगादयः समूहाः सार्वजनिकसंस्थायां सन्ति परिगणिताः । एते पूगादय एव वर्गेष्वपि भवन्ति परिगणिताः । ग्राम-पौरगणश्रेण्यश्चैते वर्गेष्वपि प्रमुखाः । उक्तञ्च - ग्रामपौरगणश्रेण्यश्चतुर्विधाश्च वर्गिणः[4] ।

---

(१) वीरमित्रोदयः ।

(२) विवादरत्नाकरः पृ० ६६६ चण्डेश्वरोद्धृतम् (हिन्दूराज्यतन्त्रम् भा० २ पृ० ६५)

(३) कात्यायनः । (४) वीरमित्रोदयः (व्यवहारप्रकाशः) ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

एवञ्च बृहस्पतिः - गणपाखण्डपूगाश्च व्राता च श्रेणयस्तथा ।
समूहस्थाश्च ये चान्ये वर्गाख्यास्ते बृहस्पतिः ।

कात्यायनेनाप्यनेकेषां वर्गाणामुल्लेखः कृतः --

लिङ्गिनः श्रेणिपूगाश्च वणिग्जातास्तथापरे ।
समूहस्थाश्च ये चान्ये वर्गास्तानब्रवीद्भृगुः ।।

एतादृशान्यनेकानि संघटनानि शास्त्रोदितानि । तानि सर्वाणि स्वस्य स्वस्य संघटनस्य सबलतां स्थायित्वं चेच्छन्ति, तदर्थमेव वर्गोपयुक्तान् पृथक् पृथक् नियमान् विरचयन्ति, वर्गितास्तेऽपि यदि न वेदविरुद्धा अर्थात् वेदादिभिस्तेषां विरोधो न कृतः, किन्तु तेषु वेदादिमूलत्वं तु नोपलभ्यते तथापि प्रामाणिकाः, परिपालनीया वाऽर्थात् संघविरचिता नियमा निर्मूला इत्युक्त्वा तेषां विनाशं कर्तुं न केऽपि समर्थाः । तथैव विवृतं गौतमधर्मसूत्रे --

देशजातिकुलधर्माश्चाऽऽम्नायैरविरुद्धाः प्रमाणम् ।
कर्षकवणिक्पशुपालकुसीदिकारवः स्वे स्वे वर्गे[1] ।।

अस्मादिदमपि ज्ञायते सूत्रकालादेवैतेषां कृषकादीनां संघटनं संस्थापितम् । संघटिता एते राज्याङ्गेष्वपि परिगणिता दृश्यन्ते । तथाचामरः --

राज्याङ्गानि प्रकृतयः पौराणां श्रेणयोऽपि च[2] ।

राज्याङ्गरूपा एते सर्वे वर्गा भवन्ति पौरसभायाः सदस्याः । सर्वविधवर्गसंमिलिता सभैषा नगरस्य प्रमुखा संस्था । नगरस्य सर्वविधा आन्तरिकसमस्याः

---

(१) गौतमधर्मसूत्रम् २।२।२०-२१ । (२) अमरकोशः २।८।१८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

समावर्धयति, अव्यवस्थितान् विषयान् व्यवहारान् वा व्यवस्थापयति, नगरस्य सुव्यवस्थायां राष्ट्रसंघटनविषयेऽप्यस्यामहत्वपूर्णाभूमिका विद्यते । नगरविकासस्य कृते निरन्तरं कार्यशीलाया महत्वपूर्णाधिकारसम्पन्नाया अस्याः पौरसभायाः सभापतिस्तु भवति नगरप्रमुखो नागरिकः । अस्योच्चारणन्तु श्रेष्ठिन् वा प्रधान इति शब्देन विधीयते स्म तदानीम् । सभापि द्विविधा बाह्यान्तरिकीचेति । बाह्यसभायाः सभासदस्तु भवन्ति नगरस्थाः सर्वे वर्णा वर्गाश्च । आन्तरिकसभायान्तु बाह्यसभयानिर्वाचिता नगरवृद्धा श्रेष्ठाश्च पुरुषाः प्रतिनिधित्वं कुर्वन्ति । सैवसभानगरस्य कार्यकारिणी, या नगरे स्थायित्वमाप्नोति । सभायामस्यामेकः कार्यकुशलो लेखकः सचिवो वापि स्थाप्यते, यः कार्यालयस्य लेखनादिकं सर्वं कार्यं सञ्चालयति । उक्तञ्च --

चिरकं नाम लिखितं पुराणैः पौरलेखकैः[१] ।

पौरसभायाः कर्तव्यम् -

सामाजिकधार्मिकराजनैतिकादीनि बहूनि बहुविधानि कार्याण्यस्या अधिकारान्तर्गतानि । सभया सञ्चाल्यमानेषु कार्येषु राजनैतिकादतिरिक्तान्येव कार्याण्यत्र प्रदर्श्यन्ते । तेष्वपि निम्नाङ्कितानि प्रमुखाणि ।

(क) मृतस्यादायादस्य सर्वं धनं राजकोशगामीतिशास्त्रीयोऽयं नियमः, अतः पौरेषु केऽदायादाः, तेषु कः कुत्र वर्तते, कस्य चलं सुवर्णद्रव्यभाण्डादिकमचलं भूम्यादिकं च धनं कियत् कुत्र चास्ति, एतत्सर्वमन्विष्य तथ्यज्ञानोत्पादनं कर्तव्यम् ।

---

(१) वाशिष्ठः ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

ततो यदा ते दायादहीना मृत्युं यान्ति तदैव तेषां सर्वं धनं गृहीत्वा कोशवर्धनं विधातव्यम् । यदि सर्वकार: स्वयमेवादायादानां धनग्रहणकार्ये संलग्नो भवेत्तदा तस्मिन्कार्ये तस्मै पूर्ण: सहयोग: सभयादातव्य: । एतदेवोक्तमस्ति वशिष्ठ-स्मृतावपि --

"प्रक्षीणद्रव्याणि राजगामीनि भवन्ति । ततोऽन्यथा राजामन्त्रिभि: सह नागरैश्च कार्याणि कुर्यात्[1]" ।

(ख) नगरे ये दरिद्रा: सहायहीना अनाथाश्च सन्ति तेषां वस्त्रान्न द्रव्यादिना सहयोगं विधाय मृते सत्यपि दाहसंस्कारादिकं कर्तव्यम् ।

तथानाथदरिद्राणां संस्कारो यजनक्रिया[2] ।

(ग) संरक्षकहीनानामप्राप्तव्यवहाराणामनाथानां हिरण्यद्रव्यभूम्यादिकं यद्धनमस्ति तस्य संरक्षणं सभया समासदैर्भिर्वा यत्नत: कर्तव्यमा व्यवहारप्रापणात्, तथा देवधनस्यसंरक्षणं संवर्धनन्तु सदैवकर्तव्यम् । अत्र सभासदिति कथनेन ग्रामवृद्धा नगरवृद्धा वा गृह्यन्ते यतस्त एव भवन्ति सभाया: समासद: ।

बालद्रव्यं ग्रामवृद्धा वर्धयेयुराव्यवहारप्रापणाद्देवद्रव्यं च[3] ।

अप्राप्तव्यवहाराणां देयविशुद्धं - - - - ग्रामवृद्धेषु वा स्थापयेयुराव्यवहारप्रापणात्[4] ।

(घ) नित्यनैमित्तिककाम्यशान्तिकपौष्टिकादीनि कर्माण्यपि नगरे समयैवाथवा

---

(१) बीस स्मृतियां (वशिष्ठस्मृति:, व्यवहारविधिवर्णनम् ३४१-३४३) ।
(२) वीरमित्रोदये बृहस्पति: ।
(३) अर्थशास्त्रम् (हिन्दूराज्यतन्त्र २ ख० ९६ पृष्ठोद्धृतम्) । (४) कौ० ३।५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

तद्वताधिकारया धार्मिकसंस्थया भवन्ति निर्दिशितानि । पुनः कर्मसु तेषु चोत्पन्ने सति सन्देहे निर्णयप्रदानञ्च सभाया एव कर्तव्यम् । तथा च वीरमित्रोदये --

नित्यं नैमित्तिकं काम्यं शान्तिकं पौष्टिकं तथा ।
पौराणां कर्म कुर्युस्ते संदिग्धे निर्णयं तथा ॥[1]

(ङ०) सभया नगरं विशुद्धं शोधितं वा विधातव्यम्, एतदर्थं प्रत्यहं समार्जनशोधनावस्करनिष्कासनदुर्गन्धनिवारणादिकं साधारणं कार्यं साहसनिवारण-न्यायप्रदानादिभ्योऽतिरिक्तं तस्करचाटवञ्चकनिवारणादिकमसाधारणकार्यमपि यत्नतः कर्तव्यम् ।

चाटचौरभये बाधा: सर्वसाधारणा: स्मृता: ।
तत्रोपशमनं कार्यं - - - - - - - - - - - ॥[2]
साहसन्यायवर्जानि कुर्युः कार्याणि ते नृणाम् ।

(च) तीर्थस्थलधर्मस्थलविश्रामस्थलगोचारणारण्यस्थलश्मशानघट्टानाम्, नृत्य-गीतक्रीडोपयुक्तानां सार्वजनिकस्थलानाम्, देवमन्दिरचैत्यस्तूपादीनाम्, सार्वजनी-नानां वाप्यारामतडागकूपसभाभवनादीनाञ्च निर्माणम्, निर्मितानामेतेषां प्राचीनानां कलानां संस्कृतीनां स्मारकाणाञ्च संरक्षणम्, पुनर्विनाशं गतानां विनाशितानां जीर्णानां शीर्णानां वैतेषां पुनर्निर्माणं विधाय पूर्ववत्संरक्षणस्य सुव्यवस्थाकरणं सभायाः कर्तव्यम् । तद्यथा - सभाप्रपादेवगृहतडागारामसंस्कृतिः ।[3]

(छ) पुरवासिनां संख्याया जन्ममरणयोश्च यथार्थज्ञानं कर्तव्यम् ।

---

(१) वीरमित्रोदये बृहस्पतिः । (२) वीरमित्रोदयः ।
(३) वीरमित्रोदयः ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

(ज) स्वस्मिन्नगरे वैदेशिकानां संख्या कियत्यस्ति, कुत्र निवसन्ति, आगमनेस्योद्देश्यं किम्, उद्देश्यानुरूपं कार्यं कुर्वन्ति न वेत्यादिकं सर्वं ज्ञातव्यम् । पुनस्तेषामागमनात् स्वस्मिन्देशे कश्चिदपकारोऽस्ति न वेत्यादिकं सर्वं विचार्य यद्यपकारो भवेत्तदा तेषां निष्कासनञ्च कर्तव्यम् । यदि ते मृत्युं यान्ति तदा मरणसमाचारो तस्य बान्धवादिभ्यो दातव्यः ।

(न) पुरवासिनां कृत आवश्यकवस्तुयुतानां बहूनां बहुविधानामापणानां सुव्यवस्था विधातव्या । पुनस्तेष्वापणेषु क्रियमाणानां वस्त्रभाण्डफलमूलौषधादीनां वस्तूनां करग्रहणञ्च कर्तव्यम्[1] ।

जानपदसभा -

पुरं जनपदश्चेति भेदाद्देशो भागद्वये विभक्तः । 'पुरं मुख्यनगर' मित्याह मित्रमिश्रः । यन्नगरं मुख्यरूपेणावस्थितं तदेव राजनगरं राजधानी वा । राजनगरादतिरिक्ता भूभागा जनपदाः । एतेषां समुदयो देशः, देशो राष्ट्रशब्देनापि व्यवह्रियते । राष्ट्रे सर्वोत्कृष्टैका सभासंस्थापिता तस्याः पौरसभायाश्च विवेचनमुपर्यैवोपस्थापितम् । इतः परं जानपदसभा भवति वर्णिता । जनपदस्था जना जानपदाः, तेषां यद्भवति संघटितं संघटनं तदेव जानपदसभा । सभैषा जनपदस्य सर्वोच्चा सामूहिकीसंस्था । एषा संस्था जनपदोत्पन्नसर्वविधसमस्यासमाधानार्थं जनपदविकासार्थञ्च भवतियत्नशीला । अस्याः सभायाः सभासदो राज्ञोनिर्वाचनाभिषेकादिष्वत्युच्चतमकार्येष्वपि स्वस्य स्वतन्त्रं मतं प्रतिपादयन्ति । तस्मादेषा

---

(१) हिन्दुराज्यतन्त्रम् खण्ड २ पृ० ७१ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

भवति सबला स्वतन्त्राधिकारसम्पन्ना च । भगवतः श्रीरामस्य यौवराज्याभिषेकस्य कृते राजादशरथः पौरजानपदैर्विनिवेदितः, अथाद्रामस्याभिषेकस्य प्रतीक्षायां सन्ति सर्वेजानपदाः पौराश्च, अतः शीघ्रमेवाभिषेकस्य व्यवस्थां कुरु पार्थिवेत्ये-तद्विधं निवेदनं राज्ञः सन्निधौ प्रस्तुतं तैः ।

उदतिष्ठत रामस्य समग्रमभिषेचनम् ।
पौरजानपदाश्चापि नैगमश्च कृताञ्जलिः ।।
स्वयं वसिष्ठो भगवान् ब्राह्मणैः सह तिष्ठति ।
क्षिप्रमाज्ञाप्यतां राजन् राघवस्याभिषेचनम् ।।[१]

स्वतन्त्राधिकारोपेता जानपदाः पौरैः सह तादृशं निर्णयं कुर्वन्ति यो निर्णयो भगवतेश्रीरामाय युवराजपदप्रदानाय पूर्णां सम्मतिं जनयति, क्षिप्रमेव तस्याभिषेकञ्चेच्छति । तद्यथा --

समेत्य ते मन्त्रयितुं समतागतबुद्धयः ।
ऊचुश्च मनसा ज्ञात्वा वृद्धं दशरथं नृपम् ।।
अनेकवर्षसाहस्रो वृद्धस्त्वमसि पार्थिव ।
स रामं युवराजानमभिषिञ्चस्व पार्थिवम् ।।
इच्छामो हि महाबाहुं रघुवीरं महाबलम् ।[२]

इत्थमेते जानपदादयः सततं कुर्वन्ति स्वतन्त्राधिकारप्रयोगम् । स्वतन्त्राधिकारयुतानि जानपदादीनि बहूनि संघटनानि भवन्ति जनपदे । तेषां जानपदादीनां ब्राह्मणादि जातानाञ्च यद्यत्संघटनं भवेत् तेषां नियमो धर्मश्च भवति पृथक् पृथक् । यदि तेषां संघटनानां नियमा न वेदविरुद्धा स्तदा तादृशा नियमा धर्माश्च राज्ञापिमान्याः "देशजातिकुलधर्माश्चनाम्नायैरप्रतिषिद्धाः प्रमाणम्" इति गौतम-

---

(१) रामायणम् २।१४।५२-५३ । (२) रामायणम् २।२।२०-२२ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

स्मरणात् । संघटननिर्मिता नियमा विधानविशेषा वा यदि वेदविरुद्धा स्तदा-त्वप्रामाणिका स्तै । तथैव विवृतं मनुस्मृतावपि --

जातिजानपदान्धर्मान्श्रेणीधर्माश्च धर्मवित् ।
समीक्ष्य कुलधर्माश्च स्वधर्मं प्रतिपादयेत् ॥[1]

जानपदादीन्यश्रेणाणि संघटनानि याज्ञवल्क्यस्मृतावपि सामूहिक-संस्थायामेव परिगणितानि दृश्यन्ते । एताः संस्था यदि स्वधर्मा द्विचलिता स्तदा ता यथापराधं दण्डयित्वा स्वस्वधर्मे स्थापयेद्राजा ।

कुलानि जातीः श्रेणीश्च गणान्जानपदानपि ।
स्वधर्माच्चलितान्राजा विनीय स्थापयेत्पथि ॥[2]

अस्यायं भावः - कुलानि ब्राह्मणादीनाम्, जातयोमूर्धावसिक्तप्रभृतयः, श्रेणयस्ताम्बूलिकादीनाम्, गणाहैलाबुकादीनाम्, जानपदाः कारुकादयः, स्वस्वधर्माच्च्युतानेतानपराधानुसारं "दुर्वृत्तेषु दण्डं निपातये" दित्युक्त्वादण्डयित्वा स्वस्वधर्मे प्रवेशयेत् । शरीरोऽर्थदण्डश्चेति दण्डोऽपि द्विविधः । यथाह नारदः --

शारीरश्चार्थदण्डश्च दण्डो हि द्विविधः स्मृतः ।
शारीरस्ताडनादिस्तु मरणान्तः प्रकीर्तितः[3] ।+
काकिण्यादिस्त्वर्थदण्डः सर्वस्वान्तस्तथैव च ॥
द्विविधोदण्डोऽप्यपराधानुसारेण भवत्यनेकधा ।

तथा चाह -

शारीरो दशधा प्रोक्तो ह्यर्थदण्डस्त्वनेकधा । इति

---

(१) मनुस्मृतिः ८।४१ । (२) याज्ञवल्क्यस्मृतिः १।३६१ ।
(३) मिताक्षरा (या० १।३६१) ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

कौटिल्योऽपि देशजातिकुलसङ्घानुल्लिखति । एते सर्वे स्वस्वधर्मेषु नियमेषु वा भवन्त्याबद्धाः । नियमविनीता मर्यादिता वैते सर्वसङ्घा जनपदान्तर्गता एव । सर्वेषामेतेषां सभैव जानपदसभेति नाम्ना विख्याता । अस्या अधिकारो महत्त्वपूर्णः, अस्तित्वं स्वतन्त्रं विद्यते, तस्मादस्या भूमिका महत्त्वपूर्णा वर्तते ।

पौरजानपदानां राजनैतिकं कार्यम् -

पौरजानपदाः स्थानीयानामर्थात्पौराः स्वस्वपुरान्तर्गतोत्पन्नानां स्त्र जानपदाजनपदान्तर्गतोत्पन्नानां सामाजिकधार्मिकराजनैतिकानां समस्यानां समाधानं विधाय पुरे पौरा जनपदे जानपदाश्च नानाविधानि देशकालपरिस्थित्यनुकूलानि विकासकार्याणि च परिचालयन्ति । सामाजिकधार्मिकादिषु कार्येषु तेषां कृतेऽधिकारक्षेत्रं निर्धारितम्, किन्तु राजनैतिक कार्ये तु नाधिकारक्षेत्रनिर्धारणं कृतं नीतिज्ञैः, यतस्तेषामपि तस्मिन्विषये राष्ट्रव्याप्यधिकारत्वात् । अर्थाद्राजनैतिके कार्ये तु सर्वे देशवासिनः समानाधिकारोपेता भवन्ति । सर्वेषां मतं समानं महत्त्वं प्रतिपादयति । राज्ये यदि जनमताधार एव निष्पाद्यं राजनैतिकं कार्यं समुत्पद्यते तदा देशवासिनः सर्वे भवन्त्येकत्रिताः।ततः केन्द्रीयमधिवेशनं प्रारम्यते, राष्ट्रस्य हितानुकूला विचारास्तत्र प्रस्तूयन्ते, सभायां समागतप्रस्तावनिर्णयः सामूहिकः, निर्णीतो विषयः सर्वमान्यश्च, सभायां समुपस्थितेषु पौरजानपदेषु भेदविचारो न केषुचिदप्युपलब्धः, अर्थादेते पौरा एते तु जानपदाः, एते वरिष्ठा एते तु निकृष्टा इत्येतद्विधो भेदभावो न केषुचिदपि दृश्यते सर्वेषां मतस्य समानमूल्यत्वात् । एतद्विधो जनसमाजो रामायणकालेप्यासीदेकत्रितः । युवराजपदप्रदानस्योद्देश्यमादायसमुपस्थितेनानेन जनसमाजेनैकमत्येन भगवतेश्रीरामाय यौवराज्या-

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

षिणेक: प्रदातव्य:, इति निर्णयो विहित: । लोकसम्यानिर्णीतोऽयं प्रस्तावो राजन्यपि विनिवेदित: । तद्यथा --

ब्राह्मणा जनमुख्याश्च पौरजानपदै: सह ।
इच्छामो हि महाबाहुं रघुवीरं महाबलम् ।
गजेन महता यान्तं रामं छत्रावृताननम् ।।[1]

जनसमया निवेदितो राजेदमाह - समेणेदानीं राघवं पतिं कथमिच्छति । यतोऽहमेवास्मि राज्यसिंहासनस्थ:, धर्मानुसारमेव राज्यशासनमस्ति सञ्चालितम्, एतादृश्यां परिस्थितावपि सभायां समुपस्थिता महानुभावा ममात्मजस्य श्रीरामस्य यौवराज्याभिषेकस्येच्छां प्रकटयन्ति, एतादृशी भावना कथं समुदिता, मयि संशयोऽयं समुत्पन्न:, अस्य निवारणं कुरुत ।

इति तद्वचनं श्रुत्वा राजा तेषां मन: प्रियम् ।
श्रुत्वैतद्वचनं यन्मे राघवं पतिमिच्छथ ।
राजान: संशयोऽयं मे तदिदं ब्रूत तत्त्वत: ।।[2]
कथं नु मयि धर्मेण -- युवराजं ममात्मजम् ।।

एतद्विधं राज्ञो वचनं श्रुत्वा सभायां समुपस्थिता: पौरजानपदा युवराजपदप्रदानस्यानिवार्यतां प्रदर्शयन्ति - हे राजन् राज्यसञ्चालनमतिकठिनं कार्यमस्य कृते शूरता वीरता सत्यनिष्ठताशौर्यादयश्चैते गतिशीला गुणविशेषा सहयोगादयश्च नितान्तमपेक्षन्ते । किन्तु भवान् वृद्धावस्थायां संप्राप्त:, वृद्धस्येन्द्रियाण्युपर्युक्ता गुणाश्च शिथिलतां यान्ति, गुणानां शैथिल्येन सुशासनम-

---

(१) रामायणम् २।२।१६-२२ । (२) रामायणम् २।२।२३-२५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

संभवम्, पुनरेतादृशस्य शासकस्य कृते शासनं कर्तुमपि महत्कठिनं भविष्यति । एतादृश्यां परिस्थितावस्माकं राज्ये राज्यसहायको नितान्तमपेक्षित: । अत एव जनसभायां युवराजव्यवस्थापनविषयक: प्रस्ताव: समागत:, सभया निर्णयोऽपि विहित: प्रस्तावस्यास्य । जनसभया निश्चितत्वाद्रामाय युवराजपदमवश्यं दातव्यम् । पदस्यास्य प्रदानाज्जना: सहुल्लासानन्दाश्च भविष्यन्ति । पुनर्भवत: पुत्रेषु श्रीरामस्तु ज्येष्ठ एव । ज्येष्ठपुत्रश्च राजपदप्रदानार्ह: शास्त्रीयोऽयं नियम: । पुनर्भगवान्-श्रीरामस्तु राजोचितसर्वगुणसम्पन्नोऽस्ति, राज्यशासनादौ सर्वथा समर्थो दृश्यते । पुन: सर्वोरजानपदानां सदैव कुशलं मङ्गलं समुन्नतिं चेच्छति, अतो देशवासिन: सर्वे तमेव स्वामिनमिच्छन्ति, अत्युत्कृष्टान् गुणान् दृष्ट्वा सर्वात्मना तस्य समर्थनं प्रशंसां च कुर्वन्ति । अतएवापि श्रीरामो युवराजपदप्रदानयोग्य:, सर्वतो योग्यता-प्राप्त: सद्रामो वा तस्मादस्मै पदमेतत्प्रदातव्यम् । प्रकारेणानेन राष्ट्रिये राजनैतिक-कार्येऽपि स्वतन्त्रं स्वाधिकारं मतञ्च प्रयुज्य राज्ञे परामर्शं प्रयच्छन्ति + पौरजानपदा: । तद्यथा रामायणस्यायोध्याकाण्डे --

ते तमूचुर्महात्मान: पौरजानपदै: सह ।
बहवो नृपकल्याणगुणा: सन्ति सुतस्य ते ।
दिव्यैर्गुणै: शक्रसमो राम सत्यपराक्रम: ।

राजपदप्रदानं राजपदान्निष्कासनञ्च पौरजानपदानामेवाधिकारान्तर्गतम् -

योराजोचितगुणसंपन्न: स एव राजपदप्रदानार्ह:, अत: को गुण-संपन्न: कश्चा संपन्न इत्यादिकं सर्वं विचार्य यथासंभवं सर्वगुणसम्पन्नाय एव

---

(१) रामायणम् २।२।२६-५७ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

राजपदमभिषेकञ्च प्रयच्छन्ति पौरजानपदाः । राजपदप्रदानकाले राज्याभिषेके च पौरजानपदा स्तेषां प्रतिनिधयो वा भवन्त्यैकत्रिताः । यदि केवलाः प्रतिनिधयः समुपस्थिता भवेयुस्तथापि तत्र देशवासिनां सर्वेषां प्रतिनिधित्वं स्वीक्रियते । पाञ्चालस्य कान्यकुब्जस्य च राज्ञोऽभिषेक कृत्ये केवला वयोवृद्धा उपस्थिताः, ये जनप्रतिनिधय आसन् । इत्थ मन्येषु राजकीय कृत्येष्वपि जनप्रतिनिधय एवोपस्थिता भवन्ति स्म । तादृश्येव परम्परा संप्रत्यपि सार्थका । इत्थं प्रजाजनाः स्वयमेव समुपास्थ्य स्वस्यामूल्यं मतं प्रयच्छन्ति, जनविश्वासमवाप्य साधारणः पुरुषोऽपि राजपदमाप्नोति । किन्तु जननिर्वाचितो राजा यावज्जनभावनानुकूलो भवेत्तावद् भवति तत्पदासीनः । यदि राजा जनानां नाभिप्रेतस्तदा तत्पदान्निष्कासयन्तितं पौरजानपदाः । धर्मविरुद्धमाचरणमाचरतिचेद्राजपदान्निष्कास्य देशनिर्वासिनञ्च कुर्वन्ति, अन्यस्मै कस्मैचित्पुरुषाय तत्पदं प्रयच्छन्ति । मृच्छकटिकाख्ये नाटके एतद्विधमुदाहरणमपि प्राप्यते ।[1]
एतादृशोऽधिकारः पौरजानपदेष्वेवान्तर्हितः ।

४
४४४
४४४४४
४४४४४४४
४४४४४४४४४
४४४४४४४४४४४
४४४४४४४४४४४४४
४४४४४४४४४४४
४४४४४४४४४
४४४४४४४
४४४४४
४४४
४

---

(१) हि० रा० त० भा० २ पृ० ८० ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

द्वितीयपरिच्छेदः

अथ

मन्त्रिपरिषद्

मन्त्रिपरिषदोऽनिवार्यता

प्रारम्भिकेयुगे सर्वोन्नतैकाऽऽसीद्राष्ट्रिया सभा, या राजकार्यं सञ्चालयति स्म, अर्थादिदानीन्तनी मन्त्रिपरिषद् यत्कार्यं सम्पादयति तदेव-रूपमासीत्तस्याः, किन्तु सा शनैः शनैः शिथिलतां गतां, तस्माद्राज्यसञ्चालनार्थं तस्या एवांशरूपैकाऽत्युत्कृष्टशक्तिसमेता सर्वोच्चसंस्था परिकल्पिता, या मन्त्रि-परिषदिति नाम्ना प्रसिद्धा । एषा परिषद्वैदिककालादद्ययावदस्त्यखण्डिता गतिशीला च । यदा जनसमुदयेन शासनकार्यसमर्थया मन्त्रिपरिषदः समुद्घाटनं कृतं तदानीन्तनकालादेव राज्यशासनादौ सभाया अस्तित्वं प्रायः समाप्तम् । सभया संपाद्यमानेषु कार्येषु मन्त्रिपरिषत्सक्रिया जाता । मन्त्रिपरिषदि यावन्तः सदस्या विद्यन्ते ते सर्वे जनप्रतिनिधय एव, जनविश्वासमवाप्यैव मन्त्रिपदं प्राप्नु-वन्ति । स्वतन्त्ररूपया निर्वाचनप्रक्रियया समागतानां मन्त्रिणामस्तित्वञ्च स्वतन्त्रम्, वैदिककालादेवास्याः परिषदः स्वतन्त्रताक्षुण्णा । पौरजानपदानां निर्णय-निर्मितैषा पर्षद् सामूहिकी संस्था । राज्येऽस्या भूमिका सारपूर्णा । जनमत-प्राप्त्या सबलतायामापन्नाया अस्याः परिषदः सहयोगेन विना राजा राज्यं सञ्चालयितुं न क्षमः । अमात्यादि सहायहीनः शास्त्रासंस्कृतबुद्धिपरो भूपतिः स्वयमेव

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

सर्वं शासनकार्यं कर्तुमिच्छति चेन्न कदापि सफलतामाप्नोति, यतो राज्यसञ्चालनन्त्वेकं कठिनं कार्यमस्य कृते सामूहिकं गहनं चिन्तनं मननं सहयोगादिकञ्चापेक्षितम् । पुनश्चक्रमेकं न कदापि कार्यशीलमसहायस्य नृपतेर्गतिश्च तादृश्येव । एवं यत्कार्यं सामूहिक्या शक्त्या सुखेन पार्यते तदेवैकस्य कृते दुष्करं जायते । अतः सहायरूपा मन्त्रिपरिषन्नितरामपेक्षिता । तथा च मनुस्मृतौ मनुः --

सोऽसहायेन मूढेन लुब्धेनाकृतबुद्धिना ।
न शक्यो न्यायतो नेतुं सक्तेन विषयेषु च ।।

अपि स यत्सुकरं कर्म तदप्येकेन दुष्करम्[1] ।
विशेषतोऽसहायेन किंतु राज्यं महोदयम् ।।

अन्यच्च --

स मन्त्रिणः प्रकुर्वीत प्राज्ञान्मौलान्स्थिराञ्शुचीन् ।
तैः सार्धं चिन्तयेद्राज्यं विप्रेणाथ ततः परम्[2] ।।

एवञ्च --

सप्राड्विवाकः सामात्यः स ब्राह्मणः पुरोहितः ।
ससभ्यः प्रेक्षको राजा स्वर्गे तिष्ठति धर्मतः ।।

राज्ये यावन्तो मन्त्रिणो नियुज्यन्ते ते सर्वे राजपदप्रदातारः । राजपदप्रदाने प्रमुखस्थानमवलम्बन्त एते "रत्नी" इति शब्देनाप्युच्चार्यन्ते । रत्नीति कथनेन पुरोहितसेनापत्यादय उच्चपदाधिकारिणोऽपि गृह्यन्ते । राजपदप्रदानसमये पुरोहितादीनामपि भूमिका महत्वपूर्णा । अत एते मन्त्रिपुरोहितादयो भवन्ति

---

(१) मनुस्मृतिः ७।३०, ५५ । (२) याज्ञवल्क्यस्मृतिः १।३१२ ।
(३) वीरमित्रोदयः, पृ० १४ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

राज्ञापि मान्या:, यतो राज्याभिषेककाले राजकर्तार: पूज्यन्तेऽर्थात्प्रथमेतान्पूजयति राजा, तत: पूजितास्ते राजानमभिषिञ्चन्ति । पुना राज्यारोहणकाले राज्ञ: कृते जनप्रतिनिधीनां स्वीकृतिरनिवार्या, तेषां स्वीकृत्या विना तत्पदमप्राप्यम् । राज्यनिर्धारितयैतद्विध्या प्रक्रिययापि मन्त्रिपरिषदो महत्वं सर्वाधिकमपरिहार्यञ्च । एषा परिषद्पनिषत्काले "समिति:", राज्ञोऽशोकस्य राज्यकाले "परिसा" इति नाम्नाऽऽसीत् प्रसिद्धा । परिसाया: सदस्या एव राजकर्तारो भवन्तीत्युल्लेखोऽस्ति पालीधर्मग्रन्थे । तत्र "राजकृत्" इति शब्दस्य प्रयोगोऽस्ति । एष: शब्दो मन्त्रिण: पर्यायवाचक: । रामायणे "राजकर्तार:" इत्येतादृश: शब्दो दृश्यते, अयमपि मन्त्रिपुरोहितादीनेव बोधयति यथा --

तत: प्रभातसमये दिवसेऽथ चतुर्दशे ।
समेत्य राजकर्तारो भरतं वाक्यमब्रुवन्[१] ।।

सन्दर्भेऽस्मिन्नीतिज्ञ: कौटिल्योऽपि स्वमतं प्रतिपादयति —

"आत्ययिके कार्ये मन्त्रिणो मन्त्रिपरिषदं चाहूय ब्रूयात्,
तत्र यद् भूयिष्ठा: कार्यसिद्धिकरं वा ब्रूयुस्तत्कुर्यात्[२] ।

अस्यायं भाव: -- राज्येऽत्यावश्यकं कार्यं सहसासमुत्पन्नमथवा भयावहास्थितिरुद्भूता कश्चित्संकटकालो वाऽऽपतितश्चेत्तदा राज्ञा मन्त्रिपरिषद् भवत्याहूता । समायोजितायाममात्य सभायामकस्मादागतस्यासाधारणविषयस्योपस्थापनं कुर्याद्राजा । तत्र बहुमतद्वारा यन्निर्णीतं स्यात्तस्यैव कार्यान्वयनं कर्तव्यम् । यद्यपि राज्यसम्बन्ध्यशेषं कार्यं मन्त्रिभि: सह समाधेयम्, तथाप्यप्रत्याशितविषये

---

(१) रामायणम् २।७९।१ । (२) कौटलीयार्थशास्त्रम् १।१४ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

त्त्वमात्या अनभिज्ञाः, अविचिन्तितविषये न ककिमपि कार्यं सम्भवम्, अतोऽमात्यादीन् कार्यकर्तॄन् प्रथमं यथार्थताया (वस्तुस्थितेः) ज्ञानं कारयेद्राजेति ।

यद्यपि राजा सर्वविषयज्ञो व्यवहारकुशलश्चास्ति तथाप्यमात्यानां परामर्शेण विनैकाकी न किमपि कार्यं कुर्यात् । अमात्यानां सभ्यसभासदामुच्च-पदाधिकारिणाञ्च मतानुसरणेन पार्थिवेष्वादर्शताया दूरदर्शितायाः नीतिज्ञता-याश्च भावः प्रतिभाति । यदि राजास्वतन्त्राचरणशीलो भवेत्तदाऽनर्थं जायते, अमात्यादयोऽपि विच्छिन्नतां गच्छन्ति, स्वयमेव विनाशावस्थां प्राप्नोति, राज्यं प्रायः समाप्यते । यतो विशेषतो राज्यन्तु जनानामेव, जनावासद्वारा राज्योत्पत्तिः, यदा जनसमुदयेन राज्यं स्थापितं तदैव तत्र शासनमपि कल्पितम् । शासनं नाम प्रजारञ्जनमेवार्थात्प्रजाभ्यो यथासम्भवं सुखाश्रयप्रदानम् प्रजाजनाः सततं सुखं शान्तिं समृद्धिञ्चेच्छन्ति, तेषामेतद्विधा स्पृहा स्वाभाविक्येव । अस्याः परिपूर्त्यर्थं शासनकार्ये तैः स्वभावनानुकूलाः प्रतिनिधयः प्रेष्यन्ते । ते च जनेच्छा-सिद्ध्यर्थं भवन्ति दृढप्रतिज्ञाः प्रयत्नशीलाश्च । अतो राज्ञाप्येतेषामाशयानुरूपं कर्तव्यम् । किन्त्वेतेषां जनमर्मज्ञानां नेतॄणां विचारविपरीतं कार्यं करोति चेत्तादृशो राजा सर्वनाशकरः । अतः प्रजानां स्वस्य च हितमिच्छता राज्ञा-ऽमात्यादीनां विचारो निर्णयः परामर्शो वा सर्वथा स्वीकार्यः । तथा च शुक्रनीतौ -

सर्वविद्यासु कुशलो नृपो ह्यपि सुमंत्रवित् ।
मन्त्रिभिस्तु विना मन्त्रं नैकोऽर्थं चिन्तयेत्क्वचित् ॥
सभ्याधिकारिप्रकृतिसभासत्सु मते स्थितः ।
सर्वदास्यान्नृपः प्राज्ञः स्वमते न कदाचन ॥

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

प्रभुः स्वातन्त्र्यमापन्नो ह्यनर्थायैव कल्पते ।
भिन्नराष्ट्रो भवेत्सद्यो भिन्नप्रकृतिरेव च[1] ॥

एवञ्च मनुः --

तेषां स्वं स्वमभिप्रायमुपलभ्य पृथक् पृथक् ।
समस्तानां च कार्येषु विदध्याद्धितमात्मनः[2] ॥

राज्येवर्णाश्रमादयश्चानेकविधामानवा निवसन्ति । तेषां धर्मसम्प्रदायव्यवसायव्यवहारविचारबुद्धिवैभवादिभिश्चौर्यसाहसव्यभिचारभ्रष्टाचारछलबलगुरुत्वलघुत्वादिभिश्च राज्यं विचित्रम्, एतत्सर्वं ज्ञात्वा राजकार्यं कर्तव्यम्, किन्तु सर्वस्यैतस्य ज्ञानमेकस्य राज्ञः कृतेऽसम्भवम् । अतो राज्ञामात्यसभ्यादीनां बहूनां बहुविधानां जनानां सुसंघटितः स्वस्थः शक्तिविशेषो राजकार्योन्मुखः कर्तव्यः । चिन्तनशीलानां बहूनां विचारः परिमार्जितः । व्यवहारपरिपक्वानामधिकतराणां सभ्यानां पूर्णतां गतस्य परिष्कृतविचारस्याधार एव राज्यसञ्चालनं कर्तव्यं राज्ञा । अतो राजानं सहस्राक्षमिति च वदन्ति । देवराजस्येन्द्रस्य मन्त्रिपरिषदि सहस्रपरिमिता देवा ऋषयश्च सदस्या आसन् । तेषां सर्वेषां मन्त्रानुसारमेव राज्यं सञ्चालयतिस्म । अतो ह्ययं पाकशासनं सहस्राक्षमित्याहुः । तदानीन्तन कालादेवान्ये राजानोऽपि सहस्राक्षशब्देनोच्चार्यन्ते । उच्चारणमिदं पूर्णतःसार्थकम्, यतः प्रायः सर्वेषां पार्थिवानां राजकार्ये परामर्शदातारो भवन्ति सहस्राधिकाः । तथैव प्रोक्तं कौटलीयार्थशास्त्रे --

---

(१) शुक्रनीतिः २।२-४ । (२) मनुस्मृतिः ७।५७ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

इन्द्रस्य हि मन्त्रिपरिषद्ऋषीणां सहस्रम्, स तच्चक्षुः, तस्मादिमं द्वयक्षं सहस्राक्षमाहुः[1]।

प्राचीनतमोऽमात्यशब्दः -

राज्यस्य सप्ताङ्गेष्वमात्यो द्वितीयः। यो मन्त्र्यथवा सचिव-शब्देनाप्युच्चार्यते। एतेष्वमात्यमन्त्रिसचिवेषु किञ्चिदन्तरं परिलक्षितम्। बौधायनपितृमेधसूत्रेऽमात्यशब्दः कार्यनिरतस्मिंश्चित्पुरुष सम्बन्ध्यर्थे प्रयुक्तः[2]। कस्यचिद् गृह्यकार्यकर्तारं जनं बोधयति ऋग्वेदः[3]। आपस्तम्बधर्मसूत्रे शब्दोऽयं मन्त्र्यर्थेऽधार्दिवाक्तविकार्थे प्रयुक्तोऽस्ति "गुरूनमात्यांश्च नातिजीवेत्"[4] गुरवः पित्रादयः, अमात्या मन्त्रिणः। ऐतरेयब्राह्मणेऽमात्यः सचिवार्थे प्रयुक्तः। कौटिल्योऽप्यमात्यमन्त्रिणोर्भिन्नतां प्रदर्शयति --

विभज्यामात्यविभवं देशकालौ च कर्म च।
अमात्याः सर्व एवैते कार्याः स्युर्न तु मन्त्रिणः[5]।

अस्यायं भावः -- अमात्यपदान्मन्त्रिपदमुच्चतमम्, अतो व्यक्तेर्गुणाधार एव एते पदे प्रदानार्हे। सत्कृष्टगुणसम्पन्नः पुरुषः श्रेष्ठतमं मन्त्रिपदं सामान्य-गुणयुक्तस्त्वमात्यपदमाप्नोति। कार्यमपि तयोस्तद्विधमेव, यो मन्त्रिपदासीन स्तस्मै गोपनीयासाधारणकार्यभारो दीयते। अमात्यस्तु सामान्यकार्यप्रदानार्हः।

---

(१) कौटलीयार्थशास्त्रम् १।१४ । (२) बौ०पि०मे०सू० १।४।१३ ।
(३) ऋग्वेदः ७।१५।३ । (४) आपस्तम्बधर्मसूत्रम् २।१०।१० ।
(५) कौटलीयार्थशास्त्रम् १।७ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

इत्थमेते शब्दा विविधार्थे प्रयुक्ता:, यस्य यस्मिन्नर्थे प्रयोगस्तथाप्येते त्रय एव समानार्थका: । एतेषां कार्यविषयेऽप्येकार्थता निरूपिता । शास्त्रकारा: स्वेच्छयाऽमात्यादिशब्दानां प्रयोगं कुर्वन्ति । शब्दप्रयोगस्तु प्रयोक्तुरधीन: । किन्तु कौटिल्यस्य विचारस्तत्र न तु व्यावहारिक:, यतो व्यक्तेर्गुणस्याधारे उच्चादि पदभेदस्तु लोकप्रचलित: किन्त्वमात्यमन्त्रिणोरन्तरं व्यवहारेनोपलब्धम् । कोशकारैणाप्येते शब्दा: पर्यायवाचका न तु भिन्नार्थका इत्युक्तम् -- "मन्त्री-धीसचिवोऽमात्य:" एते बुद्धिविषयेसहायता प्रदातारो मन्त्रिण: । त्रिष्वेतेष्वमात्य शब्द: पुरातन: । यत ऋग्वेदात्पुरातनं नान्यच्छास्त्रमस्मिन्नेवास्य शब्दस्य प्राप्यते प्रारम्भिकरूपम् । अतोऽमात्यानां व्यवस्थाया: काल:, ऋग्वेदकाल एव निश्चित: । ऋग्वेदकाले महर्षिभि: कृताऽमात्यव्यवस्थाऽद्ययावदविच्छिन्ना सार्थका च । सक्रियरूपेण निरन्तरं प्रचलितैषा न कदापि निष्क्रियतां गमिष्यति ।

अमात्यानां शौचाशौचपरीक्षणविधि: -

प्रथममात्यानां नियुक्ति: सामान्यपदेषु कार्या, अथर्थिमन्त्रिपदस्य कृते - उपस्थितास्तेभ्य स्तत्पदप्रदानात्प्राक् साधारणपदं देयम् । ततो मन्त्रि-पुरोहितादीनामाप्तपुरुषाणां सहयोगेनोपधाभिस्तेषां चरित्रपरीक्षणं कर्तव्यं राज्ञा, परीक्षणस्य (१) धर्मोपधा, (२) अर्थोपधा, (३) कामोपधा, (४) भयोपधा चेति चत्वार उपाया: शास्त्रोक्ता: । धर्मार्थकामभयानामवसरे मन्त्र्यादीनां सहायत्वे विश्वसनीयैर्गुप्तचरादिभि: कैनापिच्छलेनामात्यादीनां मनोभावनाया: परीक्षण-मुपधा । तथा च नीतिवाक्यामृते --

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

धर्मार्थकामभयेषु व्याजेन परचित्तपरीक्षणमुपधा[1] ।

(१) धर्मोपधा - राजापुरोहितमयाज्यस्य गृहे याजनार्थमादिशति, आदेशोऽयं काल्पनिक: तमादेशं निषेधयति पुरोहित:, तस्माद्राजातत्पदान्निष्कासयति, कृत्रिममेतान्निष्कासनमपि, पदच्युत: पुरोहितोऽमात्यसमीपं गत्वा कथयति -- अधार्मिकोऽयं राजा, राजपदस्य कृते सर्वथाऽनर्ह: । अतोऽस्यनिर्वासनं कृत्वाऽन्यधार्मिकपुरुषाय राजपदं दातव्यम् । मतमिदमन्यैरमात्यादिभि: स्वीकृतं तव को विचार: ? पुरोहितस्यास्याशयस्य प्रत्याख्यानं करोति चेत्तदा सोऽमात्य: शुचि: सिद्ध: । (२) इत्थमेवार्थिकोपायेनामात्यस्य मनोविचारपरीक्षणमर्थोपधा । (३) कामसम्बन्ध्युपायद्वारामात्यस्य हृदयपरीक्षणं कामोपधा (४) भयसम्बन्ध्युपायेनामात्यचित्तपरीक्षणं भयोपधा । एतासूपधासु निष्कल्मषा एवामात्यपदप्रदानार्हा:[2]।

परीक्षितानाममात्यानां नियुक्ति: -

यो धर्मोपधायां विशुद्धो भवेत्तस्य नियुक्तिं धर्मस्थीयकण्टकशोधनादिविभागेषु कुर्याद्राजा । एवमर्थोपधायां विशुद्ध अर्थविभागेऽथं मन्त्रिपदे । कामोपधायां विशुद्धो राजप्रासादेन सह सम्बद्ध विभागे । भयोपधायां विशुद्धो रक्षाविभागे (रक्षामन्त्रिपदे) नियुज्यते । एतासुसर्वासूपधासु निम्नलिखितासु परीक्षासु च विशुद्धेभ्यो मुख्यमन्त्रिपदं देयम्। यस्मै मन्त्रिपदं दीयते तत्पदप्रदानात्प्राक् तस्य परीक्षणं कर्तव्यम् । परीक्षाया विषयामाध्यमाश्चैतादृशा: -- सत्यवादितायाः (सत्यतायाः) निवासस्थानस्यार्थिक्याः स्थितेश्चाप्तपुरुषादिभि:, शास्त्रज्ञतायाः

---

(१) नी० वा० (अमात्यसमुदेश:) । (२) कौटलीयार्थशास्त्रम् १।८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

(योग्यतायाः) सहपाठिभिः, नूतनकार्यस्यमाध्यमेन बुद्धेः स्मृतेः (स्मरणशक्ते)श्चातुर्यस्य च, सभया वाक्पटुतायाः प्रगल्भतायाः प्रतिभायाश्च, आपन्माध्यमेनोत्साहस्य प्रभावस्य सहिष्णुतायाश्च, व्यवहारमाध्यमेन पवित्रताया मित्रताया दृढतायाः स्वामिभक्तेश्च, शीलबलव्यसनस्वास्थ्यगौरवाप्रमादादीनां सहवासिभिः, मधुरभाषितताया व्यावहारिकतायाः प्रकृतेश्च ज्ञानं राजा स्वयमेव कुर्यात्[१]। एतद्विधा परिपाटिरिदानीं न तु प्रत्यक्षा, तथापि प्रकारान्तरेणापि मन्त्रिपदप्रस्ताविताः पुरुषा भवन्ति परीक्षिताः, एतेषां सर्वं जीवनचरित्रं ज्ञात्वैव मन्त्रिपदं दीयते। पुनरिदानीन्तना मन्त्रिणो भवन्ति लोकनिर्वाचिताः। मन्त्रिपदस्य कृते विधायिकायाः सदस्यत्वमपेक्षितम्। तदर्थं जनसमाजे महान्प्रतियोगः प्रसरति। तदा जनमानसं विशिष्टगुणयुतं लोकोत्पन्नसमस्यासमाधानसमर्थं प्रतिनिधिमिच्छति, तदनुरूपं यस्य विशुद्धं मनः स एव विजयं प्राप्नोति। जनमताधारे विजयिपुरुष एव विधायिकायां (लोकसभायां) जनप्रतिनिधित्वं करोति। अत एषा निर्वाचनप्रक्रियापि मन्त्रिपदासक्तानां शौचाशौचपरीक्षणस्यैका विश्वसनीया पद्धतिः। पुनर्विधायिकाया न सर्वे सदस्या मन्त्रिपदभाजः। मन्त्रिपदस्य कृते तत्रापि शौचाशौचपरीक्षणमर्थान्निर्वाचनं विधीयते। येष्वपेक्षिता गुणाः सत्त्यन्तर्निहितास्ते एव निष्पापाः। निष्कलङ्का एव मन्त्रिपदमवाप्नुवन्ति। अमात्यानां शौचाशौचपरीक्षणस्यैतादृशी प्रणालीलोकप्रचलितेदानीम्। अत्रोपस्थापितयोः प्रणाल्योः किञ्चिदन्तरमनुभूतम्, तथाप्याशयस्तु द्वयोरेक एव।

मन्त्रिपदाकाङ्क्षिणो न सर्वे तत्पदं प्राप्नुवन्ति। स्वस्य सच्चरित्र-

---

(१) कौटलीयार्थशास्त्रम् १।६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

ताया आधारे जनमतमवाप्य ये निर्वाचिता: सन्ति ते एव तत् पदाधिकारिण: । किन्तु पदमवाप्याधिकारत्वं मदं पीत्वोन्मत्ततां गच्छन्ति जनसमदाकृतां प्रतिज्ञां विस्मृत्य भ्रष्टाचरणं कुर्वन्ति चेत्तदा ते तत्पदान्निष्कास्यन्ते । सर्वमान्योऽयं शास्त्रय: सिद्धान्त: ।

मन्त्रिपरिषदि सदस्यसंख्या -

अमात्यानां संख्याविषये शास्त्रकाराणां मतैक्यं नास्ति मानवमतानुयायिनो मन्त्रिणां द्वादशसंख्या कर्तव्येति वदन्ति । त्रयोदश इत्याहुर्बार्हस्पत्या: । विंशतिरिति वदन्त्यौशनसा: । राज्ञो दशरथस्य राज्यकालेऽष्टौ मन्त्रिणो नियुक्ता आसन् ।

अष्टौ बभूवुर्वीरस्य तस्यामात्या यशस्विन: ।
शुचयश्चानुरक्ताश्च राजकृत्येषु नित्यश: [१] ।।

मनुस्तु सप्ताष्टौ वामात्यान्कुर्वीतेत्याह [२] । महाभारतशान्तिपर्वाध्यायेऽमात्यानां सप्तत्रिंशत्संख्या दर्शिता [३] । नीतिवाक्यामृते त्रय: पञ्चसप्त वा मन्त्रिण: कर्तव्या इत्युल्लेखोऽस्ति "त्रय: पञ्च सप्त वा मन्त्रिणास्तै: कार्या:"[४] । शुक्रनीतौ दशानाममात्यानां वर्णनमस्ति [५] । कौटिल्यस्तु देशकालादीन् विचार्यावश्यकतानुसारं मन्त्रिणो

---

(१) रामायणम् १।७।२-३ ।

(२) मनुस्मृति: ७।५४ ।

(३) शान्ति० ८६।७-६ ।

(४) नी० वा० (मन्त्रिसमुद्देश:) ।

(५) शुक्रनीति: २।७१-७२ ।

CC-0 Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

नियोक्तव्या इत्याह "यथासामर्थ्यमिति कौटिल्यः" इत्थमनेके आचार्या अमात्यानां[1] मनेकां संख्यां प्रदर्शयन्ति, न केषाञ्चिदपि मतैक्यम्, तथापि बहूनां मतमष्टसु मन्त्रिष्वस्ति केन्द्रितम् । यस्य यन्मतं स्यात्तथापि राज्यव्यवस्थायाममात्यानां संख्या त्रिपुरुषान्न्यूना न कदापि कर्तव्या । राजनीतिमर्मज्ञा आचार्या अमात्या-नामल्पसंख्याया महत्वं प्रदर्शयन्ति । अतो यथासम्भवं मन्त्रिणां संख्या न्यूना कर्तव्या । यतो बहूनां विचारो बहुविधः, बहुसंख्यायां मतैक्यमपि नायाति । मतैक्याभावे कार्यनिर्णयादौ काठिन्यमुत्पद्यते, सफलता नोपलब्धा, अतोऽत्यानां बाहुल्यं कार्यसमुन्नतौ बाधकं सिद्धम् । यद्यमात्या बहवो भवेयु स्तथापि मन्त्र-निर्धारणन्त्वल्प संख्यायामेव कर्तव्यमित्येतन्मतं सर्वमान्यम् । महाभारते सप्तत्रिंशद-मात्या वर्णिताः, एतद्वर्णनमुपर्युक्तम्, किन्तु तत्रापि मन्त्रनिर्धारणकाले त्वष्टावेव मन्त्रिण उपस्थापिताः । कौटिल्यस्त्वावश्यकतानुसारं मन्त्रिणो नियोक्तव्या इत्याह, इदमेवमतं सर्वत्र व्यापकम्, यतोऽमात्यानां संख्या न कुत्रापि समाना, प्रत्येकं राष्ट्रे भिन्नैव दृश्यते । सर्वे राजानः स्वस्वावश्यकतानुसारं स्वराष्ट्रस्य प्रकृत्यनुरूपमेव कुर्वन्त्यमात्यस्थापनम् । अतः कौटिल्यो नीतिज्ञो व्यावहारिकश्चा-सीदिति वक्तुं शक्यते । पुनर्यस्मिन्काले येनाचार्येणामात्यानां या संख्या प्रस्तुता तस्मिन्समये सैव संख्या सामयिकी । अत्र न केषाञ्चिदपि मतभेदः । अमात्यसंख्याविषये सोमदेवमतमप्युपरि स्थापितम्, तत्र तस्य विचार एतद्विधः -- अमात्यानां संख्याऽल्पा त्रिपञ्चादि विषमा च कर्तव्या, मन्त्रोऽपि विषमसंख्यायामेव विधेयः । मतमिदं बहुभिः समर्थितं दृश्यते । मन्त्रिपरिषदि विविधा विचाराः प्रस्तुता भवन्ति, उपस्था-पितेषु विचारेषु पूर्णतः सामञ्जस्यमसम्भवम् । तस्यां परिस्थितौ वाच्यत्वेन बहुमतं

---

(१) कौटलीयार्थशास्त्रम् १।१५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

स्वीकर्तव्यम् । यथमात्यानां संख्या विषमाऽस्ति तदा बहुमतादाने भवति सौकर्यम् । वैज्ञानिकदृष्ट्यापीदं च: सिद्धान्त उपयुक्त: । यदि समसंख्यायाममात्या: स्थाप्यन्ते तदा मन्त्रिपरिषदागतप्रस्तावनिर्णये कठिनता समायाति । पुनरस्मादिदमपि ज्ञायते तस्यामवस्थायामप्यमात्यादयो दलगतया (समूहगतया) व्यक्तिगतया वा भावनयाऽऽसन् प्रेरिता: । एतादृशी भावनेदानीमप्यस्ति सर्वत्र प्रसृता प्राप्त प्रसरिता च । कारणेनानेन विधायिकायां मन्त्रिपरिषदि वोपस्थापिता: सर्वे विषया न सर्वसम्मता: । स्थितिरेतादृशी बहुषु राष्ट्रेषूपलब्धा ।

केषाञ्चिन्मतेऽष्टौ प्रकृतयोऽपि वर्णिता: सन्तीत्युक्तं शुक्रनीतौ शुक्राचार्येण --

अष्टप्रकृतिभिर्युक्तो नृप: कैश्चित्स्मृत: सदा ।
सुमन्त्र: पण्डितो मन्त्री प्रधान: सचिवस्तथा ।।

अमात्य: प्राड्विवाकश्च तथा प्रतिनिधि: स्मृत: ।
एता भृतिसमास्त्वष्टौ राज्ञ: प्रकृतय: सदा[१] ।।

एतैरेव नामभि: प्रसिद्धा अष्टाविवामात्या शिवाजीत्याख्यस्य राज्ञो राज्यकालेऽप्यासन् । तेषां विभागा अधोनिर्दिष्टा -- (१) सुमन्त्र: - अर्थविभागस्य मन्त्री (अर्थमन्त्री) (२) पण्डित: - धर्मेणसह सम्बद्धविभागस्य मन्त्री (३) मन्त्री - गृहविभागस्य मन्त्री (गृहमन्त्री) (४) प्रधान: - मुख्यमन्त्री, (५) सचिव: - युद्ध-मन्त्री (रक्षामन्त्री), (६) अमात्य: - कृषिविभागस्य मन्त्री (कृषिमन्त्री), (७) प्राड्विवाक: - न्यायविभागस्य मन्त्री (न्यायमन्त्री), (८) प्रतिनिधि: -

---

(१) शुक्रनीति: २।७३-७४ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

महनीयमेतत्पदं यतो राज्ञा सह तस्य साक्षात्सम्पर्को विद्यते, राज्ञः सन्निधौ स्थित्वा तस्यैव निर्देशने गुह्यतमं सर्वं कार्यं करोति, तस्मात्तत्पदं मुख्यमन्त्रिपदादुच्चतमम्[1] । पुरोहितदूतावपि मन्त्रिणावेवेत्याहुः केचिदाचार्याः । पुरोहितः - धार्मिककृत्यैन सह सम्बद्ध विभागस्य मन्त्री । दूतः - परराष्ट्रमन्त्री । किन्त्विदानीमेताभ्यां मन्त्रिपदं न दीयते । पुरोहितो याजनादिकं धार्मिककृत्यं दूतस्तु राजदूतस्य कार्यं करोति ।

अमात्यानां गुणाः -

स्वदेशोत्पन्नाः, कुलीनाः, अवगुणरहिताः, सर्वविधकार्यकुशलाः कलायां निपुणाः, सर्वशास्त्रज्ञाः, विद्वांसः, बुद्धिमन्तः, स्मरणशक्तिसम्पन्नाः, दृढविक्रमाः, स्वामिभक्ताः, कीर्तिमन्तः, विद्याविनीताः, वीराः, प्रभावशालिनः, विशुद्धाचरणरताः, धर्मार्थोपधाभिर्विशुद्धाः, सोत्साहाः, सुशीलाः, बलसम्पन्नाः, अरोगाः, चापल्यहीनाः, धैर्यधारणशीलाः, अक्रोधाः, जीतेन्द्रियाः, व्यवहारनिपुणाः, जागरुकाश्चैते मन्त्रिपदप्रदानार्हाः । तथा च याज्ञवल्क्यस्मृतौ याज्ञवल्क्यः --

स मन्त्रिणः प्रकुर्वीत प्राज्ञान्मौलान्स्थिरान्शुचीन्[2] ।

एवञ्च मनुः -

मौलाञ्छास्त्रविदः शूरांल्लब्धलक्षान्कुलोद्भवान् ।

---

(१) हिन्दूराज्यतन्त्रम् पृ० १२१ । (२) याज्ञवल्क्यस्मृतिः १।३१२ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

सचिवान्सप्त चाष्टौ वा प्रकुर्वीत परीक्षितान्[1] ।

एतेषां गुणानामाधार एव मन्त्रिणो नियुज्यन्ते । गुणानां भावाभावज्ञानं निर्वाचनप्रक्रियया कर्तव्यम् । अर्थान्निर्वाचने यो जयी भवेत् स गुणवान्, यः पराजितः स निर्गुणः । वर्तमानयुगे लोकप्रचलितैषाप्रक्रियाऽमात्यानां गुणनिरूपणे सार्थका सर्वमान्या च । अमात्यानां कृतेऽपेक्षितानधिकान् गुणानुल्लिखन्ति केचित्केचित्त्वल्पान्, अतो गुणसंख्यायां समता नोपलब्धा, तथापि गुणविषयकं चिन्तनन्त्वैक विधमेवाचार्याणाम् । अतो गुणानां संख्यावैषम्येनामात्यानां वास्तविकचरित्रविशेषे न किमप्यन्तरमायाति ।

अमात्यभेदाः -

मुख्यमध्यमजघन्याश्चेत्यमात्या स्त्रिविधाः । ये उपर्युक्तसर्वगुणसम्पन्नाः स्युः स्तेभ्यो मन्त्रिपदं देयम् । त्रिपादगुणयुता (श्चतुर्थांशहीना) मध्यमाः । गुणैश्चार्धगुणसंयुक्ता (अर्धांशरहिता) जघन्याः । तथा च रामायणे --

कच्चिन्मुख्या महत्स्वेव मध्यमेषु च मध्यमा ।
जघान्याश्च जघन्येषु भृत्यास्ते तात योजिताः[2] ।।

कौटलीयार्थशास्त्रेऽपि --

- - - - अमात्यसंपत्, अतः पादार्थगुणहीनौ मध्यमावरौ[3] ।

---

(१) मनुस्मृतिः ७।५४, रामायणम् १।७-१४, शान्ति० ८१।२५-२८, कौ० अ० १।६ ।
(२) रामायणम् । (३) कौटलीयार्थशास्त्रम् ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

ये योग्यताया (गुणस्य) आधारे मन्त्रिपदमवाप्नुवन्ति ते एव राज्यस्य महत्वपूर्णं कार्यभारं वहन्ति । ये मध्यमा स्तेभ्यो मध्यमस्तरीयं कार्यं दीयते । जघन्यास्तु निम्नस्तरीयकार्यभार प्रदानार्हाः । मन्त्रिषु यः श्रेष्ठः स एव प्रधानमन्त्री । अस्य सहयोगार्थमुपप्रधानमन्त्र्यापि स्थाप्यते कस्मिंश्चिद्देशे । किन्त्वे-षानियमो न सर्वसिद्धः । मन्त्रिणः सहयोगार्थं मध्यमा जघन्याश्च मन्त्रिणो नियुज्यन्ते । जघन्यस्तुमध्यमस्यापि सहायकः । महर्षिवाल्मीकि कृतोऽयं भेदोऽद्या-प्यस्ति सर्वत्र प्रचलितः । मध्यमजघन्ययोः किञ्चित्परिवर्तनं दृश्यते तथापि विभाजन-क्रमे न किमप्यन्तरम् । इदानीमपि मन्त्री राज्यमन्त्री सहायकमन्त्री चेति भेदात्म-न्त्रिणः सन्ति त्रिविधाः । राज्यमन्त्री मध्यममन्त्रि सदृशः, सहायकमन्त्री जघन्य-मन्त्रीसदृशः । राज्यसहायकयोर्व्यवस्था नेपाले प्रचलितेदानीम्, अन्येषु देशेषु मात्यानां भेदे सामान्यमन्तरं प्राप्यते । प्रधानमन्त्रिणो व्यवस्था तु सर्वत्रोपलब्धा । अमात्या नामधिकारसम्बन्धेऽपि न कोऽपि विशेषः ।

उपमन्त्रिणः -

एकस्मिन् मन्त्रालये त्रयो मन्त्रिणः स्थाप्यन्ते । तेष्वेको मुख्यमन्त्री नियुज्यते द्वावुपमन्त्रिणौ सहायकौ वा स्थाप्येते । तयोर्द्वयोरेक उपस्वरूपः एकः सहायकोऽपि भवितुं शक्नोति । उपसहायकयोर्मन्त्रालयस्य कार्यस्याधारे योऽपेक्षितः स एव नियुज्यते । तथा च प्रोक्तं शुक्रनीतौ --

> एकस्मिन्नधिकारे तु पुरुषाणां त्रयं सदा ।
> नियुञ्जीत प्राज्ञतमं मुख्यमेकन्तु तेषु वै ।।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

द्वौ दर्शको न तत्कार्यौ ---------- [1]।

गुप्तकाले त्वेते त्रयः महादण्डनायको दण्डनायकः कुमारामात्यश्चेति-नामभिरासन्प्रसिद्धाः। महादण्डनायको मुख्यमन्त्री, दण्डनायक उपमन्त्री, कुमारामात्यः, सहायकमन्त्री। मुख्योऽमात्य स्तु कुत्रचिन्महामात्र शब्देनाप्युच्चार्यते। एते त्रयः महाप्रधानः, महासान्धिविग्रहिकः, महादण्डनायकश्चेतेः शब्दैश्चाप्युच्चारिताः सन्ति कुत्रचित् [2]। इत्थममात्या विभिन्नकाले विविध शब्दैनोच्चारिता दृश्यन्ते किन्तु वर्तमानकाले तु केवलं मन्त्रिशब्देनोच्चार्यन्ते। मन्त्रिणां येनकेनापि शब्देनोच्चारिता भवेयुः, संख्यायामप्यन्तरं स्यात्, मन्त्रालयोऽपि पृथग् भवेत्थापि पदस्याधारेऽर्थात्समान-पदस्थाः सर्वे मन्त्रिणः समाना नोपलब्धाः, तथापि गुणः परस्परं समानाधिकारयुता विधेया न तु न्यूनाधिकबलोपेताः। तच्चोक्तं शुक्राचार्येण --

न कुर्यात्स्वाधिकबलान् कदापि ह्यधिकारिणः।
परस्परं समबलाः कार्याः प्रकृतयस्तथा [3] ॥

समानपदस्थेष्वमात्येष्वपि केचित्सबलाः केचिन्निर्बला विधीयन्ते चेत्तदा ये न्यूनबला स्ते भवन्ति कुपिताः, अमात्यानां कोपो देशे भयावहां स्थितिं सृजति, सर्वं विनाशावस्थां प्राप्यति "सर्वकोपेभ्यः प्रकृतिकोपो गरीयान्" [4] अतो ये उपधाभिः परीक्षिता निर्लेपाः समानगुणाश्च सन्ति तेभ्य स्तुल्यं पदं देयम्, तुल्यपदस्थेभ्योऽधिकारोऽपि तुल्य एव दातव्यः। देयाधिकारे-पक्षपातो भवेच्चेदानुकूला अपि भवन्ति प्रतिकूलाः। प्रतिकूलतां गता अधिकारप्राप्त्यर्थं विविधोपद्रवादिकं कर्तुमपि

----

(१) शुक्रनीतिः २।११०-१११ । (२) हिन्दूराज्यतन्त्रम् पृ० १४८ भा० २ ।
(३) शुक्रनीतिः २।१०६ । (४) नी० वा० (मन्त्रिसमुद्देशः) ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

शक्नुवन्त्यतोऽनुकूलान् न प्रतिकूलतां प्रापयेद्राजा । तथा च नीतिवाक्यामृते --

कमप्यात्मनोऽनुकूलं प्रतिकूलं न कुर्यात्[1] ।

मन्त्रिपरिषदि वर्णानां प्रतिनिधित्वम् -

महाभारतकाले मन्त्रिपरिषदि सप्तत्रिंशदमात्या व्यवस्थिता: । तेषु चत्वारो ब्राह्मणा:, अष्टौ क्षत्रिया:, एकविंशतिर्वैश्या:, त्रय: शूद्राश्चासन् । इत्थं तस्यामवस्थायां मन्त्रिपरिषदि ब्राह्मणादीनां चतुर्णामेव वर्णानां प्रतिनिधित्वमासीत् । तथा च --

चतुरो ब्राह्मणान्वैश्यान्क्षत्रियान् सात्त्विकान्शुचीन् ।
त्रींश्च शूद्रान्विनीतांश्च शुचीन्कर्मणि पूर्वके[2] ।।

राज्ये विविधावर्णावर्गजातयश्च निवसन्ति । तेषामावासद्वारा राज्यमेतन्नाम सिद्धम् । अतो राज्यसञ्चालनसम्बन्धित कार्येऽपि वर्णादीनां प्रतिनिधित्वं सुसङ्गतम् । यतो राज्यस्था विशेषतोऽशेषा मानवा भवन्ति वर्गगत-भावनया प्रेरिता: । यदि मन्त्रिपरिषदि तेषां सर्वेषां प्रतिनिधित्वं स्याद्वा राज्ये वर्गसमन्वयो जायते । अस्मादेव देशस्य जनानाञ्च विकास: सम्भव: केषाञ्चिन्मतमिदम् । केचित्तु वर्गसंघर्षोऽपि न तु विकासबाधक इत्याहु: । मतमेतत्स्वीकुर्वन्तीदानीन्तना: केचिज्जना:, न तु प्राक्तना: । प्रागभवानां बहूनां विश्वासस्तु वर्गसमन्वय एव दृश्यते । अत इदानीमपि ये वर्गसमन्वये विश्वस्ता: सन्ति ते तु वर्गसमन्वयस्यैव सिद्धान्तमङ्गीकुर्वन्ति । ये वर्गसंघर्ष एव विकाससाधकोऽर्थाद्राज्योन्नतिकर इति कथयन्ति ते वर्ग-

---

(१) नीतिवाक्यामृतम् (मन्त्रिसमुद्देश:) । (२) शान्ति० ८५।७-११ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

संघस्यैव सिद्धान्तं स्वीकुर्वन्ति । एतौ द्वावेव सिद्धान्तौ लोकप्रचलितौ स्तः ।

मन्त्रिनिर्धारणम् -

नीतिनिर्धारणानन्तरमेव राज्यशासनारम्भः, अर्थाद्राज्ये यादृशी नीतिर्धारिता तदनुरूपमेवामात्या दैनिकं शासनं कुर्वन्त्यतो राजा मन्त्रिभिः सह समये समये राष्ट्रियनीतिविषयकं गुह्यतमं परामर्शं करोति । सोऽयं सर्वथा गोपनीयः तस्मान्मन्त्रणमेकान्ते (निर्जने) स्थाने कार्यम् । यस्य राज्ञो मन्त्रं मन्त्रवरेभ्यो मन्त्रिभ्योऽन्ये न जानन्ति तदा क्षीणकोशोऽपि राजा पूर्णतां प्राप्नोति सर्वां पृथिवीं भुनक्ति । अतो मन्त्रणस्थलं प्रयत्नतः शुकसारिकादिभिः पक्षिभिः कुक्कुरादिभिः पशुभिरतिवृद्धस्त्रीम्लेच्छरोग्यङ्गविकलजडमूकादिभिश्चानालोक्यं विधेयम् । यत स्ते मन्त्रभेदकरा, अतो मन्त्रकाले तानपसारयेत् । शुकादि पतगास्तु विशेषतो मुखदुष्टा स्तस्माच्च भवन्ति बन्धिताश्च "आत्मनो मुखदोषेण बध्यन्ते शुकसारिकाः"[१] । जडमूकादयः पूर्वकृतदुष्कर्मवशेन प्राप्तजडादिभावा अधार्मिकतयैवावमानिता मन्त्रभेदं कुर्वन्ति । तथा शुकादयोऽतिवृद्धाश्च स्त्रियश्च विशेषेणास्थिरबुद्धितया मन्त्रं भिन्दन्ति । तस्मात्तदपसारणे यत्नवान्स्यात् । तथा च मनुः --

गिरिपृष्ठं समारुह्य प्रासादं वा रहोगतः ।
अरण्ये निःशलाके वा मन्त्रयेदविभावितः ॥
यस्य मन्त्रं न जानन्ति समागम्य पृथग्जनाः ।
स कृत्स्नां पृथिवीं भुङ्क्ते कोशहीनोऽपि पार्थिवः ॥

---

(१) सुभाषितम् ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

जडमूकान्धबधिरांस्तैर्यग्योनान्वयोतिगान् ।
स्त्रीम्लेच्छव्याधितव्यङ्गान्मन्त्रकालेऽपसारयेत् ।।[1]

(१) कर्मणामारम्भोपायः, (२) पुरुषद्रव्यसंपत्, (३) देशकालविभागः, (४) विनिपातप्रतीकारः, (५) कार्यसिद्धिरित्येवं पञ्चाङ्गं मन्त्रं मन्त्रिभिः सह चिन्तयेद्राजा । मन्त्रमिममामात्या नैकैकशः श्रावयेदथवा सर्वानेकस्मिन्स्थले[2] । मन्त्रो मुख्यमन्त्रिभिः सह कार्यः, नेतरैर्मध्यमादिभिः सह । मध्यमादयस्तु मुख्यमन्त्रिभिरा निर्दिष्टं कार्यं सम्पादयन्ति विशेषतो मुख्येष्वेव पूर्णं मन्त्रित्वं ध्रियते, अतस्ते मन्त्रग्रहणासमर्थाः मन्त्रणायोग्याश्च । मन्त्रितस्य कार्यान्वियनमपि मध्यमादीनां सहायत्वे मुख्यमन्त्रिण एव कुर्वन्ति । मध्यमसहायकास्तु मुख्यसहयोगप्रदातारः । ये मन्त्रिणो दुष्कार्यप्रवृत्तं राजानमपि सत्कार्ये प्रेरयन्ति, मार्गविहीनं सन्मार्गं प्रदर्शयन्ति त एव मन्त्रणार्हाः, गुरुस्थानीया च । तथा च कामन्दकः --

नृपस्य ते हि सुहृदस्त एव गुरवो मताः ।
य एनमुत्पथगतं वारयन्त्यनिवारिताः[3] ।।

येऽमात्याराज्ञोहितं चिन्तयन्ति ते प्रजानां द्वेष्याः, ये प्रजानां हितकारकास्ते भवन्ति परित्यक्ता राज्ञा । अतो राज्ञः प्रजानाञ्च हितचिन्तनममात्यानां कर्म । किन्त्वेतद्द्विविधकार्यक्षमा मन्त्रिणो लोके विरलाः । तथा चैकोक्तिः पुरातनी --

---

(१) मनुस्मृतिः ७।१४७-१४९ ।
(२) कौटिल्यार्थशास्त्रम् १।१४ ।
(३) कामन्दकः ४।४४ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

नरपतिहितकर्ता द्वेष्यतां याति लोके जनपदहितकर्ता त्यज्यते पार्थिवेन्द्रैः ।
इति महति विरोधे वर्तमाने समाने नृपतिजनपदानां दुर्लभः कार्यकर्ता[1] ॥

अतो ये एतद्विधकार्यसम्पादनसमर्था स्त एवामात्यपदप्रदानार्हाः ।

आन्तरिकसभा -

यथाकालं संमकासमायोजिता राज्ञा, याऽऽन्तरिकेति नाम्ना प्रसिद्धा । राज्येऽस्या महत्त्वं महनीयम्, यतो राष्ट्रस्य मूलतत्त्वविशेणा राष्ट्रियानोतिः, तस्या निर्धारणमस्यामेव । प्रतिष्ठितेषु मन्त्रिष्वपि ये विश्वसनीयाः, गोपनीयार्थगोपनचतुराः, परमपवित्राः, सर्वकार्यकुशलाः, शीलसम्पन्नाः, मन्त्रस्य महत्त्वविदः, त्रिकालज्ञाः, पौरजानपदानां विश्वास्याः, ज्ञानविज्ञानसम्पन्नाश्च सन्ति त एव मन्त्रं श्रोतुमर्हन्ति, अर्थादेतद्गुणयुतेभ्य स्त्रिभ्यः पञ्चभ्यो वा तस्यां सभायां स्थानं दीयते । तथा च महाभारते --

कृतप्रज्ञश्च मेधावी बुधो जानपदः शुचिः ।
सर्वकर्मसु यः शुद्धः स मन्त्रं श्रोतुमर्हति ॥
मन्त्रिणः प्रकृतिज्ञाः स्युस्त्र्यवरा महदीप्सवः[2] ॥

सभायामुपस्थापितैः स्तैः सह मन्त्रणं कुर्याद्राजा । मन्त्रिता स्ते भवन्ति मन्त्रधराः । यदा महत्कार्यं सम्पन्नं तदैव तैः श्रोतृभिः सतर्कतावलम्बनीया, यत स्तेषामिङ्गिताकारादिभिरपि मन्त्रभेदः सम्भवः । अतो यावन्निर्धारित कार्यस्य मन्त्रस्य वा

---

(१) सुभाषितम् ।
(२) शान्ति० ८४।३८-४४ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

कार्यान्वयनं न स्याच्चावश्यं गोपने सावधाना भवेयुर्मन्त्रधराः । यदि मन्त्रभेदो भवेत्तदा राज्ञो राज्यस्य च विनाशः प्रायो निश्चितः । अतो राज्ञा मन्त्रदेया-नाममात्यानां गुणशीलादीनां परीक्षणं प्रयत्नतः कर्तव्यम् । सुपरीक्षितैरात्मीयैः सह परामर्शो विधेयः । मन्त्रभेदकारणाद् घटिताया अप्रियघटनाया उदाहरणमपि मन्त्रधरैम्यो देयं मन्त्रभेदशङ्कया भीतेन राज्ञा ।

मन्त्रिपरम्परा मन्त्रं भिनत्ति, मन्त्रभेदपरिणामो देशघातकः, अतो देशहितमिच्छन्राजा गुप्तचिन्तनं स्वयमेव कुर्यादित्याहाचार्यो भारद्वाजः । किन्त्वा-चार्यो विशालाक्षस्तु भारद्वाजमतखण्डनं कृत्वात्र स्वमतं स्थापयति यथा -- एकपुरुषेण-कृतं राजकार्यविषयकं चिन्तनं न त्वभीष्टम् । यतः प्रत्यक्षं परोक्षञ्चेति द्विविधं राजशासनम् । तयोर्द्वयोः कृतेऽमात्या नितरामपेक्षिताः । पुनरज्ञातविषयस्य ज्ञानं ज्ञातस्य निश्चितरूपप्रदानं निश्चितस्य दृढरूपेण कार्यान्वयनं सन्दिग्धस्य विचार-विमर्शद्वारा संशयनिराकरणमांशिककार्यस्य पूर्णरूपप्रदानञ्चेत्यादिनिकार्याण्यमात्य सहयोगेन साध्यानि, अतो राजकार्यचिन्तनं मन्त्रिभिः सह कर्तव्यं राज्ञा । किन्त्व मात्यानां संख्यात्यल्पा विषमा च कार्यमन्त्रकाले ।। तथा च मित्रमिश्रः --

संख्या वैषम्यन्तु भूयोऽल्पविरोधे भूयांसं स्यात्[१] ।

मन्त्रणादौ मन्त्रिणां विषमासंख्या बहूनामनुमता । किन्तु विषमाया-मप्येका तु निषिद्धैव । एकोऽमात्यः स्वतन्त्रो निरङ्कुशश्च पुनाराजकार्यं नैकबुद्धि-साध्यम् । अमात्यौ द्वावपि न तु स्थाप्यौ । यतः परस्परं संहतौ तौ राज्यं राजानञ्च विनाशयतः । अतोऽमात्या त्रयः पञ्च सप्त वा स्थाप्याः । तथा च नीतिवाक्यामृते--

---

(१) वीरमित्रोदयः, पृ० ३५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

एको मन्त्री न कर्तव्यः, द्वावपि मन्त्रिणौ
न कार्यौ, त्रयः पञ्च सप्त वा मन्त्रिणस्तैः कार्याः[1] ।

रामायणेऽपि --

कच्चिन्मन्त्रयसे नैकः कच्चिन्न बहुभिः सह[2] ।

मन्त्रिपरिषदः संघटनम् -

मन्त्रिपरिषदि न केवलं मन्त्रिणः, अपितु मन्त्रिभ्य इतरे सभ्या अपि परिषदः सदस्यत्वमाप्नुवन्ति । ये महाशयाः परिषदः सदस्यपदप्रदानार्हास्ते चैते -- (१) मन्त्रिणः, (२) सहायाः, (३) सुहृदः, (४) परिच्छदाः, (५) तीर्थविशेषाश्च । एतेषां विवृतिर्यथा -- (१) मन्त्रिणो मन्त्रधराः (आन्तरिकसभायाः सदस्याः) येषु वास्तविकराज्यशासनाधिकारोऽन्तर्निहितः, मन्त्रग्राहकेभ्योऽन्ये मन्त्रिणः, राज्यमन्त्रिणः, सहायकमन्त्रिणः । (२) सहायाः - ये लज्जाशीलाः सदैव सन्मार्गप्रदर्शकाः सत्यवक्तारः सरलाः (निष्कपटाः) कुलीना माननीयाः स्वशक्ति प्रदर्शनसमर्थाश्च सन्ति त एव सर्वास्ववस्थासु भवन्ति सहायाः । तथा च महाभारते --

ह्रीनिषेधाः सदा सन्तः सत्यार्जवसमन्विताः ।
एतान्सहायांल्लिप्सेथाः सर्वास्वापत्सु भारत ।
कुलीनः पूजितो नित्यं न हि शक्तिं निगूहति[3] ।।

---

(१) नीतिवाक्यामृतम् (मन्त्रिसमुद्देशः) । (२) रामायणम् २।१००।१८ ।
(३) शान्ति० ८४।८-३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

(३) ये सुखदुःखादिषु सर्वास्ववस्थासु स्वानुसरणं कुर्वन्ति त एव सुहृदः । तथा च शान्तिपर्वणि --

प्रसन्नं ह्यप्रसन्नं वा पीडितं हृतमेववा[१] ।
आवर्तयति भूयिष्ठं तदेको ह्यनुपालितः ।।

(४) उच्चकुलोद्भूताः, स्वदेशोत्पन्नाः, सुबुद्धिमन्तः, रूपवन्तः, बहुश्रुताः, सोत्साहाः, सदैवसन्तुष्टाः, राजनिष्ठाश्च ये सन्ति त एव परिच्छदाः । तथा च --

कुलीनादेशजाः प्राज्ञा रूपवन्तो बहुश्रुताः ।
प्रगल्भाश्चानुरक्ताश्च ते तव स्युः परिच्छदाः[२] ।।

परिच्छदो राज्यस्यैतादृशो वर्गविशेषः प्रोक्तः, यो बहुमान्यः सदैव राजकोशादेव पालितः पोषितश्च ।

(५) तीर्थम् - अष्टादशानामत्युच्चपदाधिकारिणां समुदयः । तीर्थपदवाच्या अधिकारिणः - (१) मन्त्रिणः, (२) पुरोहितः, (३) सेनापतिः, (४) युवराजः, (५) दौवारिको (राजप्रासादस्य प्रधानाधिकारी), (६) अन्तर्वंशिकः (अन्तः पुररक्षकः), (७) प्रशास्ता (मुख्यप्रशासकः), गोविन्दराजेन कारागारस्य प्रधानाधिकारीत्युक्तम्, (८) समाहर्ता (भाण्डागाराध्यक्षः), (९) सन्निधाता (राजकोषाध्यक्षः), (१०) प्रदेष्टा (पारुष्यादिष्वभियोगेषु निर्णयप्रदाता), (११) नायकः (सैनिकविभागस्य प्रधानाधिकारी), (१२) पौरो (राजधान्याः सर्वोच्चशासकः, (१३) व्यावहारिकः (प्रधानन्यायाधीशः), (१४) कार्मान्तिकः

---

(१) शान्ति० ८४।४ । (२) शान्ति० ८४।५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

(सुवर्णादिधातूनामुत्पत्ति स्थानस्य प्रधान निरीक्षकः), (१५) मन्त्रिपरिषदाध्यक्षः (प्रधानमन्त्री), (१६) दण्डपालः (सेनारक्षकः), (१७) दुर्गपालो (दुर्गरक्षकः), (१८) अन्तः पालः (सीमारक्षकोऽटवीपालश्च) । तथा च कौटलीयार्थशास्त्रे कौटिल्यः --

"तान्राजा स्वविषये मन्त्रिपुरोहितसेनापतियुवराजदौवारिकान्त-
र्वंशिक प्रशास्तृसमाहर्तृसन्निधातृप्रदेष्टृनायकपौरव्यावहारिक
कार्मान्तिक मन्त्रिपरिषदध्यक्षदण्डदुर्गान्तपालाटविकेषु - -
- - - - - - - - - - - - - तीर्थेष्वष्टादशस्वपि ।[1]

तीर्थस्थानीया एतेऽमात्यादयस्त्विदानीमपि सन्ति, किन्त्वेतेषां पवित्रताबोधकं यन्नाम परिकल्पितं पौरस्त्यैराचार्यैस्तदधुना न श्रूयते तेषाम् । सर्वविधगुणान्तर्निहितत्वादत्युच्चपदस्था भवन्त्येते । पदोत्कृष्टत्वाद्धार्मिकं सामाजिकं राजनैतिकमार्थिकञ्चेति सर्वमत्युत्कृष्टमेव कार्यं सम्पादयन्ति । तथा च नीतिवाक्यामृते --

धर्मसमवायिनः कार्यसमवायिनश्च पुरुषास्तीर्थम्[2] ।

नद्यादिषु तीर्थेषु सम्प्राप्ता मानवाः स्नानदानादिना सर्वविधापापप्रक्षालिता भवन्ति, आध्यात्मिकीं शान्तिं च लभन्ते यथा, तथैव व्यावहारिकदुःखेन दुःखिताः प्रजा अमात्यरूपं तीर्थं गत्वा दुःखमुक्ता भवन्ति, व्यावहारिकीं शान्तिं चाप्नुवन्ति, अर्थाज्जनानां सर्वविधानां समस्यानां समाधानं तीर्थाभिधा अमात्यादयः कुर्वन्ति । अतः पौरस्त्यैर्विद्वद्भिः परिकल्पितमेतत्तीर्थं नाम सर्वथार्थपूर्णं दृश्यते ।

---

(१) कौटलीयार्थशास्त्रम् १।१२ । (२) नीतिवाक्यामृतम् (अर्थसमुद्देशः) ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

इत्थं मन्त्रिपरिषदि बहूनां बहुविधानां व्यक्तित्वानां सङ्गमो जायते । देवराजस्येन्द्रस्य मन्त्रिपरिषदि सह्स्राधिकाः सर्वशक्तिसमन्विता ऋषयः सदस्या आसन्[1] । एवं रामायणस्यायोध्याकाण्डे विद्वज्जनपरिपूरिताया अत्युत्तमायाः सभाया वर्णनमस्ति । प्रग्रहानामिकायां तस्यां सभायां सदस्यानां संख्याऽऽसीदनल्पा ।

> तामार्यगणसम्पूर्णां भरतः प्रग्रहां सभाम् ।
> ददर्श बुद्धिसम्पन्नः पूर्णचन्द्रां निशामिव ॥[1]

प्रधानमन्त्री -

यः सर्वविधासूपधासु शास्त्रनिर्दिष्टासु परीक्षासु च विशुद्धः, शास्त्रोक्त-गुणसमन्वितः, मन्त्रिष्वपि श्रेष्ठतमः लोकनियन्त्रणसमर्थश्चास्ति, पुनर्येन निष्कपटता-पूर्णव्यवहारेण धर्मानुकूलमार्गेण च जनविश्वासः संपादितः स एव प्रधानमन्त्रिपद-प्रदानार्हः । यस्मै प्रधानमन्त्रिपदं देयं तस्मै मन्त्रोराज्यशासनाधिकारश्च दीयते राज्ञा । तथा च महाभारते --

> तस्मै मन्त्रः प्रयोक्तव्यो दण्डमाधित्सता नृप ।[2]
> पौरजानपदा यस्मिन् विश्वासं धर्मतो गताः ॥

मन्त्रिपरिषदि निश्चिताः केचिद्विषयाः कार्यान्वयनात्प्राक् सर्वथा गोपनीयाः, केचित्तु प्रसारणीया अथवितादृशा असाधारणविषयाऽपि भवन्ति

---

(१) रामायणम् २।८२।१ । (२) शान्ति० ८४।४२-४३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

निर्णीता:, येषां कृते जनसम्मतिरपेक्षिता, तदर्थं ते विषयाजनसमक्षं प्रापणीया:, जनसमाजे नूतनविषयस्य कार्यान्वियनं कठिनमत: कार्यमेतत्प्रधानमन्त्रित: कारयेद्राजा। मन्त्रिपरिषदि मन्त्रितौ विषयौ लोकेऽपि प्रचारार्ह इति विषये महाभारतकार: --

तत: सम्प्रेषयेद्राष्ट्रे राष्ट्रियाय च दर्शयेत्।
अनेन व्यवहारेण द्रष्टव्यास्ते प्रजा: सदा॥

अत: प्रधानमन्त्री राज्यतत्त्वेषु सर्वोच्च: सम्माननीयश्च। तस्माद्राज्यशासनसम्बन्धिविशेषाधिकारोऽपि तस्मिन्नेव।

अमात्यानां कर्तव्यम् -

देशस्य राज्ञो जनानाञ्च सर्वतो हितचिन्तनम्, सैनिकबलवर्धनम्, कोशवृद्धेरुपायान्वेषणम्, मार्गहीनस्यानुपयुक्तमार्गं प्रवृत्तस्य वा राज्ञ: सन्मार्गं प्रदर्शनम्, मत्या नीत्या वा शत्रुदमनम् सुशासने दक्षतायाः उपार्जनम्, मन्त्रनिर्धारिताया नीतेरनुसरणम्, मन्त्रगोपनं(फलनिष्पत्ते: प्रागन्ये मन्त्रं न जानन्त्वित्यर्थ:) तथा च याज्ञवल्क्य: --

मन्त्रमूलं यतो राज्यं तस्मान्मन्त्रं सुरक्षितम्।
कुर्याद्यथाऽस्य न विदु: कर्मणामा फलोदयात्[१]॥

नीतिवाक्यामृतेऽमात्यानां चतुर्विधानां कर्तव्यानामस्त्युल्लेख:, तान्येतद्विधानि - राष्ट्रियायस्य व्ययस्य च विचार:, राजरक्षणम् सैन्यशक्तिवर्धनञ्च

---

(१) याज्ञवल्क्यस्मृति: १।३४४।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

"आयो-व्यय: स्वामिरक्षा तन्त्रपोषणं चामात्यानामधिकार:"[1] । अमात्यो राजराष्ट्रभृदित्याहुराचार्या:, वचनमेतत् पूर्णत: सार्थकम्, यतोऽमात्यानामभावे मन्त्रेण च विना राजा न क किमपि कार्यं सम्पादयितुं क्षम: करोति चेदपि न सफलतामाप्नोति । अतो राज्ञे समुचितपरामर्शप्रदानं मन्त्रिणां प्रमुखं कर्तव्यम् । य: परामर्शो देशोन्नतौ पूर्णरूपेण सहायक: स्यात् । मन्त्रिभि: प्रदत्तो विचारो यदि राज्यस्य प्रजाजनानां बलस्य कोशस्य च समुन्नतौ तथा राज्ञ: सद्भावबृद्धौ च पूर्णसहायको न भवेत्तदा तत्प्रदातारो मन्त्रिण: सर्वथा निरर्थका: । उक्तञ्च शुक्राचार्येण --

विना प्रकृतिसन्मन्त्राद्राज्यनाशो भवेद् ध्रुवम् ।
रोधर्न न भवेत्तस्माद्राज्ञस्ते स्यु: सुमन्त्रिण: ।।

न बिभेति नृपो येभ्यस्तै: स्यात् किं राज्यवर्धनम् ।
यथालङ्कारवस्त्राद्यै: स्त्रियो भूष्या स्तथा हि ते ।।

राज्यं प्रजा बलं कोश: सुनृपत्वं न वर्धितम् ।
यन्मन्त्रतोऽरिनाशस्तैर्मन्त्रिभि: किं प्रयोजनम्[2] ।।

अमात्यानां कर्तव्यविषये नेपालस्य संविधानम् -- श्रीपञ्चमहाराजाधिराजस्य कार्यसम्पादने सहयोगार्थमेवं परामर्शप्रदानार्थमेकामन्त्रिपरिषद् व्यवस्थापिता भवति । संविधानस्य तत्कालप्रचलितान्यनियमस्य राजप्रदत्तमार्गदर्शनस्य चाधीने स्थित्वा देशस्य दैनिकप्रशासने निर्देशनं नियन्त्रणञ्चास्या: परिषद: कर्तव्यम्[3] ।

इत्थममात्यानां कर्तव्यान्युल्लिखन्त्याचार्या: । विषयवस्तूनामुपस्थापनादौ

---

(१) नीतिवाक्यामृतम् (अमात्यसमुद्देश:) । (२) शुक्रनीति: २।८१-८३ ।
(३) नेपालस्य संविधानम् भा० ७, पृ० २० ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

तेषां मते काचिद् भिन्नता प्रतिभाति, तथाप्युद्देश्यविशेषे तु न किमप्यन्तरं दृश्यते । नेपालस्य संविधानमपि पौरस्त्यैराचार्यैः प्रतिपादितेष्वमात्यानां कर्तव्येषु स्वस्य सम्मतिं जनयति ।

अमात्यानामधिकारः -

मन्त्रिणोऽप्रतिवीर्याः, अतो राज्ये तेषां स्थानं सर्वोत्कृष्टं विद्यते, पुनस्तेषामुच्चताऽऽदर्शताऽऽवश्यकता चावर्णनीया, तस्माद्विशिष्टाधिकारसम्पन्ना भवन्त्येते । अधिकारेष्वपि निम्नाङ्कितः अधिकारा विशिष्टाः, (१) राज्ये समुपस्थितानां महत्त्वपूर्णानां विषयाणां मन्त्रणं चिन्तनञ्च, (२) चिन्तितानां विषयाणां कार्यान्वयनं तेषां फलाफलविचारश्च, (३) अकस्मादुत्पन्नाया घटनायाः, समस्याया वा यथाकालं समाधानं प्रचलितेषु विषयेष्वावश्यककार्य-सम्पादनञ्च, (४) आयस्रोतैरवर्धनम्, आयस्याधारे व्ययव्यवस्थाकरणं विकास-योजनानुमानञ्च, (५) सैन्यसंरक्षणं संवर्धनं संपोषणञ्च, (६) सैन्यशक्तिपरिचालनम्, (७) वैरिविनाशनमाटविकानां प्रतीकारश्च, (८) सर्वतो राज्यरक्षणम्, (९) दुर्भिक्षाद्यापद्भ्यः दुर्जनेभ्यश्च प्रजारक्षणम्, (१०) युवराजरक्षणं तस्याभिषेके यथोचित व्यवस्थाकरणञ्चेत्यादीनि बहूनि बहुविधानि कार्याण्यमात्यानामधिकारा-न्तर्गतानि । एतद्विधानां महत्वपूर्णानामधिकाराणां समुचितप्रयोगोऽव्यसनिभ्योऽमात्येभ्यः सम्भवः, न तु व्यसन प्रसक्तेभ्यः । अतो राज्ञो व्यसनादमात्यव्यसनं भयप्रदम् । अमात्यानामभावः स्यादथवा मात्या व्यसनरता भवेयु स्तदा सर्वं राजकार्यं

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

राज्ञः सर्वविधश्चा कार्यक्रमश्च विनश्यति, तदानीं पक्षरहितपतगसदृशो भवति राजा । पुनर्व्यसनासक्तानाममात्यानां दशां जानन्तः शत्रवोऽपि तदैव विविधमुपद्रवमाचरिष्यन्ति । तदा राजैव विनाशावस्थां प्राप्नोति, यतोऽमात्यास्तु राज्ञः प्राणरूपा एवेति भारद्वाजमतम् । तथा च --

> "स्वाम्यमात्यव्यसनयोरमात्यव्यसनं गरीय इति । मन्त्रो मन्त्रफलावाप्तिः कार्यानुष्ठानमायव्ययकर्म-दण्डप्रणयनममित्राटवी प्रतिषेधो राज्यरक्षणं व्यसनप्रतीकारः कुमाररक्षणमभिषेकश्च कुमाराणामायत्तममात्येषु । तेषामभावे तदभावः । छिन्नपक्षस्येव राज्ञश्चेष्टानाशः । व्यसनेषु चासन्नाः परोपजापाः । वैगुण्ये च प्राणबाधः प्राणान्तिकचरत्वाद्राज्ञ इति ।[1]

भारद्वाजो हिन्दूराजनीतिपूर्धन्यआचार्यः, अस्य मतमस्ति महाभारते कौटलीयार्थशास्त्रे चोद्धृतम् । अनेनामात्यानामधिकारविषये यदुल्लिखितमुपरि तदिदं मेगास्थिनामधिकारकल्पनायां भारद्वाजमेगास्थिनिजयोः समरूपतोपलब्धा -- उपर्युक्ते १ अङ्क०के भारद्वाजेन विषयचिन्तनाद्यधिकारः प्रोक्तः सोऽयं मेगास्थिनीजस्य सार्वजनिककार्यव्यवस्थया सह समानः । २, ३, ८, ९ अङ्क०केषूक्ता अधिकारा मेगास्थिनीजस्य राज्यशासनव्यवस्थया सहैकरूपाः । ५, ६, ७ अङ्क०केषु प्रोक्ता अधिकारा मेगास्थिनीजस्य सैनापत्यादीनां निर्वाचनादि विषयसमानाः । १० अङ्क०कोक्ता अधिकारा मेगास्थिनीजस्य प्रान्तीयशासकोपशासकादीनां निर्वाचनादि व्यवस्थया सुहृत्तुल्यरूपाः । ४ अङ्क०कोक्ता अधिकारा मेगास्थिनीजस्य कोशव्यवस्थया एवं कृष्यादिव्यवस्थया सह समरूपतां गच्छन्ति । इत्थममात्याधिकारविषये पौरस्त्यपाश्चात्ययोर्विदुषोरैकमत्यं

---

(१) कौटलीयार्थशास्त्रम् ८।१ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

[illegible]

[illegible]

> [illegible]

[illegible]

---

(1) [illegible]

CC.O Sampurnanand University Collection. Digitized by eGangotri

प्राप्यते, अर्थात्पाश्चात्या बुधा अपि प्राय: पूर्वाचार्याणामेवमतमनुसरन्ति ।

अमात्यानामनुमत्या विना स्वेच्छया न किमपिकार्यं (दानादिकमपि) कर्तुं क्षमो राजा । तथा चोक्तमापस्तम्बधर्मसूत्रे -- "भृत्यानामनुपरोधेन क्षेत्रं वित्तं च ददद्ब्राह्मणेभ्यो - - - -"[1] । अत्र भृत्यशब्दे नामात्या गृह्यन्ते "मन्त्रिपुरोहितादि भृत्यवर्गम्" । यत्कार्यं कर्तुमिच्छति राजा तस्य कृते मन्त्रिणां सम्मतिरनिवार्या । सम्मतिविषयस्त्वमात्यानामधिकारान्तर्गतत्वात्तद् दातुमदातुञ्च शक्नुवन्त्यमात्या: प्रयच्छन्ति चेदीदप्सितं कार्यं क्रियते राज्ञा नोचेन्न । विषयेऽस्मिन्नुदाहरणान्यपि प्राप्यन्ते यथा -- मौर्यवंशोद्भवेन सम्राजाशोकेन वाञ्छितस्य वित्तादिदानस्य राधागुप्तादिभिरमात्यै: स्वाधिकारं प्रयुज्य विरोध: कृत: । एवं रुद्रदामनेन राज्ञा मौर्यकुलोत्पन्ने राजभिर्विनिर्मितस्य सुदर्शनाख्यस्य जलाशयस्य जीर्णोद्धारार्थं प्रस्ताव: स्थापित: । प्रस्तावोऽयं मन्त्रिभिरस्वीकृत: । प्रस्तुतप्रस्तावविषये स्वाधिकारप्रयोक्तृभिरमात्यैर्विरोधप्रदर्शित:, अतोराष्ट्रिय कोशाद्विधीयमानो व्ययोऽपि निरुद्ध: । तस्माद्राज्ञा स्वस्य वैयक्तिककोशादेवोक्त जलाशयस्य जीर्णोद्धारो विहित: । कार्यमेतन्महताधनेन निष्पन्नमर्थाद्बह्वर्थव्ययो जात:, तथापि पौरजानपदादिभ्यो धनादानं न तु कृतं मयेत्याह राजा स्वस्मिन् शिलालेखे --

अपीडयित्वा करविष्टिप्रणयक्रियाभि: पौरजानपदं जनं स्वस्मात्कोशान्महता धनेन अनतिमहता च कालेन - - - - सेतुं - - - - कारितम् । स - - - इत्यादि ।[3]

अमात्यानामेतद्विधोऽयमधिकार: शास्त्रीयो धर्मसंमतश्च । यतोऽमात्या-

---

(१) आपस्तम्बधर्मसूत्रम् २।१०।२६।१ । (२) कौटलीयार्थशास्त्रम् ।
(३) इपिग्राफिया इण्डिका (शिलालेख:), पृ० ४४ ख० ८ (हि०रा०त०भा०२ पृ० ८६ स० उद्धृतोऽयम्) ।

CC-0. Gurukul Kangri University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

२०२ नामनुपस्थितौ न किमपि कार्यसम्पादनं चिन्तनञ्च कर्तव्यं राज्ञा । तच्चोक्तं शुक्राचार्येण --

मन्त्रिभिस्तु विना मन्त्रं नैकोऽर्थं चिन्तयेत् क्वचित्[१] ।

पुनः शासकोपशासकादीनामन्येषां निम्नपदस्थकर्मचारिणां च नियुक्त्यां स्थानान्तरणे पदपरिवर्तने वेतननिर्धारणे वेतनप्रदानादौ चामात्यानामेवाधिकारो विद्यते । अधिकारा विभाजिता च भवन्ति यथा -- यत्कार्यं येन विभागेन सह सम्बद्धं तत्सर्वं तस्यैव विभागस्यामात्यस्याधिकारान्तर्गतम् । पुनः स्वस्य विभागस्य दैनिकं प्रशासनञ्च । तथा यद्यस्य कृते निर्दिष्टं पृथक्कृतं वा तत्कार्यं तेनैव सम्पाद्यम् । यदनिर्दिष्टमसाधारणञ्चस्यान्तरस्य कार्यान्वियनं मन्त्रिपरिषदो निर्णयानुसारं भवति ।

मन्त्रिपरिषदो निर्णयो राज्ञापिमान्य: -

शासनसम्बन्ध्यशेषाधिकारो मन्त्रिपरिषद्यन्तर्निहितः । स्वाधिष्ठिताधिकारस्य सदुपयोगं सततमिच्छति च सा । सुशासनं राज्योत्पन्नानां सर्वविधानां समस्यानां यथासमय समाधानं सुसम्पन्नराष्ट्रनिर्माणं प्रजानां सर्वतो हितञ्चेत्यादिकं परिषदोऽधिकारस्य यथोचितप्रयोगादेव सम्भवम् । अत एतेषां विषयाणां चिन्तनमविच्छिन्नं भवति मन्त्रिपरिषदि । तस्यां विचारिता निर्णीताश्च विषया राज्ञाप्यनालोच्याः सर्वथा स्वीकार्याः । परिषदिनिर्णीतविषयस्यास्वीकारं करोति चेत्तादृशि राजनि राष्ट्रसंघटनस्य नियमानुसारं न विद्यते वास्तविकं राजत्वम् ।

---

(१) शुक्रनीतिः २।२ ।

CC-0 Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अतो राज्ञा मन्त्रिपरिषदो निर्णयस्योल्लङ्घनं न कदापि कर्तव्यम् "न खल्वसौ राजा यो मन्त्रिणोऽतिक्रम्य वर्तते"[१]। अस्वतन्त्रताद्राजा मन्त्रिपरिषदो निर्णय-खण्डनं विपरीतादेशप्रदानञ्च कर्तुम् समर्थः।

परतन्त्र सदाराजा - - - - - - ।
मन्त्री चामात्य सहिते कुतस्तस्य स्वतन्त्रता[२] ।।

यदा मन्त्रिपरिषदि कश्चिदसाधारणप्रस्तावागमः सम्भवः स्यात्तदा तदागमनात्पूर्वमेव राज्ञे वस्तुस्थितेः सङ्केतो देयः। यदि राजा प्रस्तावोऽनावश्यकः प्रतिकूलो वेति विचारयति तदा तस्य प्रत्याख्यानं कर्तव्यं राज्ञा। प्रकारेणानेन निरर्थकप्रस्तावनिर्णयनिरोधे राज्ञोऽधिकारो वर्तते, किन्तु निर्णीतविषयप्रतिषेधेतु नाधिकारः। राज्ञा तिरस्कृतः प्रस्तावो मन्त्रिपरिषदा बलान्निर्णीयते चेद्राज्ञा तस्यास्वीकारः स्वाभाविक एव।

स्वीकृतिप्रदानक्रमः -

यदा क्रियमाणकार्यस्य निश्चितरूपं प्राप्यते, तदैव कार्यारम्भो जायते। निश्चितरूपस्य कृते सम्बद्धानां सर्वेषां लिखिता स्वीकृतिरपेक्षिता। स्वीकृतिश्च लेखपत्रे दातव्या भवति। लेखस्याधारे स्वामात्याः कर्मचारिणश्च कार्यं सम्पादयन्ति, तस्या भावे न किमपि कार्यं वाञ्छनीयम्। साधारणोऽसाधारणश्चेति लेखो द्विविधः। साधारणलेखपत्रे विभागाध्यक्षोऽमात्यो वा स्वीकृतिं प्रयच्छति, अर्थात्कार्यं येन

---

(१) नीतिवाक्यामृतम् (मन्त्रिसमुद्देशः) ।

(२) महाभारतस्य वचनमिदं हिन्दूराज्यतन्त्रम् भा०२, १३७ पृष्ठे उद्धृतमस्ति ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

विभागेन सहसम्बद्धं तस्य निश्चितरूपं विभागीयप्रमुखादेवोपलब्धं भवति । तदनुरूपमेव कर्मचारिणाकार्यं कर्तव्यम् । यो विषयोऽसाधारणो भवेत्तस्य कृते सम्बद्धानां सर्वेषां प्रमुखाणां स्वीकृतिरनिवार्या । स्वीकृतिक्रमश्चैतद्विध: -- प्रथमं राज्ञेऽसाधारणविषयोल्लिखितं लेखं प्रदर्शयेयुर्मन्त्रिण: । राज्ञापि लेखावलोकनं कर्तव्यम् । लेखपत्रे प्रस्तुतो विषय उचितोऽनुचितो वाऽऽवश्यकोऽनावश्यको वा कीदृश: स्यात्तदनुसारमेव स्वसम्मतिं प्रयच्छति राजा । ततो राज्ञ: सम्मत्यनुसारमेवामात्यादय: स्वां स्वां स्वीकृतिं लिखन्ति । तथा च शुक्रनीतौ शुक्राचार्य: --

राजा स्वलेख्यचिन्हं तु यथाभिलषितं तथा ।
लेखानुपूर्वं कुर्याद्धि दृष्ट्वा लेख्यं विचार्य च ॥+

मन्त्री च प्राड्विवाकश्च पण्डितो दूतसंज्ञक: ।
स्वाविरुद्धं लेख्यमिदं लिखेयु: प्रथमं त्विमे ॥

अमात्य: साधु लिखनमस्त्वेये तत्प्राग् लिखेदयम् ।
सम्यग्विचारितमिति सुमन्त्रो विलिखेत्तत: ॥

सत्यं यथार्थमिति च प्रधानन्च लिखेत्स्वयम् ।
अङ्गीकर्तुं योग्यमिति तत: प्रतिनिधिर्लिखेत् ॥

अङ्गीकर्तव्यमिति च युवराजो लिखेत्स्वयम् ।
लेख्यं स्वाभिमतं चैतद्विलिखेच्च पुरोहित: ॥

स्वस्वमुद्राचिन्हितं च लेख्यान्ते कुर्युरेव हि ।[1]
अङ्गीकृतमिति लिखेन्मुद्रयेच्च ततो नृप: ॥

---

(१) शुक्रनीति: २।३६४-३६६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

युवराजः -

कुकर्मणा कुसहायेन च भूपतिः स्वधर्माद्राज्यतश्च हीयते । अतो निरभिमानः सुसहायश्च भवेद्राजा । युवराजामात्यौ महीभुजः सहायौ, एतौ क्रमेण दक्षसव्यौ भुजौ नयने कर्णौ च स्मृतौ । अत एताभ्यां विना पार्थिवो बाहुकर्णादि हीनः स्यात् । अतो विचारपूर्वकं तौ स्थाप्यौ अपरीक्षितौ (अविचारितौ) हि तौ सर्वनाशकरौ । अमात्यविवेचनमुपरिकृतमतः परं युवराजो विचार्यते । स्वराज्यकाल एव राजा धर्मपत्नीजं स्वमौरसं पुत्रं युवराजपदे स्थापयेत् । अस्याभावेऽनुजं पितृव्यमनुजात्मजमग्रजात्मजं पुत्रीकृतं पुत्रं दत्तकपुत्रन्चैतान्क्रमेण योजयेत् । एतेषामप्यभावे दौहित्रं स्वस्रीयं वा स्थापयेत् । तथा च --

कल्पयेद्युवराजार्थमौरसं धर्मपत्निजम् ।
स्वकनिष्ठं पितृव्यं वाऽनुजं वाऽग्रज संभवम् ।।

पुत्रं पुत्रीकृतं दत्तं यौवराज्येऽभिषेचयेत् ।
क्रमादभावे दौहित्रं स्वस्रीयं वा नियोजयेत् ।।[१]

औरसपुत्रेष्वपि ज्येष्ठ एव तत्पदप्रदानार्हः । तथा च रामायणे --

अहोऽस्मि परमप्रीतः प्रभावश्चातुलो मम ।
यन्मे ज्येष्ठं प्रियं पुत्रं यौवराज्यस्थमिच्छथ ।।[२]

भगवता श्रीरामेणराज्याभिषेककाल एवानुजाय भरताय युवराजपदं दत्तम् ।

---

(१) शुक्रनीतिः २।१४-१६ ।

(२) रामायणम् २।३।२ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

नियुज्यमानोऽपि च यौवराज्ये ततोऽभ्यषिञ्चद्भरतं महात्मा[1] ।

युवराजो मन्त्रिपरिषदः सदस्योऽपि भवति स्म । मन्त्रिपरिषदि तस्य महत्त्वपूर्णा भूमिकाऽऽसीत्तदानीम् । किन्त्विदानीं केवलं राज्यस्योच्चराधिकारं प्राप्नोति सः, तस्य महत्त्वञ्च पृथग्विधं दृश्यते । इदानीन्तन्यां मन्त्रिपरिषदि तस्य गणना न तु कृता तथाप्यष्टादशतीर्थेन्यतमोऽविशिष्टः । तीर्थस्थानीयस्यास्य महत्त्वमुच्चतमं विशेषं विघञ्च । राज्यस्य महत्त्वपूर्णविषयचिन्तनादौ विशिष्टकार्यसम्पादनादौ चास्य सहभागिताऽनिवार्या, स्वीकृतिश्चापेक्षिता, अस्यानुमत्या विनाऽसाधारणविषयस्य कार्यान्वियनं न तु सम्भवम्, प्रकाशनार्हाः सास्युताविषयविशेषाश्च न तु प्रकाश्यन्ते । यत्र यथा मात्यानां स्वीकृतिरपेक्षिता तथैव तत्र तस्यापि । शुक्राचार्योऽपि विषयमिमं पूर्णतः समर्थयति --

अङ्गीकर्तव्यमिति च युवराजो लिखेत्स्वयम्[2] ।

भट्टभास्करेण युवराजः कुमाराध्यक्ष इत्युक्तम्, कुत्रचिन्महामात्रः कुत्रचिन्महामात्यः कुत्रचित्तु प्रधानामात्यशब्देनापि व्यवह्रीयते स सः । राज्येनास्मैमहत्त्वपूर्णाधिकारः प्रदीयते । येन राजापि नियन्त्रितः, अर्थाद्युवराजः स्वेच्छाचारिणं राजानमपि नियन्त्रणं करोति यथा -- राज्ञोऽशोकस्य शासनकाले तस्य पौत्रः कुनालस्य पुत्रः सम्पदिर्युवराज आसीत्, स्वस्य यौवराज्ये पितामहोऽशोकः कुर्कुटारामं दौत्रं महद्धनञ्चान्यस्मै दातुमिच्छति तदा राज्ञ एतद्विधं दानकार्यं प्रतिषेघ्यति युवराजः । इत्थं राज्ञा विधीयमानकार्यनिरोधे समर्थो भवति युवराजः । अतो युवराजस्यानुमत्या विना राजा न किमपि कार्यं कुर्यात् ।

---

(१) रामायणम् ६।१२८।९३ । (२) शुक्रनीतिः २।३६८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

तस्मिंश्च समये कुनालस्य सम्पदिनामपुत्रो युवराज्ये प्रवर्तते । तस्यामात्यैरभिहितम्, कुमार अशोकोराजा स्वल्पकालावस्थायी, इदं च द्रव्यं - - - प्रतिषिद्ध:[१] ।

मन्त्रिपरिषदोऽध्यक्ष: -

मन्त्रिपरिषदोऽध्यक्षो राजैव भवति । कारणवशादध्यक्षता ग्रहणेऽसमर्थो राजा प्रधानमन्त्रिणमध्यक्षपदे नियोजयेत् । तथा च मनुस्मृतौ --

अमात्यमुख्यं धर्मज्ञं प्राज्ञं दान्तं कुलोद्गतम् ।
स्थापयेदासने तस्मिन्खिन्न: कार्येक्षणे नृणाम्[२] ।।

मन्त्रिपरिषदि राज्यसन्चालनेन सह सम्बद्धानां महत्वपूर्णानां विषयाणां विमर्शो निर्णयश्च जायते । अत स्तस्यां सर्वेषां सदस्यानामुपस्थितिरनिवार्या । यदि कश्चिदनुपस्थित: स्यात्तदा तस्यानुपस्थिते: कारणोल्लिखितं पत्रमादायैव सभाया: सन्चालनं कुर्यादध्यक्ष: ।

अमात्यानां परिवर्तनम् -

पदपरिवर्तनं व्यक्तिपरिवर्तनन्चेति परिवर्तनं द्विविधम् । यो यत्पदस्थ स्तस्मै तत्पदमदत्वाऽन्यपदप्रदानं पदपरिवर्तनम् । व्यक्तिरेका न चिरमेकपदे स्थाप्या

---

(१) दिव्यावदानम् पृ० ४३० हिन्दूराज्यतन्त्रम् भा०२, पृ० ११६ उद्धृतम् ।

(२) मनुस्मृति: ७।१४१ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

भवत्यर्थादेकस्मै बहुकालं यावदेकाधिकारप्रदानं नोचितम् । यतोऽधिकाररूपं मदं पीत्वा कः प्रमत्तो न भवेत् । अत स्तस्य कार्यक्षमताया योग्यतायाश्चाधारे यो विभाग उपयुक्तः स्याचस्मिन् यथासमये परिवर्तनमवश्य कर्तव्यं राज्ञा । गृहविभागस्थं रक्षाविभागेपरिवर्तनमुचितम्, अर्थादस्मै यद्विधविभागप्रदानात्प्रतिकूलतानोत्पद्यते तस्मैतद्विधो विभागो दातव्यः । विषयेऽस्मिन् शुक्राचार्यः --

परिवर्त्य नृपो ह्येतान् युञ्ज्यादन्योऽन्य कर्मणि[1] ।

यत्पदं येनोपभुक्तं तदस्मैऽप्रदानमर्थादन्यस्मै दीयते चेत्तदा व्यक्तेः परिवर्तनं भवति । परिवर्तनमेतत् त्रिषु पञ्चसु सप्तसु दशसु वाऽब्देषु कर्तव्यम् । परिवर्तनस्यैतेऽब्दाः कार्यकर्तुरधिकारिणः कार्यकुशलताया आधार एव निश्चीयन्ते । तथा च शुक्रनीतौ शुक्राचार्यः --

त्रिभिर्वा पञ्चभिर्वापि सप्तभिर्दशभिश्च वा ।
दृष्ट्वा तत्कार्यकौशल्यं तथा तं परिवर्तयेत्[2] ।।

अस्यायं भावः - यश्चतुरः कार्यनिपुणो गुणसम्पन्नश्चास्ति तस्य परिवर्तनं मन्दमर्थाद्दशवार्षिकम् । यो गुणादिभिर्मध्यमः स पञ्चसप्तसु वाऽब्देषु निष्कास्यते । यो गुणसामान्यो मन्दमतिश्च भवेत् सोऽविलम्बेनार्थाद्वर्षत्रयेण निष्कासितो भवति । परिवर्तनस्यैष नियमोऽमात्येष्वेव युज्यते न त्वन्येषु कर्मचारिवर्गेषु ।

महत्त्वपूर्णाधिकारो दीर्घकालं यावन्न कस्मैचिदपि देयः । नियमोऽयं सार्वत्रिकः । नियमस्यास्य प्रयोगाद् योऽधिकारवन्वितः स्यात्, किन्त्वधिकार-

-----

(१) शुक्रनीतिः २।१०६ । (२) शुक्रनीतिः २।११२ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

मुक्तोऽप्यधिकारप्रदानार्हश्चेत्तस्य कार्यदक्षताया आधारे पुनः पदेऽन्यस्मिन् स्थापयेत् । यस्मिन्पदे यो नियुक्तः स तस्य पदस्य कृतेऽनुपयुक्तश्चेत्तस्य परिवर्तनं विधाय तस्मिन्पदेऽन्यं कुशलं नियोजयेत् । उच्चपदस्थन्तु निम्नपदे न नयेत् । निम्नपदस्थोऽप्युच्चपदप्रदानयोग्यश्चेत्तदा तस्मै उत्तरोत्तरमुच्चमत्युच्चं पदं देयम् । तेनार्जितान्गुणानवलोक्यान्ते सर्वोच्चं पदमपि दातव्यम् ।

नाधिकारं चिरं दद्यात्कस्मै कस्मै सदा नृपः ।
अधिकारे दामं दृष्ट्वा ह्यधिकारे नियोजयेत् ।।

यथा यथा श्रेष्ठपदे ह्यधिकारी यदा भवेत् ।
अनुक्रमेण संयोज्यो ह्यन्ते तं प्रकृतिं नयेत् ।।[1]

एतद्विधाऽमात्यपरिवर्तनव्यवस्थाऽधुनापि राज्यसञ्चालनविधौ व्यवस्थिताऽस्ति । प्रचलनमेतादृशं शासनयन्त्रे नितान्तमपेक्षितं विद्यते । राज्ञोऽशोकस्य राज्यकालेऽमात्याः पञ्चसु पञ्चस्वब्देषु पदमुक्ता भवन्तिस्म "पञ्चसु पञ्चसु वासेसु निंयातु"[2] । सिद्धान्तोऽयं व्यावहारिकः सर्वमान्यश्च दृश्यते । एतादृशां परिवर्तनक्रियां "अनुसंयानम्" इत्युच्यते, शब्दोऽयं पारिभाषिकः, अस्यार्थः - निश्चितप्रयाणम् ।

पुरोहितः -

दृष्टादृष्टार्थेषु सर्वेषु कर्मसु दानमानसत्कारादिभिरात्मसम्बद्धं विधीयते यं तमाहुः पुरोहितम् । अस्योत्पत्तिकाल ऋग्वेद काल एव । राज्ञोत्पत्तिना

---

(१) शुक्रनीतिः २।११३-११६ । (२) धर्मशास्त्र का इतिहास भा०२,पृ०६२६

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

सत्त्वोत्पन्नत्वाद्रक्षकत्वाच्चैष राज्ञः प्राणरूप इत्याहुर्मुनयः । राज्ञोराष्ट्रस्य चोत्थानमस्य सक्रियतायामेव सम्भवम् । पुरोहितो न केवलं याजकोऽपितु राष्ट्ररक्षकोऽपि "पुरोहितो राष्ट्रगोपः"[1] सर्वशास्त्रज्ञत्वाच्छास्त्रोक्तेनानुष्ठानेन राज्योत्पन्नसर्वविधविघ्नोपशमनं कृत्वा राजानं राष्ट्रञ्च रक्षति, तस्मात्सर्वाभ्यः प्रकृतिभ्योऽयं श्रेष्ठः । तथैव प्रोक्तं शुक्रनीतौ --

पुरोधाः प्रथमं श्रेष्ठः सर्वेभ्यो राजराष्ट्रभृत्[2] ।

मन्त्रशक्तेः प्रयोगात् पुरोधसा विश्वामित्रेण भरतकुलस्य रक्षणं कृतम् "विश्वामित्रस्य रक्षति ब्रह्मेदं भरतं जनम्"[3] । इत्थमाध्यात्मिकीशक्तिर्भवति सर्वतो रक्षणे समर्था । सैव भवत्यन्तर्हिता पुरोधसि । एषा महनीया शक्तिर्नितरामपेक्षिता राज्यतत्त्वे । अस्याः प्रभावादेव राज्यतत्त्वं सफलतां राज्यं सुसम्पन्नतामेति । तस्मादाध्यात्मिकशक्तिसम्पन्नस्य पुरोहितस्य मन्त्रिपरिषद्यप्यत्युत्कृष्टं स्थानमासीत्प्रारम्भिके युगे । महत्त्वपूर्णविषयोल्लिखितं लेख्यमप्यस्य स्वीकृत्या विना नोद्देश्य पूर्तिकरम् ।

लेख्यं स्वाभिमतं चैतद्विलिखेच्च पुरोहितः[4] ।

इत्थं राज्यस्य सर्वाञ्चसंस्थायामप्यस्य भूमिकामहत्वपूर्णाऽऽसीत् । किन्तु मन्त्रिपरिषदि (शासनयन्त्रे) अस्य महत्त्वं क्रमशोन्यूनं जातमर्थादावश्यकता नानुभूता, ततः स मन्त्रिपरिषदः सदस्यपदादप्यपसारितः, केवलं पुरोहितपदमवशिष्टम्, धार्मिककृत्येष्वस्योपयोगी दर्शितः, न तु शासनादौ । अतः प्राचीनयुगेऽस्य यन्महत्त्वं यद्विधा

---

(१) ऐतरेयब्राह्मणम् ४०।२ । (२) शुक्रनीतिः २।७५ ।
(३) ऋग्वेदः ३।५३।१२ । (४) शुक्रनीतिः २।३६८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

प्रतिष्ठा चासीन्नेदानीम् । यद्यपि दैनिकशासनेऽस्य प्रत्यक्षसम्बन्धो न दृश्यते, तथाप्यस्य कर्मणः सहयोगाच्च राज्यं सदैव लाभान्वितम् । राष्ट्रस्य राज्ञः प्रजानाञ्च समुन्नतावस्य सहभागितेदानीमपि सुतरामपेक्षिता ।

पुरोहितगुणाः :-

गुणहीनः पुरोहितः सर्वनाशकरः, गुणयुतस्त्वैहिकं पारलौकिकञ्च सर्वविधं सुखं तथा लोकद्वये शान्तिं च प्रयच्छति, तस्माच्छास्त्रोक्त गुणसम्पन्नः पुरोहितो वरणीयः । महर्षिभिः पुरोहितस्यानेके गुणाः प्रतिपादिता स्तेष्वत्र प्रथमं याज्ञवल्क्योक्ता गुणाः प्रदर्श्यन्ते । याज्ञवल्क्यस्मृतौ याज्ञवल्क्यः --

पुरोहितं प्रकुर्वीत दैवज्ञमुदितोदितम् [१] ।
दण्डनीत्यां च कुशलमथर्वाङ्गिरसे तथा ।।

ग्रहोत्पाततत्त्वज्ञानादेर्वेदितारम्, विद्याभिजनानुष्ठानादिभिः समृद्धम्, अर्थशास्त्रे शान्त्यादिकर्मणि च कुशलमेतद्विधगुणसंयुतं पुरोहितं कुर्यात् । तथा च विष्णुः -- वेदेतिहासधर्मशास्त्रार्थकुशलं कुलीनमव्यङ्गं तपस्विनं पुरोहितं च वरयेत् [२] । एवञ्च शुक्राचार्यः --

मन्त्रानुष्ठानसम्पन्नस्त्रैविद्यः कर्मतत्परः ।
जितेन्द्रियो जितक्रोधो लोभमोहविवर्जितः ।।

षडङ्गवित्साङ्गधनुर्वेदविच्चार्थधर्मवित् ।
यत्कोपभीत्या राजापि धर्मनीतिरतो भवेत् ।।

---

(१) याज्ञवल्क्यस्मृतिः १।३१३ । (२) विष्णुस्मृतिः ३।७० ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

नीतिशास्त्रास्त्र व्यूहादि कुशलस्तु पुरोहितः ।
सैवाचार्यपुरोधा यः शापानुग्रहयोः क्षमः ॥[1]

एतैर्विशिष्टगुणैर्युतेन पुरोधसा विधीयमानेन कर्मणा समुत्पादितं दृष्टमदृष्टं वा यत्फलजातं स्यात्तद्राज्ञो राज्यतत्त्वानाञ्च शक्तिवर्धकं भवति, वृद्धिं गता सा शक्तिरतुलनीया तस्मान्न कैश्चिदपि दमनीया, यस्याः प्रभावाद्राज्यं सुसमृद्धं सबलैः परैरप्यमर्दनीयञ्च ।

पुरोहितस्यावश्यकता -

पुरोहितो राज्यशक्तिं प्रवर्धयितुं समर्थः । पुरोहितस्याध्यात्मिक ज्ञानेन वर्धिता शक्तिरमोघा, तस्मात्साऽजितमपि जयति, अलभ्यं वस्त्वपि सारल्येन स्वायत्तं करोति । युद्धभीतानुत्साहहीनान् सैनिकान् पूर्ववृत्तोक्त्या श्रुत्यादि वचनाद् वा प्रोत्साहितान् करोति । आशिषो गुरुजनवितीर्णा वरतामुपयन्ति, तस्माद्युद्धहताः सैनिका अपि पुरोहितस्याशीर्वचनात्स्वर्गतिं प्राप्नुवन्ति । मृतेभ्योऽन्येभ्योऽपि शास्त्रीयया संस्कारक्रियया सद्गतिं प्रयच्छति । अथर्ववेदोक्तं शत्रुनाशकरं मन्त्रं जपति, तस्यानुष्ठानेन शत्रवो विनश्यन्ति । व्यावहारिकेषु धार्मिकेषु च कृत्येषु प्रथमं पुरोहितस्यैव परामर्शोऽपेक्षितो राज्ञः कृते तदनन्तरममात्यानाम् । इत्थं राज्यव्यवस्थाया विविधपक्षेषु पुरोहितस्यावश्यकता विद्यते । राज्ये सदैवापेक्षितस्यैतादृशस्याध्यात्मिकशक्तिसमेतस्यास्याज्ञापालनं राज्ञापि तथैव कर्तव्यं यथा गुरोः शिष्याः पितुः पुत्राः स्वामिनो भृत्याः पालयन्त्याज्ञाम् । पुरोहितस्यावश्यकता-

---

(१) शुक्रनीतिः २।७८-८१ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

विषयकमेतन्मतं कौटलीयार्थशास्त्र प्रतिपादितम् [१]।

पुरोहितकार्यम् -

आपन्निवारणम्, याजनम्, प्रायश्चित्तोपदेशः, पञ्चकल्पविधानेन सर्वोत्पातप्रशमनञ्चेत्यादीन्यस्य कार्याणि। कार्येष्वेतेष्वापन्निवारणन्तु महत्त्वपूर्णमस्य। यतो महाभयप्रदाऽऽपद्, एषा राज्ये भयावहां स्थितिं सृजति, यदि कार्याण्येतान्येककालोपस्थितानि स्यु स्तदा प्रथममापन्निवारणं कर्तव्यं पुरोधसा। पुरोहितस्य कार्येष्वेतदेव महदतोऽस्योल्लेखः प्रागेव कृत आचार्यैरपि। दैवी मानुषी चेति द्विविधाऽऽपद्। दैवीष्वापत्सु मतैक्यं नोपलभ्यं -- केचिदष्टविधाः केचित्पञ्चविधाः केचित्त्वनेकविधा आपदः प्रदर्शयन्ति। कौटिल्यस्त्वापत्प्रदायकानष्टौ विषयानुपस्थापयन्ति -- (१) अनलः, (२) जलम्, (३) आमयः, (४) दुर्भिक्षम्, (५) मूषकाः, (६) सिंहादिहिंस्रकजन्तवः, (७) सर्पादिविषधराः, (८) भूतप्रेतदैत्यनिशाचराद्यश्च।

दैवान्यष्टौ महाभयानि - अग्निरुदकं व्याधिर्दुर्भिक्षं मूषिका व्यालाः सर्पा रक्षांसीति [२]।

कामन्दकीयनीतिसारे विपज्जनकानामग्न्यादीनां पञ्चानां वर्णनमस्ति यथा --

---

(१) कौटलीयार्थशास्त्रम् १।८, १०।३ ।

(२) कौटलीयार्थशास्त्रम् ४।३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

हुताशनो जलं व्याधिर्दुर्भिक्षो मरकस्तथा[1] ।
इति पञ्चविधं दैवं व्यसनं मानुषं परम् ।।

नीतिवाक्यामृते सोमदेवोऽपि -- "अमानुषोऽग्नि:, अवर्षम्, अतिवर्षम्, मारक: दुर्भिक्षम्, सस्योपघात:, जन्तूत्सर्ग:, व्याधिभूतपिशाचशाकिनीसर्पव्यालमूषकक्षोभश्चेत्यापद:[2] । एतेभ्यो जनपदा रक्षणीया: । रक्षणस्यापि द्वौ क्रियायौ स्त: - सर्वकार:, पुरोहितश्च । सर्वकार: स्वपक्षतो यथा-सम्भवमेतेषां दमनं कृत्वा जनानां रक्षणं करोति । पुरोहितस्तु शास्त्रोक्त विध्यनुसारमथर्वशास्त्रे बलिहोमपूजापाठजपशान्त्यादीनां विविधानामुपायानां विधानमस्ति । येषामनुष्ठानादसहनीयदु:खदायका अग्न्यादि तत्त्वविशेषा भवन्ति नियन्त्रिता: । यस्तत्त्वविशेष उक्तेषु बल्याद्युपायेषु येनोपायेन नियन्त्रितो भवेत् तं प्रयुज्य तस्य नियमनं विधाय जनान्रक्षति । मानुष्यापत्तु प्रकृतीनामन्येषान्व दुर्व्यसनादापतति । तदेतत्स्वमितरानपि विनाशयति, तस्मात्तस्य निरोधोऽवश्यं कर्तव्य: । निरोधस्तु धर्माचरणयोर्यन्महत्वं तस्योपदेशाद्दण्डनीतेर्नियमाच्च सम्भव:[3] । धर्मस्याचरणस्य च महत्वप्रदर्शनं पुरोहितकार्यम्, येन दुर्व्यसनासक्ता अपि धर्मे प्रवृत्ता भवन्ति । नियमप्रयोगस्तु सर्वकारेण विधीयते । याजनादिधार्मिककृत्येष्वपि पुरोहितोऽपेक्षित: ।

पुरोहितं च कुर्वीत वृणुयादेव चर्त्विज:[4] ।
तेऽस्य गृह्याणि कर्माणि कुर्युर्वैतानिकानि च ।।

गर्भाधानादिभि: संस्कारैर्यथाशास्त्रं संस्कृतानामजितेन्द्रियतया स्वकर्म-

----

(१) का० नी० सा० १३।२० । (२) नीतिवाक्यामृतम् (पुरोहितसमुद्देश:)
(३) का० नी० सा० १३।१६,२१ । (४) मनुस्मृति: ७।७८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

तश्च्युतानां लोकयोर्द्वयोरतिकष्टदायकेषु सुरापानादिनिषिद्धकर्मसु प्रवृत्तानाञ्च यत्प्रायश्चित्तं शास्त्रोदितं विद्यते तत्प्रदानं पुरोहितस्यैव कर्तव्यम्[१]। यदि स पापानुसारं प्रायश्चित्तं नोपदिशति तदा राज्ञा दिनमेकं पुरोहितेन दिनत्रयमुपवासरूपं प्रायश्चित्तं कर्तव्यम्। यदि राजाऽज्ञानतयाऽदण्ड्यं दण्डयति दण्ड्यमदण्डयति तदा पुरोहितेन कृच्छ्राख्यं प्रायश्चित्तं विधेयमित्याह वसिष्ठः[२]। इत्थं प्रायश्चित्तप्रदानाद् यथा कालं यथोचितप्रायश्चित्तानिर्देशाच्च निष्पापौ राजपुरोहितावपि प्रायश्चित्तभाजौ भवतः। अतः पुरोहितेनोचितप्रायश्चित्तनिर्देशो यथासमयमेव कर्तव्यः। विशेषतः पञ्चकल्पानां ज्ञानं सर्वथा विधेयं पुरोहितेन। धार्मिककृत्यविशेषाः पञ्चकल्पाः -

(१) नक्षत्रशान्तिविधानम्, (२) श्रौतयज्ञविधानम्, (३) मन्त्रपाठविधानम्, (४) अथर्वशिरोमन्त्रविधानम्, (५) सर्वविधशान्तिविधानम्। एतत्पञ्चविधं विधानं पूर्णरूपेण यो जानाति स एव पुरोहितपदप्रदानार्हः। यदि पञ्चकल्पविधानज्ञः पुरोहितः स्यात्तदा राज्ये न केऽप्युपद्रवा जायन्ते, सर्वत्र शान्तं वातावरणं समुत्पद्यते, राज्ञो राज्यञ्च स्थिरतां याति। तथा च विष्णुधर्मोत्तरे --

पञ्चकल्पविधानज्ञं वरयेत्तु सुदर्शनम्।
नक्षत्रकल्पो वैतानास्तृतीयः संहिताविधिः॥
चतुर्थः शिरसां कल्पः शान्तिकल्पस्तु पञ्चमः।
पञ्चकल्पविधानज्ञमाचार्यं प्राप्य भूपतिः॥
सर्वोत्पातप्रशान्तात्मा भुनक्ति वसुधां चिरम्[३]।

---

(१) आपस्तम्बधर्मसूत्रम् २।५।१०।१३।

(२) वशिष्ठस्मृतिः १९।४०-४२।

(३) विष्णुधर्मोत्तरम् २।५।३-५ (धर्मशास्त्र का इतिहास २ भा० ६३२ पृ० उद्धृतम्)

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

दूतव्यवस्था -

अन्यदेशस्य वृत्तान्तज्ञानार्थं दूतो नियुज्यते, एषा मन्त्रितुल्य: 'अनासन्नेष्वर्थेषु दूतो मन्त्री'[1] सोऽयं परराष्ट्रं गत्वा तस्य स्थितेर्नीते: शक्ते श्चाध्ययनं कृत्वा तथ्यज्ञानं करोति। तत: स्वानुभवं राज्ञे मन्त्रिणे वा निवेदयति । दूतोक्त-वास्तविकानुभवाधार एव नृपेणापि परराष्ट्रनीतेर्निर्धारणं कर्तव्यम् । व्यवस्थेयम् ऋग्वेदकालादेवागता । ऋग्वेदस्य बहुषु स्थलेषु दूतस्योल्लेखो दृश्यते । तस्मिन्कालेऽग्निर्दूतस्य कार्यं समादधतिस्म[2] । कुक्कुराश्च दूतस्यकार्यं चौरकृतवस्त्वन्वेषणादि कार्यञ्च कुर्वन्ति स्म । राज्ञ इन्द्रस्य राज्यकाले सरमाख्या शुन्यै तस्मिन्नेव कार्ये नियुक्ताऽऽसीत्[3] ।

दूतगुणा: -

परराष्ट्रस्यान्तरिकं बाह्यञ्च गोप्यमप्युदन्तं जानन्ति दूता:, तस्मात्तेषां कार्यं सारपूर्णं विद्यते । कार्यमेतद् गुणसम्पन्नेभ्य: [illegible] सम्पादनीयम् न तु गुणहीनेभ्य:, तस्मात्पदेऽस्मिन् शास्त्रोक्तगुणयुता: पुरुषा नियोक्तव्या: । शास्त्रदर्शिता गुणा: - उच्चकुलोत्पन्न:, सच्चरित:, वक्तृत्वशक्तिसम्पन्न:, स्व-कार्यकुशल:, मधुरभाषी, सत्यवादी, स्मरणशीलश्चैतै: सप्तभिर्गुणैर्युक्तो दूत: कर्तव्य: । तथा च महाभारते --

---

(१) [illegible] नीतिवाक्यामृतम् (दूतसमुद्देश:) ।

(२) ऋग्वेद: १।१२।१, १।१६१।३, ८।४४।३ ।

(३) ऋग्वेद: १०।१०८।२-४ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

कुलीन: शीलसम्पन्नो वाग्मी दक्ष: प्रियंवद: ।
यथोक्तवादी स्मृतिमान् दूत: स्यात्सप्तभिर्गुणै: [1] ।।

एवञ्च मनुस्मृतावपि --

दूतं चैव प्रकुर्वीत सर्वशास्त्रविशारदम् ।
इङ्गिताकारचेष्टज्ञं शुचिं दक्षं कुलोद्गतम् ।।
अनुरक्त: शुचिर्दक्ष: स्मृतिमान्देशकालवित् ।
वपुष्मान्वीतभीर्वाग्मी दूतो राज्ञ: प्रशस्यते [2] ।।

अन्यच्च रामायणेऽपि --

कच्चिज्जानपदो विद्वान्दक्षिण: प्रतिभानवान् [3] ।
यथोक्तवादी दूतस्ते कृतो भरत पण्डित: ।।

दूतभेदा: -

दूतास्त्रिविधा: - निसृष्टार्था:, परिमितार्था:, शासनहराश्चेति । "स च त्रिविधो नि:सृष्टार्थ: परिमितार्थ: शासनहरश्चेति । [4]" (१) देशकालोचितानि राजकार्याणि स्वयमेवकथयितुं क्षमा निसृष्टार्था: । यै: कृतं कार्यं राज्ञापि स्वीकार्यम् । पाण्डवानां दूतो भगवान् कृष्णोनिसृष्टार्थदूतस्य कार्यं सम्पादयति स्म, तेन कृतं कार्यं पाण्डवा: स्वीकुर्वन्ति स्म । "यत्कृतौ स्वामिन: सन्धिविग्रहौ प्रमाणं स नि:सृष्टार्थो यथा कृष्ण पाण्डवानम् [5]", (२) उक्तमात्रं ये परस्मै

---

(१) शान्ति० ८६।२७ । (२) मनुस्मृति: ७।६३-६४ ।
(३) रा० अयोध्याकाण्डम् १००।३५ । (४) नीतिवाक्यामृतम् (दूतसमुद्देश:) । (५) नीतिवाक्यामृतम् (दूतसमुद्देश:) ।

CC-0 Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

निवेदयन्ति ते परिमितार्थाः । (३) शासनहरास्तु राजकीयं पत्रं सन्देशं च वहन्ति उक्तेषु स्थलेषु प्रवर्तन्ति च[1] । भगवतः श्रीरामचन्द्रस्य दूत आसीन्मारुतात्मजो वीरतादिगुणसम्पन्नो हनुमान्, सोऽपि निसृष्टार्थ एवेति वक्तुं शक्यते ।

दूतकार्यम् -

भिन्नानां सन्धिसम्पादनं संहतानां भेदनं प्रतिपक्षनृपस्य तस्य परिजनानान्चेङ्गितकारादीनां ज्ञानं विपक्षनृपकृतानामखिलानामादानप्रदानादिव्यवहाराणां कार्याणान्च रहस्यं ज्ञात्वैव स्वस्या योजनाया निर्माणन्चेत्यादीनि कार्याणि मनुक्तानि[2] । कौटिल्योक्तानि कार्याणियथा --

प्रेषणं सन्धिपालत्वं प्रतापो मित्रसंग्रहः ।
उपजापः सुहृद्भेदो दण्डगूढातिसारणम् ॥
बन्धुरत्नापहरणं चारज्ञानं पराक्रमः ।
समाधिमोक्षो दूतस्य कर्मयोगस्य चाश्रयः[3] ॥

अनयोः श्लोकयोर्भवत्ययमर्थः -- शत्रुभावात्पन्नराज्ञे स्वस्य राज्ञः पत्रसन्देशादिप्रदानम्, स्वस्य देशस्य स्वामितः शत्रोः सन्देशार्पणम्, शत्रुपक्षे सन्धिभावोत्पादनम्, सत्यागते काले स्वपराक्रमप्रदर्शनम्, शत्रुदेशेऽपि मित्रसंख्या वर्धनम्, शत्रोर्हितचिन्तकेषु परस्परं भेदोत्पादनम्, शत्रोर्मित्रेषु भेदभावोत्पादनम्, शत्रुदेशस्थानां स्वसैनिकानां गुप्तचराणान्चापसारणम्, शत्रोर्बान्धवानां रत्नानान्चापहरणम्, शत्रुदेशमुषित्वा

---

(१) मिताक्षरा (याज्ञवल्क्यस्मृतिः १।३२८) ।

(२) मनुस्मृतिः ७।६५-६८ । (३) कौटलीयार्थशास्त्रम् १।१५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

गुप्तचरकार्यनिरीक्षणम्, सत्यावश्यके शत्रुसमक्षं स्वसामर्थ्यप्रदर्शनम्, बन्धितानां राजकुमाराणां बन्धनाद्विमोचनम्, मारणमोहनोच्चाटनादीनां प्रयोगश्चैतानि सर्वाणि दूतकार्याणि ।

सन्दर्भेऽस्मिन् सोमदेवः -- कृत्योपग्रहः कृत्योत्थापनं सुतदायादावरुद्धोपजापः स्वमण्डल प्रविष्टगूढपुरुषपरिज्ञानम् अन्तभूमिपालाटविकसम्बन्धः कोशदेशतन्त्रमित्रावबोधः कन्यारत्नवाहनविनिश्रावणं स्वाभिष्टपुरुषप्रयोगात् परप्रकृतिक्षोभकरणं च दूतकर्म[1] ।

आचार्यैः प्रदर्शितान्येतानि दूतकार्याणि तत्कालोचितानि, यतस्तात्कालिकेष्वधिकराजसु भेदस्य दमनस्य च भावोऽन्तर्हितो दृश्यते । भावनयाऽनया प्रेरितानां राज्ञां परस्परं द्रोहोत्पादनं छलबलादिभिर्विविधैः कूटोपायैः परधनानां जानान्वापहरणं सतिसामर्थ्ये परराज्यमेवोत्पाट्य तस्मिन्स्वस्यस्वामित्वोत्पादनञ्चैतदेवासीन्मूलमुद्देश्यम् । परराष्ट्रप्रेषितोदूतोऽप्यस्यैवोद्देश्यस्य पूर्तिकरः, तस्य कार्याण्यपि तदनुकूलानि विधन्ते । किन्त्विदानीन्तनेषु राजसु भावनैतद्विधा नोदिता, तस्माद् बहवो राजानः स्वशक्त्यनुसारं परस्परं सहयोगमेव (उपकारं) कुर्वन्ति न त्वपकारम् । पुनर्मित्रतां सद्भावनां च वर्धयन्ति । यद्राज्यं मित्रत्वेनावस्थितं तत्रैव दूतो स्थाप्यते । सोऽपि स्वस्य राजस्य परराष्ट्रसम्बन्धे या नीतिस्तदनुकूलतां गच्छति, तस्यकार्यमपि तद्विधमेवार्थान्मित्रताया यः सम्बन्धस्तस्यैव पुष्टिकरम् । इत्थं दूतस्थापनस्योद्देश्यमेव भिन्नं दृश्यते, तस्माचयोः कार्यविषयेपृथक्ता स्वाभाविक्येव ।

---

(१) नीतिवाक्यामृतम् (दूतसमुद्देशः ८) ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

गुप्तचरव्यवस्था -

दूतगुप्तचरयोर्महदन्तरं विद्यते -- दूतो मन्त्रिवत्सम्मानितः । तस्य कृते वेतनादीनि पूर्वमेव निश्चितानि (नियमोक्तानि) यानान्यप्युपलब्धानि । तस्य कार्याण्यपि प्रकाशितान्यर्थात्सर्वं कार्यं प्रकाशरूपेण संपादयति सः । गुप्तचरास्तु न तथाविधाः, गुप्तरूपेण (छद्मवेशेन) इतस्ततो भ्रमन्ति, तेषां कार्यमपि गुप्तत्वान्नकोऽपि जानन्ति । वेतनादिकमपि न नियमितं कार्यस्याधारे पारितोषिकं दीयते तेभ्यः । तेनैव तान् प्रसादितान् विधीयते "तुष्टिदानमेव चाराणां वेतनम्[1]" अस्य लोभादेव ते स्वामिनः कार्येषु धावन्ति शीघ्रमेव साधयन्ति च। कृतमेतैः कार्यं राजकार्यस्य कृतेऽतीवोपयुक्तं सिद्धम् । तस्माद्राजानः कुर्वन्त्येतेषां नियुक्तिम्, नेत्ररूपानेतान्सर्वत्र (स्वदेशे विदेशे च) प्रसारयन्ति, माध्यमेनैवेतेषां दूरस्थमप्यशेषं वृत्तान्तं जानन्ति । कारणेनानेन "चारचक्षुर्महीपतिः[2]", राजानश्चारचक्षुषः[3]", चारैः पश्यन्ति राजानः[4]" इत्याहुः शास्त्रप्रवर्तका अपि । आचार्याणामुक्तिरेषा सर्वथोपयुक्ताऽधुनापि ।

दीपायां रक्षकस्याभावे न कस्यापि रक्षणं सम्भवं धनिकस्य धनमपि न रक्षितं यथा तथैव गुप्तचरहीनस्य राज्ञोऽपि न कुत्रापि मङ्गलम् । अतः सुशासनं कर्तुमिच्छता राज्ञाऽवश्यं गुप्तचरव्यवस्था कर्तव्या । तथा हि नीतिवाक्यामृते -- "किमस्त्ययामिकस्य निशि कुशलम्[5]" ।

---

(१) नीतिवाक्यामृतम् (चारसमुदेशः) । (२) कामन्दकः १२।२८ ।
(३) म०भा० उद्योगपर्वम् ३४।३४ । (४) वि० ध० पुराणम् २।२४।६३ ।
(५) नीतिवाक्यामृतम् (चारसमुदेशः७) ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

गुप्तचरगुणाः -

गुणहीना गुप्तरा यथोक्तकार्यसाधयितुं न क्षमाः, तस्माच्छास्त्रोक्त-गुणसम्पन्ना स्ते भवन्ति नियोक्तव्याः । गुणाश्चैतादृशाः --

> तर्केङ्गितज्ञः स्मृतिमान्मृदुर्लघु परिक्रमः ।
> क्लेशायाससहो दक्षश्चरः स्यात्प्रतिपत्तिमान् [१] ।।

नीतिवाक्यामृतेऽपि --

> अलौल्यममान्यममृषाभाषित्वमभ्यूहकत्वं चेति चारगुणाः ।

अनयोर्द्वयोरर्थः -- इङ्गितकारचेष्टज्ञः, तर्कवित्, स्मरणशीलः, मधुर-भाषी, शौर्यवान्, सहिष्णुः, परिश्रमकर्ता, कार्यकुशलः, प्रत्युत्पन्नमतिः, चान्चल्यहीनः, आलस्यरहितः, वास्तविकार्थवक्ता, शत्रोर्रहस्यविच्चेति गुप्तचरगुणाः ।

गुप्तचरभेदाः कार्याणि च -

असन्चाराः सन्चाराश्चेति गुप्तचरद्विविधाः । (१) कापटिकः, (२) उदास्थितः, (३) गृहपतिकः, (४) वैदेहकः, (५) तापसश्चैते पन्चासन्चाराः । सन्चारकास्तु चतुर्विधाः -- (१) सत्रिः, (२) तीक्ष्णाः, (३) रसदः, (४) भिक्षुकी चेति । तथा हि --

---

(१) कामन्दकः १२।२५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

"कापटिकोदास्थित गृहपतिवैदेहकतापसव्यन्जनान् सत्रितीक्ष्णरसदभिक्षु-कीश्च ।"[१]

कापटिकादि पन्चासन्चारकास्तु पन्चवर्गशब्दवाच्य: । तत्रापिरहस्य वित् प्रगल्भश्छात्र: कपटव्यवहारित्वात्कापटिक: । वृत्यर्थिनमेनं दानमानसत्कारादिभि: प्रसाध राजा रहसि ब्रूयात्, "लोके यस्यासदवृत्तं पश्यसि तत्सर्वं तदानीमेव मयि वक्तव्यमिति" । तदनुरूपमेव स्वकार्यं सम्पादयति स: । प्रव्रज्यारूढ: प्रज्ञाशौचयुक्त उदास्थित:, वृत्यर्थिनमेनं बहूत्पत्तिकमठे स्थाप्यते, प्रचुरसस्योत्पत्तिकं भूम्यन्तरं चास्मै दीयते । मठाधीशपदस्थोऽयममात्यादीनामुच्चपदाधिकारिणामन्येषां कर्मचारिणां सर्वसाधारणानां जनानान्च यद्दुर्वृत्तं भवेत्तत्सर्वं गुप्तरूपेण ज्ञात्वा राज्ञे निवेदयति । अन्येभ्य: प्रव्रज्याप्रत्यवसितेभ्यो गुप्तचरकार्योत्सुकेभ्यश्छात्रेभ्यश्च मठस्यायप्रतिसोऽर्थवस्त्रान्नावासादिकं वृत्तिविशेषं दत्त्वा कार्येऽस्मिन्नेव प्रवर्तयति । क्षीणवृत्ति: कर्षक: प्रज्ञाशौचयुक्तो गृहपतिकाख्यो गुप्तचर: । कृष्युपयुक्तां भूमिं कर्षणार्थं दीयतेऽस्मै, अयमप्युदास्थितेनैव कार्यसम्पन्नं करोति । प्रज्ञाशौचयुक्त: क्षीणवृत्तिर्वाणिजको वैदेहक: । तमपि पूर्ववदुक्त्वा धनमानाभ्यामात्मीयं कृत्वा वणिक्कर्मप्रदिष्टायां भूमौ वाणिज्यं कारयेद्राजा । जटिलो मुण्डो वा वृत्तिकाम-स्तापसाख्यो गुप्तचर: । एषप्रभूतैर्मुण्डैर्जटिलैर्वाऽन्तेवासिभि: सह पुरसमीपं निवसति । गृहपतिवैदेहकस्वानुचरा: कुर्वन्त्यस्य काल्पनिकी पूजोपासनं सर्वत्र कृत्रिमगुण प्रचारन्च-अलौकिकशक्ति संपन्नोऽयं तापसो भविष्यत्फलं कथयतीति । तत: स्वस्य भविष्यत्फलज्ञानार्थमागच्छन्ति तत्र बहवो जना: । आगतानां

---

(१) कौटलीयार्थशास्त्रम् १।१० ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

तेषामाकारप्रकारहबिभिः शिष्यसङ्केतादिभिश्चायव्ययसुखदुःखराजसम्मानादिकं तेषां सर्वं फलं कथयति, तदेव तेषां राजकार्यविषयकं मनोविचारं विदित्वा राज्ञे निवेदयति । राजाप्यस्यौचित्यनुरूपं कस्मैचिद्दानमानादिकं कस्मैचित् दण्डं च प्रयच्छति । इत्थमेव ते पञ्चविधा अचरा गुप्तचराः स्व स्व कार्यं सम्पादयन्ति ।

(१) ये सामुद्रिकविद्यायामङ्गविद्यायां च निपुणाः, वशीकरणेन्द्रजालविदः, धर्मशकुनपक्षिकामविषये यच्छास्त्रं विद्यते तच्छास्त्रज्ञाः, तथा तत्सम्बद्धेषु नृत्यगीतादिष्वपि कुशलाः सन्ति ते सत्रिणः । एते इतस्ततो गत्वा स्वविषयं प्रदर्शयन्ति, तदवलोकनार्थं भवन्ति बहवो जना एकत्रिताः, तदेव ते स्वस्वोद्देश्यानुरूपं जनानां स्थितिं गतिं च विदित्वा राज्ञः सन्निधौ वास्तविकमनुभवमुपस्थापयन्ति । एतत्कार्यप्रवृत्ताः सर्वे राजकोशादेव वृत्तिमाप्नुवन्ति ।

(२) धनलोभेन स्वशरीरस्योपेक्षां कृत्वापि व्याघ्रभल्लूकादीनां हिंस्रजन्तूनां व्यालादीनां विषधराणामभिमुखा भवन्ति तैः सह भीषणं सङ्घर्षं कुर्वन्ति ये ते तीक्ष्णाः ।

(३) ये बान्धवपरिजनादिष्वपि निःस्नेहा क्रूरस्वभावा अलसाश्च सन्ति ते रसदा इत्युच्यन्ते ।

(४) याः स्त्रियः प्रौढा निर्धना विधवा प्रागल्भाश्च सन्ति ताः परिव्राजिकाः । एता जीवननिर्वाहार्थं परिव्राजिकायाः कृत्रिमं वेशमादाय इतस्ततो भ्रमन्ति राजद्वारेऽमात्यानामावासेष्वपि प्रवेशमाप्नुवन्ति, राजप्रदत्तार्थान्न-

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

वस्त्रादिभिर्जीवनं यापयन्ति ।

एते चतुर्विधा गुप्तचराः सञ्चाराः, तस्मात्तत्र सञ्चरणं कृत्वैव जनानां मनोविचारस्य कुर्वन्ति यथार्थज्ञानम् । तद्राज्ञे निवेदयन्ति । इत्थं नवविधानागुप्तचराणां व्यवस्थापनं विधाय माध्यमेनैवैतेषां निखिलां लोकप्रवृत्तिं जानाति, ततः स्वकार्यक्रमं विचारयति राजा । इत्थं गुप्तचरभेदान् कार्याणि चोपस्थापयति कौटिल्यः । सोमदेवस्तु गुप्तचरस्ये - कोनत्रिंशद्विधान् भेदान् तेषां कार्याणि प्रदर्शयति --

"कापटिकोदास्थितिकगृहपतिकवैदेहिकतापसकितवकिरातयमपट्टिकाहितुण्डिकशौण्डिकशोभिकपाटच्चरविटविदूषकपीठमर्दकनटनर्तकगायकवादकवाग्जीवकगणकशाकुनिकभिषगैन्द्रजालिकनैमित्तिकसूदारालिकसंवाहिकतीक्ष्णक्रूररसदजडमूकबधिरान्धच्छद्मावस्थायियायिभेदेनावसर्पवर्गः"[1] ।

कौटिल्यस्तूक्तरीत्या गुप्तचराणां भेदद्वयं प्रतिपादयति, किन्तु नीतिवाक्यामृते सोमदेवस्त्वेतद्विधं भेदं न तु दर्शयति, चर इति कथनेन सर्वे गुप्तचराः सञ्चारा एवेत्याह । सदसच्च सर्वं लोकवृत्तान्तं सञ्चारणेनैव ज्ञायते । लोकघटितानां सर्वासां घटनानां लोकोपस्थितानामखिलानां समस्यानां लोककृतानां सदसत्कार्याणां व्यवहाराणाञ्च यथार्थविवरणोपस्थापनार्थं नियुक्ता एतेषामेव कार्याणां कृते पालिताः पोषिताश्च गुप्तचरा उक्तविषये यान्निवेदयन्ति तस्य परीक्षणञ्चानिवार्यम् ।

---

(१) नीतिवाक्यामृतम् (चारसमुद्देशः) ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

पञ्चसंस्था -

अस्याः संघटनं कार्यमुद्दिश्यन्वाप्रकाशितमर्थाद्गुप्तमेव । अस्याः कार्यस्य कर्तव्यस्योद्देश्यस्य च निर्धारको राजैव । अस्यां कापटिकादयः पञ्चासञ्चारा नियुज्यन्ते । एतेषां पञ्चानां समुदय एव पञ्चसंस्थेति शब्देन व्यवह्रीयते । राज्ञा धनमानादिभिः सम्मानितेषा संस्था गुप्तचरामात्यादीनां राजप्रदवृत्तिग्राहकाणां यद्यत्कार्यं प्रदिष्टं तदवलोकयति । तथा हि कौटलीयार्थशास्त्रे --

पूजिताश्चार्थमानाभ्यां राज्ञा राजोपजीविनाम् ।
जानीयुः शौचमित्येताः पञ्चसंस्था प्रकीर्तिताः ॥

गुप्तचरादीनां वृत्त्युपजीविनां कार्यकलापपरीक्षणात् शुभमशुभं वा यन्निश्चयति तदनुसारं सत्कार्यकर्तारः प्रशंसिताः प्रोत्साहिताः पुरस्कृता असत्कार्यप्रवृत्तास्तु दण्डिता उत्सारिताश्च भवन्ति ।

उपर्युक्ता गुप्तचरा राजकोशाद् वृत्तिमादायोच्चान्निम्नान्तानां समस्तानां राजकर्मचारिणां कार्यवृत्तं पश्यन्ति । अतः परं समाहर्तादिभि रुच्चपदाधिकारिभिर्नियुक्ता गुप्तचरा विविच्यन्ते, ये जनपदानां वृत्तं विचारयन्ति । जनपदरक्षणोद्देश्येनाशेषं जनपदं चतुर्धा विभज्य प्रत्येकं भागे गृहपतिवैदेहकतापसाख्यान् त्रिविधान् गुप्तचरान् स्थापयन्त्युच्चाधिकारिणः । ते च स्वस्व क्षेत्रं परिभ्रम्य गृहस्था गृहस्थानां वैदेहका वैदेहकानां तापसाः कर्षकगोरक्षकाणां धार्मिकाणाञ्च सर्वं वृत्तमवलोकयन्ति ।

---

(१) कौटलीयार्थशास्त्रम् १।१० ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

कौ गृहस्थ: किं कार्यं करोति, कुत्र गच्छति, कै: सह सम्पर्कं स्थापयति, धनधान्यपशु-पौत्रादिकं कियदस्ति तस्य, आयोव्ययश्च कीदृश: गृहे के कीदृशाश्च जना आगच्छन्ति, परिवारा: किं किं कुर्वन्तीत्यादिकं सर्वं ज्ञानं गुप्तरूपेण कुर्युर्गृहस्था गुप्तचरा: । प्रकारेणानेनैव वैदेहकास्तापसाश्च स्वं स्वं कार्यमवलोकयेयु: । पुनर्मठमन्दिरचतुष्पथो-दपानसार्वजनिकस्थलतडागतीर्थस्थलाश्रमारण्यशैलादिष्वपि तापसा गुप्तचरा एव भ्रमन्त्येतेषु स्थलेषु घटिताया घटनाया: समुत्पन्नाया: समस्याया जनताभि: कृतस्य शुभाशुभकार्यस्य व्यवहारस्य च तथ्यज्ञानं चोत्पादयन्ति । इत्थं राज्यव्यवस्थां सर्वत्र गुप्तचररूपं जालं प्रसारयेत् । इदमेवमतं समर्थयति महाभारतकारोऽपि --

चारांश्च विद्यात्प्रहितान्परेण भरतर्षभ ।
आपणेषु विहारेषु समवायेषु भिक्षुषु ।।
आरामेषु तथोद्याने पण्डितानां समागमे ।
वेशेषु चत्वरे चैव सभास्वावसथेषु च[१] ।।

प्राचीनयुगे मन्वादिभिर्मुनिभि: परिकल्पितैषा गुप्तचरव्यवस्थेदानीमपि विश्वप्रचलिताऽस्ति ।

---

(१) शान्ति० ६९।११-१२ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

तृतीयपरिच्छेद:

मित्रामित्रादीनां सन्ध्यादीनाञ्च विचार:

मित्रस्वरूपम्

राज्यस्य सप्ताङ्गानि प्रसिद्धानि, तेषु मित्रमेकं महत्त्वपूर्णमङ्गम्, तस्याभावे राज्यं विकलाङ्गं सिद्धम्, अङ्गहीनराज्यस्य दशाऽबला, तस्मात्पर-रुपेक्षिता दमनीया च, तस्माद्राज्यं सर्वाङ्गपूर्णं विधातव्यम् । एतदर्थं यत्नतो मित्रप्राप्तिं वृद्धिञ्च, कुर्यान्नृजित्याहु: शास्त्र प्रयोजका: । य: सम्पत्ताविव विपद्यपि सहयोगं स्नेहभावञ्च न त्यजति तन्मित्रम् । सुखशक्त्यादिदायकानां सुवर्णादिरत्नानां भूम्यादीनाञ्च लाभेन तथा राजा न वृद्धिमेति यथा दुर्बलमप्यागामिकाले बृद्धियुतं स्थिरं मित्रं लब्ध्वा वर्धते । तथा हि मनु: --

हिरण्यभूमिसम्प्राप्त्या पार्थिवो न तथैधते ।
यथा मित्रं ध्रुवं लब्ध्वा कृशमप्यायतिक्षमम् ॥[1]

याज्ञवल्क्येनाप्येतदेवमतं स्वीकृतमस्ति यथा -- शक्तिवर्धकतत्त्व प्राप्त्यै परराष्ट्रमुच्छेत्तव्यम् । प्राप्तिश्च त्रिविधा: -- (१) सुवर्णप्राप्ति:, (२) भूप्राप्ति:,

---

(१) मनुस्मृति: ७।२०८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

(३) मित्रप्राप्तिश्चेति । एतासु मित्रप्राप्तिरेव श्रेष्ठतरा, अतस्तत्प्राप्त्युपाये यत्नः कर्तव्यः । वचनञ्च यथा --

हिरण्यभूमिलाभेभ्यो मित्रलब्धिर्वरा यतः ।
अतो यतेत तत्प्राप्त्यै रक्षेत्सत्यं समाहितः[1] ।।

सुवर्णादिद्रव्यं भूमिर्मित्रञ्चेते त्रयो विषया राज्ञो राज्यस्य चाभ्युदयस्य प्रमुखकारणविशेषाः, अत एतेषां कृते सततं प्रयासो विधेयः, नानाविधा उपायाश्च शोचनीया राज्ञेत्याहुर्मनुयाज्ञवल्क्याभ्यामितरे शास्त्रकाराः । किन्तु तौ तु सुवर्ण-भूमिलाभान्मित्रलाभ एव श्रेयस्करः, अर्थाद्राज्यव्यवस्थायां सुवर्णभूम्योरपेक्षया सुहृद एवाधिकं महत्त्वं विद्यते, राज्यस्य सबलाङ्गत्वात् संकटकालेऽपि पूर्णसहयोग-प्रदायकत्वाच्चेति वदतः । किन्तु कौटिल्यस्त्वेतद्विषये तयोर्मतं न समर्थयत्यर्था-त्सुवर्णभूम्योरधिकं महत्त्वं प्रतिपादयति, यथा --

"मित्रहिरण्यभूमिलाभानामुत्तरोत्तरोलाभः श्रेयान्, मित्रहिरण्ये हि भूमिलाभाद् भवतः, मित्रं हिरण्यलाभात्[2] ।"

अस्यायं भावः -- राज्ये भूमिरेव सर्वाधिकं महत्त्वं प्रतिपादयति, यतोऽस्या अभावे न राज्यं नाम राज्योत्पत्तिराधारैव । प्रधानं राज्यमेव नास्ति-चेत्प्रधानस्य सहायकरूपाणां मित्राद्यङ्गानां किं प्रयोजनम् । तस्मात्प्रथमं भूमिलाभ एव कर्तव्यः । ततः सुवर्णलाभः, तदनन्तरमेव मित्रलाभो विधेयः । मित्रहिरण्ये तु भूमिलाभात्स्वतो लभ्येते ।

---

(१) याज्ञवल्क्यस्मृतिः १।३५२ । (२) कौटलीयार्थशास्त्रम् ७।९ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

इत्थं केचिन्मित्रस्याधिकं महत्वं प्रदर्शयन्ति चेत्केचित्तु भूमेः । वस्तुतस्तु सप्ताङ्गानां योगेनैव राज्यमित्येतन्नाम सिद्धयति । एतेषामङ्गानामेकत्रिता शक्तिरेव राज्यशक्तिः, अस्याः सक्रियतायामेव हिरण्यभूम्यादयो विषया भवन्त्युपलब्धाः । मित्राद्यङ्गहीन राज्यस्य गतिस्तादृश्येव यथा हस्तपादाद्यङ्गहीनमानुषस्य भवेद् । तस्मात्प्रथमं मित्राद्यङ्गविशेषा एव सबलाः कर्तव्याः । शत्रुमित्रे न जन्मना सिद्धे ते तु शक्तिविशेषादेव निष्पद्येते । तथा हि महाभारते शान्तिपर्वणि --

नास्तिजात्या रिपुर्नाम मित्रं नाम न विद्यते ।
सामर्थ्ययोगाज्जायन्ते मित्राणि रिपवस्तथा[1] ।।

न कश्चिन्कस्यचिन्मित्रं न कश्चित्कस्यचिच्छत्रुश्च, मित्राणि शत्रवस्तु धनात्क्रियाकलापादर्थात्कारणवशादुत्पद्यन्ते । तथा हि कामन्दकः --

कारणेनैव जायन्ते मित्राणि रिपवस्तथा[2] ।

स्वभावतो राजा न कस्यापि मित्रं भवितुं शक्नोति, राज्ञो मित्रमपि न कोऽपि विद्यते, तस्मान्मित्रन्तु सत्कर्मयोगादेवोत्पादनं विधेयं राज्ञा । उक्तञ्च --

न राज्ञो विद्यते मित्रं राजा मित्रं न कस्य वै[3] ।

शास्त्रकाराणामेताभिरुक्तिभिरिदं ज्ञायते -- मित्रन्तु न कस्यापि स्वतः सिद्धमपितु कार्यविशेषादेवोपार्जनं कर्तव्यम् । कृत्रिममित्रविषये नियमोऽयं सार्थकः ।

---

(१) शान्ति० १३८।५१ । (२) का० नी० सा० ८।५२ ।

(३) शुक्रनीतिः ४।१।६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

मित्रभेदाः -

सहार्थः, भजमानः, सहजः कृत्रिमश्चेति भेदात्सुहृदश्चतुर्विधाः । (१) यः सहैव गच्छति सह वसति शत्रुदमनादौ मिलित्वैव सहयोगादिकं करोति स सहार्थः, (२) पितृपितामहादिभ्यः क्रमेणागतो भजमानः, (३) सहजो मातृपितृष्वस्रीयः (येन सह जन्मनो घनिष्ठसम्बन्धो विद्यते), (४) धनादिकं दत्त्वोपार्जितः कृत्रिमः । तथैव प्रोक्तं महाभारते शान्तिपर्वणि --

चतुर्विधानि मित्राणि राज्ञां राजन्भवन्त्युत ।
सहार्थो भजमानश्च सहजः कृत्रिमस्तथा[1] ।।

अन्यदेकं पञ्चमं मित्रमपि वर्णितमस्ति महाभारत एव, यन्न कमपि पक्षं समर्थयति यत्र धर्मो वर्तते तत्रैव तस्य गति एत मध्यस्थतामङ्गीकरोति ।

धर्मात्मा पञ्चमं मित्रं स तु नैकस्य न द्वयोः[2] ।
यतो धर्मस्ततो वास्यान्मध्यस्थो वा ततो भवेत् ।।

नीतिवाक्यामृते तु त्रिविधानां मित्राणामुल्लेखोऽस्ति यथा -- "यः कारणमन्तरेण रक्ष्यो रक्षको वा भवति तन्नित्यं मित्रम्, तत्सहजं मित्रं यत् पूर्वपुरुषपरम्परायातः सम्बन्धः, यद्वृत्तिजीवितहेतोराश्रितं तत् कृत्रिमं मित्रम्[3] ।" केचित्तु सहजकृत्रिमप्राकृताभिधानि त्रिविधानि मित्राणि प्रदर्शयन्ति । सहजं मित्रं

---

(१) शान्तिपर्व ८१।३ । (२) शान्तिपर्व ८१।४ ।

(३) नीतिवाक्यामृतम्, मित्रसमुद्देशः ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

भागिनेयपितृष्वस्रीयमातृष्वस्रीयादि । कृत्रिमं मित्रं येनोपकृतं यस्य चोपकृतम् । प्राकृतं मित्रमेकान्तरितदेशाधिपतिः । मित्रं पुनर्द्विविधम् -- बृंहणीयं कर्शनीयञ्च । कोशबलहीनं बृंहणीयम् । कोशबलाधिकं कर्शनीयम् ।

इत्थं केचित् त्रिविधानि केचित्तु चतुर्विधानि मित्राण्युपस्थापयन्ति । पुनर्भेदेष्वपि समानत्वं नोपलब्धम् । तस्माच्छास्त्रकारेष्वपि नत्वैकमत्यम् । वस्तुतस्तु मित्रं त्रिविधमेव, त्रिविधेष्वपि सहजकृत्रिमप्राकृतान्येव बहुमान्यानि । राजमण्डलेऽप्येतेषां त्रयाणामेव स्थानं विद्यते । पुनः केचिन्मित्रभेदमेव न स्वीकुर्वन्ति, तेषां मते मित्रं केवलमेकविधम्, यः सम्पत्तौ विपत्तौ चैकरूपतां दर्शयति तदेव वास्तविकं मित्रम्, तन्नानेकविधम् ।

मित्रगुणाः -

सहजं प्राकृतं कृत्रिमञ्चेति मित्रं त्रिविधम् । बहुमान्योऽयं भेदः प्रागेवोपस्थापितः । मित्रेष्वेतेषु सहजप्राकृते स्वभावसिद्धे, तस्मादेतयोर्गुणा नोक्ताः । कृत्रिमन्तूपार्जितम्, उपार्जन काले गुणस्यापि विचारो विधेयः । यतः शास्त्रोक्तगुणयुतेभ्यो मित्रेभ्य ईप्सितं फलं लभ्यते, धर्मार्थकामाख्याः पुरुषार्था अपि सिद्ध्यन्ति, अतो गुणसम्पन्नानामेवोपार्जनं कर्तव्यमित्याहुराचार्याः । गुणाश्च यथा--

"व्यसनेषूपस्थानमर्थेष्वविकल्पः,[1] स्त्रीषु परमं शौचं कोपप्रसादविषये वाऽप्रतिपक्षत्वमिति मित्रगुणाः ।"

---

(१) नीतिवाक्यामृतम् मित्रसमुद्देशः ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

कामन्दकोऽपि --

शुचिता त्यागिता शौर्यं समानसुखदु:खिता ।
अनुरागश्च दाक्ष्यञ्च सत्यता च सुहृद्गुणा:[1] ।।

द्वयोर्भाव: -- सम्पदीव विपद्यपि सहयोगकर्ता, द्रव्येष्वलोलुप:, स्त्रीष्वनासक्त:, क्रोधानलेऽपि शान्तोऽनुकूलश्च, विशुद्धात्मा विषयविरक्त:, शूर:, सुखदु:खयो: समान:, सदैव प्रेमभावयुक्त:, कार्यकुशल:, सत्यनिष्ठश्चेतद्विधगुणयुत: सुहृदुत्पादनार्ह: । एतादृशं मित्रमुत्पादयति य: स परैरमर्दनीय: पुनस्त्रिवर्गादिकमनश्वरं फलन्चाप्नोति "त्रिवर्गनिष्पत्तिमुपैति शाश्वतीम्"[2] इत्युक्तत्वात् । यस्मिन्नत्रोक्ता गुणा, नान्तर्हिता न तन्मित्रं तस्मात्तस्य विश्वासो न कदापि कर्तव्य: "यस्मिन्नेतन्न तन्मित्रं तत्रात्मानं न नि:क्षिपेत्"[3] ।

अर्थलोलुपता, स्वार्थान्धता, विपद्यसहायता, मित्रस्यामित्रेण सहव्यवहार:, कपटपूर्णव्यवहार:, अविनम्रता चेते मित्रदोषा: एतद्दोषैर्युतं मित्रं सर्वथा त्याज्यम् । तथैव प्रोक्तं नीतिवाक्यामृते -- "दानेन प्रणय:, स्वार्थपरत्वं, विपदुपेक्षणम्, अहितसम्प्रयोग:, विप्रलम्भनगर्भप्रश्रयश्चेति मित्रदोषा:"[4] ।

मित्रताया: य: सम्बन्धस्तस्य विच्छेदोऽपि सम्भव:, तत्तु दुर्गुणावलम्बनाद् भवति । दुर्गुणाश्च यथा -- मित्रस्य स्त्रिया सह समागम:, मित्रेण सह विवाद:, मुहुर्मुहुरर्थादियाचनम्, मित्रस्योपेक्षा, धनादानप्रदानव्यवहार:

---

(१) कामन्दकीयनीतिसार: ४।७५ । (२) का० नी० सा० ४।७७ ।
(३) कामन्दकीयनीतिसार: ४।७६ ।
(४) नीतिवाक्यामृतम् (मित्रसमुद्देश:) ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

परोक्षे मित्रदोषकथनम्, पशून्यीकर्णनिन्चेते दुर्गुणा मैत्रीभेदकराः[1]। एतान् यत्नतस्त्यक्त्वा मैत्रीभावे चिरस्थायित्वं कल्पनीयम्, मित्रतायाः सम्बन्धः सुखदः सुसंहतश्च कर्तव्यः। अस्य कृते मित्रयोः परस्परं तथाविधोभावो नितरामपेक्षितः, नीरक्षीरयोर्मित्रताया यथाविधो भावो विद्यते। नीरक्षीरयोः-मित्रतायाः सम्बन्धं प्रदर्शयति सोमदेवः -- "न हि क्षीरात्परं महदस्ति, यत्संगतिमात्रेण करोति नीरमात्मसमम्, न नीरात्परं महदस्ति यन्मिलितमेव संवर्धयति रक्षति च स्वक्षयेण क्षीरम्[2]" इति।

शत्रोर्लक्षणं भेदाश्च -

शत्रुर्मित्रमुदासीनश्चेता राजमण्डलस्य प्रमुखाः प्रकृतयः। मित्रस्य स्वरूपादिकमुपर्युक्तम्। अतः परं शत्रोर्लक्षणादि विषया निगद्यन्ते। यो मित्रमपकृत्य तस्य प्रतिकूलतामेति स एव शत्रुः। तथा हि नीतिवाक्यामृते -- "य एव स्वस्याहितानुष्ठानेन प्रातिकूल्यमियर्ति स एवारिः[3]"। सोऽपि त्रिविधः -- सहजकृत्रिमप्राकृतश्चेति भेदात्। तत्र सहजोऽरिः - सापत्न्यपितृव्य तत्पुत्रादि। कृत्रिमोऽरिः - अपकारादुत्पन्नः। प्राकृतस्त्वनन्तरदेशाधिपतिः। अरिः पुनश्चतुर्विधः - यातव्योच्छेत्तव्यपीडनीयकर्शनीय भेदेन। स्वदेशानन्तरदेशाधिपतिर्यदि व्यसनासक्तो निर्बलो विरक्तप्रकृतिश्च भवेत्तदा स यातव्यः। यदि विदुर्गो मित्रहीनो दुर्बलश्च स्यात्तो-

---

(१) नीतिवाक्यामृतम् (मित्रसमुद्देशः)।

(२) नीतिवाक्यामृतम् (मित्रसमुद्देशः)। (३) नीतिवाक्यामृतम् (षाड्गुण्यसमुद्देशः)

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

च्छेत्तव्यः । मन्त्रबलहीनः पीडनीयः । प्रबलमन्त्रबलयुक्तः कर्शनीयः, निर्मूलनात्समुच्छेदं पीडनं बलनिग्रहम् । कर्शनं तु पुनः प्राहुः कोशदण्डापकर्षणात्[1] शत्रुर्यदिगुणसम्पन्नो भवेत्तदा स दुरुच्छेद इति वदन्ति पण्डिताः । शत्रोर्गुणविषये मनुस्मृतौ मनुः --

प्राज्ञं कुलीनं शूरं च दक्षं दातारमेव च ।
कृतज्ञं धृतिमन्तं च कष्टमाहुररिं बुधाः[2] ॥

शत्रुर्यदि तद्विधगुणसंयुक्तः स्यात्तदा सोऽतिविदुःखदायकस्तस्मादनेन सह यत्नतः सन्धातव्यम्, नोचेद्विनाशावस्थां प्रापयत्येषः ।

उदासीनलक्षणं भेदाश्च -

लक्षणञ्च नीतिवाक्यामृते -- "अग्रतः पृष्ठतः कोणे वा सन्निकृष्टे वा मण्डले स्थितो मध्यमादीनां विग्रहीतानां निग्रहे संहितानामनुग्रहे समर्थोऽपि केनचित् कारणेनान्यस्मिन् भूपतौ विजिगीषुमाणे य उदास्ते स उदासीनः[3]" ।

सहजकृत्रिमप्राकृतश्चेति भेदेन सोऽपि त्रिविधः । सहजकृत्रिममित्रशत्रुलक्षणरहितौ सहजकृत्रिमोदासीनौ । द्वयन्तरितदेशाधिपतिः प्राकृतोदासीनः । अस्य गुणान्प्रदर्शयति मनुः --

आर्यता पुरुषज्ञानं शौर्यं करुणवेदिता ।
स्थौललक्ष्यं च सततमुदासीनगुणोदयः[4] ॥

---

(१) मिताक्षरा (या०व०स्मृ० १।३४५) । (२) मनुस्मृतिः ७।२१० ।
(३) नीतिवाक्यामृतम् (षाड्गुण्यसमुद्देशः) । (४) मनुस्मृतिः ७।२११ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अस्यार्थः - सम्माननीयत्वं पुरुषविशेषज्ञता पराक्रमत्वं दयालुत्वं बहुप्रदत्वञ्च "स्युर्वदान्यस्थूललक्ष्यदानशौण्डा बहुप्रदे"[1] इत्यमरः । एते उदासीन-गुणसामग्रीविशेषाः । एवं विधगुणसंयुतमुदासीनमाश्रित्यारिणा सह योद्धव्यम् । प्राकृतोदासीनस्तु प्रकृतिभ्यो बलवत्तरः, अरिविजिगीषुमध्यमानां सन्धौ सन्धिं विग्रहे विग्रहमेव समर्थयति । प्रकारेणानेन मित्रामित्रोदासीनाः सन्ति शास्त्रवर्णिताः । एतेषां मण्डलविषयोऽपि विचारितोऽस्ति विद्वद्भिः ।

शत्रुमित्रादीनां महीपालानां मण्डलम् -

भूपतीनां मण्डलविषये स्वं स्वं चिन्तनं प्रस्तुवन्ति विद्वांसः । किन्त्व-धिकतराणां विचारस्तु सादृश्यं जनयति । विशेषतो मनुयाज्ञवल्क्याभ्यां यन्मतमुपस्था-पितं तदेव समर्थयन्ति भूयिष्ठाः । अत्र प्रथमं याज्ञवल्क्यमतं प्रस्तूयते --

अरिमित्रमुदासीनोऽनन्तरस्तत्परः परः ।
क्रमशो मण्डलं चिन्त्यं सामादिभिरुपक्रमैः[2] ।।

अस्यायमर्थः -- अरिर्मित्रमुदासीनश्चैते उपर्युक्ताः । अनन्तरस्तत्परः परः -- अनन्तरः प्राकृतोऽरिः, तत्परः प्राकृतं मित्रम्, तस्माच्चपरः प्राकृत उदासीनः । एवमनन्तरः सहजोऽरिः, तत्परः सहजं मित्रम्, तस्माच्च परः सहज उदासीनः । तथा चानन्तरः कृत्रिमोऽरिः, तत्परः कृत्रिमं मित्रम्, तस्माच्च परः कृत्रिम उदासीनः । इत्थमेते राजानः पूर्वादिक्रमेण निवसन्ति, मण्डलमेकमुत्पादयन्ति । मण्डलस्थाना-

---

(१) अमरकोशः ३।१।६ । (२) याज्ञवल्क्यस्मृतिः १।३४५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

मेतेषां चेष्टा यत्नतो ज्ञातव्या, ज्ञात्वा च सामदानादिभिरुपायैरनुसन्धेया । एवं परतः पृष्ठतः पार्श्वतश्च त्र्य त्र्य आत्मा चैक इति त्रयोदशराजकमिदं पद्माकारं राजमण्डलम् । पार्ष्णिग्राहाक्रन्दादयस्त्वरि मित्रोदासीनेष्वेवान्तर्भवन्ति तस्मादेतेषां पृथङ्निर्देशो व न त्वावश्यक इत्युक्तं योगीश्वरेण याज्ञवल्क्येन । अनेनोक्तमेतन्मण्डलं निर्दिष्टचक्रद्वारा स्पष्टीक्रियते । राजमण्डलचक्रञ्च --

पू०

प्राकृत उदासीनः (४)

प्राकृतं मित्रम् (३)

प्राकृतोऽरिः (२)

उ०	सहज उदासीनः (१३)	सहजं मित्रम् (१२)	सहजोऽरिः (११)	विजिगीषुः (१)	सहजोऽरिः (५)	सहजं मित्रम् (६)	सहज उदासीनः (७)	द०

कृत्रिमोऽरिः (८)

कृत्रिमं मित्रम् (९)

कृत्रिम उदासीनः (१०)

प०

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

राजमण्डलविषये स्वस्य स्वतन्त्रं विचारं समुपस्थापयत्याचार्यो मनुः । सोऽयं द्वादशानां भूपालानामेकं विशिष्टं मण्डलं कल्पयन्ति । मण्डलितेषु राजसु विजिगीषुमध्यमा । उदासीनानां चतुर्णां राज्ञां विद्यते प्रमुखं स्थानम्, तेष्वपि विजिगीषुरेव महत्वपूर्णां भूमिकां निर्वहति । यः प्रज्ञोत्साहगुणप्रकृतिसमर्थः, अमात्यदेशदुर्गकोशदण्डाख्याः पञ्चप्रकृतयः प्रसिद्धाः, एताभिश्च सम्पन्नः स्यात् स विजिगीषुः । अस्य चतुर्दिगवस्थायिनो मण्डलीभूता भूम्यनन्तरा राजानोऽरिरूपा जायन्ते । तदनन्तरास्तु मित्ररूपाः । इत्थं विजिगीषोः पुरस्तात् क्रमशः शत्रु-र्मित्रं शत्रुमित्रं मित्रमित्रं शत्रुमित्रमित्रञ्चेते पञ्चराजानो भवन्ति मण्डलिताः । एवमेव पश्चात्क्रमेण पार्ष्णिग्राह आक्रन्दः पार्ष्णिग्राहासार आक्रन्दासारश्चेते चत्वारो भूपाला मण्डलं कृत्वा निवसन्ति । विजिगीषोर्भूम्यनन्तरा राजानो विशेषतः पितृव्यपुत्रादय एव, ते तु स्वभावतः शत्रुभावमाकलयन्ति । शत्रुराज्यतः पराराजानो मातृपितृष्वस्रीया एव एते तु स्वभावेनैव जायन्ते सुहृदः । अरिविजिगीष्वोः सन्धौ सन्धिं विग्रहे विग्रहमेव स्वीकरोति यः स मध्यमः कथितः । पुनरेष, शत्रुविजिगीषो-र्भूम्यनन्तरं तिष्ठति मध्यस्थतामङ्गीकरोति ।

"उदासीनवदनियतमण्डलोऽपरभूपापेक्षया समधिकबलोऽपि कुतश्चित्कारणा-दन्यास्मिन् नृपतौ विजिगीषुमाणो यो मध्यस्थभावमवलम्बते स मध्यमः ।"[1]

उदासीनस्तु "अरेरनन्तरं मित्रमुदासीनं तयोः परम्"[2] इत्युक्त्वा दरि-मित्राभ्यां परस्तिष्ठति । सोमदेवस्तु मण्डले यत्रकुत्रस्थोऽपि भवितुं शक्नोतीत्याह,

---

(१) नीतिवाक्यामृतम् (षाड्गुण्यसमुद्देशः) ।

(२) मनुस्मृतिः ७।१५८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अग्रतः पृष्ठतः कोणे वा सन्निकृष्टे वा मण्डले स्थितो - - - - उदासीनः[1] ।
वस्तुतस्तु तस्यस्थानमरिविजिगीषोरनन्तरमेवोपयुक्तं दृश्यते ।

अनया रीत्या मध्यवर्तिनां विजिगीषुमध्यमादीनां चतुर्णामग्रवर्तिनां मित्रादीनां चतुर्णां पृष्ठवर्तिनां पार्ष्णिग्राहादीनां चतुर्णान्चाथद्द्वादशविधानां राज्ञामेकं मण्डलं निष्पद्यते । उक्तञ्च --

एताः प्रकृतयो मूलं मण्डलस्य समासतः ।
अष्टौ चान्याः समाख्याता द्वादशैव तु ताः स्मृताः ॥[2]

विजिगीषुः, मध्यमः उदासीनः, शत्रुश्चैते चत्वारः स्वतन्त्रा मण्डल प्रमुखाश्च । मित्रं मित्रमित्रमाक्रन्द आक्रन्दासारश्चैते चत्वारो विजिगीषोः समर्थकाः । अरिमित्रम् अरिमित्रमित्रं पार्ष्णिग्राहः पार्ष्णिग्राहासारश्चैते चत्वारः शत्रुपक्षीयाः । विजिगीषुमध्यमादिचतसृणां मूलप्रकृतीनां मित्राद्यष्टानां शाखाप्रकृतीनामेकैकस्याः प्रकृतेरमात्यदेशदुर्गकोशदण्डाख्याः पञ्चद्रव्यप्रकृतयो भवन्ति । एताश्च पञ्चगुणितानां द्वादशानां षष्ठिरेव द्रव्यप्रकृतयो भवन्ति । मूलप्रकृतिभिश्चतसृभिः शाखाप्रकृतिभिरष्टाभिः सह संक्षेपतो द्विसप्तति प्रकृतयोनीतिशमन्वादिभिः कथिताः । तथा च मनुः --

अमात्यराष्ट्रदुर्गार्थदण्डाख्याः पञ्च चापराः ।
प्रत्येकं कथिता ह्येताः संक्षेपेण द्विसप्ततिः ॥

---

(१) नीतिवाक्यामृतम् (षाड्गुण्यसमुद्देशः) ।
(२) मनुस्मृतिः ७।१५६ ।
(३) मनुस्मृतिः ७।१५७ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

एवञ्च कौटिल्योऽपि --

चतुर्मण्डल संक्षेप:, द्वादशराजप्रकृतय:, षष्टिर्द्रव्य प्रकृतय:,

संक्षेपेण द्विसप्तति: ।

द्वादशराजकराजमण्डलबोधकचक्रम्

अरिमित्रमित्रम् पञ्चद्रव्यप्रकृतय:
(४)

मित्रमित्रम् पञ्चद्रव्यप्रकृतय:
(३)

अरिमित्रम् पञ्चद्रव्यप्रकृतय:
(२)

मित्रम् पञ्चद्रव्यप्रकृतय:
(१)

पञ्च द्रव्य प्रकृतय:	मध्यम: (२)	अरि: (४)	पञ्चद्रव्यप्रकृतय:	उदासीन: (३)	पञ्च द्रव्य प्रकृतय:
		विजिगीषु: (१)	पञ्चद्रव्यप्रकृतय:		

पार्ष्णिग्राह: पञ्चद्रव्यप्रकृतय:
(१)

आक्रन्द: पञ्चद्रव्यप्रकृतय:
(२)

(३)पार्ष्णिग्राहासार: पञ्चद्रव्यप्रकृतय:

आक्रन्दासार: पञ्चद्रव्यप्रकृतय:
(४)

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

प्रकारेणानेन मनुयाज्ञवल्क्यौ राजमण्डलविषये स्वं स्वं विचारमुपस्थापयत:, किन्त्वसमन्जसौ स्त द्वावेव विचारौ । योगीश्वरप्रस्तुतं मण्डलमस्ति त्रयोदशराजभिर्मण्डलितम्, यस्मिन् केवलं शत्रुर्मित्रमुदासीनश्चेते त्रय: सन्ति, एते विजिगीषुं परित: क्रमशो निवर्तन्ते । विजिगीषुस्तु मण्डलस्य मध्यस्थो भवति । पार्ष्णिग्रहादीनामष्टानां निर्देशो ग्रन्थान्तरे दर्शित:, किन्तु तेऽरिमित्रोदासीनेष्वेवान्तर्भवन्ति, तस्मात्तेषां पृथगुल्लेखोऽनावश्यक:, नामभेदमात्रं प्रदर्शयन्त्यन्ये, इत्याह याज्ञवल्क्य: । मनोर्मतावलम्बितं मण्डलमस्ति द्वादशराजकम् । तेषु राजसु विजिगीषु:, मध्यम:, अरि, उदासीनश्चेते त्रयोमण्डलप्रमुखा: । इतरेष्वष्टसु मित्रमरिमित्रं मित्रमित्रमरिमित्रमित्रञ्चेते चत्वारो विजिगीषो: पुरस्तात्तिष्ठन्ति । पार्ष्णिग्राह:, आक्रन्द:, पार्ष्णिग्राहासार:, आक्रन्दासारश्चेते चत्वारस्तु मण्डलस्य पृष्ठभागमवलम्बन्ते । विजिगीषुमध्यमादीनां चतुर्णां स्थितिर्मण्डलस्य मध्यभागे भवति । द्वादशस्वेतेष्वेकस्यैकस्य राज्ञोऽमात्यराष्ट्रदुर्गकोशबलाभिधानि पञ्चतत्त्वानि भवन्ति । एतेषां पञ्चगुणितानां द्वादशानां मण्डलीभूतानां द्वादशानाञ्च योगो द्विसप्ततिर्भवति । एत: सर्वैरेकं मण्डलमुत्पद्यते । इत्थं मनुयाज्ञवल्क्ययोर्मतिभेदन्तरमुपलभ्यते । मण्डलविषयेमनुना यद्विधं मतमुपस्थापितं तदेव समर्थयन्ति कौटिल्यकामन्दकादयो बहवोऽपि तथा हि कामन्दक: --

द्वादशानां नरेन्द्राणां पञ्च पञ्च पृथक् पृथक् ।
अमात्याद्याश्च प्रकृतीरामनन्तीह मानवा: ।।
मौला द्वादश यास्त्वेता ह्यमात्याद्या स्तथा च या: ।
सप्ततिश्चाधिका ह्येता: सर्वं प्रकृतिमण्डलम्[1] ।।

---

(१) कामन्दकीयनीतिसार: ८।२४-२५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

मनोर्मतं स्वीकुर्वन्कामन्दकोऽन्येषामिन्द्रपराशरशुक्राचार्यादीनामनेकानां मण्डलविदामनेकं मतं प्रदर्शयति[1] -- विजिगीषुमध्यमादिमण्डलतत्त्वानाममात्यादि राज्यतत्त्वानाञ्च संमिलनाद्राजमण्डले भवन्ति प्रकृतीनामनेकाः संख्याः, ताश्चेताः - १, २, ३, ४, ५, ६, १०, १४, १८, २१, २६, ३०, ३६, ४४, ५४, ६०, ७२, १०८, ३२४ एतासु संख्यासु ७२ संख्या बहुमान्या । विशेषतो मनुकौटिल्यादिभिः समर्थितेषा संख्या । इत्थमनेकविधं मण्डलं प्रदर्शयन्ति शास्त्रज्ञाः । मण्डलितानेतान्सर्वान्नृपतीन् तिसृभिः शक्तिभिः सामादिभि रुपायैश्च वशीकुर्याद् विजिगीषुः ।

तिस्रः शक्तयः -

शक्तिर्विविधाऽसंख्येया च, तासां सर्वासामत्र विवेचनमप्रासङ्गिकम्, अत्र तु केवलाराज्यशक्तिरेवास्ति सान्दर्भिकी, तस्मात्सैव भवति चर्चिता । सा च त्रिविधा -- (१) मन्त्रशक्तिः, (२) प्रभुशक्तिः, (३) उत्साहशक्तिश्चेति । एतासां तिसृणामेव मूलं प्रीतः कोश, एव, अस्य परिपुष्ट्यामेव पूर्णतां यान्त्येताः । तथैव प्रोक्तं गौतमधर्मसूत्रे[2] -- "प्रभुमन्त्रोत्साहशक्तयस्तन्मूला इति, तन्मूलाः कोशमूला इत्यर्थः ।" कौटिल्येन त्वस्मिन् विषये विश्लेषणात्मको विचारः कृतो यथा -- "शक्तिस्त्रिविधा -- ज्ञानबलं मन्त्रशक्तिः, कोशबलं प्रभुशक्तिः, विक्रमबलमुत्साहशक्तिः ।"[3]

अस्यायं भावः -- राजा राजविद्यावित् सर्वगुणसम्पन्नः, राजनीतिज्ञः,

---

(१) कामन्दकीयनीतिसारः ८।२०-४० ।

(२) अप्रकाशितमिदं सूत्रं सरस्वतीविलास ४६ पृष्ठोद्धृतं (ध०शा०इ०भा०२ पृ० ६५६)

(३) कौटलीयार्थशास्त्रम् ६।२ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

राजकार्यकुशलश्चास्ति, पुनस्तस्यामात्यादयोऽपि तथा विधा स्वार्थपथोचितगुण-युता: स्वानुकूलाश्च सन्ति चैव राजकार्येण सह सम्बद्धं सर्वं विषयं जानन्ति, सर्वविधविषयज्ञा एव ज्ञानबलोपेता अर्थाद्भवन्ति मन्त्रशक्तिसम्पन्ना: । मन्त्रशक्तिसमेतैर्भूपालादिभिर्विचारितो मन्त्रो निर्धारितो नीतिविशेषो वा सत्फलप्रद: । यस्य राज्यस्य कोशो रत्नकनकादिभि: परिपूर्णोऽस्ति तद्राज्यं भवति प्रभुशक्तिसम्पन्नम् । यद्राज्यं सुयोग्यै: पराक्रमशीलैर्युतु समर्थैश्च सैनिकै: परिपूर्णमस्ति तद्राज्यं भवत्युत्साहशक्तिसम्पन्नम् । पुनरेतासुशक्तिष्वपि पूर्वा: पूर्वा: शक्तय: सबला:, यथा - मन्त्रशक्ति:, प्रभुशक्ते:, प्रभुशक्तिरुत्साहशक्तेर्महत्तरा । तस्मात्प्रथमं मन्त्रशक्तेरेवोपार्जनं कर्तव्यं राज्ञा, तत इतरयोर्द्वयो: । विषयेऽस्मिन्कामन्दक: --

> मन्त्रस्य शक्तिं सुनयोपचारं सुकोशदण्डौ प्रभुशक्तिमाहु: ।
> उत्साहशक्तिं बलवद्विचेष्टां त्रिशक्तियुक्तो भवतीह जेता[1] ।।

अस्यार्थ: -- सन्धिविग्रहादौषु राज्यशासनादौ च यथोचितनीतिनिर्धारणं कृत्वा तदनुरूपकार्यसन्चालनं मन्त्रशक्ति: । पूर्णकोश: सैन्यबलन्च प्रभुशक्ति: । शक्तिशालिनो भूपते: क्रियाशीलतवोत्साहशक्ति: । एताभिस्तिसृभिरेव शक्तिभि: सुसम्पन्नो राजैव भवति सर्वत्र विजयशील: । इत्थं शक्तिविषये कौटिल्यकामन्दकयो: किन्चिदन्तरं लक्षितम् । विषयेऽस्मिन् दृष्टान्तं प्रदर्शयन् सोमदेवोऽस्या गरिमाणं गायति - आत्मबलन्तु न किमपि कार्यसाधकमीप्सितकार्यसिद्धयर्थन्तु बुद्धिरेव नितरामपेक्षिता, अस्या: प्रभावादेव सर्वाणि कार्याणि सिद्धयन्ति, आत्मबलसम्पन्न: सिंहोऽपि निर्बलेन किन्तु बुद्धिमता शशकेन व्यापादित:, तस्मादात्मबलाद्बुद्धिबलमेव

---

(१) कामन्दकीयनीतिसार: १५।३२ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

श्रेष्ठतम्, बुद्धिशक्तिरात्मशक्तेरपि गरीयसी, शशकेनेव सिंहव्यापादनमत्र दृष्टान्तः[1]। कोशबलं सैन्यबलञ्च प्रभुशक्तिः, अत्र शूद्रकशक्तिकुमारयोर्दृष्टान्तं प्रयच्छति सोमदेवः - राज्ञा शूद्रकेण विपुलधनैः प्रचुरैः सैनिकैश्च शक्तिकुमारस्य विनाशः कृतः[2]। उत्साहशक्तिसम्पन्नेन भगवता श्रीरामेण लङ्काधिपतिर्विनाशितः[3]। प्रकारेणानेन नीतिविद्भिर्विवेचिताऽस्ति शक्तिः। शक्तिसाध्यासिद्धिश्च त्रिविधा -- मन्त्रशक्तिसाध्या सिद्धिर्मन्त्रसिद्धिः। प्रभुशक्तिसाध्या सिद्धिः प्रभुसिद्धिः। उत्साहशक्तिसाध्या सिद्धिरुत्साहसिद्धिः। एतत्त्रिविधसिद्धिप्राप्ते राज्यविकासस्य राज्यरक्षणस्य प्रजानां हितस्य च ये उपाया: शास्त्रोक्तास्तेषां चिन्तनं यत्नतो विधेयं त्रिशक्तिसमेतैर्नृपतिभिः।

चत्वार उपायाः -

उपायेन विना न किमपि कार्यं सिद्ध्यति। राज्यस्य संरक्षणं संवर्धनं योगक्षेमसाधनं शत्रुवशीकरणञ्चेत्यादयोऽशेषा राज्यव्यवहारास्तथा लोकव्यवहाराश्चोपायसाध्याः। उपायानामाश्रयेण विना न कोऽपि वृद्धिमेति, अत उदयेच्छुभिर्भूपतिभिः प्रजाजनैश्च तस्यैवाश्रयो विधेयः। उपायाश्चानेकविधाः, वस्तुतः सामदानभेददण्डाभिधाश्चत्वार उपाया बहुमान्याः।

---

(१) नीतिवाक्यामृतम् (षाड्गुण्यसमुद्देशः)।

(२) नीतिवाक्यामृतम् (षाड्गुण्यसमुद्देशः)।

(३) नीतिवाक्यामृतम् (षाड्गुण्यसमुद्देशः)।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

उपायाः सामदानं च भेदो दण्डस्तथैव च ।
सम्यक्प्रयुक्ताः सिद्धयेयुर्दण्डस्त्वगतिका गतिः ॥[1]

अस्यार्थः - प्रियवचनादिभिर्महद्भ्योऽरातिभ्योऽपि सन्तुष्टिदानं साम । रत्नकनकद्रव्यादिकं दत्त्वा परिचित्तसन्तोषणं दानम् । भेदो भिदकरणं परस्यां वैरस्योत्पादनम् । प्रकाशाप्रकाशाभ्यां परिपन्थिनो द्रव्यापहारादि वधपर्यन्तोऽपकार एव दण्डः । देशकालपरिस्थित्यनुसारं सम्यक्प्रयुक्तानामेतेषां प्रभावादेव सदैव प्रतिकूलतां गताः सबलाः शत्रवोऽपि भवन्ति स्ववशगाः। एतेषां च मध्ये "दण्डस्त्वगतिका गतिः" इत्युक्तत्वादुपायान्तरसंभवे सति दण्डो न प्रयोक्तव्यः। एतेसामादयो न केवलं राज्यव्यवहारविषयाः, अपि तु सकललोकव्यवहारविषयाः, यथा -- "अधीष्व पुत्रकाधीष्व दास्यामि तव मोदकान् । यद्वाऽन्यस्मै प्रदास्यामि कर्णमुत्पाटयामि ते" इति ।[2]

विजयप्रवृत्तस्य भूपतेर्ये विजयविरोधिनः स्युः स्तान् सर्वान् हि सामदानभेदैस्त्रिभिरुपायैरेव वशमानयेद् विजिगीषुः । ते च परिपन्थिनो यदा स्त्रिभिरुपायैर्न तु स्वाधीना स्तदा सर्वविध दण्डेन युद्धेन (देशोपमर्दादिना) वा वशीकुर्यात् । तथैव प्रोक्तं मनुस्मृतौ --

यदि ते तु न तिष्ठेयुरुपायैः प्रथमैस्त्रिभिः ।[3]
दण्डेनैव प्रसह्यैतां शनकैर्वशमानयेत् ॥

उपायेषु चतुर्ष्वपि राष्ट्राभिवृद्ध्यर्थं सामदण्डावेव प्रशंसनीयौ स्त

---

(१) याज्ञवल्क्यस्मृतिः १।३४६ । (२) मिताक्षरा (या० स्मृ० १।३४६)
(३) मनुस्मृतिः ७।१०८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

इत्याहुर्विद्वांसः, साम्नि प्रयासधनव्ययसैन्यक्षयादि दोषाभावात्, दण्डे तु तत्सद्भावेऽपि कार्यसिद्धिनिश्चितत्वात् । केचित्तु येनोपायेन देशविस्तारोऽर्थवृद्धिर्मूलायो भवेत्सएवावलम्बनीयः प्रशंसनीयश्चेत्याहुः । यतो राज्ञः कृतेऽन्येभ्यो लाभेभ्यो भूमिलाभ एव श्रेयस्करः । भूमिवृद्धिं विधाय प्रजारक्षणं राज्ञः कर्तव्यम्, भूमिस्तु न केषाञ्चिदपि परम्परागता, तस्या उपार्जनमेव विधेयम्, योऽस्ति पराक्रमशीलः, यस्मिन्नस्ति वीरता स एव भवति भूम्यर्जनसमर्थः, तेनैव भवति भोग्या सा । तथा च नीतिवाक्यामृते -- "न हि कुलागता कस्यापि भूमिः किन्तु वीरभोग्या वसुन्धरा"[१] । चतुर्षूपायेषु दण्डस्यैवाधिकं महत्त्वं प्रतिपादितं महर्षिणा वाल्मीकिना --

त्रीनुपायनतिक्रम्य चतुर्थ इह दृश्यते ।
न सामरक्षःसु गुणाय कल्पते न दानमर्थोपचितेषु युज्यते ।
न भेदसाध्या बलदर्पिता जनाः पराक्रमस्त्वेव ममेह रोचते[२] ।।

प्रकारेणानेन दण्डस्य महत्त्वमस्ति प्रदर्शितम्, किन्तु यदाऽऽद्यास्त्रय उपाया निष्फलतां यान्त्यर्थात्सामदानभेदैः परिपन्थिनः स्ववशा न स्युस्तदैवान्तिमोपायस्य दण्डस्य प्रयोगो विधातव्यः । दण्डप्रयोगादपहरणवधयुद्धादिकं यत्किमपि कार्यं भवितुं शक्नोति, एतद्विधेभ्यः कार्येभ्यो न केषाञ्चिदपि कल्याणं जायते, तस्मादपहारवधादिकमत्युग्रं कर्मबुद्धिमद्भिः सर्वथा त्याज्यम् । तथा च शान्तिपर्वणि --

वर्जनीयं सदायुद्धं राज्यकामेन धीमता ।
उपायैस्त्रिभिरादानमर्थस्याह बृहस्पतिः[३] ।।

---

(१) नीतिवाक्यामृतम् (षाड्गुण्यसमुद्देशः) ।
(२) रामायणम् ५।४१।२-३ । (३) शान्ति० ६९।२३ ।

CC-0 Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

एवन्च --

न युद्धमाश्रयेत्प्राज्ञो न कुर्यात्स्वबलक्षयम्[1] ।
वदन्ति सर्वे नीतिज्ञा दण्डस्त्वगतिका गतिः ।।

विशेषत एते उपायाः क्रमेण प्रयोज्या भवन्ति -- प्रथमं परैः सह सामोपायो व्यवहरणीयः यदि च निष्फलो भवेत्तदा दानोपायः कल्पनीयः, सोऽपि निरर्थकस्ततो भेदोऽवलम्बनीयः, स चार्थहीनः स्यात्तोऽन्ते दण्डनीतिरेव ग्राह्या भवति । एतेषामुपायानामप्यनेके प्रकाराः सन्ति शास्त्रोक्ताः । विजय-विरोधिनो गुणसंकीर्तनं सम्बन्धोपाख्यानं परोपकारप्रदर्शनं मित्रताया भविष्यद्गति-कथनमात्मोपनिबन्धनन्चेति भेदात् सामोपायः पन्चविधः, प्रयोगावसरे एते पन्चैव प्रकाराः प्रयोक्तव्याः । एवं दानन्च पन्चविधमेव -- परैम्य उत्तममध्यमादिकं यद्विधं द्रव्यादिकमुपलब्धं तस्यसर्वस्योत्सर्गः, शत्रुगृहीतस्य स्वस्य धनस्यानुमोदनम्, शत्रुर्यावद्धनादिकमिच्छति तस्मै तत्प्रदानम्, अल्पार्थं प्रदानेन शत्रोः प्रचुरार्थ संरक्षणम्, विनाशावस्थां गतस्य शत्रोर्धनस्य यत्नतः संरक्षणन्च ।भमेदस्तु त्रिविधः -- प्रेम-द्वेषापनयनं हर्षोत्पादनं सन्तर्जनन्चेति भेदात् । दण्डोऽपि त्रिविधः --

बधोऽर्थ ग्रहणं चैव परिक्लेशस्तथैव च[2] ।
इति दण्डविधानज्ञैर्दण्डोऽपि त्रिविधः स्मृतः ।।

इत्थमुपायानामनेकभेदाः सन्ति प्रदर्शिताः । यदा यत्र य उपायः प्रयुज्यते तदा तत्र तस्य भेदा अपि भवन्ति प्रयोगार्हाः । अन्यैराचार्यैश्चतुर्णामुपायानां

---

(१) बृहत्पराशरः पृ० १०,२८० (धर्मशास्त्र का इतिहास भा० २ पृ० ६६० उद्धृतम्)

(२) कामन्दकीयनीतिसारः १७।६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

यद्विधा भेदा: प्रोक्ता स्तै: सह कामन्दकोक्ता एते भेदा: सामन्जस्यं नोत्पादयन्ति । उपायेषु तु सामादयश्चत्वारस्तु सर्वेषां मते समानरूपा:, किन्त्वेतदतिरिक्ता स्त्वसमाना दृश्यन्ते यथा --

साम दानञ्च दण्डश्च भेदश्चेति चतुष्टयम् ।
मायोपेक्षेन्द्रजालं च सप्तोपाया: प्रकीर्तिता: ।।[1]

एते त्रयोऽतिरिक्ता उपाया: कामन्दकेनोपस्थापिता: । महाभारतस्य वनपर्वाध्याये "उपेक्षा" इत्याख्यस्यैकस्यातिरिक्तोपायस्योल्लेखोऽस्ति । बार्हस्पत्य-सूत्रे मायोपेक्षावधेति नामकानां त्रयाणामस्ति वर्णनम् । कुत्रचिन्मायाऽदायो-विवेचनमपि प्राप्यते । इत्थं विविधा अतिरिक्तोपाया नीतिज्ञै: प्रदर्शिता: । विशेषतो मायाउपेक्षाइन्द्रजालान्येते त्रयस्तु बहुभिरनुमोदिता: । एते त्रय: सामा-दयश्चत्वारश्चेति सप्तोपाया: प्रसिद्धा: । एतेषां सम्यक् प्रयोगेणैव विजिगीषु-र्नृपतिर्मण्डलितान् भूपतीन् स्वाधीनान् करोति । एतेषामुपायानामुपर्युक्तानां शक्तिविशेषाणान्वाधार एव षाड्गुणांश्चिन्तयेद् विजयप्रवृत्तो महीपति: । तथा च गौतमधर्मसूत्रे -- "चतुरुपायानवलम्व्य सन्धिविग्रहयानासनद्वैधीभाव समाश्रयाख्यान् गुणान् परिकल्पयेत्"[2] ।

षाड्गुण्यम् -

बहुभिर्जानपदै: परिपूरिताऽतिविस्तृतेयं भारतभूमि: । विशालताया जानपदानां प्राचुर्येण चेयं कस्मिंश्चिद्युगे बहुषु खण्डेषु विभाजिताऽऽसीत् । खण्डित-

---

(१) कामन्दकीयनीतिसार: १७।३ ।

(२) धर्मशास्त्र का इतिहास, भाग-२, पृ ६६३ पृ० उद्धृतम् ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

भूभागस्थानां जनानां भावना सङ्कुचिता विचारोऽसमानः, सङ्कीर्णविचाराकृष्टैः कैश्चिज्जनैः कानिचित्पृथग्विधानि राज्यानि स्थापितानि। शनैः शनैरेतादृश्या विकृतभावनया बहवो जानपदा आकृष्टाः, तस्माद् भारतभूमौ भिन्नराज्यस्थापनक्रमोऽपि विकसितः। विस्तारितेनानेन क्रमेण बहूनि बहुविधानि लघुराज्यानि निर्मितानि, विशेषतोऽस्मिन्भारतवर्षे यावन्तो जानपदा आसन् ते सर्वे राज्यसंज्ञायां परिणता अर्थाद्राज्यरूपा जाताः, तानि सर्वाणि नवनिर्मितानि राज्यानि राजसनाथितानि च कृतानि। अत्युच्चहिमशैलस्याङ्केऽवस्थितं नेपालाधिराज्यमप्यस्यैवैकं खण्डरूपं सांस्कृतिकदृष्ट्या। प्राचीनकालादेवास्यास्तित्वं स्वतन्त्रं मान्यता चान्यराज्यापेक्षायां पृथग्विधा। पुराऽस्यापिदशा तादृश्येव या दशा भारतस्यासीत्। यदा भारतवर्षे बहूनि लघुराज्यानि समुत्पादितानि, तदानीन्तनकालादेव राजसु परस्परं संघर्षस्य विवादस्य चाप्रियास्थितिरुद्भूता, एतस्याः स्थितेः समुत्पादनादौ मण्डलिता राजान एव विशिष्टां भूमिकां वहन्ति। यदा नृपतिभिः कलहस्य वातावरणसर्जनं कृतं तदैव मनुकौटिल्यादिभिः प्रस्तुत उपर्युक्तो मण्डलसिद्धान्तः, सर्वथा सार्थकः। नीतिज्ञैस्तैः कल्पितानां सन्धिविग्रहादीनां षड्गुणानां तिसृणां शक्तीनां सामदानादीनामुपायानान्च प्रयोगो विहितः कलहप्रियैर्नृपैः। इत्थं लघुराज्यप्रमुखा बहुकालपर्यन्तं संघर्षनिरता जाताः। क्रिययाऽनयाबहवो राजानः प्रजाजनाश्च विनाशावस्थां प्राप्ताः। अस्यामेव परिस्थितौ विचारशीलानामुदात्तभावनया-प्रेरितानामत्युत्कृष्टशक्तिसम्पन्नानान्च केषाञ्चिद्विप्राणां समुदयोऽभूत्। एतेषां बुद्धिमत्तापूर्णव्यवहारेण निरन्तरप्रयासेन प्रभावेण च तथा नीतिविशेषज्ञैः कौटिल्यादिभिर्महामानवैः प्रदर्शितानां सन्ध्यादिगुणानां सामाद्युपायानां प्रयोगेण च विरक्तभावापन्नाः लघुराजानो निष्क्रिया उत्साहहीनाश्चा भवन्। तदानीमेव सामर्थ्यहीनान् तान् सर्वान्

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

दाद्धपार्थिवान् स्वाधीनान् कृत्वाऽनेकखण्डखण्डितं सम्पूर्णं भारतखण्डं च विधाय सर्वशक्तिसम्पन्नमेकं बृहदाकारं राज्यं स्थापितं तैः समुदितैः महापुरुषैः । एवमेवानेकराज्यविभक्तो नेपालोऽप्येकमात्रं महद्राज्यं निष्पन्नं यन्नेपालराज्यमिति नाम्ना विख्यातम् । कार्यमेतत् श्री५महाराजाधिराजस्य पृथ्वीनारायणशाहस्य महता प्रयासेन सिद्धम् । इत्थं खण्डितावस्थामुत्क्रम्य तौ द्वावेवदेशावखण्डावस्थां सम्प्राप्तौ । वस्तुतो राज्ञो राज्यस्य चोत्कर्षस्तु षाड्गुण्यस्य यथोचित प्रयोगादेव सम्भवः । एतावता भारतवर्षस्य तात्कालिकेषु राजसु संघर्षस्य दमनस्य चाधिको भावः प्रस्फुटितो दृश्यते । भावनामेतामेवादाय सततं संघर्षरता आसन् भारतवर्षस्य तात्कालिका महीपालाः । ये शक्तिसम्पन्ना नीतिज्ञाश्चासन् त एव विजयं प्राप्नुवन्ति स्म । विजयप्राप्त्यनन्तरं वाजपेयाश्वमेधादीनां महतां यज्ञानामनुष्ठानन्च कुर्वन्ति स्म केचित् । पराजितानां मूलोच्छेदं तु न कुर्वन्ति स्म ते तु विजयिभ्यो रक्षिता पालिताश्च भवन्ति स्म । इत्थं स्वर्यं न परित्यजन्ति स्म पुरा राजानः । उपायान्तर सम्भवेसति युद्धं न कर्तव्यमित्यस्य वचनस्य यत्नतः परिपालनं कुर्वन्ति स्म । अस्यैव शास्त्रीयवचनस्याधारे युद्धतत्परा अपि राजान प्रथममुपायानामेव प्रयोगं कुर्वन्ति स्म । उपायेषु सामादयः सन्ध्यादयश्च प्रसिद्धाः । सामादीनां विवेचनमुपर्यैवोपस्थापितमितः परं सन्ध्यदयः प्रदर्श्यन्ते । ते च यथा --

सन्धिं च विग्रहं चैव यानमासनमेव च ।
द्वैधीभावं संश्रयं च षड्गुणांश्चिन्तयेत् सदा[१] ।।

---

(१) मनुस्मृतिः ७।१६० ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

पक्षयोर्द्वयोरुपकारार्थं विधीयमानो व्यवस्थाविशेषो नियमबन्धो वा सन्धिः । विग्रहोऽपकारो विरोधो वा । वैरिणं प्रत्याक्रमणं यानम् । आसनमुपेक्षा । स्वस्यस्वार्थ सिद्ध्यर्थं बलस्य द्विधाकरणं द्वैधीभावः । परपीडितस्य बलवत्तरराजान्तराश्रयणं संश्रयः । सन्धिप्रभृतीनेतानुपकारकान्गुणान् देशकाल-परिस्थितिशक्तिमित्रादिवशेन सततं चिन्तयेद्विजिगीषुः । गुणेष्वेतेषु यस्याव-लम्बनादात्मनः समुन्नतिः शत्रोरवनतिर्भवेत्तस्यैवाश्रयणं विधातव्यं राज्ञा । एतेभ्यः षड्विधेभ्यो गुणेभ्यः शमव्यायामयोर्निष्पत्तिः, शमः सर्वत्र शान्तिः, व्यायाम-उद्योगः । शमव्यायामाभ्यां योगक्षेमौ भवतः, अर्थात् शान्त्याः क्षेमः, योगस्य प्रमुखं कारणमुद्योगः । उद्योगादेवालब्ध वस्तूनां लाभः, शान्त्या लब्धस्य परिरक्षणं भवति । शमव्यायामयोर्मूलकारणविशेषास्तु सन्धिविग्रहादयः षड्गुणा एव । तथा चोक्तं कौटलीयार्थशास्त्रे --- "शमव्यायामौ योगक्षेमयोर्योनिः, - - - - शमव्यायामयोर्योनिः षाड्गुण्यम्[1] ।" उन्नतिः, अवनतिः स्थितिश्चैतेत्रयो विषयाः षाड्गुण्यस्य फलविशेषाः । फलान्येतानि दैवमानुषाभ्यां कर्मभ्यामुपलभ्यन्ते । दैवं कर्मादृष्टफलोत्पादकम् । मानुषकर्मणा दृष्टं फलं प्राप्यते । त्रिविधा शक्तयः पूर्वमेवोपस्थापिता, तासामाधारे षाड्गुण्यस्य समुचितप्रयोग एव मानुषं कर्म, एतस्मिन्नेवाधारितौ राज्यस्य वृद्धिरक्षयौ, देशकालानुसारं सन्ध्यादीनामुचित-प्रयोगाद् वृद्धिरनुचितप्रयोगात् क्षयः । अतो राजनीतौ मानुषकर्मण एव विशेषा विचारो विधेयः । अस्य कर्मणो मूलाधारविशेषाः षड्गुणा एव । गुणेषु प्रथमः सन्धिः । अत्रप्रथममस्यैव विवेचनं विधीयते ।

---

(१) कौटलीयार्थशास्त्रम् ६।२ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

सन्धिकालाः -

(१) शत्रोरपेक्षायां स्वस्या अवस्था निर्बलतां गतेति चेत्तदा सन्धिविंधातव्यस्तेन सह ।

(२) स्वस्य वृद्धिर्द्रुततरा परस्य तु मन्दा सेति मन्यते चेत् ।

(३) स्वस्याधिकतरा वृद्धिः शत्रोर्न्यूनेत्यनुभूयते चेत् ।

(४) आवयोर्वृद्धिस्तु समाना किन्तु सा शत्रोर्ह्रासोन्मुखा स्वस्यतूदयोन्मुखा स्यादि चेत् ।

(५) उन्नतिरवनतिःस्थितिश्चावयोर्द्वयोः समाना समकालोन्मुखा च भवेत्तदाऽपि ।

(६) सन्धिं कृत्वा सन्धिव्याजेन वा शत्रोः सर्वं कर्म विनाशावस्थां प्रापयामि वा शत्रुसम्पादितेभ्यो महद्भ्यः कर्मभ्यो यत्फलं निष्पद्यते तदुपभोगं करिष्याम्यथवा सन्धिच्छलेन स्वगुप्तचरादिभिर्विषप्रयोक्तृभिश्च शत्रोरुद्योगादिकं विनाशयामि वा शत्रोः कृष्यादि विषयज्ञान् वरिष्ठान् सर्वान् जनान् धनप्रलोभादिद्वारा स्वधीनान् करोमि, येन कर्मणा स्वस्य कृष्याद्युद्योगो भवेदधिकलाभदायकः, वा सन्धिं विधाय शत्रुणा सह संहतेषु राजसु विरोधमुत्पादयामि वा मण्डलिते राजभिः सह मिलित्वा शत्रोर्मूलोच्छेदं करिष्यामीति मन्यते चेद्जिजिगीषु स्तदा शत्रुणा सह सन्धिं कुर्यात् ।

सन्धिभेदाः -

(१) दण्डोपनतसन्धिः, (२) कोशोपनतसन्धिः, (३) देशोपनतसन्धिश्चेति-

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

भेदात् सन्धयस्त्रिविधाः । एतेष्वपि केचित् त्रिविधाः केचित् चतुर्विधाः सन्ति ।
दण्डोपनतस्य त्रयो भेदाः प्रसिद्धाः - आत्मामिष आत्मरक्षण अदृष्टपुरुषश्चेति ।
यदा पराजितो राजा विजयिनः कथनानुसारं स्वसैन्यं धनञ्च तस्मै प्रयच्छति, आत्म-समर्पणञ्च करोति चेत्तदा भवत्यात्मामिषः । सेनापतिं राजकुमारञ्च परसेवायां प्रेषयित्वा सन्धिर्विधीयते चेत्तदाऽयमात्मरक्षणः, यतः सेनापतिराजकुमारयोः सेवया प्रसन्नेन शत्रुणा स्वस्य रक्षणं जायते । भवतः कार्यसिद्ध्यर्थं स्वयमेवागमिष्याम्यथवा मम सैनिका आगमिष्यन्तीत्युक्त्वा विधीयमानः सन्धिरदृष्टपुरुषः, अयं दण्डमुख्यात्मरक्षण इति चोच्यते । यतोऽस्माद्राज्ञः सैनिकानाञ्च रक्षा निश्चिता । एते त्रय एव दण्डोपनताख्याः सन्धयः ।

कोशोपनतस्य चत्वारो भेदा दर्शिता - यस्मिन् सन्धौ युद्धापहृतानाम-मात्यादिप्रकृतीनां द्रव्यदानेन विमोक्षणं विधीयते स परिक्रयः । अयमेव यथासुखं धनं दत्वा क्रियते चेदुपग्रहः । अस्मिन् देशकालावपि निश्चीयते चेत्प्रत्ययः । प्रत्ययोऽयं सन्धिर्निर्दिष्टकाले निश्चितद्रव्यप्रदानाद् द्वयोः सम्मेलनाच्च सुवर्णसन्धि-रिति नाम्नाऽपि प्रसिद्धः । तत्कालमेव निश्चितं सर्वं धनं दत्वा विधीयमानः सन्धिः कपालः । चतुर्ष्वेतेषु प्रथमयोर्द्वयोर्वस्त्रकवचलोहताम्रादिकं दीयते तृतीये देयधनस्य कञ्चिद्भागं दत्वाऽसमर्थतायाः कारणं बोधयेत् । चतुर्थे तु सबलानां मध्यमोदासीनानामाश्रयमादाय दास्यामि दास्यामीति कथयन् दानकालं यापये-दित्येते चत्वारः कोशोपनतसन्धयः प्रोक्ताः ।

देशोपनतस्यापि चत्वार एव भेदाः शास्त्रोक्ताः - देशस्य राज्ञो जनानां

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

प्रकृतीनाञ्च रक्षणार्थं स्वस्य देशस्य सारपूर्णं कञ्चिद्भूमागं दत्वा क्रियमाणः सन्धिरादिष्टः। सन्धिप्राप्तौ भूभागो महत्फलदायकः, यतस्तस्मिन् गूढादीन् पुरुषानुपस्थापयति विजिगीषुस्तेषां माध्यमेनैव स्वार्थं साधयति सः। प्रमुख-नगरदुर्गादिकं महत्वपूर्णं स्थलं विहाय सारहीनं भूभागं दत्वा विधीयमानः सन्धिरुच्छिन्नः। शत्रोः कृते प्रदर्शितभूभागादुत्पन्नफलमात्रं दत्वा क्रियमाणः सन्धिरवक्रयः। यस्मिन् सन्धौ प्रकल्पितभूप्रदेशादुत्पन्नफलादतिरिक्तं किञ्चिदन्यद् वस्त्वपि दीयते स परदूषणः। भूदानकारणादेते चत्वार एव भवन्ति देशोपनता-भिधाः सन्धयः। इत्थं त्रिविधान् सन्धीनुपस्थापयति कौटिल्यः[1]। समानयानकर्मा-समानयानकर्मेत्येवं द्विप्रकारः सन्धिर्ज्ञातव्य इत्याह मनुस्तु। तात्कालिकद्रव्यादि-फलप्राप्त्यर्थमुत्तरकालीनफललाभार्थं वा यत्रान्यं राजानं प्रति यानादिकर्म क्रियते स समानयानकर्मा सन्धिः। यः पुनस्त्वमत्र याहि अहमत्र यास्यामीति सांप्रतिकोत्तर-कालीनफलार्थितयैव विधीयते सोऽसमानयानकर्मा सन्धिः। तथैव प्रोक्तं मनुस्मृतौ -

समानयानकर्मा च विपरीतस्तथैव च।
तदात्वायतिसंयुक्तः सन्धिर्ज्ञेयो द्विलक्षणः[2]॥

पुनः सन्धिर्द्विविधः - वैरिविरचितजालभेदको लाभदायकश्चेति। कौटिल्यकल्पिता उपर्युक्तास्त्रिविधाः सन्धयः परप्रसारितं जालं भिन्दन्त्यथवैते शत्रुकृतप्रपञ्चाद्विमुक्त्यर्थं क्रियन्ते। अतः परं लाभोत्पादकाः सन्धय उच्यन्ते। ते च त्रिविधाः - परिपणितोऽपरिपणितोऽपसृतश्चेति। देशकालकार्यादीन् निर्दिश्य यः सन्धिर्विधीयते स परि-

- - - - - - - - - - - - - - - - -

(१) कौटिल्यार्थशास्त्रम् ७।३ । (२) मनुः ७।१६३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

पणित: । यस्मिन् देशकालादयो नापेक्षन्ते सोऽपरिपणित: । त्वमेतं देशं गच्छ, अहमिमं देशं गमिष्यामीत्युक्त्वा देशनिर्देशं कृत्वा य: सन्धिर्विधीयते स परिपणितदेशसन्धि: । त्वमेतावन्तं कालं कार्यं कुरु, अहमेतावन्तं कालं कार्यं करिष्यामीति कालनिर्देशं कृत्वा य: सन्धि: क्रियते स परिपणितकालसन्धि: । त्वमेतावत्कार्यं साधय, अहमेतावत्कार्यं साधयिष्यामीति कार्यनिर्देशं विधाय य: सन्धि: सम्पाद्यते स परिपणितकार्यसन्धिरिति कथ्यते । प्रकारेणानेन देशकालयो: कालकार्ययोर्देशकार्ययोर्देशकालकार्येषु चोपर्युक्तानां त्रयाणां संयोजनाद् भवति सप्तविध: परिपणित: ।

सन्धिधर्माश्च सन्ति शास्त्रदर्शिता:, तेषु चत्वार: प्रमुखा:, ते चैते - अकृतचिकीर्षा कृतश्लेषणं कृतविदूषणमवशीर्णक्रिया च ।

(१) सामदानादिभिरुपायैर्नवसन्ध्यनुबन्धनं सन्ध्यनुरूपं समहीनज्येष्ठानां राज्ञां यथास्थानमवस्थापनञ्चाकृतचिकीर्षा ।

(२) सन्धिकालकृतप्रतिज्ञाया उभयत: परिपालनं पूर्वसम्भाषितविषयस्य यत्नतोऽनुसरणं रक्षणञ्च कृतश्लेषणम् ।

(३) दूष्येण सह सन्धानं कृत्वा विजिगीषुणा सह कृतसन्धिभेदनं कृतविदूषणम् ।

(४) दोषकारणाद् बहिष्कृतेन मित्रेण सह पुन: सन्धिस्थापनमवशीर्णक्रिया ।[१] प्रकारेणानेन सन्धिभेदान् सन्धिधर्मांश्च प्रदर्शयति कौटिल्य: । कामन्दकस्तु सन्धे: षोडशविधान भेदान् प्रतिपादयति, ते च प्राय: कौटिल्योक्तभेदै: सह सादृश्यं जनयन्ति, यथा -

---

(१) कौ० अ० ७।३, ६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

कपाल उपहारश्च सन्तानः सङ्गतस्तथा ।
उपन्यासः प्रतीकारः संयोगः पुरुषान्तरः ।।
अदृष्टनर आदिष्ट आत्मामिष उपग्रहः ।
परिक्रयस्तथोच्छिन्नस्तथा च परिभूषणः ।।
स्कन्धोपनेयः सन्धिश्च षोडशः परिकीर्तितः ।[1]

विग्रहः

अन्यैः सह वैरभावो विग्रहः, सोऽयं द्विप्रकारः - शत्रुजयरूपप्रयोजनार्थं यथाकालं स्वयमेव कृतो विरोधः, अन्यैर्भूपालैः स्वस्य मित्रस्यापकारो विहितः, तदा तत्प्रतीकारार्थं मित्ररक्षणार्थञ्च कृतोऽपरो विरोध इत्येवं द्विविधो विग्रहः कथितः । तथैव प्रोक्तं मनुस्मृतौ मनुना -

स्वयं कृतश्च कार्यार्थमकाले काल एव वा ।
मित्रस्य चैवापकृते द्विविधो विग्रहः स्मृतः ।।[2]

कामन्दकीयनीतिसारे पञ्चविधा विग्रहा वर्णिताः, ते च निम्नानुरूपाः -

मण्डलक्षोभसम्भूतमुपायैः प्रशमं नयेत् ।
सापत्न्यं वास्तुजं स्त्रीजं वाऽज्ञातमपराधजम् ।।[3]
वैरप्रभेदनिपुणैर्वैरं पञ्चविधं स्मृतम् ।

विग्रहाणामेतेषां कालं प्रदर्शयति कौटिल्यः - स्वस्मिन्देशे शस्त्रास्त्रक्रियायां निपुणाः शूरा वीराश्च निवसन्ति क्षत्रियाः प्रायः, कृषिविषयज्ञानां

- - - - - - - - - - - - - - - -

(१) का० नी० सा० ६।२-४ । (२) मनुः ७।१६४ ।
(३) ,, १०।१५-१६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

कृषकाणामस्त्याधिक्यम्, शैलवनजलादीनां विद्यते प्राचुर्यम्, दुर्गमस्ति परमेयम्, शत्रोरागमननिर्गमनयोरेकमात्रमस्त्ययनम्, अतः सर्वेषु विषयेषु सबलोऽस्त्ययं मम देशः, तस्माच्छत्रोराक्रमणप्रतीकारार्थमपि सर्वथा समर्थ इति मन्यते चेद् विजिगीषुस्तदा विग्रहो विधातव्यः[1]।

यानं यानकालिकं कृत्यञ्च

यानं शत्रुं प्रत्यभियानमाक्रमणं युद्धस्य कृते प्रस्थानं वा। तच्च द्विविधम् -

एकाकिनश्चात्ययिके कार्ये प्राप्ते यदृच्छया।
संहतस्य च मित्रेण द्विविधं यानमुच्यते[2] ॥

युद्धं सर्वथा त्याज्यमुक्तिरेषा सर्वमान्या, अत उपायान्तरसम्भवे सति तन्न कर्तव्यम्, किन्त्वन्यैरुपायैः शत्रोस्तस्योद्योगादिकर्मणाञ्च विनाशो न तु सम्भवः, इति मन्यते चेद् विजिगीषुस्तदा बाध्यत्वेन यानस्यावलम्बनं कुर्यात्, पुनः स्वस्य स्वदेशस्थानां महतामुद्योगादिविकासकार्याणाञ्च सर्वतो रक्षणस्य निश्चयोऽस्ति चेत्तदा युद्धं विधातव्यं नोचेन्न। तथैव प्रोक्तं कौटलीयार्थशास्त्रे -

"यदि वा मन्येत - यानसाध्यः कर्मोपघातः शत्रोः[3] प्रतिविहित-स्वकर्मारक्षश्चास्मि, इति यानेन वृद्धिमातिष्ठेत्।"

एतच्च शत्रोरवस्थां विचिन्त्य विधेयम्, अर्थाद्यदा निर्बलतामाप्नोति स तदैव तं प्रत्याक्रमणमुचितम्, अथो निर्दिष्टायां परिस्थितौ शक्तिहीनो भवति सः। द्यूत-मद्यपानपरस्त्रीसेवनादिव्यसननिरतोऽस्ति, तस्यामात्यादिप्रकृतयोऽपि तथाविधा

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

एवार्थाद् व्यसनासक्ताः सन्ति, व्यसनेनोत्साहहीनोऽस्ति राजा स्वस्य राज्ञो दशां जानन्तः प्रजाजना अपि विरक्ताः (अप्रसन्नाः) सन्ति, प्रकृतिष्वपि परस्परं कलहोऽस्ति, कलहभावापन्नेषु तेषु प्रलोभनादिना भेदोत्पादनं शक्यते, अग्निजलरोगदुर्भिक्षादिभिरनेकैर्दुःखैः प्रजाः पीडिताः सन्ति, देशे विविधोपद्रवाः सन्ति समुत्पन्नाः, तन्निवारणेऽसमर्थोऽस्ति राजा, तस्मात् स क्षीणो विन्तितश्चास्ति चेत्तदा तं प्रत्याक्रमणं कुर्याद्विजिगीषुः । अथवा स्वस्य सहयोगकर्तारो मित्रादयः प्रकृत्यादिभिः सम्पन्नाः सबलाश्च शत्रोर्मित्रादयस्तु विपद्ग्रस्ता निर्बलाश्च सन्ति चेत्तदाऽपि तं प्रति गच्छेत्[४] । तथा च मनुस्मृतौ मनुः -

यदा मन्येत भावेन हृष्टं पुष्टं बलं स्वकम्[५] ।
परस्य विपरीतं च तदा यायाद्रिपुं प्रति ॥

यदा यानं निश्चितं तदाऽर्थाद्युद्धप्रयाणात्प्रागेव शत्रोः शक्त्यादीनां यथार्थज्ञानमवश्यकर्तव्यं राज्ञा, तस्य कृते मन्त्रिभिः सैनिकैश्च सह मन्त्रितं सर्वविषयज्ञमेकं दूतं शत्रुदेशं प्रति प्रेषयेद्युद्धतत्परो राजा । सोऽपि तत्र गत्वा शत्रोर्गतिं स्थितिं शक्तिं क्रियाश्चैतत्सर्वं ज्ञात्वा प्रत्यागत्य राज्ञः सन्निधौ तथ्यविषयस्योपस्थापनं कुर्यात्, राज्ञापि तदनुरूपः कार्यक्रमश्चिन्तनीयः । तथा हि कामन्दकः -

- - - - - - - - - - - - - - - - - - -

(१) कौ० अ० ७।१ । (२) मनुः ७।१६५ ।
(३) ,, ७।१ । (४) कौ० अ० ७।४ ।
(५) मनुः ७।१७१ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

कृतमन्त्रस्तु मन्त्रज्ञो मन्त्रिणां मन्त्रसम्मतम् [1] ।
यातव्याय प्रहिणुयाद् दूतं दूत्याभिमानिनम् ।।

यदा नोपायान्तराणि सफलानि युद्धमेव भवेदपरिहार्यं तदा तस्य कृते प्रस्थानस्य निश्चयो विधातव्यः, प्रस्थानदिनात्पूर्वं सप्तदिनं यावत् शक्तिरेवं विजयप्रदानां देवाधिदेवानां पूजोपासना कर्तव्या । तत्र प्रथमे दिने गणेशविष्णुशिवानाम्, द्वितीयेऽहनि दिक्पालानाम्, तृतीये रुद्राणां दिक्पतीनाञ्च, चतुर्थे नवग्रहाणाम्, पञ्चमेऽश्विनिकुमारादीनामभ्यर्चनमभ्यर्थनञ्च विधाय षष्ठेऽन्हि विजयस्नानमभिषेकञ्च कुर्यात्, ततः सप्तमे यात्रादिवसे त्रिविक्रमं सम्पूज्य देवब्राह्मणादीनामाशिषमादाय जयशब्दं मङ्गलमन्त्रं श्रुत्वा शस्त्रास्त्रं गृहीत्वा गमनं कुर्याद्राजा ।

तथा चाग्निपुराणे -

यात्राविधानपूर्वन्तु वक्ष्ये साङ्ग्रामिकं विधिम् ।
सप्ताहेन यदा यात्रा भविष्यति महीपतेः ।।

पूजनीयो हरिः शम्भुर्मोदकाद्यैर्विनायकः ।
द्वितीयेऽहनि दिक्पालान् संपूज्य शयनञ्चरेत् ।।

शय्यायां वा तदग्रेऽथ ----------------
--------- इति श्रुत्वा नृपो व्रजेत् [2] ।।

प्रयाणे विशेषो नीतिमयूखे -

अन्तःपुराद्वा स्वनिवेशनाद्वा सिंहासनादग्निपरिस्तराद् वा ।
कुर्यान्नरेन्द्रः प्रथमं प्रयाणं विप्रैः शताग्रैः कृतमङ्गलाशीः ।।

----

(१) का० नी० सा० १२।१ । (२) अग्निपुराणम् २३६।१-१८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

द्विजो विष्णुक्रमाद् भूपं मन्त्रेणानेन दापयेत् ।
इदं विष्णुर्विचक्रम इति पादं समुद्धरेत् ॥

अमुकस्य वधाय दक्षिणं क्षितिपो न्यसेत् ।
मङ्गलानि ततः पश्यन् स्पृशन् शृण्वन् नृपो व्रजेत् ॥[१]

यात्रायां शुभाशुभसूचकानि शकुनानि

यात्राकाले दृष्टानि कानिचिद् वस्तुनोष्टसूचकानि कानिचित् भवन्त्यनिष्टसूचकानि, अतः शुभाशुभसूचकत्वेन शकुनानि द्विविधानि । तेषु शुभशकुनानां दर्शनं स्पर्शनं वा विधाय प्रस्थानं कर्तव्यं म गमनकर्तृभिर्महीपालादिभिः । शुभान्यशुभानि च द्विविधान्येव शकुनानि वक्तुकामोऽहमत्र प्रथमं शुभान्येवोपस्थापयामि । तानि यथा - (१) ब्राह्मणा बहवो द्वौ वा न त्वेकः, (२) अश्वः, (३) अनुन्मत्तोहस्ती, (४) फलान्नदुग्धदधीनि, (५) गौः, (६) सर्षपाः, (७) कमलम्, (८) स्वच्छं वस्त्रम्, (९) वेश्या, (१०) मर्दलादिवाद्यविशेषः, (११) मयूरः, (१२) चाषः पक्षिविशेषः, (१३) नकुलः, (१४) रज्ज्वादिबद्धो वृषः, (१५) मांसम्, (१६) कार्यसिद्धिरस्त्वित्यादिसद्वाक्यं, (१७) पुष्पाणि, (१८) इक्षवः, (१९) जलपूर्णकलशः, (२०) छत्रम्, (२१) आर्द्रमृत्तिका, (२२) कुमारी, (२३) मणिमाणिक्यादिरत्नम्, (२४) शिरोवेष्टनम्, (२५) अबद्धोऽपि श्वेतो वृषः, (२६) मद्यं, (२७) पुत्रान्विता

- - - - - - - - - - - - - - - - - -

(१) नी० म० पृ० ६२ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

स्त्री, (२८) जाज्वल्यमानोऽग्निः, (२९) दर्पणः, (३०) अञ्जनम्, (३१) उज्ज्वलीकृतवस्त्रम्, (३२) वस्त्रनिर्णेजकाः, (३३) मत्स्यः, (३४) घृतम्, (३५) देवादेः सिंहासनम्, (३६) पृष्ठाभिलोकरोदनरहितं शवम्, (३७) पताका, (३८) मधु, (३९) छागः, (४०) धनुरादिशस्त्रम्, (४१) गोरोचनम्, (४२) भारद्वाजपक्षी, (४३) सुखासनम्, (४४) ब्राह्मणानामुखान्निःसरन् वेदध्वनिः, (४५) मङ्गलगानम्, (४६) हस्तिनिवारणमस्त्रञ्चैते पदार्थाः गमनकर्तॄणां भूपालादीनां प्रस्थानकाले संमुखं दृश्यमानाः शुभफलदायकाः, तथा स्वानुगो रिक्तो घटोऽपि जलेन भरिष्यमाणत्वात् शुभफलदः । तथा हि मुहूर्तचिन्तामणौ -

विप्राश्वेभफलान्नदुग्धदधिगोसिद्धार्थपद्माम्बरं -
वेश्या वाद्यमयूरचाषनकुला बद्धैकपश्वामिषम् ।
सद्वाक्यं कुसुमेक्षुपूर्णकलशच्छत्राणि मृत्कन्यका-
रत्नोष्णीषसितोक्षमद्यससुतस्त्रीदीप्तवैश्वानराः ।।

आदर्शांजनधौतवस्त्ररजका मीनाज्यसिंहासनं-
शावं रोदनवर्जितं ध्वजमधुच्छागास्त्रगोरोचनम् ।
भारद्वाजनृयानवेदनिनदा मांगल्यगीतांकुशा-
दृष्टाः सत्फलदाः प्रयाससमये रिक्तो घटः स्वानुगः ।।[१]

अशुभशकुनान्यपि तत्रैवोक्तानि यथा -

वन्ध्याचर्मतुषास्थिसर्पलवणांगारेन्धनक्लीबविट्

- - - - - - - - - - - - - - - - - - - -

(१) मु० चि० यात्राप्रकरणम् ९७-९८, अग्निपुराणम् २३०।१०-१३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

तैलोन्मत्तवसौषधारिजटिलप्रव्राट्तृणव्याधिता: ।
नग्नाभ्यक्तविमुक्तकेशपतितव्यंगक्षुधार्ता असृक्
स्त्रीपुष्पं सरठ: स्वगेहदहनं मार्जारयुद्धं क्षुतम् ॥
काषायी गुडतक्रपंकविधवाकुब्जा: कुटुम्बे कलि-
र्वस्त्रादे: स्खलनं तुलायसमरं कृष्णानि धान्यानि च ।
कार्पासं वमनं च गर्दभरवो दक्षेऽतिरुड्गर्भिणी
मुण्डार्द्राम्बरदुर्वचोऽध बधिरोदक्या न दृष्टा: शुभा: ॥[1]

यात्रायां ग्राह्यास्तिथ्यादय:

गमनकाले पन्चाङ्गानां लग्नस्य च विचारोऽवश्यं विधेय:, यतो विशुद्धान्येतानि सत्फलदायकानि, अत एतेषां शुद्धिर्यात्रासमये नितरामपेक्षिता । (१) तिथि:, (२) वार:, (३) नक्षत्रम्, (४) योग:, (५) करणन्चैतानि पन्चाङ्गानि । अङ्गेष्वेतेषु तिथि: प्रथमा, अत्राप्यस्या एव शुद्धि: प्रथमं विचार्यते - शुक्लपक्षप्रतिपच्चतुर्थीषष्ठ्यष्टमीनवमीद्वादशीचतुर्दशीपूर्णिमाऽमावास्या चेतास्तिथयो यात्रायां वर्जिता:। यत: शुक्लपक्षप्रतिपन्निधनप्रदाऽसत्फलप्रदा वा प्रतिपत्सत्यप्युदये चन्द्रस्यातिक्षीणत्वात्, रिक्तातिथयोऽष्टमी च शोकरोगदु:खभयदा:, षष्ठी मृत्युकरी, भूतिनाशिनी शर्महारिणी भीतिदायिनी द्वादशी, विनाशदा पूर्णिमा, अमा यश: क्षयकरी । अत

- - - - - - - - - - - - - - - - -

(१) मु० चि० यात्राप्रकरणम् ९९-१०० ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

एतन्निषिद्धतिथिव्यतिरिक्ता स्थितयो यात्रायां प्रशस्ता:, अर्थात्कृष्णपदा-
प्रतिपाद् द्वितीया,तृतीया,पञ्चमी, सप्तमी, दशम्येकादशी, त्रयोदशी चैता
स्तिथयोऽत्युत्तमा:, यत: प्रतिपत्सिद्धिदा, द्वितीया यशस्करी, तृतीया पञ्चमी
च भूरिधनप्रदा, सप्तमी विजयदा, सर्वदु:खशमनी यशस्करी लाभदा पशुप्रदा
मानार्थकरी विविधशुभप्रदा च दशमी, एकादशी विविधोत्तमवस्तुदा, शत्रुनाशिनी
सुखभोगप्रदा च त्रयोदशी । तथा च --

न षष्ठी न च द्वादशी नाष्टमी नोसिताद्या तिथि: पूर्णिमामा न रिक्ता[1]

---

(१) मुहूर्तचिन्तामणि: यात्राप्रकरणम् ६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

मासभेदेन दिग्भेदेन च तिथयो भवन्ति शुभाशुभफलदाः तत्त्वार्थो निर्दिष्टचक्रेण स्पष्टी क्रियते

पौ०	मा०	फा०	चै०	वै०	ज्ये०	आ०	श्रा०	भा०	आ०	का०	मा०	पूर्वा दिक्	दक्षिणा दिक्	पश्चिमा दिक्	दक्षिणा
१	२	३	४	५	६	७	[illegible]	९ १०	१०	११	१२	सौख्यम्	क्लेशः	भीतिः	अर्थागमः
२	३	४	५	६	७	८	९	१०	११	१२	१	शून्यम्	नैःस्वम्	नैःस्वम्	मित्रता
३	४	५	६	७	८	९	१०	११	१२	१	२	द्रव्यक्लेशः	दुःखम्	कष्टाप्तिः	अर्थप्राप्तिः
४	५	६	७	८	९	१०	११	१२	१	२	३	लाभः	सौख्यम्	मंगलम्	वित्तलाभः
५	६	७	८	९	१०	११	१२	१	२	३	४	लाभः	द्रव्याप्तिः	धनम्	सौख्यम्
६	७	८	९	१०	११	१२	१	२	३	४	५	भीतिः	लाभः	मृत्युः	अर्थागमः
७	८	९	१०	११	१२	१	२	३	४	५	६	लाभः	कष्टम्	द्रव्यलाभः	सुखम्
८	९	१०	११	१२	१	२	३	४	५	६	७	कष्टम्	सौख्यम्	क्लेशाल्लाभः	सुखम्
९	१०	११	१२	१	२	३	४	५	६	७	८	सौख्यम्	लाभः	कार्यसिद्धिः	कष्टम्
१०	११	१२	१	२	३	४	५	६	७	८	९	क्लेशः	कष्टात्सिद्धिः	अर्थप्राप्तिः	धनम्
११	१२	१	२	३	४	५	६	७	८	९	१०	मृत्यु	लाभः	द्रव्यलाभः	शून्यम्
१२	१	२	३	४	५	६	७	८	९	१०	११	शून्यम्	सौख्यम्	मृत्युः	अत्यन्त क[illegible]

CC-0 Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

प्रतिपदादि द्वादश्यन्ता स्तिथय उपर्युक्ता:, अवशिष्टा स्तिस्र स्तृतीयादि तिथिवद् भवन्ति । यथा त्रयोदशी तृतीयावत् चतुर्दशी चतुर्थीवत् पन्चदशी पन्चमीवद्-भवन्तीत्यर्थ: । तथैवोक्तं मुहूर्तचिन्तामणौ यात्राप्रकरणे --

पौषे पक्षात्याद्यिका द्वादशैवं तिथ्यो माघादौ द्वितीयादिकास्ता: ।
... चिस्र: स्युस्तृतीयादि वच्च याने प्राच्यादौ फलं तत्र वक्ष्ये ।।
सौख्यं क्लेशो भीतिरर्थागमश्च शून्यं नै: स्वं नि: स्वता मिश्रता च ।
- - - - - - - - - - - - - शून्यं सौख्यं मृत्युरत्यन्तकष्टम् ।।

विजयादशमीसंज्ञकोमुहूर्त: सिद्धमुहूर्त इति वदन्ति विद्वांस: । आश्विन-शुक्लदशमी विजयादशमीतिनाम्ना प्रसिद्धा, श्रवणर्क्षयुतायामस्यां यदि केश्चिद्यात्रा विधीयते तदा शत्रूणां न पराजयो नाशुभं चार्थात्सर्वथा विजय: शुभलाभश्च । इत्थं काश्चित्तिथय: प्राचीन कालादेव सिद्धमुहूर्तरूपा: सन्ति । उक्तन्च --

इषमासि सिता दशमी विजया शुभकर्मसु सिद्धिकरी कथिता ।
श्रवणर्क्षयुता सुतरां शुभदा नृपतेस्तु गमे जयसंधिकरी[2] ।।

यात्रायां ग्राह्यावाराश्चोच्यन्ते -- सोमबुधगुरुशुक्रवारा गमने प्रशस्ता:, सूर्यभौमशनिवारास्त्वप्रशस्ता: । तथा चोक्तं मुहूर्तचिन्तामणौ: पीयूषधारायाम् --

सुरेज्यदैत्येज्यशशीन्दुजानां वाराश्च वर्गा: शुभदा: प्रयाणे[3] ।+
आदित्यभूसूनुशनैश्चराणां वाराश्च वर्गा न शुभप्रदा: स्यु: ।।

एतेषां फलानि च तत्रैवोक्तानि - आदित्यवारेऽध्वनिनाश:, सोमेशक्तिदायोऽनर्थ-

---

(१) मुहूर्तचिन्तामणि: या० प्र० २०-२३ ।

(२) मु० चि० म० या० प्र० ७४ ।

(३) मु० चि० म० या० प्र० (पीयूषधारा) ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

नाशश्च, भौमेऽसृक्पित्तरोगश्च, बुधे सुहृत्प्राप्ति:, जीवे ज्योधन लाभश्च, शुक्रे स्त्रीवस्त्रगन्धधनलाभ:, शनौ दैन्यवधनबन्धन रोगश्च । इत्थं केचिदाचार्या वारान् वारफलानि च प्रदर्शयन्ति, किन्तु केचित्तु नारदकश्यपाघृणिभिरनुक्त्वाद्यात्रायां वारविचारो न त्वावश्यक: केवलं वारशूलं चिन्तनीयमित्याहु: ।

ग्राह्यनक्षत्राणि - अश्विनी, पुनर्वसु:, अनुराधा, मृग:, पुष्य:, रेवती, हस्ता, श्रवणम्, धनिष्ठा चैतानि नव नक्षत्राणि प्रशस्तानि, यात्रायामुत्तमानीत्यर्थ: । त्रिप्रोत्तरा (उत्तरफाल्गुनी, उत्तराषाढ़ा, उत्तराभाद्रपदा) पूर्वात्रयं (पूर्वाफाल्गुनी, पूर्वाषाढ़ा, पूर्वाभाद्रपदा) शतभिषा, मूलम् ज्येष्ठा, रोहिणी, अभिजिच्चैतान्येकादश नक्षत्राणि मध्यमानि । एतदतिरिक्तानि निकृष्टानि, -निकृष्टनक्षत्रेषु यात्रा निषिद्धा । उत्तममध्यमेष्वपि शूलमवश्यत्याज्यम् । तथा च वसिष्ठ: --

पौष्णाश्व्यादित्यकरेज्यमित्रमिंदुर्हरीवासवभानि यानि । (१)
श्रेष्ठानि यात्रासु नवैव तानि मुक्त्वा त्रिपं चादिमसप्तमानि ।।

यात्रायां वारशूलं नक्षत्रमूलन्च चिन्तनीयम् । तच्च विवृतं मुहूर्तचिन्तामणौ --

न पूर्वदिशि शक्रभे न विधुसौरिवारे तथा
न चाजपदभे गुरौ यमदिशीनदैत्येज्ययो: ।
न पाशिदिशि धातृभे कुजबुधेऽर्यमर्क्षे तथा
न सौम्यककुभि व्रजेत्स्वजयजीवितार्थी बुध: ।। (२)

सोमशनिवारयो-र्ज्येष्ठनक्षत्रेऽपि पूर्वदिशि न गच्छेत् । गुरुवारे पूर्वा-

---

(१) पीयूषधारा (मु०चि०म०या० प्र० ६) ।

(२) मु० चि० म० या० प्र० १० ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

भाद्रपदानक्षत्रेऽपि दक्षिणदिशि, रविशुक्रवारयो रोहिण्यान्च पश्चिमदिशि, मंगलबुधवारयो उत्तराफाल्गुन्यां चोत्तरदिशि न व्रजेत् स्वजयजीवितार्थी राजा जनो वा । गच्छतश्च राज्ञः पुंसो वा धननाशः पराजयो मरणं वा भवेदिति । तथा चाणवाक्यम् --

शूलसंज्ञानि धिष्ण्यानि शूलसंज्ञाश्च वासराः ।
यायिनां मृत्युदाः शीघ्रमथवा चार्थहानिदाः ।।

शूलदोषपरिहारार्थं दोहदा विचारणीयाः । ते च तिथिवारादीनां पृथक् पृथक् भवन्ति ।

तिथिदोहदाः - प्रतिपदादि पन्चदशतिथिषु क्रमेण तिथिदोहदं मुक्त्वा यात्रां कुर्यात् । यथा (१) प्रतिपदि - अर्कपत्रम्, (२) द्वितीयायां तंदुल-जलम्, (३) तृतीयायां घृतम्, (४) चतुर्थ्यां यवागूः, (५) पन्चम्यां मुद्गादि हविष्यम्, (६) षष्ठ्यां प्रक्षालितसुवर्णजलम्, (७) सप्तम्यामपूपम्, (८) अष्टम्यां बीजपूरफलम् 'फलपूरो बीजपूरो रुचको मातुलिंगके' इत्यमरः, (९) नवम्यां जलम्, (१०) दशम्यां गोमूत्रम्, (११) एकादश्यां यवान्नम्, (१२) द्वादश्यां पायसम्, (१३) त्रयोदश्यां गुडम्, (१४) चतुर्दश्यां रुधिरम्, (१५) पन्चदश्यां मुद्गमिश्रित-मोदनम् । वारशूलपरिहारमाहबृहस्पतिः --

सूर्यवारे घृतं प्राश्यं चन्द्रवारे पयस्तथा ।
गुडमङ्गारके वारे बुधवारे तिलानपि ।।
गुरुवारे दधि प्राश्यं शुक्रवारे यवानपि ।
माषान् मुक्त्वा शनिवारे शूले गच्छन्न दोषभाक् ।।[1]

---

(१) पीयूषधारा (मु० चि० या० प्र० ८४) ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

नक्षत्रदोहदाः - (१) अश्विन्यामन्नतस्विन्नमाषान्, (२) भरण्यां तिलमिश्रतण्डुलान्, (३) कृत्तिकायां माषान्, (४) रोहिण्यां दधि, (५) मृगे घृतम्, (६) आर्द्रायां दुग्धम्, (७) पुनर्वसौ हरिणमांसम्, (८) पुष्ये मृगस्य रुधिरम्, (९) अश्लेषायां पायसम्, (१०) मघायां चाषपक्षिणो मांसम्, (११) पूर्वाफाल्गुन्यां मृगमांसम्, (१२) उत्तराफाल्गुन्यां शशस्यमांसम्, (१३) हस्ते षाष्टिक्यम्, (१४) चित्रायां प्रियंगुः, (१५) स्वात्यामपूपम्, (१६) विशाखायां चित्रवर्णान्पक्षिणः, (१७) अनुराधायामाम्राद्युत्तमफलम्, (१८) ज्येष्ठायां कच्छपमांसम्, (१९) मूले सारिकायाः पक्षिण्या मांसम्, (२०) पूर्वाषाढायां गोधाया मांसम्, (२१) उत्तराषाढायां शल्यपक्षिणो मांसम्, (२२) अभिजिति हविष्यम्, (२३) श्रवणे कृसरान्नं (खिचड़ी), (२४) धनिष्ठायां मुद्गमिश्रितमन्नम् (२५) शतभे यवपिष्टम्, (२६) पूर्वभाद्रपदायां मत्स्यौदनम्, (२७) उत्तराभाद्रपदायां विविधान्नमिश्रितमोदनम्, (२८) रेवत्यां दध्योदनश्चैते दोहदाः कथिताः । एतेषु वर्णभेदेन देशभेदेन वा भक्ष्या भक्ष्यं विचार्य भक्ष्यसम्भवे भक्षयेत्, अभक्ष्ये सति पश्येत् स्पृशेद् वा ।

दिग्दोहदाः - पूर्वस्यां दिशि घृतम्, दक्षिणस्यां तिलमिश्रौदनम्, पश्चिमायां मत्स्यम्, उत्तरस्यां दुग्धं भुक्त्वा गच्छेत् । पदार्थानितान् पूर्वादिकामाशां यथाक्रमं भुक्त्वा गच्छन्पुमान् सिद्धिमाप्नोति । उक्तञ्च --

आज्यं तिलौदनं मत्स्यं पयश्चापि यथाक्रमम् ।
भक्षयेद्दोहदं दिश्यमाशां पूर्वादिकां व्रजेत् ॥[1]

संमुखवामगायोगिनी न शस्ता, अतो यात्रायां तस्या अपि विचारः कर्तव्यः

---

(१) मुहूर्तचिन्तामणिः याज्ञवल्क्यप्रकरणम् ८३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

यथा पूर्वस्यां नवमी प्रतिपच्च, आग्नेय्यामेकादशीतृतीया च, दक्षिणस्यां त्रयोदशी पञ्चमी च, नैर्ऋत्यां द्वादशी चतुर्थी च, पश्चिमायां चतुर्दशी षष्ठी च, वायव्यां पूर्णिमा सप्तमी च, उत्तरस्यां दशमी द्वितीया च, ऐशान्याममावास्याष्टमी च, एतास्तिथयस्तत्तद्दिक्षु योगिन्याख्याः । प्राच्यां गन्तुः प्रतिपत्संमुखी दक्षिणस्यां गन्तुः सा वामा पश्चिमायां गन्तुः पृष्ठगा उत्तरस्यां गन्तुर्दक्षिणा । एवमेव सर्वासु दिक्षु सर्वास्तिथयो विचार्याः, यदि प्रस्थानकाले तिथयः संमुख्यो वामगाश्च भवन्ति तदा ता न शुभाः, अर्थाद्दक्षिणाः पृष्ठगाश्च शुभावहाः । तथा च पीयूषधारा-याम् --

पृष्ठतो दक्षिणे वापि योगिनी गमने हिता ।
वामसंमुखयो नेष्टा वायुमेवं विचिन्तयेत्[1] ॥

यात्रायां घाता स्तिथिवारादयो भवन्ति वर्ज्याः, तस्मात्तेोपस्थाप्यन्ते । घाता स्तिथयः - वृषःकन्या मीनश्चैवद्राशिमतां पुरुषाणां पूर्णातिथिः (पञ्चमी-दशमीपूर्णिमा) घाततिथिः । मिथुनं कर्कटश्चानयोर्भद्रातिथिः (द्वितीयासप्तमीद्वादशी) घाततिथिः । मेषोवृश्चिकश्चैतयोर्नन्दातिथिः (प्रतिपत्षष्ठ्येकादशी) घाततिथिः । मे मकरतुलयोरिक्ता(चतुर्थी नवमी चतुर्दशी) धनकुम्भसिंहानां जया (तृतीयाष्टमीत्रयोदशी) घाततिथिः । एता घातातिथयो यात्रायां न शस्ताः ।

घातवाराः - मकरराशिमतः पुरुषस्य भौमो वारो घातः, वृषसिंह-कन्यानां शनिवारः, मिथुनस्य सोमवारः, मेषस्यादित्यवारः, कर्कस्य बुधवारः, धनवृश्चिकमीनानां शुक्रवारः, तुलाकुम्भयोर्गुरुर्घातवारः, एते घातवारायात्रायां न

---

(१) पीयूषधारा (मुहूर्तचिन्तामणिः यात्राप्रकरणम् ३१) ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

न शस्ता:, अतोऽवश्यं त्याज्या: ।

घातनक्षत्राणि यथा - मेषस्य मघा, वृषस्य हस्त:, मिथुनस्य स्वाती, कर्कस्यानुराधा, सिंहस्य मूलम्, कन्याया: श्रवण:, तुलाया: शतभिषा, वृश्चिकस्य रेवती, धनुषो भरणी, मकरस्य रोहिणी, कुंभस्यार्द्रा, मीनस्याश्लेषा, एतानि घातनक्षत्राणि यात्रायां न शोभनानि ।

घातचन्द्र: - मेषराशिमत: पुरुषस्य मेषस्थ एव चन्द्रो घात:, वृषस्य कन्यास्थ:, मिथुनस्य कुंभस्थ:, कर्कस्य सिंहस्थ:, सिंहस्य मकरस्थ:, कन्याया मिथुनस्थ:, तुलाया धनुस्थ:, वृश्चिकस्य वृषस्थ:, धनुषो मीनस्थ:, मकरस्य सिंहस्थ:, कुंभस्य धनुस्थ:, मीनस्य कुंभस्थश्चैते घातचन्द्रा ज्ञेया: । चन्द्राश्चैते यात्रादौ वर्ज्या: विवाहान्नप्राशनादि मङ्गलकृत्येषु त्ववर्ज्या: । घातलग्नान्याहरामज्योतिर्वित् --

भूमिषड्व्यब्धिदिक्सूर्याङ्गाष्टाङ्केशाग्निसायका: ।[1]
मेषादिघातलग्नानियात्रायां वर्जयेत्सुधी: ।।

राज्ञो यात्रायांसंमुखशुक्रदोष: -

शुक्र: प्रकारत्रयेण भवति संमुख: - प्राच्यां प्रतीच्यां वा यस्यां दिशि शुक्र उदेति तत्र गन्तु: स संमुख:, इत्येक: प्रकार: । अथवा उत्तरदक्षिणगोलभ्रमणवशेनो-त्तरस्यां दक्षिणस्यां वा यस्यां दिशि गच्छति तत्र गन्तु: संमुख: शुक्र:, द्वितीयोऽयं प्रकार: । प्राच्यादिदिशि कृत्तिकादिनक्षत्रन्यासवशेन यद्दिङ्नक्षत्रे याति तत्र गन्तु: शुक्र: संमुखो भवेत् अयं तृतीय: प्रकार: । तच्चोक्तम् --

यद्दिङ्गत: समुदयेद्विचरेद्यत्र गोलके ।[2]
यद्वारभेषु विचरेत् त्रिविधं प्रतिभार्गवम् ।।

---

(१) मु० चि० या० प्र० ३२ । (२) पीयूषधारा (मु०चि०या०प्र० ३७) ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

इत्थं प्रकारत्रयेण संमुखत्वाच्छुक्रो यस्यां दिश्युदितः स्यात्तां दिशं न यायाद्राजा। पुनः शुक्रो वक्रोपगतोऽस्तोपगतो वा स्यात्तदापि यात्रां न कुर्यात् करोतिचेन्निश्चयेन शत्रुवशं याति, शत्रुभिर्निबद्धो भवतीत्यर्थः। शुक्रः संमुखश्चेदपि रेवतीनक्षत्रादारभ्य कृत्तिकायाः प्रथमचरणे यावच्चन्द्रस्तिष्ठति तावच्छुक्रोऽन्धो ज्ञेयः, अर्थाद् दृष्टोऽपि दर्शनकार्यं न करोति। तस्यामवस्थायां यात्रा शुभा, अर्थान्न शुक्रसंमुखदोषः। तथा च पीयूषधारायां पराशरः -

> पौष्णादिवह्निभागाङ्घ्रिं यावत्तिष्ठति चन्द्रमाः ।
> तावच्छुक्रो भवेदन्धः संमुखे गमनं हितम् ॥

इत्थं दिनशुद्धिरभिहिता अतः परं लग्नशुद्धिमुच्यते - यात्रायां कुम्भः कुम्भांशकस्तथा मीनोमीनांशकश्च सर्वथा त्याज्यः एवं स्वस्य जन्मराशेर्जन्मलग्नाच्चाष्टमं लग्नं च त्याज्यम्। लालाटिक योगोऽपिनिषिद्धः। प्राच्याद्यष्टदिक्षु क्रमेण लग्नादिषु भावेषु सूर्यादिग्रहस्थित्या लालाटिका भवन्ति यथा -- यदा सूर्यो लग्नस्थो भवेत्तदा प्राच्यां गन्तुर्लालाटिकः, शुक्रो यदि एकादशद्वादशस्थानस्थो भवेत्तदाऽऽग्नेय्याम्, दशमस्थो भौमो दक्षिणस्याम्, अष्टमनवमस्थो राहुर्नैरृत्याम्, पश्चिमायां सप्तमस्थः शनिः, चन्द्रो यदि षष्ठपञ्चमस्थस्तदा वायव्याम्, चतुर्थस्थानस्थो बुध उत्तरस्याम्, बृहस्पतिर्यदि द्वितीयतृतीयस्थानस्थितो भवेत्तदा ईशान्यां भवति गन्तुर्लालाटिकः। एतान्यशुभलग्नानि विहाय शुभलग्नेषु यात्रा विधेया। तद्यथा --

> केन्द्रकोणे सौम्यखेटाः शुभाः स्युर्नो पापास्त्र्यायषट्केषु चन्द्रः
> नेष्टो लग्नात्सारिरिःफे शनिः खेऽस्ते शुक्रो लग्नेणनगांत्यारिरिःफे

---

(१) पी० धा० (मु०चि०या०प्र० ३६) । (२) मु० चि० या० प्र० ५३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

अस्यार्थः - लग्नचतुर्थसप्तमदशमस्थानानि केन्द्राणि, नवमं पञ्चमपञ्च स्थानं कोणसंज्ञकम्। यदि शुभग्रहाः केन्द्रगाः कोणगा वा भवेयुस्तदा ते शुभफलदाः स्युः। पापग्रहास्तृतीयैकादशषष्ठदशमस्थानस्थाः शुभफलदाः। लग्नद्वादश-षष्ठाष्टमस्थानादतिरिक्त स्थानगश्चन्द्रः शस्तः। दशमस्थानं विहायान्यस्थानस्थः शनिः शुभः। सप्तमस्थः शुक्रोनेष्टः, अन्यभागगतास्त्विष्टफलदः। लग्नमेतद्विधं विजयप्रदम्। विजयप्रदान्यन्यान्यपि लग्नानि यथा --

राशिः स्वजन्मसमये शुभसंयुतो यो
य: स्वारिभान्निधनगोऽपि च वेशिसंज्ञः ।
लग्नोपगः स गमने जयदोऽथ भूप-
योगैर्गमो विजयदो मुनिभिः प्रदिष्टः[१] ॥

विशेषतो यात्रायां दिग्द्वारलग्नानि प्रशस्तानि। मेषाद्याराशयः क्रमेण पूर्वादिदिक्षु दिग्द्वारसंज्ञकाः। यथा मेषः सिंहो धनुश्चैतानि लग्नानि पूर्वस्याम्, मकरोवृषःकन्या चैतानि दक्षिणस्याम्, मिथुनस्तुलाकुंभश्चैतानि पश्चिमायाम्, कर्कटोवृश्चिकोमीनश्चैतानि लग्नान्युत्तरस्यां दिशि ध्येयानि। सर्वाण्येतानि दिग्द्वारलग्नानि तत्र तद्दिग्यातुर्यथार्थादीप्सितफलदायकानि, तस्माद्यथा-संभवं गन्तव्यदिगवस्थितेषु लग्नेष्वेव प्रस्थानं कर्तव्यम्। विपरीतदिगवस्थितेलग्नेऽर्थात् पश्चिमायां मेषः, उत्तरस्यां वृषः, पूर्वस्यां मिथुनः, दक्षिणस्यां कर्कः, एवमेवान्ये राशयश्च ज्ञेयाः। एतादृशे दिक् प्रतिलोमलग्ने गन्तुर्यात्राहानिदा भयदा च। तथाहि मुहूर्तचिन्तामणौ यात्राप्रकरणे --

---

(१) मुहूर्तचिन्तामणिः यात्राप्रकरणम् श्लो ४५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

दिग्द्वारभे लग्नगते प्रशस्ता यात्रार्थदात्री जयकारिणी च ।
हानिं विनाशं रिपुतो भयं च कुर्यात्तथा दिक्प्रतिलोमलग्ने[1] ॥

यात्रा च द्विविधा - एका साधारणयात्रा, अपरा असाधारणयात्रा समरविजया [illegible]या । सामान्यावस्थायां विधीयमाना साधारणयात्रा सा तु वर्णचतुष्टयानां साधारणी, तस्यां पञ्चाङ्गलग्नादीनां सर्वेषां शुद्धिरनिवार्या । विशेषपरिस्थितौ क्रियमाणा यात्रा असाधारणरूपा, अस्यां ब्राह्मणानां कृते केवलं नक्षत्रबलं विचारणीयम् । क्षत्रियाणामर्थाद्राज्ञां कृते तु लग्नशुद्धिः कर्तव्या, अर्थात्प्रबलं शुभं वा शुभलग्नं विचारणीयम् । शुभलग्ने सति तिथ्यादि पञ्चाङ्गानां शुद्धिर्नापेक्षिता, केवलेन लग्नप्राबल्येनैव युद्धादौ विजयमाप्नुवन्ति राजानः । तच्चोक्तं वसिष्ठेन --

व्रजन्ति ये नृपाः शुभे लग्ने ते जयिनः सदा[2] ।

---

(१) मुहूर्तचिन्तामणिः यात्राप्रकरणम् ४४ ।

(२) पी० धा० (मुहूर्तचिन्तामणिः यात्राप्रकरणम् ५४) ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

चतुर्थपरिच्छेदः

कोशव्यवस्था

कोशस्य स्वरूपं महत्वञ्च

संगूढानां रत्नकनकधनधान्यरजतादीनां समुदयः कोशः । राज्यस्याशेषाङ्गसञ्चालने मूलाधारविशेषोऽयम् । अस्याभावे राज्याभावः । सम्पत्तौ विपत्तौ च स्वामिनो राज्यस्य वा सैन्यादि सर्वाङ्गपरिपुष्टकरोऽयम् । अस्मादेव धर्मार्थकामाख्यानां पुरुषार्थानां सिद्धिः । यस्य भूपतेः सातिशयहिरण्यादिव्यापृतकोशोऽस्ति तस्य शत्रवोऽपि मित्ररूपा जायन्ते । अतो यत्नतः कोशवृद्धिं वृद्धिं गतस्यास्य संरक्षणमपि कुर्याद्राजा ।

कोशश्च सततं रक्ष्यो यत्नमास्थाय राजभिः ।
कोशमूला हि राजानः कोशो वृद्धिकरो भवेत् ।।[1]

तथा च कामन्दकोऽपि --

सेतुबन्धवणिक्कर्म प्रजामित्रपरिग्रहः ।
धर्मकामार्थसिद्धिश्च कोशादेतत्प्रवर्तते ।।
क्षीणं बलं वर्द्धयति स्वतो गृह्णाति च प्रजाः ।
कोशवान् पृथिवी पालः परैरप्युपजीव्यते ।।[2]

---

(१) शान्ति० ११९।१६ ; (२) का०नी०सा० १३।३२, ३४ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

एवन्च नीतिवाक्यामृतेऽपि --

यो विपदि संपदि च स्वामिन स्तन्त्राभ्युदयं
कोशयति संश्लेषयति स कोश: [१] ।

स्वराज्यसम्बद्धं परराष्ट्रसम्बद्धं वा यत्किमपि कार्यं धनाभावे न तु सिद्धमत: सर्वविध कार्यस्य मूलमेतदेव, तस्मादस्य प्राप्त्यां निरन्तरं प्रयत्नशीलोभवेद्राजेत्याह कौटिल्योऽपि --

कोशपूर्वा: सर्वारम्भा:, तस्मात्पूर्वं कोशमवेक्षेत [२] ।

मनुयाज्ञवल्क्यादयोऽपि कोशस्यात्यन्तं महत्वं प्रदर्शयन्ति - प्रत्यहं कोशोऽवेक्षणीयो राज्ञा, अन्यत्कार्यममात्यादिभिरपि सम्पाद्यं कोशस्तु नान्यै: सन्चालनीय:, कोशस्यायव्यययोश्च निरीक्षणं केवलं राज्ञैव कर्तव्यंमहत्वपूर्णकार्यत्वात् । तद्यथा --

कृतरक्ष: समुत्थाय पश्येदायव्ययौ स्वयम् [३] ।

अन्यच्च -- नृपतौ कोशराष्ट्रे च दूते सन्धि विपर्ययौ [४] ।

अपरन्च -- उत्थाय पश्चिमे यामे मुहूर्तद्वितयेन वै [५] ।
नियतायश्च कत्यस्ति व्ययश्च नियत: कति ।
कोशभूतस्य द्रव्यस्य व्यय: कतिगतस्तथा ।
व्यवहारे मुद्रितायव्ययशेषं कतीति च ।।
प्रत्यक्षतो लेखतश्च ज्ञात्वा चाद्य व्यय: कति ।

---

(१) नीतिवाक्यामृतम् (कोशसमुद्देश:) । (२) कौटलीयार्थशास्त्रम् २।८ ।
(३) याज्ञवल्क्यस्मृति: १।३२७ । (४) मनुस्मृति: ७।६५ ।
(५) शुक्रनीति: १।२७६-२७८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

भविष्यति च तत्तुल्यं द्रव्यं कोशात् निर्हरेत् ।।

यथाऽदन्तविषधरस्य विषाणहीनवृषस्य च नैवप्रयोजनमथार्ययोरभावे तौ शक्तिहीनौ जायेते तथैवार्थेन कार्यकर्तृभिश्च रहितो राजा निर्बलो जायते भवति परपीडितश्च, अतः शक्त्यभिवृद्ध्यर्थं कोशस्योन्नतिं कुर्यात् । तथा च नारदः --

दंष्ट्राविरहितसर्पो भग्नशृङ्गोऽथवावृषः ।
तथा वैरी परिज्ञेयो यस्य नार्थो न सेवकाः[1] ।।

नीतिवाक्यामृतेऽपि - यतः सर्वप्रयोजन सिद्धिः सोऽर्थः ।

अर्थः = कोशः, सोऽर्थ नृपतेः शरीररूपो राष्ट्रस्य प्राणरूपश्च, अस्याभावे न जीवति राजा राज्यं च । यो धनधान्येन परिपूर्णः स सर्वोत्कर्षेण वर्तते योऽधनः स पत्नीपुत्रैश्च परित्याज्यः किं पुनरन्यैः । न महाकुलेन शिष्टाचारेण धर्मेण च मानवो माननीयः । मनुष्यस्तु केवलं धनेनैव सर्वेषां पूज्यः सेव्यश्च । स एव महान् कुलीनश्च यस्यास्ति प्रभूतं धनम् । न महत्या कुलीनतया वापरेजना भवन्ति सन्तुष्टा स्ते तु धनमेवाभिलषन्ति । यथा न जलहीन जलाशयस्य महत्वं तथैव धनहीन राज्ञोऽपि, अत एव धनोपार्जनं कर्तव्यं राज्ञा । तथा च --

"कोशो हि भूपतीनां जीवितं न प्राणाः । यस्य हस्ते द्रव्यं स जयति । धनहीनः कलत्रेणापि परित्यज्यते किं पुनरन्यैः । न खलु कुलाचाराभ्यां पुरुषः सेव्यतामेति । तस्य किंसरसो महत्वेन यत्र न जलानि ।[2]

अतो राज्ञो राष्ट्रस्य चोन्नत्यर्थं कोशः पूर्णो विधेयः । क्षीणकोशो हि

---

(१) नारदस्मृतिः । (२) नीतिवाक्यामृतम् (कोशसमुद्देशः)
५, ८, ९ १०, १३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

राजा पौरजानपदानन्यायेन ग्रसते, अन्यायग्रसिताभ्यः प्रजाभ्यो देशे विविधोपद्रवा जायन्ते, सर्वत्राशान्तं वातावरणं समुत्पतति, राष्ट्रं शून्यतामेति । एतत्सर्वमुपद्रवादिकं बाधकतत्त्वमपसार्योन्नितराष्ट्रस्य कृते साधकतत्त्वसर्जनार्थं केवलं गुणवान्कोश एव समर्थः, यः कोशः सुवर्णरत्नादिभिः परिपूर्णः स गुणवान् प्रोक्तः । तथा च बृहस्पतिः --

आपत्काले तु सम्प्राप्ते बहुव्यय सहक्षम: ।
हिरण्यादिभिः संयुक्तः स कोशो गुणवान् स्मृतः[1] ।।

तथा च नीतिवाक्यामृतेऽपि --

सातिशयहिरण्यरजतप्रायो व्यावहारिक पिण्याक-
बहुलो महापदि व्ययसहश्चेति कोशगुणाः[2] ।

कोशस्योत्पत्तिः -

अत्र उत्पत्तिना सहैव कोशस्योत्पत्तिर्दृश्यते यथा - पुरा न राज्यं न तु राजैव सर्वत्र पूर्णतायाः स्थितिरासीत् । किन्तु कालक्रमेण दुष्टजनानामाधिक्यं जातम् । तेषां बहुलतया लोके मात्स्यन्यायः समुद्भूतः, तस्माज्जनेषु शासकस्यावश्यकतायाः अनुभवो जातः । तदेकत्रितेन जनसमाजेनैकमत्येन राजपदेमनोर्निर्वाचनं कृतम् । किन्तु कोशस्याभावे राज्यसञ्चालनमसम्भवमिति मत्वा तत्पदमस्वीकृतं मनुना । राजपदास्वीकारकारणं ज्ञात्वा प्रजाभिश्च मनोर्भावनानुरूपः कोशः स्थापितः । कोशस्य कृते धान्यषष्ठांशपण्यदशमांस सुवर्णक्रियदंशदानस्य प्रतिज्ञापि

---

(१) बृहस्पतिस्मृतिः ।

(२) नीतिवाक्यामृतम् (कोशसमुद्देशः) ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

कृता । तथा कौटिल्यार्थशास्त्रे --

धान्यषड्भागं पण्यदशभागं हिरण्यं चास्यभागधेयं कल्पयामासुः[1] ।

कोशस्थापनार्थं पशूनां कनकस्य च पञ्चाशत्तम भागदानस्य धान्यस्य दशमभागप्रदानस्य च निश्चयः कृतः प्रजाजनैरित्याह महाभारतकारस्तु --

पशूनामधिपञ्चाशद्धिरण्यस्य तथैव च[2] ।
धान्यस्य दशमं भागं दास्यामः कोशवर्धनम् ।।

कोशस्थापितत्वान्मनुनापि दत्तं राजपदं स्वीकृत्य राज्यसञ्चालनारम्भः कृतः । इत्थं जनसमाजेन राज्ञः कोशस्य च स्थापनं सहैव कृतम् ।

करग्रहणस्य प्रथमसिद्धान्तः -

पूर्णकोशो ह्यापत्स्वपि राज्यरक्षणसमर्थः, अतः कोशो द्रव्यादिभिः परिपूर्णो विधेयः । तथा च --

कोशवृद्धिः सदा कार्या नैव हानिः कथञ्चन ।
आपत्काले हते प्राज्ञैर्यत्कोशो राज्यरक्षकः[3] ।।

कोशवृद्धेः प्रमुखाधारविशेषः करग्रहणम् । शास्त्रोक्तकरो ग्राह्यः । सामान्यपरिस्थितौ करपरिवर्तनमशक्यमर्थात् सर्वकारः स्वेच्छया शास्त्रनिर्धारितादतिरिक्तं करग्रहणं न शक्नोति । शास्त्रविहितकरस्त्वशक्तेनाप्येनकेनाप्युपायेनापि देयः । देशकालपरिस्थितिवर्णवर्गवस्तुमूल्यादीनामाधार एव करग्रहणनियमाः प्रयुज्यन्ते । दुर्भिक्षाद्यापदि दैवी प्रकोपे चान्ये विकल्पाः सन्ति शास्त्रदर्शिताः ।

---

(१) कौटलीयार्थशास्त्रम् १।१३ । (२) शान्ति० ६७।२३ ।
(३) वशिष्ठः । (४) मनुस्मृतिः

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

विशेषनियमास्तु प्रसङ्गानुसारमुपस्थाप्यन्ते, किन्त्विदानीन्तु सामान्यसिद्धान्तो दीयते । यथा मनुस्मृतौ --

पञ्चाशद्भाग आदेयो राज्ञा पशुहिरण्ययोः ।
धान्यानामष्टमो भागः षष्ठो द्वादश एव वा[1] ।।

तथा च गौतमः --

राज्ञो बलिदानं कर्षकैर्दशममष्टमं षष्ठं वा ।
पशुहिरण्ययोरप्येके पञ्चाशद्भागः[2] ।

अस्यायं भावः - पशुसुवर्णयोर्मूलादधिकयोः पञ्चाशद्भागः, अर्थात् यस्य पञ्चाशत्पशवः सन्ति स प्रतिसम्वत्सरमेकं पशुं राज्ञे दद्यात् । यस्य वा पञ्चाशन्निष्कवृद्धिप्रयोगः स प्रतिसम्वत्सरमेकैकं निष्कं राज्ञेकर रूपेण दद्यादिति । धान्यानान्तु षष्ठोऽष्टमो द्वादशो वा भागो ग्राह्यः । भूम्युत्कर्षापेक्षया कर्षणादि कष्टन्यूनाधिकापेक्षश्चायं बह्वल्प ग्रहण विकल्पः । नृपः स्वयमेवापन्नग्नस्तदा धान्यादीनां चतुर्थांशग्रहणं तृतीयांशग्रहणं वा कुर्यात् । स्वशक्त्यनुसारं प्रजारक्षन्राजा त्वनाधिक्यग्रहणपापेन लिप्यते । तथा च मनुस्मृतौ --

चतुर्थमाददानोऽपि क्षत्रियो भागमापदि ।
प्रजारक्षन्परं शक्त्या किल्बिषात्प्रतिमुच्यते[3] ।।

कौटिल्यस्तुर्वरायां भूमौ प्रभूतधान्योत्पन्नेऽब्दे धान्यस्य तृतीयश्चतुर्थांशो वा ग्राह्यो न तु राज्ञ आपदीत्याह --

प्रभूत धान्यं धान्यस्यांशं तृतीयं चतुर्थं वा याचेत[4] ।

---

(१) मनुस्मृतिः ७।१३० । (२) गौतमधर्मसूत्रम्, २।१।२४-२५ ।
(३) मनुस्मृतिः १०।११८ । (४) कौटलीयार्थशास्त्रम् ५।२ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

मांसमधुघृतचन्दनौषधिलवणादिरसपुष्पफलपत्रशाकवंशप्रस्तरमृद्भाण्डादीनां करः षष्ठांश १।६ । हस्तिदन्तचर्मणोरर्धांशः १।२ । सुवर्णरजतमणिमाणिक्यादीनां बहुमूल्यरत्नानां चार्धांशः १।२ । हस्त्यश्वादीनां पशूनां चाप्यर्धांशः १।२ । सूत्रवस्त्रताम्रपत्त्रकंसुगन्धिगन्ध्यमद्यानां चत्वारिंशदंशः १।४० । तैलादीनां रसधातूनां लौहस्य च त्रिंशदंशः १।३० । काचादीनां विंशत्यंशः १।२० । कुक्कुरसूकरयोरर्धांशः १।२ । अजमेषादीनां क्षुद्रपशूनां षष्ठांशः १।६ गोमहिषाश्वतरखरोष्ट्राणां १।१० दशमांशो ग्राह्यः । तथा च मनुः --

आददीताथ षड्भागं द्रुमांस मधुसर्पिषाम् ।
गन्धौषधि रसानां च पुष्पमूलफलस्य च ॥
पत्रशाकतृणानां च ज चर्मणां वैदलस्य च ।
मृन्मयानां च भाण्डानां सर्वस्याश्ममयस्य च ॥

तथा च गौतमधर्मसूत्रेऽपि --

मूलफलपुष्पौषधमधुमांसतृणेन्धनानां षष्ठः[1] ।

विष्णुस्मृतावपि -- मांसमधुघृतौ[2]षधिगन्धपुष्पमूलफलरसदारुपत्राजिनमृद्भाण्डाश्मभाण्डवैदलेभ्यः षष्ठभागम् ।

द्वितीयसिद्धान्तः -

कथं प्रजास्वधिकभारस्यानुभवो न स्यात् । कथं करप्रदानकालेऽपि न कस्यापि कठिनताया बोधो भवेदित्यादिकं विचार्य करग्रहणं कार्यम् । अर्थात् शास्त्रोक्तकर-

---

(१) गौतमधर्मसूत्रम् २।१।२७ । (२) विष्णुस्मृतिः ३।२५ कौ० २।५

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

प्रजाभ्यो वृद्धिर्निकायां स्वल्पांशो ग्रहीतव्य इत्यस्याशयः । यथा - मधुकरः पुष्पाणि संरक्षन् पुष्परसमादत्ते तद्वद्राजा प्रजारक्षणकरग्रहणं कुर्यात् । पुनर्यथा मालाकार उपवनं गत्वा पुष्पं पुष्पं विचिनोति न मूलं छिनत्ति तथैव प्रजाभ्यः करो ग्राह्यः, नाङ्गारकारसदृशो भवेद्राजा । तथा च महाभारते --

यथा मधु समादत्ते रक्षन्पुष्पाणि षट्पदः ।
तद्वदर्थान्मनुष्येभ्य आदद्यादविहिंसया ।।

पुष्पं पुष्पं विचिन्वीत मूलच्छेदं न कारयेत् ।
मालाकार इवारामे न यथाङ्गारकारकः ।।[1]

पराशरस्मृतावपि --

पुष्पं पुष्पं विचिनुयान्मूलच्छेदं न कारयेत् ।
मालाकार इवारामे न यथाङ्गारकारकः ।।[2]

अस्यायमर्थः - राजा तत् तत्कालोपपन्नानां व्रीह्यादीनां केवलं स्वांशं (अल्पांशं) गृह्णीयान्नत्वत्यन्तापहारं कुर्यात् । यथा मालाकार उपवने सदा यत्पुष्पं विकसति तत् तद्विचिनोति न मूलं छिनत्ति, अङ्गारककारो वृक्षं समूलमुन्मूल्य दहति न तथा स्यादिति । एवं मनुस्मृतावपि --

यथाल्पाल्पमदन्त्याद्यं वार्योकोवत्सषट्पदाः ।
तथाल्पाल्पो ग्रहीतव्यो राष्ट्राद्राज्ञाब्दिकः करः ।।[3]

अयं भावः - जलौकोवत्समधुकरा स्तोकं स्तोकं रक्तक्षीरमधून्यदन्त्येवं राजापि

---

(१) उद्योगपर्व ३४।१७-१८ ।

(२) पराशरस्मृतिः १।६२ ।

(३) मनुस्मृतिः ७।१२९ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

मूलधनमनुच्छिद्याल्पोऽल्पो राष्ट्राद्वार्षिककरो ग्राह्य: । शान्तिपर्वाध्यायेऽपि --

मधुदोहं दुहेद्राष्ट्रं भ्रमरा इव पादपम् ।
वत्सापेक्षी दुहेच्चैव स्तनांश्च न विकुट्टयेत्[1]
जलौकावत्पिबेद्राष्ट्रं मृदुनैव नराधिप: ।
व्याघ्रीव च हरेत्पुत्रान्संदशेन्न च पीडयेत् ।।
यथा शल्यकवानाखु: पदं धूनयते सदा ।
अतीक्ष्णेनाभ्युपायेन तथा राष्ट्रं समापिबेत् ।।

तृतीयसिद्धान्त: -

पूर्वं पूर्वमल्पोऽल्प: करो ग्राह्य:, तत: शनै: शनैर्वृद्धिमाचरेत् । यया वृद्धया प्रजास्वेकस्मिन्समयेऽधिकभारो न स्यात् । तथा च --

अल्पेनाल्पेन देयेन वर्धमानं प्रदापयेत् ।
ततो भूयस्ततो भूय: क्रमवृद्धिं समाचरेत्[2] ।।

करग्रहणं न चास्थाने नाकाले च, यथास्समये विध्यनुकूलं कार्यमित्याह कामन्दक: --

आददीत धनं काले त्रिवर्गपरिवृद्धये ।
यथा गौ: पाल्यते काले दुह्यते च तथा प्रजा[3] ।।

कामन्दकादीनामत्र यो नियम: प्रस्तुत: स तु न सर्वेष्वप्युक्त:, यतो वणिजादिवर्गाणां कृते तु नियम: पृथग्विध:, यथा - वणिजेन क्रियता मूल्येन

---

(१) शान्तिपर्व ८८।४-६ । (२) शान्तिपर्व ८८।७ ।
(३) कामन्दकीयनीतिसार: ५।८३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

क्रीतमिदं वस्त्रभाण्डादिवस्तु विक्रीयमाणस्य द्रव्यस्य चात्र कियल्लभ्यते, कियद्दूरा-
दानीतम्, किमस्य वणिजो भक्तव्ययेन शाकसूपादिना परिव्ययेन लग्नम्, किमस्या-
रण्यादौ चौरादिभ्यो रक्षारूपेण क्षेमप्रतिविधानेन गतम्, कोऽस्येदानीं लाभयोग
इत्येतदवेक्ष्य वणिजः करान्दापयेत् । तथा च मनुस्मृतौ --

> क्रयविक्रयमध्वानं भक्तं च सपरिव्ययम् ।
> योगक्षेमं च संप्रेक्ष्य वणिजो दापयेत्करान् ॥[1]

महाभारतेऽपि --

> विक्रयं क्रयमध्वानं भक्तं च सपरिच्छदम् ।
> योगक्षेमं च संप्रेक्ष्य वणिजां कारयेत्करान् ॥[2]

वणिजो व्यापारे यत्र यद्व्ययादिकं स्यात्तथापि तेभ्यो विक्रीयमाण
वस्तु विशेषस्य विंशतितमोभागस्तु ग्राह्य एवेत्याह गौतमः --

> विंशतिभागः शुल्कः[3] पण्ये ।

स्वदेशे शाकपर्णादिस्वल्पमूल्यवस्तुं क्रयविक्रयादिना जीवन्तं निकृष्टजनं
स्वल्पमपि करारव्यं वर्षेण दापयेत् । सूपकारलोहकारभारिकादीन् शूद्रांश्च
मासिमास्येकं दिनं कर्मकारयेत् । कृषकशिल्पकारादीनां यादृशो वार्षिकआयो
भवेत्तादृश एव करः कल्पनीयः । तथा च मनुस्मृतौ --

> यथा फलेन युज्येत राजा कर्ता च कर्मणाम् ।
> तथावेक्ष्य नृपो राष्ट्रे कल्पयेत्सततं करान् ॥[4]

---

(१) मनुस्मृतिः ७।१२७ । (२) शान्तिपर्व ८७।१३ ।
(३) गौतमधर्मसूत्रम् २।१।२६ । (४) मनुस्मृतिः ७।१२८, ३७, ३८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

करप्रदानेहेतुः -

राज्ञे किमर्थं करभागादिकं दीयते ? इत्यस्मिन्प्रश्ने गौतमेनोक्तं[3] "तद्रक्षण धर्मित्वात्" जनजातो रक्षकत्वाचस्मै करप्रदानं विधीयते । रक्षकाभावे सति लोके विविधा अपराधाः प्रवर्तन्ते, वर्णसङ्कराश्च जायन्ते । अतस्तत्परिहारार्थं करो देयः । तथा हि बौधायनधर्मसूत्रे --

षड्भागभृतो राजा रक्षेत्प्रजाम्[1] ।

राजा भूपतिः, भूमौ तस्य पूर्णं स्वामित्वं विद्यते, अतस्तस्य स्वत्वोद्भूतभूभागस्थैर्जनैर्भूम्युत्पन्नान्नादिफलस्य षष्ठांशोऽवश्यं देयः, नान्यवस्तूनामित्याहुः कात्यायनादयस्तु । तथा --

भूस्वामी तु स्मृतो राजा नान्यद्रव्यस्य सर्वदा ।
तत्फलस्य हि षड्भागं प्राप्नुयान्नान्यथैव तु ॥[2]
भूतानां तन्निवासित्वा त्स्वामित्वं तेन कीर्तितम् ।

पृथिवीपतित्वात्प्रजारक्षकत्वाच्च ताभ्यो बल्यादि ग्रहणाधिकार उत्पद्यते राज्ञि, अरक्षकस्य नाधिकारः । अरक्षन्राजा धान्यादेर्भागं शुल्कं फलकुसुमशाकपत्राद्युपायनं दण्डं च गृह्णाति चेत्स सकललोकानां सर्वपापभाग्भवति नरकञ्च याति । तथा हि मनुस्मृतौ--

योऽरक्षन्बलिमादत्ते करं शुल्कं च पार्थिवः ।
प्रतिभागं च दण्डं च स सद्यो नरकं व्रजेत्[4] ॥

---

(१) बौधायनधर्मसूत्रम् १।१०।१ । (२) राजनीतिप्रकाशः पृ० २७९ ।
(३) गौतमधर्मसूत्रम् २।१।२८ । (४) मनुस्मृतिः ८।३०७-८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अरक्षितारं राजानं बलिषड्भागहारिणम् ।
तमाहुः सर्वलोकस्य समग्रमलहारकम् ॥

भागकरबलिशब्दानां प्रयोगः -

करस्य प्राचीनतमं नाम बलिः । ऋग्वेदेऽपि बलिशब्दस्य प्रयोगोऽस्ति यथा -- स निरुध्या नहुषो अग्निर्विशश्चक्रे बलिहृतः सहोभिः ।[१]
अन्यच्च - अर्थात इन्द्रः केवलिर्विशो बलिहृतस्करत् ।[२]
अपरन्च - हरन्त्यस्मै विशो बलिम् ।[३]
साधारणजनेषु "बलिहृत्" शब्दस्य प्रयोगो दृश्यते । ये शास्त्रोक्तं बलिं यथा समये प्रयच्छन्ति राज्ञे ते एव बलिहृदित्युच्यन्ते । मन्वादिभिश्च बलिशब्दस्य प्रयोगो विहितः, स च धान्याधन्नानां षष्ठांशभागं बोधयति । राजामात्यादीनां सहयोगेन वर्णग्राह्यं बलिरूपं धान्यादिकं मानयति । तथा हि मनुस्मृतेः सप्तमाध्याये --

साम्वत्सरिकमाप्तैश्च राष्ट्रादाहरयेद्बलिम्[४] ।

अन्यच्च --

यो हरेद् बलिषड्भागं[५] - - - - - - - ।

ग्रह्यागादावपि वेदीसमीपे पूजान्ते होमान्त एव वा नवग्रहादीनां देवानां गुडौदनादिभिः बलिप्रदानं विधीयते ।+

---

(१) ऋग्वेदः ७।६।५ । (२) ऋग्वेदः १०।१७३।६ ।
(३) तैत्तिरीयब्राह्मणम् २।१७।१८।३ । (४) मनुस्मृतिः ७।८० ।
(५) रामायणम् ३।६।११ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

गुडौदनं रवेर्दद्यात् सोमाय घृतपायसम्, इत्यादि[1]

यथोक्त बल्यभावे पायसबलिं तदभावे दध्यक्षतबलिं दद्यात् । इत्थं बलिशब्दस्य प्रयोगो यत्र तत्र प्राप्यते । भागशब्दोऽप्यति प्राचीनः । वेदेऽपि "भागदुघः" इति प्रयोगो दृश्यते । किन्तु बलिभागयोश्चान्तरं दृश्यते, यतउपहारार्थे बलिशब्दो व्यापकः, भागशब्दस्तु सामान्य करार्थे प्रयुज्यते । यथा - सप्तदशानामश्वमेधान्तानां वृक्षादीनां लाभात्षष्ठो भागो ग्रहीतव्यः । एवं यः कश्चिज्जपयागदानदेवतार्चादीनि करोति तत्पालनेन राजा षड्भागमाप्नोति । मनुस्मृतावपि --

यदधीते यद्यजते यद्ददाति यदर्चति ।
तस्य षड्भाग भाग्राजा सम्यग्भवति रक्षणात् ॥[2]

कोशकारस्तु भागः, करः, बलिश्चैते शब्दाः पर्यायवाचका इत्याह । अमरकोशे --

द्विपाद्यो द्विगुणो दण्डो भागधेयः करो बलिः ।[3]

एते शब्दा धर्मशास्त्रप्रवर्तकानां मन्वादीनां स्वेच्छया यत्र कुत्रापि प्रयुक्ता दृश्यन्ते, एतेषां प्रयोगस्य न कोऽपि विशेषनियमः, अत एते विशेषतः पर्यायवाचका एवेति ।

आयस्य त्र्योभागाः -

प्रजानामायस्य षष्ठो भागः करविशेषः । विक्रीयमाणस्य वस्त्रान्न भाण्डादिवस्तुविशेषस्य शुल्कः । अपराधिषु विधीयमानोऽर्थदण्डश्चैते त्र्यो धनागमस्य

---

(१) संस्कारदीपकः पृ० ७५ । (२) मनुस्मृतिः ८।३०५ ।
(३) अमरकोशः ~~स्कन्ध~~ २।८।२७ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

प्रमुखमार्गाः । एते लोके भवन्ति सततं प्रचलिताः । आपणिककृषकशिल्पिकारादयस्तु करप्रदातार इत्युच्यन्ते । एतेभ्यो यथोक्तं करं शुल्कंबलिं प्रतिभोगं वाऽऽदाय एतेषां योगक्षेमञ्च कुर्याद्राजा । तथा च महाभारतस्य शान्तिपर्वाध्याये --

बलिषष्ठेन शुल्केन दण्डेनाथपराधिनाम् ।
शास्त्रानीतेन लिप्सेथा वेतनेन धनागमम् ।।
दापयित्वा करं धर्म्यं राष्ट्रं नीत्या यथाविधि ।
तथैतं कल्पयेद्राजा योगक्षेममतन्द्रितः[1] ।।

धान्यांशग्रहणे मतभेदः -

भूम्युत्पन्नानां धान्यादीनां कियदंशः कररूपेण ग्राह्यो राज्ञेत्यस्मिन्विषये शास्त्रकाराणां न त्वैकमत्यम् । मनोर्मते षष्ठोऽष्टमो द्वादशो वा भागो ग्रहणार्हः । विष्णोर्मते तु षष्ठांशः । गौतमस्तु दशमांश ग्रहणे राज्ञोऽधिकार इत्याह । विष्णुधर्मोत्तरे व्यवस्था विशेषाद्वस्तुविशेषाच्च ग्राह्यभागस्योल्लेखोऽस्ति यथा -- शुकधान्यानां यवगोधूमानां षष्ठांशः १।६ । समीधान्यानां माषादीनामष्टमांशः १।८ । अनुर्वरक्षेत्रादुत्पन्नानामन्नानांदशमांशः १।१० । वर्षतौ समुत्पन्नानामन्नानामष्टमांशः १।८ । वसन्ततौ समुत्पन्नानामन्नानां षष्ठांशः १।६ । एतान्भागान्प्राप्नोति राजेति शास्त्रीया व्यवस्था । तथा च --

---

(१) शान्तिपर्व ७१।१०-११ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

शूकधान्येषु षड्भागं शिम्बीधान्येष्वथाष्टमम् ।
राजा बल्यर्थमादद्याद्देशकालानुरूपत:[1] ।।

शूकशिम्ब्यतिरिक्ते धान्ये मनु गौतमोक्तौ द्वादशो दशमो वा भाग: । तथा च बृहस्पति: --

दशाष्टषष्ठं नृपतेर्भागं दद्यात् कृषीबल: ।
खिलाद्वर्षाद् वसन्ताच्च कृष्यमाणाद्यथाक्रमम्[2] ।।

करग्राह्यवस्तूनामंशग्रहणम् -

कृषिवाणिज्यपशुपालनादय: करप्राप्ते आधारविशेषा: । कोशस्थापनाद्-बहुकालं यावदेतेभ्य: कृष्यादिभ्य: करग्राह्याणां धान्यादिवस्तूनामंशग्रहणप्रचलनमासीन्नतु कार्षिकी यथा -- धान्यस्य धान्यं हिरण्यस्य हिरण्यं पशूनां पशवश्चेत्यादि । वस्तु-विशेषस्य पृथक् पृथक् कोशोऽपि व्यवस्थित: । नत्विदानीं तादृशी स्थिति: । राजभटा-ग्रामं गत्वा धान्यस्य कररूपं धान्यमेवादाय कोशागारे पशूनां पशुमेवादाय पशुशालायां स्थापयन्ति स्म । तस्यामवस्थायां गोधनस्य सर्वोत्कृष्टमासीत् स्थानम् । धनेषु गोधनस्य यन्महत्वं विद्यते तन्नेतरेषामिति मन्यन्ते स्म राजानोऽपि गोहरणञ्च कुर्वन्ति स्म । यथा - सुशर्मणा कौरवाणां सहयोगेन मत्स्यदेशस्य राज्ञो विराटस्य गावोऽपहृता: । इत्थमेव तस्यामवस्थायामासीत्कोश: सञ्चालित:[3] ।

---

(१) रा० नी० प्र० पृ० २६२ ।

(२) रा० नी० प्र० पृ० २६३ ।

(३) हिन्दूरा० शा० पृ० ७८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

क्षीणकोशपूरणोपायाः -

क्षीणकोशेन राज्ञा प्रत्यहं कोशपूरणोपाय चिन्तनं विधेयम् । क्षीणकोशस्य कृते ब्राह्मणादीनां तद्धनं ग्राह्यं यद्यज्ञादौ कुटुम्बपोषणे परोपकरणे च नोपयुज्यते । ग्रामापणिकपाखण्डादीनां धनमपि ग्राह्यम् । तथा सम्पन्नानां ग्रामीणानां नागरिकाणाञ्च किञ्चिद्धनं ग्राह्यं यथा ते निर्धना न स्युः । एवममात्यपुरोहितसामन्तभूपालादीनां गृहं गत्वाऽनुनयेन धनं याचेत । तथा हि नीतिवाक्यामृते -- देवद्विजवणिजां धर्माध्वरपरिजनानुपयोगिद्रव्यभागैराढ्यविधवानियोगिग्रामकूटगणिकासङ्घपाखण्डिविभवप्रत्यादानैः समृद्धपौरजानपदद्रविणसंविभागप्रार्थनैरनुपक्षयश्रीकरणमन्त्रिपुरोहितसामन्तभूपालानुनयगृहगमनाभ्यां क्षीणकोशः कोशं कुर्यात् ।[१]

विशेषतो धनिकैः सह धनमिच्छेत्, यत स्ते एव क्षीणकोशपूरणसमर्थाः, तेषां सहयोगेनैव क्षीणोऽपि कोशः पूर्णतामेति । कोशस्य कृते सविशेषं धनादिकं प्रयच्छन्ति ये, तान् छत्रासनालङ्कारादिभिः सत्कृत्य प्रसादयेत् । तथैव वर्णितं कौटिल्येनापि --

> सारतो वा हिरण्यमाढ्यान् याचेत, यथोपकारं वा
> स्ववशा वा यदुपहरेयुः, स्थानच्छत्रवेष्टन विभूषा-
> श्चैषां हिरण्येन प्रयच्छेत् ।[२]

अस्माकं कोशः क्षीणतां गतः, तस्माद्वयं निर्बलाः स्मः, रिपवः

---

(१) नीतिवाक्यामृतम्, कोशसमुद्देशः । (२) कौटलीयार्थशास्त्रम् ५।२ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

सबला: सन्ति सबलोऽबलं प्रत्याक्रमति । कारणेनानेनेदानीं राज्ये परेषां महद्भयं जातम् ।अरयोऽस्माकं सर्वमेवेच्छन्ति, पत्नीपुत्रादीन्नपि बलादपहरन्ति राष्ट्रमेव वा धितुमिच्छन्ति, दशेयं समुत्पन्ना, एतादृश्यां परिस्थितौ भवतां रक्षणं मम कर्तव्यं राष्ट्ररक्षणं तु सर्वेषामनिवार्यं कर्तव्यमित्यादिकमनुभाष्य मधुरया वाचा प्रजा:प्रसाद्य ताभ्यो धनग्रहणं कुर्याद्दक्षिणि कोशी राजा (तथोपवर्णितं महाभारते --

प्रागेव तु धनादानमनुभाष्य तत: पुन: ।
सन्निपत्य स्वविषये भयं राष्ट्रे प्रदर्शयेत् ।।
इमापत्समुत्पन्ना परचक्रभयं महत् ।
अपि चान्ताय कल्पन्ते वेणोरिव फलागमा ।।
अरयो मे समुत्थाय बहुभिर्दस्युभि: सह ।
इदमात्मवधायैव राष्ट्रमिच्छन्ति बाधितुम् ।।
अस्यामापदि घोरायां सम्प्राप्ते दारुणे भये ।
परित्राणाय भवत: प्रार्थयिष्ये धनानि व: ।।
- - - - श्लक्ष्णया सोपचारया[1] ।।

इत्थमेव विविधैरुपायै क्षीणकोशपूरणं कर्तव्यम् ।

कर्तव्यनिष्ठानां समनुशासनशीलानामुच्चपदाधिकारिवर्गाणा-मन्यकर्मचारिवर्गाणाञ्च सुकार्येण, अधिकोपार्जन समर्थानां विविधोद्योगव्यापाराणां प्राशस्त्येन, आढ्यानां प्रजानां सहयोगेन च राष्ट्रस्य समुन्नति:, उन्नत राष्ट्रस्य कोशोऽपि सम्पन्नतामेति । अत आढ्यादयो राज्यस्य प्रधानतत्त्वरूपा:, तस्मात्तेषां सम्मानं समादरञ्च कुर्याद्राजा । तथा च महाभारते --

धनिन: पूजयेन्नित्यं पानाच्छादनभोजनै: ।
वक्तव्याश्चानु गृह्णीध्वं प्रजा: सह मयेति वै ।।

---

(१) शान्तिपर्व ८७।२६-३३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अङ्गमेतन्महद्राज्ये धनिनो नाम भारत ।
ककुदं सर्वभूतानां धनस्थो नात्र संशय: ।।

दुर्भिक्षादावनुग्रह: -

दुर्भिक्षादौ दैवी प्रकोपे च करग्रहणस्य शास्त्रीयो नियम: प्रजासु योज्यो न वेति विषये शास्त्रकाराणां विचार इतद्विध: - दैविकतापपीडितानां प्रजानां का स्थिति:, प्रजोपभुक्त क्षेत्रस्य गृहस्य वा दशा कीदृशी, जलादिना कियती क्षति:, कियता व्ययेन क्षेत्रादिकमुपभोग्यम्, धान्याद्यन्नानामुपलब्धिरस्ति न वेत्यादिकं विचार्य कर: कल्पनीय: । यदि क्षेत्रादिकं विनाशावस्थां प्राप्तं बहुव्ययेनापि न सिद्ध्यति तदा तत्करमुक्तं कार्यम् ।

पुनर्दुर्भिक्षादिना कृषिकर्तुमसमर्थान् कृषकानन्नवस्त्रपशुद्रव्यादिभि: सहयोगं कुर्याद्राजा । आपन्निवृत्ता: समर्थावस्थां गता: कृषका राज्ञोऽनुग्रहादुपलब्धं द्रव्यादिकं सवृद्धिकं प्रत्यर्पयेयु: । वृद्ध्युपलब्ध्यानुग्रहोऽपि कोशवृद्धिकर: । तथा हि कौटिल्यार्थशास्त्रे-

धान्यपशुहिरण्यैश्चैताननु गृह्णीयात्तान्यनुसुखेन दद्यु:,
अनुग्रहपरिहारौ चैभ्य: कोशवृद्धिकरौ दद्यात् ।

नवनिर्मिततडागादीनां करव्यवस्था -

कश्चित्कृषकस्तडागकूपवाप्यारामभवनादीनां नवनिर्माणं करोति तथा प्राचीनकालादेवाप्रहतं क्षेत्रं बहुव्ययेन कर्षति चेत्तदा राजा कृषीबलस्तत्रविहितव्ययस्य द्विगुणं फलं नाप्नोति यावत्तावत्करग्रहणं न कुर्यात् ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

टिप्पणी अग्रिमपृष्ठेऽपि

CC.O Sampurnanand University Collection. Digitized by eGangotri

तथा च --

तस्य वृद्ध्यै तडागं वा वापिकां कृत्रिमां नदीम् ।
कुर्वन्त्यत्यत् तद्द्विघं वा कर्षन्त्यभिनवां भुवम् ।
यद्व्ययद्विगुणं यावन्नतेभ्यो भागमाहरेत् ॥[3]

कोशस्यायस्त्रोतः -

कोशस्यायस्त्रोतोविशेषा अष्टौभागाः प्रमुखाः, ते च यथा -- (१) कृषिविभागः, (२) व्यापारविशेषः, (३) दुर्गम्, (४) जलस्रोतः, (५) गजाक्रमणविभागः, (६) सुवर्णरत्नादीनामाकरः, (७) ऋणादानप्रदानव्यवहारः, (८) निर्जने स्थले जनावासस्य व्यवस्था विभागश्चैतेभ्यः प्रचुरं धनमुपलभ्यते । अतोऽष्टव वर्गाणामेतेषां समुन्नतौ सततं प्रयासः कर्तव्यः । तथा च कामन्दकः --

कृषिर्वाणिक्पथो दुर्गं सेतुः कुञ्जरबन्धनम् ।
खन्याकरधनादानं शून्यानाञ्च निवेशनम् ॥[4]
अष्टवर्गमिमं साधुस्वच्छवृत्तो विवर्धयेत् ।

आयस्याधारभूता दुर्गराष्ट्रखनिसेतुवनव्रजवणिक्पथाभिधाः सप्तविभागाः प्रसिद्धा इत्याह कौटिल्यस्तु । विभागैरेतैरायस्यैकं सप्ताङ्गयुतं शरीरं परिकल्पितं कौटिल्येनैव । यदर्जयति कोशपुष्टकरं धनमस्याङ्गान्यपि तथाविधान्येव । अङ्गानामेतेषामनेकोपभेदा अपि प्रदर्शिता स्तेनैव, ते च सन्त्यधो वर्णिताः --

---

(१) शान्तिपर्व ८८।२६-३० । (२) कौटलीयार्थशास्त्रम् २।१ ।

(३) शुक्रनीतिः ४।२।११६-२० ।

(४) कामन्दकीयनीतिसारः ५।७८-७६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

(१) दुर्गम् -

शुल्कदण्डपौतवनागरिकलक्षणाध्यक्षमुद्राध्यक्षसुरासूनासूत्रतैलघृतक्षार-
सौवर्णिकपण्यसंस्थावेश्याद्यूतवास्तुककारुशिल्पिगणदेवताध्यक्षद्वार-
वाह्लिकादेयन्चैते दुर्गस्य द्वाविंशत्युपभेदाः ।

(२) राष्ट्रम् -

सीताभागबलिकरवणिकनदीपालस्तरनावपट्टनविवीतवर्तनी रज्जूचोररज्जुश्-
चेत्यस्य सन्ति त्रयोदश उपविभागाः ।

(३) खनिः -

सुवर्णरजतवज्रमणिमुक्ताप्रवालशंखलोहलवणभूमिप्रस्तर रसधातवः, एते
खनेर्द्वादश उपविभागाः ।

(४) सेतुः -

पुष्पफलवाटषण्डकेदारमूलवापाश्चैते षड्भेदाः सेतोः ।

(५) वनम् -

अस्य पशुमृगद्रव्यहस्तिवनपरिग्रहश्चैते चत्वारो भेदाः ।

(६) व्रजः -

गोमहिषाजाविकखरोष्ट्राश्वाश्वतराश्चैतेऽष्टावस्योपभेदाः ।

(७) वणिक्पथः -

अस्य स्थलमार्गो जलमार्गश्चेति भेदद्वयं दर्शितम् ।

एतेभ्यः सभेदेभ्योऽङ्गेभ्यः कररूपेणाकलितं धनं कोशान्वितम् । अतः
कौटिल्येन परिकल्पितस्यास्यायशरीरस्य भूमिका महत्वपूर्णा विद्यते । अस्य शरीरस्या-

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

करादायस्थलेष्वाय निरीक्षणार्थमायसम्पादनार्थञ्च सुवर्णादिधातूनां लवणादि रसानाञ्चोत्पत्तिस्थले धान्याद्यन्नानां भागग्रहणस्थले तरस्थाने नागवनेषु च मन्त्रिण: स्वहितचिन्तकपुरुषान् वा स्थापयेद्राजा । तथैव प्रोक्तं महाभारते --

आकरे लवणे शुल्के तरे नागबले तथा ।
न्यसेदमात्यान्नृपति: स्वाप्तान्वा पुरुषान्हितान्[1] ।।

शुल्कव्यवस्था -

शुल्कं द्विविधं - स्थलजं जलजं च । क्रीतवस्तूनां मूल्याद् विंशतितमोंऽश: शुल्कार्थं देय:, इदं स्थलजम् । तथा च याज्ञवल्क्यस्मृतौ --

अर्घप्रक्षेपणाद्विंशं भागं शुल्कं नृपो हरेत्[2] ।

गौतमधर्मसूत्रेऽपि -- विंशतिभाग: शुल्क: पण्ये[3] ।

याज्ञवल्क्यगौतमाभ्यामुक्तमिदं शुल्कं विदेशात्क्रीतानीतानां वस्तूनाम्, स्वदेशक्रीतानां तु दशमांश: प्रदेय: । तथा हि विष्णु: --

स्वदेशपण्याच्च शुल्कांशं दशमादद्यात् ।
परदेशपण्याच्च विंशतितमम्[4] ।

जलजशुल्कविषये स्वमतं प्रतिपादयति मनु: --

पणं यानं तरे दाप्यं पौरुषोऽर्धपणं तरे ।
पादं पशुश्च योषिच्च पादार्धं रिक्तक: पुमान् ।।

---

(१) शान्तिपर्व ६६।२६ । (२) याज्ञवल्क्यस्मृति: २।२६१ ।
(३) गौतमधर्मसूत्रम् २।१।२६ । (४) विष्णुस्मृति: ३।२८-२६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

माण्डपूर्णानि यानानि तार्यं दाप्यानि सारत: ।
रिक्तभाण्डानि यत्किंचित्पुमांसश्चापरिच्छदा: ।।
गर्भिणी तु द्विमासादिस्तथा प्रव्रजितो मुनि: ।
ब्राह्मणा लिङ्गिनश्चैव न दाप्यातरिकं तरे ।।

अस्यार्थ: - रिक्तशकटादियानानां तरिकं शुल्कमेक: पण:, भारपुरुषाणामर्ध: पण:, भाररहितानां पणाष्टभाग: गवादीनां पशूनां पणचतुर्थभाग:, पण्यवस्तु- पूर्णानां शकटादियानानां वस्तुनां आधार एव शुल्क: कल्प्य: । रिक्तानां भाण्डादि द्रव्याणां स्वल्प:, दरिद्राणां यत्किन्चिद ग्राह्यम् । गर्भवत्या: स्त्रियामास- द्वयादूर्ध्वं तथा भिक्षुवानप्रस्थब्रह्मचारिब्राह्मणानान्च तरमूल्यं न ग्राह्यम् । श्रोत्रिया- दयोऽपि शुल्कमुक्ता भवन्तीत्याह मनु: --

अन्धोजड: पीठसर्पी सप्तत्यास्थविरश्च्य: ।
श्रोत्रियेषूपकुर्वंश्च न दाप्या केनचित्करम् ।।

आपस्तम्बधर्मसूत्रेऽपि -

अकर: श्रोत्रिय:, सर्ववर्णानां च स्त्रिय:, ये चविद्यार्थां वसन्ति, तपश्विनश्च ये धर्मपरा:, शूद्रश्च पादावनेक्ता, अन्धमूकबधिररोग- विष्टाश्च| द्वयोर्मवि: -- श्रोत्रियस्त्रीवृद्धबालधर्मज्ञगुरुकुलवासिसाधुपङ्गवन्धकाण- वधिरमूकाश्चैते सर्वत्राकरा ज्ञेया: ।

विवाहसामग्रीणाम् अन्वाधेयकानाम् आधिवेदनिकानाम् उपहार- द्रव्याणां सूतिकावस्तूनां पूजासामग्रीणां चौलोपनयनगोदानव्रतादीनामुपकरणानां

---

(१) मनुस्मृति: ८।४०४,५,७ । (२) मनुस्मृति: ८।३९४ ।

(३) आपस्तम्बधर्मसूत्रम् २।१०।२६।१०-१६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

विशिष्टोत्सवसामग्रीणां च तन्निमदेयम् । तथा च -

> वैवाहिमन्वायनमौपायनिकं यज्ञकृत्यप्रसवनैमित्तिकं
> देवेज्याचौलोपनयनगोदानव्रतदीक्षाणादिषु क्रिया-
> विशेषेषु भाण्डमुच्छुल्कं गच्छेत् ।

कौटिल्यमते शुल्कं त्रिविधं - बाह्यमाभ्यन्तरमातिथ्यन्चेति ।[2]

(१) बाह्यं - मूलस्थानाद् बहिः किन्तु स्वदेश एवोत्पन्नानां वस्तूनां शुल्कम् ।

(२) आभ्यन्तरं - दुर्गादाभ्यन्तर प्रदेशोत्पन्नवस्तूनां शुल्कम् ।

(३) आतिथ्यं - विदेशादागतानां वस्तूनां शुल्कम् ।

एतेषां त्रिविधानामेव वस्तूनां निष्क्राम्यं प्रवेश्यं च भवति द्विविधं शुल्कम् । विदेशात्स्वदेशं प्रत्यानीयमानानां स्वदेशेऽपि जनपदान्नगरं प्रत्यानेयानां वस्तूनां शुल्कः पन्चमांशः १।५ । पुष्पफलशाकमूलकन्दवल्लिक्यबीजशुष्कमत्स्य मांसानां षष्ठांशः १।६ । शंखवज्रमणिमुक्ताप्रवालहाराणां शुल्कं तद्विशेषज्ञैर्निर्धार्यम् । क्षौमदुकूलक्रिमितानकंकट हरितालमनःशिलाहिंगुलुकलोहवर्णधातूनां चन्दनागुरुकटुक किण्ववाराणां सुरादन्ताजिनक्षौमदुकूलनिकरास्तरणप्रावरणक्रिमिजातानामजैलकस्य च दशमांशः पन्चदाशांशो वा १।१० १।१५ । वस्त्रचतुष्पदद्विपदसूत्रकार्पासगन्धभैषज्यकाष्ठवेणुवल्कलचर्ममृद्भाण्डानां धान्यस्नेहक्षारलवणमद्यपक्वान्नादीनां च विंशतिभागः पन्चविंशति भागो वा १।२०, १।२५ब । सर्वमेतत् शुल्कं करभागादिकन्च कोशगतम् । करादिसन्चित कोश एव राज्यव्यवस्थाया व्ययसहः ।

---

(१) कौटलीयार्थशास्त्रम् २।२१ ।

(२) कौटलीयार्थशास्त्रम् २।२२ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

राष्ट्रियकोशस्य व्ययभार: -

कोशाद्विधीयमान व्ययस्यैकं विधानं वर्णितमस्ति शुक्रनीतौ । तदिदम् --

त्रिभिरंशैर्बलं धार्यं दानमर्धांशकेन च ।
अर्धांशेन प्रकृतयो ह्यर्धांशेनाधिकारिण: ।
अर्धांशेनात्मभोगश्च कोशोंऽशेन स रक्ष्यते ।[1]

इत्थं बलादिषु पन्चविषयेषु कोशस्य व्ययो दर्शित: शुक्राचार्येण । किन्त्वन्येषां मतं न त्वौचित्यं प्रतिपादयत्यस्मिन्राज्ये व्ययस्यावश्यकस्थानबहुत्वात् । तथापि शुक्रस्य मते राज्यव्यवस्थाया: प्रमुखतत्त्वविशेषा एते पन्चविषया एव, अतस्तेषामेव कृते तेन व्ययव्यवस्थाविहिता । अस्यापेक्षायां कौटिल्योक्तो नियम: सामयिक:, तत्र व्ययस्यावश्यकतानुभूता विशेषत: सन्त्यशेषा विषया: प्रस्तुता:, तस्मात्तस्मिन्कौटिल्यस्यौदारताया विकासस्य च भाव: प्रतिभाति । यथा --

देवपितृपूजादानार्थं स्वस्तिवाचनमन्त: पुरमहानसं दूतप्रावर्तनं
कोष्ठागारमायुधागारं पण्यगृहं कुप्यगृहं कर्मान्तो विष्टि:
पत्त्यश्वरथद्विपपरिग्रहो गोमण्डलं पशुमृगपक्षिव्यालवाटा:
काष्ठतृण वाटाश्चेति व्ययशरीरम् ।[2]

अस्यायं भाव: -- दैवपूजादौ पितृश्राद्धादिषु दानादिषु च, शान्तिपुष्ट्यादिषु कर्मसु, राजमहिषीणां भोगिनीनां राजकुमाराणान्च कृते, राज्ञो राजपरिवाराणान्च कृते, भोजनव्यवस्थायाम्, राजदूतविषये, कोष्ठागारनिर्माणविषये, आयुधानां

(१) शुक्रनीति: १।३१५-१६ । (२) कौटलीयार्थशास्त्रम् २।६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

....

[illegible] :--

....

[illegible] । [illegible] --

[illegible] ।

[illegible] ।

[illegible] ।

[illegible] ।

[illegible] । [illegible] ।

[illegible] --

[illegible]

[illegible]

[illegible] ।

[illegible] ।

[illegible] :-- [illegible]

[illegible]

[illegible]

....

(१) [illegible] १।१५-१६ । (२) [illegible] ।

सम्बन्धे आयुधागार निर्माण विषये च, पण्यागारव्यवस्थायां यत्र विक्रीय-माणानि विविधानि वस्तूनि स्थाप्यन्ते, कुप्यागारव्यवस्थायाम्, कृषि-विकासविषये, विष्ट्यादि कार्यसञ्चालने, सैन्यबलविषये, गोवृषभमहिषमेषादीनां पशूनां विकासविषये वन्यानां सिंहव्याघ्रवराहमृगादीनां सर्वविधानां पशूनां पक्षिणाञ्च संरक्षणसम्वर्धनादि कार्ये, वन्यानां काष्ठतृणपत्रादीनां विषये च राष्ट्रियकोशादेव व्ययो विधीयन्ते । इत्थं पञ्चदशाङ्गयुतमेकं व्ययशरीरं कौटिल्यकल्पितम्, तदिदं राज्यस्याखिल व्ययभारवहनक्षमम् ।

पौरस्त्यैर्विद्वद्भिः प्रतिपादितेयं कोशव्यवस्था सम्प्रत्यपि सार्थका -

---

परिच्छेदेऽस्मिन् कोशव्यवस्थाया विस्तरशो विवेचनं विहितम् । अस्या विवेचनक्रमे प्रथमं कोशस्य स्वरूपं महत्त्वं चास्ति दर्शितम् । कोशो राष्ट्रस्य प्राणरूपः, प्राणस्याभावे प्राणिनो न जीवन्ति यथा, तथैव कोशस्याभावे राष्ट्रं न जीवत्यतः कोशस्य सुव्यवस्था कर्तव्येत्याहुर्महर्षयः । अयमेव सिद्धान्तो जनानां कृतेऽपि स्वी-कार्यः । अतः प्राचीनतमे युगे कोशस्य यद्विधं महत्त्वं मन्वादिभिः प्रदिष्टं तदद्यापि सर्वमान्यम् । पुनः कदा कथं कोशस्योत्पत्तिस्तं प्रति प्रजानां किं कर्तव्यमित्यादयो विषयाः सर्वसाधारणानां जनानां कृतेऽबोध्याः, किन्त्वेते विषया अवश्यं ज्ञातव्याः, अतः प्रबन्धेऽस्मिन्सन्ति प्रस्तुताः, तस्मात्साधारणा मानवा अपि कोशस्य महत्त्वं कोशं प्रति स्वस्य कर्तव्यमेवमुत्तरदायित्वञ्च सुखेन जानन्ति ।

प्रबन्धेऽस्मिन् करग्रहणस्य त्रयः सिद्धान्ता उपस्थापिताः । महर्षिभिः प्रकल्पिता एते सिद्धान्ता इदानीमपि लोकसम्मताः । वैदेशिकानां कृते तु करग्रहण-

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

नियमाः पृथग्विधा यथा - आपणिकैर्वस्त्रभाण्डादि वस्तु कियता मूल्येन क्रीतं विक्रीयमाणस्य वस्तुविशेषस्य कियद् द्रव्यं लभ्यते भाण्डादिकं कियद्दूदानीतं मार्गेलग्नं व्ययादिकं किं लाभयोगः क इत्थे तदवेक्ष्यणिजो दापयेत्करान्, इत्येते नियमाः शास्त्रोक्ताः । इमे नियमा एवेदानीं वैदेहकेषु युज्यन्ते, नियमानिमान् तेऽपि स्वीकुर्वन्ति ।

शासकस्याभावे लोके मात्स्यन्यायः समुत्पतन्ति, विविधा उपद्रवा जायन्ते, सर्वत्रा शान्तं वातावरणं प्रसरति । एतादृश्यां परिस्थितौ एतत्सर्वमुपद्रवादिकं निराकृत्य प्रजारक्षणसमर्थस्तु केवलं भवति राजैव, अतो राजा लोकपालक इति सिद्धः । जनजगतोरक्षकत्वाद् भूपतित्वाच्च राज्ञे करभागादिकं दातव्यमित्याहुर्मुनयः । वयमपि विषयानिमान् ज्ञात्वैव तस्मैकरादिकं प्रयच्छामः । अतो मुनिभिः परिकल्पितोऽयं सिद्धान्तः सम्प्रत्यपि लोके सार्थकः ।

दैवीप्रकोपे दुर्भिक्षादौ च प्रजास्वनुग्रहो विधेय इति वदन्ति ऋषयः, एतदनुसारमेव प्राचीनतमेयुगेऽनुग्रहस्य प्रचलनमासीत्, तदधुनापि लोकप्रचलितम् ।

कोशस्याय प्रोतो विशेषाः कृषिवाणिज्यदुर्गराष्ट्रादय एवेत्याहुर्मन्वादयः । आयस्यैतेमार्गा एव सम्प्रत्यपि सक्रियाः । शुल्कव्यवस्थायामपि न किञ्चित्परिवर्तनमथाद्याव्यवस्था शुल्कविषये मन्वादिभिः परिकल्पिता सैवेदानीमपि गतिशीला । अत एव कोशव्यवस्थया सह सम्बद्धानां विशेषतः शास्त्रोक्तानामशेषाणामेव विषयाणामध्ययनान्निष्कर्षोऽयं निष्पद्यते मन्वादिभिः प्रतिपादिता कोशव्यवस्थाधुनापि सार्थका एवेति ।

:--:--:--:--:--:--:

:--:--:--:--:--:

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC-0 Sampurnanand University Collection. Digitized by eGangotri

पञ्चमपरिच्छेदः

राष्ट्रस्य राज्यशासनव्यवस्थाया न्यायव्यवस्थाया दण्डव्यवस्थायाश्च वर्णनम्

राष्ट्रलक्षणम्

राष्ट्रं देशः, यो भूप्रदेशो गोमहिष्याविपशुभिर्यवगोधूमधान्यादिभिर्मणि-माणिक्यसुवर्णादि रत्नैश्च सुशोभितोऽस्ति तद्राष्ट्रम्, पशुधान्यहिरण्यसम्पदा राजते शोभते इति राष्ट्रम्[1] । यस्मिन्देशेऽश्वत्थाशोकचंपकशाल्मल्याद्यनेकवृक्षोपेतानि महारण्यानि, प्रचुरजलयुता जलाधाराः, महानद्यः, रमणीयागिरयः, प्रत्युच्चा-हिमशैलाः, सर्वविधपशुवृद्धिकराणि तृणपत्रजलोपेतानि स्थलानि, सुमनोहरकन्दमूल-पुष्पपत्रलताफलादिभिः परिपूरिताः प्रदेशाश्च सन्ति, पुनः प्रचुरधार्मिकाणां रोगोपसर्गादिरनाकुलानाञ्च जननानां निवासोऽस्ति यत्र, यत्र जनानां जीवननिर्वाहो-पयुक्तानां कृषिवाणिज्यानां सुलभोऽस्ति, धान्याधन्नानि बहून्युत्पद्यन्ते यत्र तस्मिन्नेव देशे राष्ट्रं कल्पनीयमथर्दितद्विधं सर्वगुणसम्पन्नमेकदेशं राष्ट्रं प्रकल्प्य तत्रैव राज्ञा निवासो विधातव्य इत्यहतुमनुयाज्ञवल्क्यौ । विशेषतो राष्ट्रकल्पनायां जाङ्गलदेशस्य महत्वं प्राशस्त्यञ्च दर्शयत एतौ यथैव ।

जाङ्गलं सस्यसम्पन्नमार्यप्रायमनाविलम्[2] ।

---

(१) नीतिवाक्यामृतम् (जनपदसमुद्देशः) । (२) मनुस्मृतिः ७।६९ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

रम्यं पशव्यमाजीव्यं जाङ्गलं देशमावसेत्[1] ।

सजलतरुपर्वतो देशो "जाङ्गल" इति शब्देनाभिधीयत इत्याह मिताक्षराकारो[2] विज्ञानेश्वरः । कुल्लूकभट्टकृतमन्वर्थमुक्तावल्यां तु "जाङ्गल" शब्दस्यार्थ इत्थं कृतः[3] --

अल्पोदकतृणो यस्तु प्रवातः प्रचुरातपः ।
स ज्ञेयो जाङ्गलोदेशो बहुधान्यादि संयुतः ।।

यद्यप्यल्पोदकतरुपर्वतो देशो जाङ्गलस्तथाप्यत्र तु मिताक्षराकार कृतोऽर्थ एव सुसङ्गतः । उपर्युक्तमेवमतं राष्ट्रलक्षणाविषयकं समर्थयति विष्णुस्मृतौ विष्णुश्च -- "राजा च जाङ्गलं पशव्यं सस्योपेतं देशमाश्रयेत्[4]" । इत्थं सर्वविधवस्तूपलभ्यो देश एव राष्ट्रनिर्माणार्ह इत्याहुर्मनीषिः शास्त्रप्रयोक्ताः ।

अथर्ववेदे राष्ट्रोत्पत्तिवर्णनम् -

परमर्षयः सर्वविधज्ञानसम्पन्ना आसन्, सततं लोकहितमिच्छन्ति स्म, कथं केनोपायेन लोके जना सुखाः सानन्दाश्च भवन्तीति विचार्य तदर्थमेव प्रयत्नशीला भवन्ति स्म, प्रयत्नक्रमेणानेन बहुकालो व्यतीतः, क्रममेनमङ्गीकृत्यैव दीक्षिता ऋषय स्तपस्तप्तुमारब्धवन्तः, तेषां तपः प्रभावाल्लोकहितकरं राष्ट्रं समुत्पन्नं ततो बलमोजश्च ।

---

(१) याज्ञवल्क्यस्मृतिः १।३२१ ।

(२) मिताक्षरा (याज्ञवल्क्यस्मृतिः १।३२१) ।

(३) मन्वर्थमुक्तावली (मनुस्मृतिः ७।६९ । (४) विष्णुस्मृतिः ३।४ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

मद्रामिच्छन्त ऋषय: स्वर्विदस्तपोदीक्षामुपसेदुरग्रे । [1]
ततो राष्ट्रं बलमोजश्च जातं तदस्मै देवा उपसन्नमन्तु ।।

ऋग्वेदेऽपि राष्ट्रमस्ति वर्णितम् --

मम द्विता राष्ट्रं क्षत्रियस्य विश्वायोर्विश्वेऽमृतायथा[2]न: ।

मन्त्रोऽन्यो वरुण एव राष्ट्रस्य स्वामीति प्रतिपादयति --

राजाराष्ट्राणां पेशोनदीनामनुत्तमस्मैक्षत्रं विश्वा[3]यु ।

वाजसनेयसंहितायामाशीर्वचनमस्ति यथा --

आ ब्रह्मन्ब्राह्मणयो ब्रह्मवर्चसी जायतामा रा[4]ष्ट्रे - - ।

मन्त्रेऽस्मिन्नपि राष्ट्रमेवोच्चारितमतो राष्ट्रोत्पत्ति कालस्तु वैदिक काल एव सिद्ध: । राष्ट्रमपि राज्याङ्गम्, सप्तस्वङ्गेष्वस्य महत्वं सर्वाधिकम्, यतोराज्याङ्गानामुत्पत्तिक्रमे प्रथममेतदेवोत्पन्नम्, एतस्मादेवान्येषां स्वाम्या-मात्यादीनां षडङ्गानामुत्पत्ति: । तद्यथा --

राज्याङ्गानान्तु सर्वेषां राष्ट्राद्भवति सम्भ[5]व: ।

अग्निपुराणे राष्ट्रस्य श्रेष्ठता वर्णिता --

अन्येषामङ्गानामभावेऽपि राष्ट्रन्तु जीवत्येव, किन्तु राष्ट्रस्याभावे

---

(१) अथर्ववेद: १९।४१ (हि०रा०शा० ४२ पृष्ठोद्धृतम्) ।
(२) ऋग्वेद: ४।४२।१ । (३) ऋग्वेद: ७।३४।११ ।
(४) शुक्लयजुर्वेद: २२।२२ । (५) कामन्दकीयनीतिसार: ६।३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

तु न जीवन्त्यन्यान्यङ्गानि । अतः स्वाम्यादि षडङ्गानामस्तित्वाधारस्तु राष्ट्रमेव, न त्वङ्गमात्रस्याधारतां गच्छत्येतदपित्वशेषाणां जगत्युद्भूतानां स्थावरजङ्गमानामेव । यतोऽस्मादेव चराचरजगत्पालितं पोषितञ्च । चराचराणां कृते नितरामपेक्षितानि धनान्नवस्त्रफलपुष्पपत्रतृणोदकादीनि सर्वविधानि वस्तून्युत्पादयत्येतत्, चराचरजगतां कृतेऽपेक्षितानि वस्तून्युत्पाद्य लोकस्यास्तित्वं रक्षति । अतो राष्ट्रान्महन्नकिमप्यङ्गम् । तद्यथा --

राज्याङ्गानां वरं राष्ट्रं साधनं पालयेत्सदा[१] ।

श्रेष्ठताप्रतिपादकमतखण्डनम् -

सप्तस्वङ्गेष्वेकस्याङ्गस्य श्रेष्ठत्व प्रदर्शनं सर्वथाऽसङ्गतम् । यतः स्वस्व स्थाने स्वस्व कार्ये च तत्तदङ्गं विशिष्टं न किञ्चिन्न्यूनमधिकञ्च । राज्यशरीरं मानवशरीरवदस्ति, मानव शरीरस्य हस्तपादादीनि सर्वाण्यङ्गानि तेषु तेषु कार्येषु महत्त्वप्रतिपादकानि, येनाङ्गेन यत्कार्यं सिद्धं तस्मिन्कार्ये तदेव श्रेष्ठम् । यदि किञ्चिदङ्गं हीनं निर्बलं वा भवेत्तदा तेन सम्पाद्यं कार्यमसिद्धमेव तदा शरीरमपूर्णं निरर्थकं वा जायते । अतो राज्याङ्गान्यपि तादृशान्येवातो राज्य सञ्चालनार्थं स्वाम्यमात्यराष्ट्रादीनि सर्वाण्येवाङ्गान्यावश्यकानि समान महत्त्व प्रतिपादकानि च । पुनस्तानि स्व स्व कार्यस्थाने विभागे वा श्रेष्ठत्वमपि प्रदर्शयन्ति।

---

(१) अग्निपुराणम् ३६।२ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

सप्ताङ्गस्येह राज्यस्य विष्टब्धस्य त्रिदण्डवत् ।
अन्योन्यगुणवैशेष्यान्न किञ्चिदतिरिच्यते ।।
तेषु तेषु तु तत्तदङ्गं विशिष्यते ।
येन यत्साध्यते कार्यं तदस्मिन् श्रेष्ठमुच्यते[1] ।।

राष्ट्राभिधा देशाः -

राष्ट्रममरकोशस्यानुसारं राज्यस्य पञ्चममङ्गम् । अस्य लक्षणमुपर्युक्तम् । सम्प्रति देशलक्षणं प्रस्तूयते । यो राज्ञो दण्डादिकमधिकारं रत्नकनकद्रव्यादिभिः कोशं (राष्ट्रियं) च वर्धयति स एव देशः । तथैवोक्तं नीतिवाक्यामृते --

"भर्तुर्दण्डकोशवृद्धिं ददातीति देशः"[2] ।

राष्ट्रदेशयोर्न किमप्यन्तरम्, वस्तुतस्तु राष्ट्रशब्दो देशवाचकः । शब्दावेतौ पर्यायवाचकौ, तस्मादेतौ प्रयोक्तुरधीनतां गतावेव दृश्येते । भारतवर्षे एतद्विधा राष्ट्रबोधका बह्वोदेशाः शास्त्रदर्शिताः, तेषां सर्वेषामत्र विवेचनमसम्भवं तथापि सान्दर्भिकाः केचिदत्र विविच्यन्ते ।

भारतवर्षमिमं कर्मभूमिरिति वदन्ति मुनयः । कृष्णसारो मृगो स्वच्छन्दं विचरति तस्माद्धर्मकर्माहोऽतिपवित्रोऽयं देशः । तथा च मनुस्मृतौ --

कृष्णसारस्तु चरति मृगोयत्र स्वभावतः ।
स ज्ञेयो यज्ञियो देशो म्लेच्छदेशस्त्वतः परः[3] ।।

---

(१) मनुस्मृतिः ९।२९६-२९७ । (२) नीतिवाक्यामृतम् (जनपदसमुद्देशः) । (३) मनुस्मृतिः २।२३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

ग्रामाद्व्यासेऽपि ग्रामान्तं निरन्तरालं निरूपयेत् ।
ग्रामाद्युत्तरीयेऽपि च तथा निर्दिशेदिति ॥
क्षेत्रे देवे च तदर्थे विनिर्दिशेत् ।
एवं व्याख्याना बहवो प्रयोगास्तु प्रदर्शिताः ॥

रामाश्रमिता सभा: -

रामाश्रमिकायामपि रामाश्रमे लक्षणशास्त्रे । यथा भवतापि [illegible] ।
[illegible] । [illegible] [illegible] ।
[illegible] -

"[illegible]" ।

[illegible]

[illegible] ।

[illegible] -

[illegible] ।
[illegible] ॥

---

(१) [illegible] (२) [illegible]
[illegible] (३) [illegible]

CC.O Sampurnanand University Collection. Digitized by eGangotri

ब्रह्मावर्तकुरुक्षेत्रमत्स्यपञ्चालशूरसेनमध्यदेशादयोऽत्युत्तमा राष्ट्राभिधा देशा वर्षेऽस्मिन्सन्त्यन्तर्हिता: । यत्र स्थित्वा मानवताया विकासं कुर्वन्ति मानवा:, मानवजीवनस्योच्चताभादर्शतां च विश्वमानवसमक्षं प्रदर्शयन्ति । एतद्विधादेशा पाश्चात्यदेशे दुर्लभा: । महाभाष्येऽजमीढाङ्गाम्बष्ठावन्तीक्ष्वाकुकुणिककलिङ्गोशीनरकश्मीरकाशिकुन्तिकुरुकेरलकोसलदाक्षकगन्धारचोऽजिह्वत्रिगर्तकंडेरदशार्णनीचकनीपनैशपञ्चालपारस्करपुण्ड्रमगधमद्रमहिषमालवयुगन्धरवंगविदर्भविदेहवृजिशिबिसुह्य-कम्बोजसाल्वसौवीराणां देशानामुल्लेखोऽस्ति[1] । ऐतरेयब्राह्मणे भारतवर्षोऽयं पञ्चसु भागेषु विभक्तोऽस्ति यथा -- (१) पूर्वप्रदेश:, (२) दक्षिणप्रदेश:, (३) पश्चिमप्रदेश:, (४) उत्तरप्रदेश: (प्रदेशेऽस्मिन्द्वौ देशौस्त:, उत्तरकुरु उत्तरमद्रश्चैति । (५) मध्यदेश: (अस्मिन् कुरुपञ्चालउशीनराश्चैति त्रयो प्रदेशा वर्तन्ते) । पुनर्भारतवर्षोऽयं भागद्वयेऽपि विभक्तो दृश्यते दक्षिणापथ उत्तरापथश्चेति । नर्मदाया दक्षिणो भूभाग दक्षिणापथ: । उत्तरापथे बह्वो देशा: सन्ति । महाभारते द्विशताधिकानां देशानामुल्लेखा प्राप्यते भारतवर्षस्य । बौधायनगृह्यसूत्रे भारतवर्षस्य नवानां देशानां वर्णनमस्ति । कुत्रचित् सप्ततिर्देशा वर्णिता दृश्यन्ते कुत्रचित्तु चतु: षष्टि: । तन्त्रशास्त्रे ५६ देशानामुल्लेखोऽस्ति । इत्थं भारतवर्षस्यानेकानां देशानां वर्णनमुपलभ्यते । विजयपराजयाभ्यामेतेषु केचिद्देशा: परिवर्तिता अपि दृश्यन्ते । एतेषु देशेषु बहुविधा जात्योऽनेकवर्णाविगाश्च निवसन्ति । देशस्य जातस्य वर्णस्य चाधारे धर्मसंस्कृत्यादिषु किञ्चिदन्तरं प्राप्यते । किन्तु बहुविधेषु कृत्येषु त्वेकरूपताप्युपलभ्यते । विशेषत: शासनव्यवस्था तु सर्वेषु प्रदेशेषु समानरूपैवेति ।

---

(१) पाणिनि: ४।१।१७०-१७५, ४।२।१०८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

राष्ट्ररक्षणोपाया: -

राष्ट्रमितिनाम्ना प्रसिद्धा एते देशा स्वस्य स्वस्यदेशस्य रक्षणोपायान् विचारयन्ति । उपायेषु त्रय: प्रसिद्धा:, ते चैतादृशा: - (१) शासनव्यवस्था, (२) न्यायव्यवस्था, (३) दण्डव्यवस्था च । एतेभ्यस्त्रिभ्य उपायेभ्य राज्यं भवति सञ्चालितं रक्षितं चाथद्राज्यस्यैतेत्रयो विषया: प्रमुखा: । एतेषामर्थान्न्यायस्य शासनस्य दण्डस्य च सुसञ्चालनं कर्त्तव्यम् । न्यायशासनसञ्चालने न्यायाधीशस्य प्रमुखा भूमिका विद्यते । दण्डशासनञ्चन्यायशासनान्तर्गतमेव, अर्थात्क: कीदृशेन दण्डेन दण्डनीय:, अस्य निर्णयस्तु न्यायाधीशस्याधीन: । न्यायशासनस्य विवेचनं न्यायप्रकरणे दण्डशासनस्य विवेचन्तु दण्डप्रकरणे एव विधीयते । अत्र तु केवलं राज्यशासनव्यवस्थाया वर्णनमुपस्थाप्यते । शासनव्यवस्थायां विशेषत उच्च-पदाधिकारिणामेव महत्वपूर्णं स्थानं विद्यते । अर्थात्त एव राज्यस्य सर्वमान्तरिकं शासनं सञ्चालयन्ति । राज्यशासनस्य प्रकृतिस्त्वनेकविधा, अतएव शासनसञ्चालनसौक-र्यायानेके विभागा भवन्ति संस्थापिता: परिकल्पिता वा । इत्थं विभागं परिकल्प्य तेषु सर्वेषु विभागेषु विभागाध्यक्षा नियुज्यन्ते । अतोऽत्र तेषां विभागाध्यक्षाणां विभागीयकार्यस्य च वर्णनं विधीयते ।

शासनव्यवस्था : राज्यशासनव्यवस्थायां विभागीया: शासका: -

राज्यस्य सर्वोच्च शासकस्तु राजैव राष्ट्रपतिर्वा । अस्य सहयोगार्थं मन्त्रिणो नियुज्यन्ते । एते स्वस्य स्वस्य मन्त्रालयस्य सर्वविधं कार्यं सञ्चालयन्ति । प्रान्तीयशासनसञ्चालनार्थं प्रत्येकं प्रान्ते सर्वोच्च शासको व्यवस्थाप्यते । गुप्तकालेऽस्य-

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

सहयोगार्थं चत्वार: सहायका नियुक्ता आसन् । ते च यथा - (१) नगरश्रेष्ठी, (२) सार्थवाह:, (३) प्रथमकुलिक:, (४) प्रथमकायस्थ: । एते शासन सञ्चालनादौ सम्मतिं प्रयच्छन्ति स्म । केन्द्रीयशासनव्यवस्थायां तु मन्त्रिण एव प्रमुखा: । एतेऽप्येकस्यैव मन्त्रालयस्य प्रमुखतामङ्गीकुर्वन्त्यथादिकोऽमात्य: सामान्यत एकस्यैव मन्त्रालयस्य करोति शासनम् । शासनकार्यसौकर्याय एकस्मिन्मन्त्रालयेऽप्यनेके विभागा: परिकल्प्यन्ते । प्रत्येकं विभागे एको मुख्योऽपि व्यवस्थाप्यते, यो विभागाध्यक्ष इति नाम्ना विख्यात: । विभागस्य सर्वमेवकार्यमस्यैवाधीनम् । कतिपयानिकार्य-जातानि कर्मचारिणां परामर्शेण स्वयमेव समाधयति । कतिपयानि कार्याणि स्वस्य माध्यमेन मन्त्रिणो निर्णयं कुर्वन्ति । एतद्विकार्यसंचालनस्य नियमो निर्धारित: । तस्यैवाधार एव कर्मचारिणो विभागाध्यक्षा: सचिवा मन्त्रिणोऽपि सर्वं शासनकार्यं सञ्चालयन्ति । सचिवामात्ययो: कार्यन्त्वमात्यप्रकरणेऽस्ति विवेचितम्, अत्र तु केवलं विभागाध्यक्षाणां तेषां कार्यस्य च विवेचनं प्रस्तूयते । तेचाध्यक्षा: कार्यसञ्चालनकुशला:, नैतिकगुणसम्पन्ना:, अर्थेष्वलोलुपा:, तत्तत्कार्यचतुरा:, चतसृभिरुपधाभिर्विशुद्धा:, आयकार्येषु व्ययकार्येषु चानलसा:, प्राज्ञत्वादि गुण-युक्ता:, स्वामिभक्ताश्च नियोक्तव्या: । तथा च मनुस्मृतौ --

अध्यक्षान्विविधान्कुर्यात्तत्र तत्र विपश्चित: [१] ।
तेऽस्य सर्वाण्यवेक्षेरन्नृणां कार्याणि कुर्वताम् ।।

---

(१) मनुस्मृति: ७।८१ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

याज्ञवल्क्यस्मृतावपि --

तत्र तत्र च निष्णातानध्यक्षान्कुशलान्शुचीन्[1] ।
प्रकुर्यादायकर्मान्तव्ययकर्मसु चोद्यतान् ॥

कामन्दकीयनीतिसारेऽपि --

अभ्यस्तकर्मणस्तज्ज्ञान् शुचीन् सुज्ञानसम्पतान्[2] ।
कुर्यात्कुलोगसम्पन्नानध्यक्षान् सर्वकर्मसु ॥

कौटिल्योक्ता विभागाध्यक्षास्तेषां कार्याणि च -

नीतिज्ञो कौटिल्यः स्वस्मिन्नर्थशास्त्रे शासनसञ्चालनस्य कृतेऽपेक्षितानां विभागानां विभागाध्यक्षाणाञ्च वर्णनमुपस्थापयति । राज्यं विविधविषयोपेतम्, तेषां सर्वेषां समुचितव्यवस्थाकरणमेव राज्यसञ्चालनम् । तत्सञ्चालनार्थं विषयेण सह सम्बद्धा अनेके विभागा अपि अपेक्षिता भवन्ति, पुनर्विभागकार्यसञ्चालनार्थं विभागाध्यक्षा अप्यपरिहार्याः । अत एव कौटिल्योऽष्टाविंशतिविभागान् तेषामध्यक्षांश्च प्रदर्शयति । अत्रापि ते विभागा विभागीयप्रमुखास्तेषां कानिचित्कार्याणि च प्रदर्श्यन्ते --

(१) निर्माणविभागः । विभागेऽस्मिन्सन्निधाताख्योऽध्यक्षो नियुज्यते । सोऽयं राष्ट्रियकोशागारपण्यगृहकोष्ठागारकुप्यागारायुधागारकारागारत-यातायातादीनां निर्माणं कारयति । पुनस्तेषामागारेष्वागाराध्यक्षस्य

---

(१) याज्ञवल्क्यस्मृतिः १।३२२ । (२) कामन्दकीयनीतिसारः ५।७५

CC.O Sampurnanand University Collection. Digitized by eGangotri

सहयोगमादायागारोपयुक्तवस्तुसंग्रहणं संगृहीतस्य समुचितं संरक्षणं रक्षितस्य संवर्धनम् उचितकाले यथोचित स्थले च वितरणञ्च करोति ।[1]

(२) करविभाग: । अस्मिन्विभागे समाहर्ता नामोऽधिकारी स्थाप्यते । स एव विभागाध्यक्ष: । अयं दुर्गराष्ट्रखनिसेतुवनव्रजवणिक्पथादीनां निरीक्षणं कृत्वा एतेभ्यो यथोचितं (शास्त्रोदितं नियमोक्तं वा) करं गृह्णाति ।

(१) शुल्कस्थानदण्डतुलाशासनादिमापकयन्त्रनगराध्यक्षलक्षणाध्यक्ष-मुद्राध्यक्षसुराध्यक्षसूनाध्यक्षसूत्राध्यक्षापणिकसुवर्णाध्यक्षा-पणवेश्याद्यूतवास्तुकसुवर्णकारलोहकारनटनर्तकादिभ्य: कररूपं यद्धनं प्राप्यते तद्दुर्गम् ।

(२) कृषिभागबलिफलवृद्धिव्यापारनदीनावपट्टनविवीतमार्गभू-निरीक्षकश्चैतान्यायसाधनानि एतेभ्य: प्राप्यं धनं राष्ट्रमुच्यते ।

(३) सुवर्णरजतहीरकमणिधातिक्यलोहलवणपाषाणादय: खनिज-पदार्था: खनिशब्देन व्यवह्रियन्ते ।

(४) पुष्पफलक्षेत्रादिभ्यो यद्धनमुपलभ्यते तत्सेतु: ।

(५) मृगादिपशव इन्धनादिद्रव्यं हस्तिवनञ्च वनशब्देन व्यवह्रियतेऽर्था-देतेभ्य आगतं धनमेव वनम् ।

(६) गोमहिषाजाविकरवरोष्ट्राश्वाश्वतराश्चैते व्रजशब्देनोच्यार्यन्ते, एतेभ्योऽपि करग्रहणं कर्तव्यम् ।

(७) स्थलमार्गोजलमार्गश्चापि वणिक्पथ: । एतेभ्य: सप्तविधेभ्यो

---

(१) कौटलीयार्थशास्त्रम् २१५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

मार्गेभ्यः एतदतिरिक्तेभ्यो मार्गेभ्योऽपि करसङ्कलनं कर्तव्यं समाहर्त्रा[1]।

(३) लेखापरीक्षणविभागः। विभागस्यास्याध्यक्षस्त्वक्षपटलः।

असावधिराज्यस्थापितानामधिकरणानां सर्वविधानां विभागानान्चायव्यययोर्निरीक्षणमर्थाल्लेखापरीक्षणं करोति[2]।

(४) अर्थ (राष्ट्रियकोश) विभागः। अस्य विभागस्य प्रमुखः कोशाध्यक्षः। राष्ट्रियकोशसंरक्षणसंवर्धनादिकं कर्तव्यमनेन। सुवर्णरत्नद्रव्यादिभिः कोशसंवर्धनं कोशप्रावेश्य रत्न परीक्षणान्च यत्नतो विधातव्यं कोशाध्यक्षेण[3]।

(५) आकरविभागः। अस्मिन्विभागेऽप्यध्यक्षो नियुज्यते, य आकराध्यक्ष इति शब्देनोच्चार्यते। अध्यक्षोऽयं सर्वविधानामाकराणां संरक्षणं सन्चालनं खन्युद्भवानां सुवर्णादि धातूनां लवणादि द्रव्याणान्च परिचालनन्च करोति[4]।

(६) मुद्रोत्पादनविभागः (टकसार) अस्य प्रमुखस्तु लक्षणाध्यक्षः। राष्ट्रियनीत्यनुसारं नियमितरूपेण मुद्रामुत्पादयति[5]।

(७) सुवर्णविभागे सुवर्णाध्यक्षो नियुज्यते। अध्यक्षोऽयं प्रथममक्षशालाया निर्माणं कारयति। तत्र स्थित्वा सुवर्णरजतादीनां विविधाभूषणनिर्माणं सुवर्णादिरत्नपरीक्षणान्च स स्वयमेव करोति कारयति वा। नगरग्रामादिष्वपि शिल्पशालां निर्माय शिल्पकारान् संस्थाप्य सुवर्णादिधातूना-

---

(१) कौटलीयार्थशास्त्रम् २।६। (२) कौटलीयार्थशास्त्रम् २।७।
(३) कौटलीयार्थशास्त्रम् २।११। (४) कौटलीयार्थशास्त्रम् २।१२।
(५) कौटलीयार्थशास्त्रम् २।१२।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

मलङ्कारनिर्माणव्यवस्थां विदधाति[1] ।

(८) खाद्यान्नविभागः । अस्य प्रमुखः कोष्ठागाराध्यक्षः । कृष्यधान्याद्यन्न सङ्कलनार्थं सीताध्यक्षो नियुज्यते, तस्य सहयोगेन खाद्यान्नसंग्रहणं विधाय कोष्ठागारे स्थापनं स्थापितस्य संरक्षणादिकां सर्वविधां व्यवस्थां करोति कोष्ठागाराध्यक्षः । खाद्यान्नमिति कथनेन माषमुद्गतिलयवगोधूम गुडतैलघृताम्लादयोऽपि गृह्यन्ते[2] ।

(९) क्रयविक्रयविभागः । अस्य प्रमुखः पण्याध्यक्षः । राष्ट्रस्य कृतेऽपेक्षितानां सर्वविधानां वस्तूनां क्रयस्य राष्ट्रेसन्चितानां विक्रेयाणां सर्वविधानां द्रव्याणां पदार्थानां वा विक्रयस्य च यथा काले यथोचितां व्यवस्थां विदधाति[3] ।

(१०) वनविभागः । विभागेऽस्मिन्कुप्याध्यक्षो नियुज्यते । सोऽयं वनस्य संरक्षणं संवर्धनं काष्ठेन्धनादिवितरणस्य सुव्यवस्थां च करोति । विशेषतो वृक्षारोपणं रक्षणञ्चास्यानिवार्यं कर्तव्यम् । वृक्षेष्वपि महत्वपूर्णानां विशेषव्यवस्था विधातव्या । सारपूर्णवृक्षाश्चैतादृशाः --

"शाकतिनिशधन्वनार्जुनमधूकतिलकसालशिंशपारिमेद-
राजादनशिरीषखदिरसरलतालसर्जाश्वकर्णसोमवल्क-
कशाम्रप्रियकधवादिसारदारुवर्गः"[4] ।

सिंहव्याघ्रगजमहिषगण्डकहरिणादीनां वन्यजन्तूनां चर्मदन्तशृङ्गखुरादीनां

---

(१) कौटलीयार्थशास्त्रम् २।१४ । (२) कौटलीयार्थशास्त्रम् २।१५ ।
(३) कौटलीयार्थशास्त्रम् २।१६ । (४) कौटलीयार्थशास्त्रम् २।१७ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

सङ्कलनं च कर्तव्यं वनविभागाध्यक्षेण ।

(११) आयुधविभागे आयुधागाराध्यक्षः स्थाप्यते । असावध्यक्षो युद्धोपयुक्तानां स्थितयन्त्रचलयन्त्रहलमुखकुन्ततोमरादीनां विविधानां शस्त्रास्त्राणां निर्माणं कारयति । निर्मितानां संरक्षणस्य व्यवस्थां च विदधाति ।

(१२) तुलादिमापकयन्त्रव्यवस्था विभागः । अस्मिन्विभागे पौतवाध्यक्षो नियुज्यते । स एव तुलाशासनमानादीनां परिमाणमापक-साधनानां परीक्षणनिर्माणादिकं सर्वमेवकार्यं सञ्चालयति । तेषां साधनानां यत्र यत्रावश्यकता विद्यते, तस्याः परिपूरणमप्यस्यैव कर्तव्यम्[१] ।

(१३) शुल्कविभागे शुल्काध्यक्षस्य नियुक्तिर्विधातव्या । अध्यक्षोऽयं प्रथमं शुल्कशालाया निर्माणं कुर्यात् । तत्र स्थित्वा नियमोक्तानां सर्वविधानां शुल्कानां ग्रहणं कुर्यात् । शुल्कग्रहणात्प्राक् कीदृशस्य वस्तुविशेषस्य शुल्क-परिमाणं किमित्यादिकं सर्वमेव विचार्यम् । शुल्कग्राह्यवस्तूनां संख्यापरिमाणादिकं च लेख्यमित्यादिकं शुल्काध्यक्षस्य[२] कर्तव्यम् ।

(१४) सूत्रोद्योगविभागस्याधिकारी सूत्राध्यक्षः । एष ऊर्णाकार्पास-तूलवल्कलक्षौमशणादीनां सूत्रोत्पादनव्यवस्थां करोति । यस्मा-ज्जनजीवनोपयुक्तानि विविधानि वस्त्राणि वर्मरज्जादीन्यनेकानि व्यवहारोपयुक्तानि वस्तूनि निर्मीयन्ते । विशेषतः सूत्रकर्तनं स्त्रीजातयः कुर्वन्ति । तथा च कौटिल्यः --

---

(१) कौटलीयार्थशास्त्रम् २।१९ । (२) कौटलीयार्थशास्त्रम् २।२१ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

ऊर्णावल्कलकार्पासतूलशणक्षौमाणि च विधवान्यङ्गा-
कन्याप्रव्रजितादण्डप्रतिकारिणीभी रूपाजीवामातृकाभि-
र्वृद्धराजदासीभिर्व्युपरतोपस्थानदेवदासीभिश्च कर्तयेत्[1] ।

(१५) कृषिविभाग: । विभागेऽस्मिन् सीताध्यक्षो नियुज्यते ।
कृषिशास्त्रस्य शुल्बशास्त्रस्य वृक्षायुर्वेदशास्त्रस्य च पर्याप्तं
ज्ञानं कर्तव्यमेनेन । अथवैतेषु शास्त्रेषु यो विज्ञो भवेत्तस्यैव सहयोगेन स्वं कार्यं
सञ्चालनीयम् । क्षेत्रकर्षणोपयुक्त कुद्दालादि साधनानां देशकालादीन् विचार्य-
क्षेत्रोपयुक्तानां बीजानामन्नवृद्धिकराणां रासायनिकमलविशेषणाञ्च सुव्यवस्था-
करणं यथाकालं धान्याद्यन्नानां शास्त्रोक्तांश ग्रहणञ्चेत्यादीनि सीताध्यक्षस्य
कर्तव्यानि[2] ।

(१६) मद्योत्पादनमद्यविक्रयव्यवस्थाविभाग: । विभागेऽस्मिन् सुराध्यक्षो
नियुज्यते । अध्यक्षोऽयं सुराविक्रयस्थानं निर्दिशति । निर्दिष्टस्थले
परिमितसुराविक्रयव्यवस्थाकरणम्, परिमितसुरोत्पादनादौ निर्देशप्रदानम्, ये देशकाल-
परिमाणादीनतिक्रम्य सुराविक्रयं कुर्वन्ति तेभ्य:, ये सुरां पीत्वा अनुचितं कार्यं
कुर्वन्ति तेभ्योऽपि यथोचित दण्डप्रदानञ्चेत्यादीनि सुराध्यक्षस्य कार्याणि[3] ।

(१७) मांसोत्पादनमांसविक्रयव्यवस्थाविभाग: । सूनाध्यक्षो विभागस्यास्य
प्रमुख: । प्रमुखोऽयमप्रतिबन्धितानां पशूनां मांसविक्रयव्यवस्थां
विदधाति । ये प्रतिबन्धितानां पशूनां मांसविक्रयं कुर्वन्ति तेभ्योऽपराधानुसारेण
दण्डञ्च प्रयच्छति । पुनर्मांसविक्रेतृभ्यकरादिकं च गृह्णाति सूनाध्यक्ष:[4] ।

---

(१) कौटलीयार्थशास्त्रम् २।२३ । (२) कौटलीयार्थशास्त्रम् २।२४ ।
(३) कौटलीयार्थशास्त्रम् २।२५ । (४) कौटलीयार्थशास्त्रम् २।२६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

(१८) वेश्याविभाग: । विभागस्यास्य प्रमुखो गणिकाध्यक्ष: । वेश्याया वृत्तिव्यवस्थापनार्थमध्यक्षोऽयं नियुज्यते । कनिष्ठ-मध्यमोत्तमभेदेन गणिकास्त्रिविधा:, एतासां तिसृणामेव यथोचितावृत्ति: कल्पनीया । या स्त्रीगणिकावृत्तिं त्यजति तदाध्यक्षस्तस्या: समुचितवृत्तिव्यवस्थां कुर्यात् ।[1]

(१९) नौकाव्यवस्था, नौकाया जलमार्गस्य वा सुव्यवस्थार्थमेक: पृथगेव विभाग: कल्पित: । विभागेऽस्मिन्नेकोऽध्यक्षोऽपि स्थाप्यते, सोऽयं नावाध्यक्ष इति शब्देनोच्चार्यते । जलमार्गेत्पन्नानां सर्वेषामानां समस्यानां समुचितरूपेण समाधानमस्य कर्तव्यम् । पुनर्येजलमार्गेण यात्रां कुर्वन्ति व्यापारवस्तूनि तदतिरिक्तान्यन्यान्यपि वस्तून्यानयन्ति तेभ्यो देशकालपरिस्थितिं द्रव्यं चावेक्ष्य शुल्कग्रहणन्चेत्यादीन्यध्यक्षस्यैव कर्तव्यान्तर्गतानि ।[2]

(२०) पशुविभाग: । पशुविकासार्थं पशुविभागेगोऽध्यक्षाख्योऽधिकारी नियुज्यते । सोऽयं पशूनां कृते घासादिकादीनां प्रचारणस्य च सुव्यवस्थां विदधाति । पशुपालनार्थं पालका:, दोहनार्थं दोहका-मथनार्थं मन्थका रक्षणार्थं लुब्धकाश्चापि नियुज्यन्ते । निरन्तरं तेषां कार्यपरीक्षणं कार्यविषये निर्देशनन्च कर्तव्यमध्यक्षेण ।[3]

एवमेवाश्वविभागेऽश्वाध्यक्ष:, गजविभागेहस्त्यध्यक्ष:, रथविभागे-रथाध्यक्ष:, रक्षाविभागे पत्त्यध्यक्ष:, मुद्राविभागे मुद्राध्यक्ष:, विवीतविभागे विवीताध्यक्ष:, ग्रामव्यवस्थाविभागे गोपोग्रामाध्यक्षो वा, नगरव्यवस्थाविभागे

---

(१) कौटलीयार्थशास्त्रम् २।२७ । (२) कौटलीयार्थशास्त्रम् २।२८ ।
(३) कौटलीयार्थशास्त्रम् २।२९ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

नागरिको काराध्यक्षो वा, दुर्गविभागे स्थानिको नियुज्यते[1]।

प्रकारेणानेन राज्यव्यवस्थायां राज्यप्रकृत्यनुरूपा भवन्त्यनेके विभागाः परिकल्पिताः। प्रत्येकं विभागेऽध्यक्षव्यवस्थापि विहितैव। तेषां विभागाध्यक्षाणां सहयोगेन माध्यमेन च राज्यशासनं सन्चाल्यते। इत्थमेवास्माकमाचार्याः शासन-सन्चालनव्यवस्थां कल्पयन्ति। किन्तु विभागविषये संख्यायामुपस्थापकमेवाचार्याणां नास्ति मतैक्यम्। अस्य कारणन्त्वेतदेव स्यात्, यस्मिन्समये ये आचार्या आसन् तस्मिन्समये राज्यस्य का स्थितिः शासनसन्चालनार्थं कीदृशी व्यवस्थाऽपेक्षिता, एतत्सर्वं विचार्य तदनुसारमेव विभागा विभाजिताः। उपर्युक्ता विभागास्तु कौटिल्यविभाजिताः, तेन तु गणिकायाः सुरायाः सूनायाश्चापि पृथग्विभागनिर्देशो विहितः। यतस्तस्मिन्काले तादृशानां विभागानामपि पृथग्व्यवस्थाकरणमत्यावश्यकम्। किन्त्वन्यैराचार्यैरेतद्विधानां विभागानां पृथग्व्यवस्था न तु कृता। राज्यव्यवस्थायां सम्प्रत्यपि गणिकाद्याः पृथग्विभागास्तु नोपलब्धाः। आधुनिकै राजनीतिज्ञै-श्चाप्येतादृशानां विभागानामावश्यकता न तु दर्शिता। शिक्षास्वास्थ्यजलविद्युदा-दीनां पृथग् विभागाः कौटिल्येन न तु दर्शिताः, यतः कौटिल्यकाले एते विभागा नापेक्षिताः, तेनैते नोल्लिखिताः। किन्त्वेते विभागाः सर्वेषु राज्येष्वपेक्षिताः तस्मादेवैते सर्वत्र व्यवस्थिता अपि दृश्यन्ते, सम्प्रति। एतादृशानां विश्वव्यापकानां विभागानामनुल्लेखात्कौटिल्येऽप्यस्मिन्विषये तु दूरदर्शितायाभावो नोपलब्धः। अत एव विभागास्तु देशकालपरिस्थित्यनुसारमेव स्थापिता दृश्यन्त इति मदीयोऽयं विचारः।

---

(१) कौटलीयार्थशास्त्रम् २।३०-३६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

कर्मचारिणां कार्यपरीक्षणम् -

इत्थं विभागानां विभागाध्यक्षाणाञ्च व्यवस्था विधीयते । पुनः प्रत्येकं विभागे विभागीयकार्यसञ्चालनार्थं बहवोऽर्थादावश्यकतानुसारं कर्मचारिणोऽपि नियुज्यन्ते । एतैः प्रमुखैः कर्मचारिभिश्च निर्दिष्टं नियमोक्तं वा स्वं स्वं सर्वमेव कार्यं यथोक्तसमये समुचितरूपेण कर्तव्यम् । किन्तु बहवः कर्मचारिणोऽर्थलोलुपा भवन्ति, तस्मादर्थाधिकारे नियुक्ताः केऽपि पुरुषाः कर्मचारिणो वा स्वल्पमपि धनादानमवश्यमेव कुर्वन्ति । तथा च प्रोक्तं कौटिल्येन --

यथा ह्यनास्वादयितुं न शक्यं जिह्वातलस्थं मधु वा विषं वा ।
अर्थस्तथा ह्यर्थचरेण राज्ञः स्वल्पोऽप्यनास्वादयितुं न शक्यः[1] ॥

परधनानुरक्ता वञ्चका कर्मचारिणः कदा कथमुत्कोचादिकं गृह्णन्तीति कथयितुं न शक्यत इत्याह कौटिल्यः --

मत्स्या यथान्तः सलिले चरन्तो ज्ञातुं न शक्याः सलिलं पिबन्तः ।
युक्तास्तथा कार्यविधौ नियुक्ता ज्ञातुं न शक्या धनमाददानाः[2] ॥

राज्यरक्षार्थं नियुक्ता राज्यसञ्चालनकार्यसहयोगार्थं वाऽधिकृताः कर्मचारिणो बाहुल्येन परधनानुरक्ता भवन्ति, तस्मात्तेभ्यो राज्यरक्षणं प्रजारक्षणञ्च यत्नतः कर्तव्यं राज्ञा । तथा चोक्तं मनुना --

राज्ञो हि रक्षाधिकृताः परस्वादायिनः शठाः ।
भृत्या भवन्ति प्रायेण तेभ्यो रक्षेदिमाः प्रजाः[3] ॥

---

(१) कौटलीयार्थशास्त्रम् २।६ । (२) कौटलीयार्थशास्त्रम् २।६ ।
(३) मनुस्मृतिः ७।१२३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

उच्चपदाधिकारिणस्त्वमात्यगुणोपेताः कार्याः । अर्थादमात्यानां कृते ये ये गुणा शास्त्रोक्ताः, तादृशा एव गुणा उच्च पदाधिकारिणां कृतेऽप्यपेक्षन्ते । गुणोपेतानां तेषां योग्यतायाः कार्यक्षमतायाश्चाधार एव तन्तत्पदे तेभ्यो नियुक्तिर्देया । कर्मचारिणोऽपि तद्विधा एव नियोक्तव्याः, ये गुणशीलसम्पन्नाः स्व स्व कार्यसाधनसमर्थाश्च सन्ति । इत्थं नियुक्तानां कर्मचारिणामध्यक्षाणाञ्च क्रियाकलापनिरीक्षणं समये समये कर्तव्यम् । यतो मानवस्वभावः सदैव नैकरूपः, गुणसम्पन्ना अप्यर्थकारणेन निर्गुणा जायन्ते यथाऽश्वशालायामश्वानां स्वरूपं शान्तमेव दृश्यते, किन्तु त एवाश्वा यदा रथेषु युज्यन्ते तदा तेषां स्वभावो भिन्नतामेति, अर्थात्दुष्टतामशान्ततां च यान्ति । मानवानां प्रकृत्यपि तादृश्येवार्थात्पिद माप्त्यनन्तरं दुराचरणं कुर्वन्त्येव । यदा येऽनुचितरूपेण परधनं राज्यधनं वा गृह्णन्ति तदा तेषां भ्रष्टाचरणानां सर्वस्वमादाय देशनिष्कासनं कुर्याद्राजा । तथा च मनुः --

> ये कार्यिकेभ्योऽर्थमेव गृह्णीयुः पापचेतसः[१] ।
> तेषां सर्वस्वमादाय राजा कुर्यात्प्रवासनम् ॥

कर्मचारिणां कार्यचरितमपि गुप्तचरैर्ज्ञात्वा तदनुरुपं कार्यं कर्तव्यं राज्ञाऽर्थात् सत्कार्यप्रवृत्ताः सदाचरणरताः परद्रव्येष्वनासक्ताश्च सन्ति ते दानमानपुरस्कारादिभिः सत्कार्याः । ये दुराचरणशीलाः परधनानुरक्ताश्च सन्ति ते त्वपराधानुसारेण दण्डनीयाः । तच्चोक्तं याज्ञवल्क्येन :-

---

(१) मनुस्मृतिः ७।१२४ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

ये राष्ट्राधिकृतास्तेषां चारैर्ज्ञात्वा विचेष्टितम् ।
साधून्संमानयेद्राजा विपरीतांश्च घातयेत् ॥[1]
उत्कोचजीविनो द्रव्यहीनान्कृत्वा विवासयेत् ।

ग्रामशासनव्यवस्थायां ग्रामाधिपतय: -

ग्रामशब्दोऽतिप्राचीन:, अस्योल्लेख ऋग्वेदे नापि विहितो यथा -- "यथा समसद् द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्नातुरम्"[2] । ग्रामशब्दो ऋग्वेदेऽप्युल्लिखितत्वाद् ग्रामशासनव्यवस्थाऽपि ऋग्वेदकालादेव प्रचलिता दृश्यते । एकक्रोशविस्तृतो भूभागो ग्राम:, अर्थाद्ग्रामस्य परिमाणं त्वेक क्रोशात्मकम् । क्रोशान्तर्गता जना ग्रामीणा: क्रोशपरिमाणविषये विदुषां मतभेदोऽस्ति यथा शुक्रनीतौ --

कर: पञ्चसहस्रैर्वा क्रोश: प्रोक्त: प्रजापते: ।
हस्तैश्चतु: सहस्रैर्वा मनो: क्रोशस्य विस्तर: ॥[3]

इत्थं मतभेदं प्रदर्शयन्ति शास्त्रप्रयोक्ता:, किन्त्वत्र मनोर्मतमेव प्रामाण्यं लोकप्रचलितं च दृश्यते । अर्थान्मनोर्मतमङ्गीकृत्य ग्रामसीमा निर्धारिता । ग्रामशासनन्तु निश्चित सीमान्तर्गतमेव । शासनमेतद् स्वग्रामं शासति । अस्यां व्यवस्थायामर्थाद्-ग्रामशासनसञ्चालनार्थं षड्जना ग्रामाधिपतयो व्यवस्थीयन्ते । ते च यथा -- (१) सेहसाध्यक्ष:, (२) ग्रामाधिपति:, (३) भागहार:, (४) लेखक:, (५) शुल्कग्राह:, (६) प्रतिहारश्च । ते चेत्थं वर्णिता: सन्ति शुक्रनीतौ --

---

(१) याज्ञवल्क्यस्मृति: १।३३८-३९ । (२) ऋग्वेद: १।११४।१ ।
(३) शुक्रनीति: १।१९४ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

साक्ष्याधिपतिं चैव ग्रामनेतारमेव च ।
भागहारं तृतीयं तु लेखकं च चतुर्थकम् ।।

शुल्कग्राहं पन्चमं च प्रतिहारं तथैव च ।
षाट्कमेतान्नियोक्तव्यं ग्रामे ग्रामे पुरे पुरे ।।[1]

प्रकारेणानेन ग्रामाधिपतीनां व्यवस्थाविहिता शुक्राचार्येण । एतेऽधिपतयः शास्त्रोक्तनियमानुसारं ग्रामशासनं सन्चालयन्ति ।

ग्रामशासनसंस्था -

प्रत्येकं ग्रामे तादृश्येकासंस्था परिकल्पितायया ग्रामसंस्थेति नाम्ना प्रसिद्धा । सैव संस्था ग्रामशासनं विदधाति । तस्यामुपर्युक्ताः पदाधिकारिणो भवन्ति । तेषु ग्रामाधिपतिरेव मुख्यः । सोऽयं ग्रामाधिपतिः, ग्राममुख्यः, ग्रामनेता, ग्रामणीः, ग्रमिकश्चेतैः शब्दैरुच्चार्यते । कुत्रचित्तु ग्रामकूटशब्दस्यापि प्रयोगो दृश्यते । ग्रामेऽस्य महत्वपूर्णा भूमिका विद्यते । केन्द्रीयसमितेः सदस्यत्वमप्याप्नोत्यसौ । राज्ञो-निर्वाचनेऽभिषेकप्रदानकाले चास्याधिकारो महत्वपूर्णः । ग्रामस्य त्वेष सर्वोत्तम एव । अस्यैवाध्यक्षतायां सर्वमेव ग्रामशासनादिकं सन्चाल्यते । ग्रामोत्पन्नानां सर्वविधानां समस्यानां समाधानादौ चौरादिभ्यो दुर्वृत्तिभ्यः प्रजारक्षणादौ च यः समर्थः स एवेतत्पदमाप्नोति । तद्यथा शुक्रनीतौ --

आधर्षकेभ्यश्चौरेभ्यो ह्यधिकारिगणात्तथा ।
प्रजासंरक्षणे दक्षो ग्रामपो मातृपितृवत् ।।[2]

---

(१) शुक्रनीतिः २।१२१-१२२ । (२) शुक्रनीतिः २।१७२ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

ग्रामशासनसंस्थायां दण्डस्यापि व्यवस्था विहिता । दण्डप्रयोगार्थं साहसाध्यक्षो व्यवस्थाप्यते । ग्रामिणानामपराधानुसारं दण्ड: प्रयोक्तव्य:, यस्य प्रयोगात्प्रजाजना विनाशावस्थां नाप्नुवन्त्यथाद्वितीयेनोपायेन दण्डप्रयोग: शास्त्रीयो भवेत्तादृश एवोपाय: शोचनीय: साहसाध्यक्षेण । य उचितदण्डप्रयोगे कुशल: स एव तत्पदमाप्नोति । उक्तञ्च शुक्राचार्येण --

प्रजा नष्टा न हि भवेत्तथा दण्डविधायक:[1] ।
नातिक्रूरो नातिमृदु: साहसाधिपतिश्च स: ।।

ग्रामसंस्थया करग्रहणञ्च विधीयते । तदर्थं भागहारस्य व्यवस्था कर्तव्या । मालाकारो यथा पुष्पं पुष्पं विचिनोति समूलमुन्मूल्य न तु छिनत्ति तथैव प्रजाभ्य: करग्रहणं विधातव्यम् । योऽनया रीत्या करादानं कर्तुं शक्नोति स एव तत्पदप्रदानार्ह: ।

उक्तञ्च --

वृक्षान् संपुष्य यत्नेन फलं पुष्पं विचिन्वति[2] ।
मालाकार इवात्यन्तं भागहारस्तथाविध: ।।

ग्रामसंस्थायां गणकोऽपि नियुज्यते । यो गणनायां कुशलोऽस्ति, यो देशस्य ग्रामस्य वा भाषाभेदं जानाति, य: सन्देहरहितार्थं ज्ञानं करोति पुन: सुस्पष्टं च लिखति स एव गणक (लेखक) पदमाप्नोति । तथा च --

गणनाकुशलो यस्तु देशभाषाप्रभेदवित्[3] ।
असन्दिग्धमगूढार्थं विलिखेत्स च लेखक: ।।

य: शस्त्रास्त्रविद्यायां निपुण:, बलसम्पन्न:, आलस्यरहित:, सद्वचनान्वितश्चास्ति स

---

(१) शुक्रनीति: २।१७१ । (२) शुक्रनीति: २।१७३ ।
(३) शुक्रनीति: २।१७४ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

[illegible]

[illegible]

[illegible] ।

[illegible] ॥

[illegible]

[illegible] ।

[illegible] ॥

[illegible]

[illegible] ।

[illegible] ॥

[illegible]

---

(१) [illegible] २।१०९ । (२) [illegible] २।१०३ ।

(३) [illegible] २।१०८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

सद्वचनान्वितश्चास्ति स एव प्रतिहारपदमाप्नोति । तच्चोक्तम् --

शस्त्रास्त्रकुशली यस्तु दृढाङ्गश्च निरालसः ।
यथायोग्यं समाहूयात् प्रनम्रः प्रतिहारकः[1] ।।

ग्रामसंस्थायां शुल्कदानस्य व्यवस्थापि विहिता । तच्च शुल्कं पण्यवस्तूनामेव ग्राह्यम् । आपणिकानामापणे शुल्कग्रहणयोग्यानि द्रव्याणि सन्ति न वा । केषां केषां द्रव्याणां शुल्कादानं कर्तव्यमित्यादिकं विचार्य शुल्कं गृह्णाति यः स एव शौल्किकपदे नियोक्तव्यः । तथा च --

यथा विक्रयिणां मूलधननाशो भवेन्न हि ।
तथा शुल्कं तु हरति शौल्किकः स उदाहृतः[2] ।।

प्रकारेणानेन ग्रामशासन सन्चालनार्थं बहुविधानां पदाधिकारिणां व्यवस्था विहिता । एते एव ग्रामस्य सुव्यवस्थां कुर्वन्ति ।

ग्रामशासनसंस्थायाः कर्तव्यम् --

अस्या बहूनि बहुविधानि कर्तव्यानि शास्त्रोदितानि तेषु कानिचिदत्रापि प्रदर्श्यन्ते । ग्रामसभाभवनसामाजिकभवनादीनां निर्माणं निर्मितस्य पुरातनस्य पुनर्निर्माणं जीर्णोद्धारकरणं वा, जलपानार्थं सामाजिककूपतडागादीनां सुव्यवस्थाकरणम्, देवालय-धर्मस्थलतीर्थस्थलशवदाहस्थलश्मशानघट्टादीनां यथोचितव्यवस्थाकरणम्, धर्मशालायानिर्माणं निर्मितस्यरक्षणम्, दरिद्राणामनाथानामुपनयनान्त्येष्ट्यादीनां संस्काराणां यथोचित-

---

(१) शुक्रनीतिः २।१७५ । (२) शुक्रनीतिः २।१७६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

व्यवस्थाकरणम्, विविधोपद्रवपीडितानां दैवीप्रकोपपीडितानाञ्च सहयोगकरणम्, यातायातनिर्माणम्, नदीतटेमार्गादौ वाऽश्वत्थादि वृक्षारोपणम्, असमर्थानामौषधोपचारस्य व्यवस्थाकरणम्, नापितकुलालादीनां व्यवस्थाकरणम्, गोचारणस्थलसंरक्षणम्, पशूनां कृते उपयुक्तानां जलाधारादीनां निर्माणम्, परम्पराया धर्मस्य च संरक्षणम्, परम्परागतसामाजिकमर्यादापालनञ्चेत्यादीनि ग्रामसंस्थायाः कर्तव्यान्यवगन्तव्यानि । यः सामाजिकमर्यादाया उल्लङ्घनं करोति तस्य सर्वस्वहरणं वाग्धिग्दण्डप्रदानं भर्त्सनं ग्रामान्निष्कासनञ्चेत्यादीन्यपि संस्थाया अधिकारान्तर्गतानि । उक्तञ्च --

ग्रामश्रेणिगणानाञ्च संकेतः समयक्रिया ।
बाधाकाले तु सा कार्या धर्मकार्ये तथैव च ॥
द्वौ त्रयः पञ्च वा कार्याः समूहहितवादिनः ।
कर्तव्यं वचनं तेषां ग्रामश्रेणि गणादिभिः ॥

सभाप्रपादेवगृहतडागारामसंस्कृतिः ।
तथानाथदरिद्राणां संस्कारो यजनक्रिया ॥

कुलायननिरोधं च कार्यमस्माभिरंशतः ।
यत्रैतल्लेखितं पत्रे धर्म्या सा समयक्रिया ॥

पालनीया समस्तैस्तु यः समर्थो विसंवदेत् ।
सर्वस्वहरणं दण्डस्तस्य निर्वासनं पुरात्[1] ॥

ग्रामसंस्था स्वतन्त्राधिकारसम्पन्ना -

वस्तुतः संस्थैषा स्वल्पाकारं राज्यमेव न कैषाञ्चिदप्यधीना, स्वतन्त्ररूपेणैव सर्वमेव ग्राम्यं कार्यं सञ्चालयति ग्रामसभया निर्मितनियमस्याधारे परम्परागतधर्मस्याधारे

---

(१) अपरार्क (पृ० ७९२-९३) एवं स्मृतिचन्द्रिका २।२२२-२३ उद्धृत ध०शा०इ०भा०२पृ०६५०

CC.O Sampurnanand University Collection. Digitized by eGangotri

[illegible]

[illegible]

[illegible]

[illegible]

[illegible] ।

[illegible]

[illegible] । यथा –

[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥

[illegible] ।
[illegible] ॥

[illegible] ।
[illegible] ॥

[illegible] ।
[illegible] ॥

[illegible] –

[illegible]

[illegible]

---

(१) [illegible]

च ग्रामोत्पन्नानां सर्वविधानां समस्यानां समाधानं करोत्येणा । करग्रहणरक्षणादि-कार्येभ्योऽतिरिक्तेषु ग्रामसन्चालितकार्येषु केन्द्रीयशासनस्य न कोऽपि प्रभाव: । केन्द्रीय-शासनस्यतु ग्रामसंस्थायां केवलं सामान्यं निर्देशनं साधारणं नियन्त्रणं भवति । करग्रहणं रक्षणन्च केन्द्रादेव विधीयते । रक्षणादि कार्यन्तु सैनिकशासनादेव सम्भवम्, ग्रामसंस्था-यां सैनिकव्यवस्था तु न तु विहिता, सैनिकास्तु भवन्ति केवलं केन्द्रशासिता: सन्चालिता वा । करग्रहणन्तु ग्रामसंस्थायां व्यवस्थितस्य भागहारस्य माध्यमेनैव । केषुचिद् विषयेष्वधिकारप्रत्यर्पणन्च करोति केन्द्रम् । विशेषतो ग्रामवासिनो ग्रामप्रचलित परम्परागतनियमस्यैव पालनं कुर्वन्ति । ग्रामप्रचलितनियमाद् विपरीत नियमप्रतिपादनं न केऽपि समर्था: । तच्चोक्तं मनुना --

जातिजानपदान्धर्मान्श्रेणिधर्मांश्च धर्मवित् ।[1]
समीक्ष्य कुलधर्मांश्च स्वधर्मं प्रतिपादयेत् ॥

इत्थं स्वतन्त्राधिकारोपेता ग्रामसंस्था स्वतन्त्ररूपेणैव स्वं कार्यं सन्चालयति । ग्रामेयाव्यवस्था सन्चालिता तादृश्येव व्यवस्था नगरेऽपि व्यवस्थिता । अतो ग्रामनगरयो-र्व्यवस्थायां न किमप्यन्तरम् । किन्त्वन्तरमेतद् भवति नगरं ग्रामाद् वृहदाकारम् तस्मादेतच्चतुर्षु भागेषु विभाजितम्, भागस्यैकस्य प्रमुखस्तु स्थानिक: । नगरस्यैव प्रमुखस्तु नगराध्यक्षो भवति । अन्यत्सर्वं शासनं द्वयो: समानमेव । किन्तु नगरस्वच्छता विषये तु पृथक्विधो नियमो दृश्यते ।

नगरव्यवस्था -

नगरस्य बह्वो विषया ग्रामेण सहापि सम्बद्धा:, ये संबद्धा स्ते सर्वे ग्रामशासनव्यवस्थायामेवोक्ता: । असंबद्धस्तत्रादर्शितो वा केवलो नगरस्वच्छताविषय

---

(१) मनुस्मृति: ८।४१ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

एवोच्यतेऽत्र तु । दुर्गन्धादिकमपसार्य नगरस्वच्छताकरणं सर्वेषां नागरिकाणामनिवार्यं कर्तव्यम् । स्वं परं कर्तव्यं विस्मृत्यापि कामतो वा नगरं दूषयन्ति ते त्ववश्यं दण्डनीयाः । नगरदूषका अपि बहवः सन्ति दूषिताः पदार्थाः । तेषु केचिदत्र प्रदर्श्यन्ते । येभ्यो नगरं भवति दूषितम् । यो मृत्पाषाणादिकं प्रक्षिप्य मार्गं दूषयति स पणस्याष्टमांशेन दण्डनीयः । पङ्कोदकादिभिर्मार्गनिरोधे पणस्य चतुर्थांशेन १।४ । उक्तद्रव्येण राजमार्गदूषणे निरोधे चोपर्युक्ताद् द्विगुणोदण्डो वेदितव्यः । यो राजमार्गे मलं प्रक्षिपति सपणदण्डप्रदानार्हः । सार्वजनिकस्थलेतीर्थ-स्थले च मलं त्यजति चेत्पण द्वयेन जलाशये तत्त्यजति चेत् पणत्रयेण, देवालये पण-चतुष्टयेन । कोष्ठागारादिषु पञ्चपणेन दण्डनीयः । एतेषु स्थलेषु मूत्रं त्यजति चेदुपर्युक्तेभ्योदण्डेभ्योऽर्धदण्डः । ये मृतानां मार्जारकुक्कुरनकुलव्यालानां नगरान्तरे प्रक्षेपणं कुर्वन्ति ते पणत्रयेण दण्डनीयाः । मृतकानां खरोष्ट्राश्वतराश्वानां प्रक्षेपणं कुर्वन्ति चेत्षट्पणेन, यदि मृतानां मनुष्याणामेव प्रक्षेपणं कुर्वन्ति तदा ते पञ्चा-शत्पणेन दण्डनीया भवन्ति । प्रकारेणानेन नगरदूषणरता भवन्ति दण्डिताः ।[1] एतद्विधा व्यवस्था सम्प्रत्यपि नगरेष्वपेक्षिता दृश्यते ।

न्यायव्यवस्था

न्यायप्रदानेन प्रजारक्षणं राज्ञः कर्तव्यम्

अभिषेकादिगुणयुतस्य राज्ञः प्रजापालनं परं कर्तव्यम् । तच्च दुष्टनिग्रह-मन्तरेण न सम्भवति, दुष्टपरिज्ञानं च व्यवहारावलोकनेन विना न सम्भवम् । अतो दिनमानमष्टधा विभज्य द्वितीये भागे व्यवहारदर्शनमनिवार्यरूपेण कर्तव्यं राज्ञा । तच्चोक्तम् ।

---

(१) कौटलीयार्थशास्त्रम् २।३६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

द्वितीये पौरजानपदानां कार्याणि पश्येत्[1] ।

लोकोत्पन्नानां विवादानां व्यवहाराणाञ्चावलोकनार्थे ये मानवा अनुचितकार्यप्रवृत्ता दृश्यन्ते तेभ्योऽपराधानुरूपं दण्डं प्रदायान्यायोपगतेभ्यो न्यायप्रदानं कर्तव्यं राज्ञा । कार्यञ्चैतद्वेदव्याकरणादि धर्मशास्त्राभिज्ञैर्विद्वद्भिर्ब्राह्मणैः सह कर्तव्यम् । तथा च याज्ञवल्क्यस्मृतौ --

व्यवहारान्नृपः पश्येद्विद्वद्भिर्ब्राह्मणैः सह ।
धर्मशास्त्रानुसारेण क्रोधलोभविवर्जितः[2] ॥

न्यायशासनं धर्मस्य प्रतीकम्, धर्मशास्त्रानुकूलन्यायप्रदानादधर्मो विनश्यति, धर्मो भवति रक्षितः, रक्षितो धर्मो रक्षति च सर्वान् । पुनः, धर्मरक्षणात् (प्रजारक्षणात्) तत्फलं लभ्यते यत्पवित्रवैदिकयज्ञानुष्ठानात्सम्भवति । सुखभोगेषू-पलिप्य व्यवहारदर्शनं प्रजानां विवादनिराकरणञ्च न करोति यो राजा स निन्दार्हः, एतादृशो राजा दीर्घकालं यावत् नृगवत्कृकलासोऽपि भविष्यति । तद्यथा --

अर्थिनां कार्यसिद्ध्यर्थं यस्मात्त्वनैषि दर्शनम्[3] ।
स्वभ्रेत्वं कृकलीभूतो दीर्घकालं निवत्स्यसि ॥

अतो व्यवहारानवलोक्य प्रजासूत्पन्नविवादसमाधानं यत्नतो विधातव्यं राज्ञा । राज्यशासनादीनि बहूनि बहुविधानि कार्याणि राजकार्यान्तर्गतानि, अतो यदि राजा कार्यान्तरव्यापृततया व्यवहारावलोकनासमर्थो भवेत्तदा तत्कार्य-

---

(१) कौटलीयार्थशास्त्रम् १।१६ । (२) याज्ञवल्क्यस्मृतिः २।१ ।
(३) रामायणम् उ० का० ५३।१८-१६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

दर्शिनेऽर्थान्न्यायकार्ये सभ्यैः सह सर्वधर्मविदो न्याय(कानून) विदश्च ब्राह्मणस्य नियुक्तिं कुर्यात् ।

> अपश्यता कार्यवशाद्व्यवहारान्नृपेण तु[1] ।
> सभ्यैः सह नियोक्तव्यो ब्राह्मणः सर्वधर्मवित् ।।

सोऽपि सर्वगुणसम्पन्न एव प्रशस्तः, यदि गुणविशिष्टब्राह्मणोऽसम्भवे क्षत्रियो वैश्यो वापि स्थापनीयः । न्यायकार्ये न्यायालये वैष एव न्यायाधीशस्य प्राड्विवाकस्य वा पदमाप्नोति । असावपि सभ्यानां सहयोगं परामर्शञ्चादायैव सर्वं न्यायकार्यं पश्यति ।

न्यायसभा -

न्यायशासनव्यवस्थायां न्यायसभायाः संघटनं विधीयते । सभैषा न्याय-शास्त्रस्य (धर्मशास्त्रस्य) विवेचनं विश्लेषणं व्याख्यानं च विधाय शास्त्रस्याश्यानुरूपां न्यायव्यवस्थां विदधाति । सर्वज्ञोऽप्येकाकी विधिशास्त्रस्य निर्णयं न कुर्यात् "तस्मान्नवाच्यमेकेन विधिज्ञेनापि धर्मतः" इत्येकस्य धर्मकथन निषेधात् । एकैकान्ते च न्यायस्य (वादिप्रतिवादिनोर्विवादस्य) निर्णयं न्यायप्रदानञ्च न कर्तव्यमित्याह नीतिज्ञः शुक्राचार्योऽपि --

> नैकः पश्येच्च कार्याणि वादिनोः शृणुयाद्वचः[2] ।
> रहसि च नृपः प्राज्ञः सभ्याश्चैव कदाचन ।।

यतो यदि केवलमेको राजा न्यायधीशोऽपि वा भवेत्समुत्पन्नविवादनिर्णयं

---

(१) याज्ञवल्क्यस्मृतिः २।३ । (२) शुक्रनीतिः ४।५।६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

करोति तदा पक्षपातस्तु निश्चयेन सम्भव: । पक्षपातस्यापि पन्चविधानि कारणानि शास्त्रोदितानि तानि चैतानि --

पक्षपाताधिरोपस्य कारणानि च पन्च वै ।
रागलोभभयद्वेषा वादिनोश्च रह: श्रुति: [1] ।।

अत एव न्यायसभाया: संघटनमवश्यकर्तव्यं राज्ञा । संघटनमेतदपि मीमांसा-व्याकरणादि श्रवणेन वेदाध्ययनेन च संपन्नान् सत्यवदनशीलान् रागद्वेषलोभमोहादि-रहितान् विदुष: सभासद: संस्थाप्य कुर्यात् तथा च योगीश्वरो याज्ञवल्क्य: --

श्रुताध्ययनसंपन्ना धर्मज्ञा: सत्यवादिन: ।
राज्ञा सभासद: कार्या रिपौ मित्रे च ये समा: [2] ।।

मनुस्मृतावपि --

व्यवहारान् दिदृक्षुस्तु ब्राह्मणै: सह पार्थिव: ।
मन्त्रज्ञैर्मन्त्रिभिश्चैव विनीत: प्रविशेत्सभाम् [3] ।।

एवं भूता: सभ्या: सभायां संसदि यदा निवसन्ति तदा ते दानमानसत्कारै-र्भवन्ति राज्ञापि मान्या: । एतद्विधगुणसम्पन्नानां विदुषां सभायां निर्णयं विदधाति तादृशो निर्णय: सर्वमान्य: । एतेऽपि सप्त पन्च त्रयोऽपि वा नियोक्तव्या: । लोकवेदवेदाङ्गधर्मज्ञाश्चैते यत्रोपविशन्ति तत्र भवति सभा समुत्पन्ना सैव यज्ञसदृशी । तथा च बृहस्पति: --

लोकवेदाङ्गधर्मज्ञा: सप्त पन्च त्रयोऽपिवा [4] ।
यत्रोपविष्टा विप्रा: स्यु: सा यज्ञसदृशी सभा ।।

---

(१) शुक्रनीति: ४।५।७ । (२) याज्ञवल्क्यस्मृति: २।२ ।
(३) मनुस्मृति: ८।१ । (४) वीरमित्रोदय: प्र० पृ० २६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

त्रय: सभासद: स्थाप्या इत्याह मनुस्तु --

यस्मिन्देशे निषीदन्ति विप्रा वेदविदस्त्रय: ।
राज्ञश्चाधिकृतो विद्वान् ब्राह्मणस्तां सभां विदु: ।।[1]

इत्थं सभासद: संख्यायां समानता नोपलब्धा, तथाप्यत्रेदं ज्ञायते न्याय-सभाया: सभासदस्त्रिभ्योऽन्यूना: सप्तभ्योऽधिकाश्च न कार्या: । प्रकारेणानेन संघटिता सभा न्यायविभागस्य सर्वोच्चा संस्था । संस्थयानया निश्चितो विषयो राज्ञापि स्वीकार्य: ।

न्यायसभाया: सभासदां बलाबलविचार: -

"राज्ञा सभासद: कार्या:" इत्युक्तं योगीश्वरेण, अस्य नियमोऽयं सर्व-मान्य:, नियमस्यास्याधार एव राजा जनसमाजोत्पन्नसर्वविधव्यवहार(विवाद) दर्शनार्थं सभासदो नियोजयति, एवमेव पूगादयोऽप्यस्मिन् कार्ये संलग्ना दृश्यन्ते । विवादावलोकनकार्यैनिरता एतेऽपि भवन्ति सबला निर्बलाश्च । एतदाह याज्ञवल्क्य: --

नृपेणाधिकृता: पूगा: श्रेणयोऽथ कुलानि च ।[2]
पूर्वं पूर्वं गुरु ज्ञेयं व्यवहारविधौ नृणाम् ।।

अस्यायं भाव: -- नृपेणाधिकृता नृपग्रहणमत्रप्राड्विवाकोपलक्षणम्, प्राड्विवाक इति कथनेन न्यायाधीशोऽप्यवगम्यते । राज्ञा न्यायाधीशेन वाधिकृता वेदधर्मशास्त्रादि सर्वविधविधिशास्त्रज्ञा: सभासद: । पूगा भिन्नजातीनां भिन्नवृत्तीनां एकस्थाननिवासिनां समूहा: - यथा ग्रामनगरादय: । श्रेणयो नानाजातीनामेक-

---

(१) मनुस्मृति: ८।११ । (२) याज्ञवल्क्यस्मृति: २।२ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

जातीनामप्येककर्मोपजीविनां संघा: - यथा हैडाकुकादीनां ताम्बूलिककुविन्दचर्मकारादीनान्च । कुलानि ज्ञातिसम्बन्धिबन्धूनां समूहा: । एते नृपाधिकृताद्य: सर्वे जनानां व्यवहारं विवादन्चावलोकयन्ति, समुत्पन्ने विवादे शास्त्रीयं (विधिशास्त्रानुकूलं) निर्णयन्च कुर्वन्ति । एतेषु चतुर्षु ये ये पूर्वं पूर्वं पठिता स्ते ते बलवत्तरा वेदितव्या: । बलवता निर्णीतविषयस्य पुनर्विचारो निर्बलान्नसम्भव:, यथा नृपाधिकृतसभ्यनिर्णीतविषयस्य पुनरवलोकनं पूगसंस्थायां न भवति । तथा पूगनिर्णीतविषयस्य श्रेण्याम्, श्रेणिनिर्णीतविवादस्य कुलसंस्थायाम् । सबलास्तु निर्बलनिर्णीतविषयस्य पुनरवलोकनं कुर्वन्ति, यथा कुलनिर्णीतविषयस्य पुनरवलोकनं भवति श्रेण्याम्, श्रेणिनिर्णीतविषयस्य पूगसंस्थायाम्, पूगनिर्णीतविषयस्य नृपाधिकृतसभ्याधिष्ठितायां न्यायसभायाम्, सभाया: सभ्यनिर्णीतविषयस्य पुनरावेदनन्तु भवति सर्वोन्नतायां राजसंस्थायाम् । एतदेवोक्तं नारदेन --

कुलानि श्रेणयश्चैव गणाश्चाधिकृता नृप: ।
प्रतिष्ठा व्यवहाराणां गुर्वेषामुत्तरोत्तरम् ॥[1]

दशाङ्गोपेता न्यायसभा -

न्यायसभा भवति दशाङ्गोपेता, अस्या: सर्वाण्यङ्गानि न्यायप्रदानकार्ये सदैवावश्यकानि स्व स्व कार्यसम्पादनादौ सततं यत्नशीलानि च, सर्वाङ्गपूर्णा सभैवोचितन्यायप्रदानसमर्था, अङ्गेषु सभैकाङ्गहीना भवेत्तदा सा निरर्थकतां याति, यतोऽङ्गहीना सभा न्यायसम्बन्धिसर्वविधकार्यं साधयितुं न क्षमा, अत: सभां सर्वाङ्ग-

---

(१) वीरमित्रोदय: व्या० प्र० पृ० २६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

पूर्णां कल्पयन्ति विद्वांसः । दशाङ्गानि चैतादृशानि - (१) न्यायाधीशः, (२) सभ्याः, (३) स्मृतिः, (४) गणकः, (५) लेखकः, (६) सुवर्णम्, (७) अग्निः, (८) जलम्, (९) स्वपुरुषः, (१०) साधनश्चैतान्यङ्गानि प्रसिद्धानि ।

नृपोऽधिकृतसभ्याश्च स्मृतिर्गणकलेखकौ ।
हेमाग्न्यम्बुस्वपुरुषाः साधनाङ्गानि वै दश ॥[1]

दशाङ्गोपेतायां सभायां स्थित्वा राजा यदि न्यायस्य विवेचनं विश्लेषणं च करोति तदा सा सभा भवति यज्ञसदृशी । तद्यथा --

एतद्दशाङ्गकरणं यस्यामध्यस्य पार्थिवः ।
न्यायान् पश्येत्कृतमतिः सा सभाऽध्वरसम्मिता ॥[2]

दशाङ्गानां कार्याणि चाह बृहस्पतिः --

वक्ताध्यक्षो नृपः शास्ता सभ्याः कार्यपरीक्षकाः ।
स्मृतिर्विनिर्णयं ब्रूते जयदानं दमं तथा ।
शपथार्थे हिरण्याग्नी अम्बुतृषितक्षुब्धयोः ॥
गणको गणयेदर्थं लिखेन्न्यायं च लेखकः ।
प्रत्यर्थि सभ्यानयनं साक्षिणां च स्वपुरुषः ॥
कुर्यादलग्नकौ रक्षेदर्थि प्रत्यर्थिनौ सदा ।

एतान्यङ्गान्यपि मनुष्यशरीरवन्मूर्धादिभिर्नामभिःप्रसिद्धानि यथा --

एषां मूर्धा नृपोऽङ्गानां मुखं चाधिकृतः स्मृतः ॥
बाहू सभ्याः स्मृतिर्हस्तौ जङ्घे गणकलेखकौ ।
हेमाग्न्यम्बु दृशौ ह्रुव पादौ स्व पुरुषस्तथा ।

---

(१) वीरमित्रोदयः व्य० प्र० पृ० ३१ । (२) वीरमित्रोदयः व्य०प्र०पृ० ३१ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

बृहस्पतिनाऽधिकृतशब्दस्य प्रयोगो विहितः, शब्देनानेन न्यायाधीशो गृह्यते ।

न्यायाधीशः -

'व्यवहारान्नृपः, पश्येद्विद्वद्भिर्ब्राह्मणैः सह'[1] इत्युक्त्वान्न्याय-सम्बन्धपि कार्यमपि धर्मशास्त्रज्ञैः(न्यायविद्भिः) ब्राह्मणैः सह राज्ञा स्वयमेव कर्तव्यम्, कार्यान्तरव्यग्रतया स्वास्थ्याभावेन वा राजा यदि न्यायप्रदानादि व्यवहारदर्शना-समर्थस्तदा न्यायकार्यसन्चालनार्थं पूर्वोक्तैःसभ्यैः सह सर्वधर्मविदो न्यायशास्त्रविदश्च ब्राह्मणस्य नियुक्तिं कुर्यात् --

अपश्यता कार्यवशाद्व्यवहारान्नृपेण तु[2] ।
सभ्यैः सह नियोक्तव्यो ब्राह्मणः सर्वधर्मवित् ।।

एवं विधब्राह्मणालाभे गुणसम्पन्नः क्षत्रियो वैश्यो वापि नियोक्तव्यः । इत्थं न्यायकार्यसन्चालनार्थं यो नियुज्यते स एव स न्यायाधीशः । राज्ञः प्रतिनिधि-रूप एव न्यायाधीशः प्राड्विवाकशब्देनाप्युच्चार्यते । यो वादिप्रतिवादिनौ न्याय-प्रदानात्प्राक् प्रश्नं पृच्छति स प्राड्विवाकः । तद्यथा --

विवादे पृच्छति प्रश्नं प्रतिप्रश्नं तथैव च[3] ।
प्रियपूर्वं प्राग्वदति प्राड्विवाकस्ततः स्मृतः।।

प्राड्विवाकशब्दस्य व्युत्पत्तिं प्रदर्शयति बृहस्पतिः -- 'विवादे वादिप्रति-

---

(१) याज्ञवल्क्यस्मृतिः २।१ । (२) याज्ञवल्क्यस्मृतिः २।३ ।
(३) वीरमित्रोदयः, व्य० प्र० पृ० २४ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

वादिनौ पृच्छतीति प्राड् ताभ्यामुक्तं सभ्यैः सह विविच्य वक्तीति विवाक:" इति ।

नारदस्तु --

यथा शल्यं भिषक्कायादुद्धरेधन्त्रयुक्तितः ।
प्राड्विवाकस्तथा शल्यमुद्धरेद्व्यवहारतः[1] ।।

इत्थं न्यायाधीशः प्राड्विवाक इति नाम्नापि प्रसिद्धः । कौटलीयार्थशास्त्रे तु न्यायाधीशो धर्मस्थशब्देनाप्युच्चारितो दृश्यते यथा-- "धर्मस्थास्त्रयस्त्रयोऽमात्याः[2] - - - - " । "धर्मस्थाः कार्याणि कुर्युः[3]" । "एवं कार्याणि धर्मस्थाः[4] - - - - -" इत्यादि ।

न्यायाधीशगुणाः --

यदा राजा स्वयमेव व्यवहारावलोकनासमर्थस्तदा तदर्थमर्थान्न्यायकार्यसञ्चालनार्थं न्यायसम्बन्धिसर्वविधज्ञानसम्पन्नस्याथच्छिास्त्रोदितगुणसम्पन्नस्य न्यायाधीशस्य नियुक्तिं कुर्यात् । गुणाश्चशुक्रनीतौ --

यदा न कुर्यान्नृपतिः स्वयं कार्यविनिर्णयम् ।
तदा तत्र नियुञ्जीत ब्राह्मणं- वेदपारगम् ।।
दान्तं कुलीनं मध्यस्थमनुद्वेगकरं स्थिरम् ।
परत्र भीरुं धर्मिष्ठमुद्युक्तं क्रोधवर्जितम् ।।
यदा विप्रो न विद्वान् स्यात् क्षात्रियं तत्र योजयेत्[5] ।
वैश्यं वा धर्मशास्त्रज्ञं शूद्रं यत्नेन वर्जयेत् ।।

---

(१) वीरमित्रोदयः, व्य० प्र० पृ० २४ । (२) कौटलीयार्थशास्त्रम् ३।१ ।
(३) कौ० ३।२० । (४) कौ० ३।२० । (५) शुक्रनीतिः ४।५।१२-१४ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

न्यायालयः -

यत्र शास्त्रमर्मज्ञा गुणसम्पन्ना वा न्यायाधीशा निवसन्ति न्यायशास्त्रस्य विवेचनं विश्लेषणं व्याख्यानं न्यायप्रदानादिकञ्च कुर्वन्ति तत्स्थानमेव न्यायालयः, अथवा या संस्था धर्मशास्त्रानुसारं न्यायप्रदानं कृत्वा लोकोत्पन्नविवादनिराकरणं करोति, असन्मार्गप्रवृत्तेभ्यो दुर्जनेभ्यो दण्डादिकं दत्वा मर्यादितस्यैवं नियन्त्रित जनसमाजस्य निर्माणं करोति एव न्यायालयः । अयं सर्वलक्षण समन्वितो विधातव्यः, अर्थाद् वास्तुशास्त्रोक्त लक्षणेन लक्षितः कर्तव्यः । न्यायालयोऽयं धर्माधिकरणमिति नाम्नापि प्रसिद्धः । तथा च शुक्रनीतौ --

धर्मशास्त्रानुसारेण ह्यर्थशास्त्रविवेचनम् ।
यत्राधिक्रियते स्थाने धर्माधिकरणं हि तत्[१] ।।

न्यायालयोऽपि बहुविधः, कौटिल्येन चतुर्विधानां न्यायालयानामुल्लेखो विहितः । यथा -- "धर्मस्थास्त्रयस्त्रयोऽमात्या जनपदसन्धिसंग्रहणद्रोणमुखस्थानीयेषु व्यावहारिकानर्थान् कुर्युः ।"[२] (१) जनपन्न्यायालयः (जनपदितिकथनेनात्र ग्रामन्यायालयो गृह्यते) (२) दशग्रामाणां केन्द्रं संग्रहणं तत्र स्थापितः संग्रहणन्यायालयः, (३) द्रोणमुख न्यायालयः (चतुः शतपरिमितानां ग्रामाणां यत्केन्द्रं तत्रस्थो न्यायालयः, (४) अष्टशतानां ग्रामाणां केन्द्रं स्थानीयम्, तत्रस्थो न्यायालयः स्थानीयः, न्यायालयोऽयं राष्ट्रियो वा सर्वोच्च शब्देनापि व्यवह्रियते । इत्थं कौटलीयार्थशास्त्रे चतुर्विधानां न्यायालयानां व्यवस्था विहिता । मौर्यकाले एते चतुर्विधा न्यायालया एव

---

(१) शुक्रनीतिः ४।५।४२ । (२) कौटलीयार्थशास्त्रम् ३।१ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

संस्थापिता: सन्चालिताश्चासन् "नैक: पश्येच्च कार्याणि वादितो शृणुयाद्वच:"[1] इत्युक्त्वादेतेषु न्यायालयेषु त्रयस्त्रयो न्यायाधीशा अपि व्यवस्थिता आसन्, किन्तु शुक्राचार्यस्तु सप्तपन्च त्रयोऽपि वा न्यायाधीशा भवन्ति नियोक्तव्या इत्याह --

व्यवहारधुरं वोढुं ये शक्ता: पुङ्गवा इव ।
लोकवेदज्ञधर्मज्ञा: सप्त पन्च त्रयोऽपि वा[2] ॥

न्यायालयभेदविषये केचिदाचार्या: कौटिल्यस्यैवमतं समर्थयन्ति केचित्तु न, ये कौटिल्यमतमस्वीकुर्वन्ति तेषां मते न्यायालयाश्चैतद्विधा भवन्ति यथा --

दशस्थानानि वादानां पन्च चैवाब्रवीद्भृगु: ।
निर्णयं येन गच्छन्ति विवादं प्राप्यवादिन: ॥
आरण्यास्तु स्वकै: कुर्यु: सार्थिका: सार्थिकैस्तथा ।
सैनिका: सैनिकैरेव ग्रामेऽप्युभयवासिभि: ॥
उभयानुमतं चैव गृह्यते स्थानमीप्सितम् ।
कुलिका: सार्थमुख्याश्च पुरग्रामनिवासिन: ॥
ग्रामपौरगणश्रेण्यश्चातुर्विद्यश्च वर्गिण: ।
कुलानि कुलिकाश्चैव नियुक्ता नृपतिस्तथा[3] ॥

इत्थं केचिच्चतुर्विधानां केचित् त्वनेकविधानां न्यायालयानामुल्लेखं कुर्वन्ति, किन्त्वेतद्विधा: सर्वे न्यायालया इदानीं न तु दृश्यन्ते, अत इदानीन्तनस्यापेक्षायां न्यायालयास्तु तदानीमेव विकसिता दृश्यन्ते । यतो ग्रामे ग्रामेऽपि न्यायालया: संस्थापिता आसन् तदानीम् । एतद्विधा व्यवस्था नैवेदानीम्, तथापि लोकोत्पन्ना व्यवहारास्तु सिद्धिंगता एव दृश्यन्ते सम्प्रत्यपि ।

---

(१) शुक्रनीति: ४।५।६ । (२) शुक्रनीति: ४।५।२५ ।
(३) वीरमित्रोदय: (व्य० प्र० पृ० ८) ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

न्यायप्रदानार्हव्यवहारपरिभाषा -

शास्त्रप्रणेतारो व्यवहारपरिभाषामुपस्थापयन्ति, या परिभाषा व्यवहारः कः ? कीदृशश्चेति विषयं बोधयति, सा च मन्वर्थमुक्तावल्याम् --

"ऋणादानाद्यष्टादशविवादे विरुद्धार्थार्थिप्रत्यर्थि वाक्यजनित-
सन्देहहारी विचार एव व्यवहारः"[१] ।

तत्रैवाह कात्यायनोऽपि --

विनानार्थेऽवसन्देहे हरणं हार उच्यते ।
नानासन्देहहरणाद् व्यवहार इति स्मृतः[२] ॥

याज्ञवल्क्यस्मृतावपि --

स्मृत्याचारव्यपेतेन मार्गेणाऽधर्षितः परैः ।
आवेदयति चेद्राज्ञे व्यवहारपदं हि तत्[३] ॥

धर्मशास्त्राचारविरुद्धेन मार्गेण परपीडितः परैस्तिरस्कृतो वा मानवो राज्ञे प्राड्विवाकाय वा यदावेदयति तदावेदितमेव व्यवहारपदमित्याहुर्मुनयः ।

न्यायेन सह सम्बद्धानि व्यवहारपदानि -

न्यायप्रदानार्हाणां व्यवहारपदानां संख्यायां संज्ञायामुपस्थापनक्रमेषु

---

(१) मन्वर्थमुक्तावली (मनुस्मृतिः ८।१) ।

(२) मन्वर्थमुक्तावली (मनुस्मृतिः ८।१) ।

(३) याज्ञवल्क्यस्मृतिः २।५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

चैषदन्तरमुपलभ्यम्, तच्चाधोनिर्दिष्टायां तालिकायां स्पष्टीक्रियते --

(१) मनूक्तानि व्यवहार-पदानि	(२) याज्ञवल्क्योक्तानि व्यवहारपदानि	(३) कौटिल्योक्तानि व्यवहारपदानि	(४) मित्रमिश्रोक्तानि व्यवहारपदानि
१- ऋणादानम्	ऋणादानम्	विवाहः	ऋणादानम्
२- निक्षेपः	उपणिधिः	दायविभागः	उपनिधिः
३- अस्वामिविक्रयः	दायविभागः	वास्तुसम्बन्धि-व्यवहारः	सम्भूयसमुत्थानम्
४- सम्भूयसमुत्थानम्	सीमाविवादः	ऋणादानम्	दत्तस्यपुनरादानम्
५- दत्तस्यानपकर्म	स्वामिपालविवादः	उपनिधिः	अभ्युपेत्याशुश्रूषा
६- वेतनादानम्	अस्वामिविक्रयः	दासकर्मकरकल्पम्	वेतनस्यानपाकर्म
७- संविद्व्यतिक्रमः	दत्ताप्रदानिकम्	सम्भूयसमुत्थानम्	अस्वामिविक्रयः
८- क्रयविक्रयानुशयः	क्रीतानुशयः	विक्रीतक्रीतानुशयः	विक्रीयासंप्रदानम्
९- स्वामिपालविवादः	अभ्युपेत्याशुश्रूषा	दत्तस्यानपाकर्म	क्रीत्वाऽनुशयः
१०- सीमाविवादः	संविद्व्यतिक्रमः	अस्वामिविक्रयः	समयस्यानपाकर्म
११- वाक्पारुष्यम्	वेतनादानम्	स्वस्वामिसम्बन्धः	क्षेत्रजविवादः
१२- दण्डपारुष्यम्	द्यूतसमाह्वयः	साहसम्	स्त्रीपुंसयोः सम्बन्ध
१३- स्तेयम्	वाक्पारुष्यम्	वाक्पारुष्यम्	दायभागः
१४- साहसम्	दण्डपारुष्यम्	दण्डपारुष्यम्	साहसम्
१५- स्त्रीसंग्रहणम्	साहसम्	द्यूतसमाह्वयः	वाक्पारुष्यम्
१६- स्त्रीपुंधर्मः	विक्रीयासंप्रदानम्	प्रकीर्णकम्	दण्डपारुष्यम्

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

१७-	विभागः	सम्भूयसमुत्थानम्	--	द्यूतम्
१८-	द्यूतसमाह्वयः	स्तेयम्	--	प्रकीर्णकम्
१९-	--	स्त्रीसंग्रहणम्	--	--
२०-	[१] --	[२] प्रकीर्णकम्	[३] --	[४] --

प्रकारेणानेन विवादविषयान्प्रदर्शयन्ति शास्त्रकाराः। विवादविषयप्रदर्शकेषु विद्वत्सु मतैक्यं नोपलभ्यते, तथापि बहवो विद्वांसस्तु मनूक्तानष्टादशविषयानेव स्वीकुर्वन्ति। एतेऽष्टादशविषया अपि भेदोपभेदेन क्रियाभेदेन च बहुत्वं गता दृश्यन्ते, अर्थाद्विषयाणामेतेषां भवन्त्यनेके भेदाः। यथाह नारदः --

एषामेवप्रभेदोऽन्यः शतमष्टोत्तरं भवेत् । [५]
क्रियाभेदान्मनुष्याणां शतशाखो निगद्यते ।।

एतेषु भेदोपभेदयुतेष्वष्टादश विवादविषयेष्वेव न्यायप्रदानं कर्तव्यं न्यायालयेन ।

विवादस्य चत्वारः पादाः -

अन्यायपीडितैर्मानवैर्न्यायोपलब्ध्यर्थमुचितनिर्णयप्राप्त्यर्थं वा न्यायालये

---

(१) मनुस्मृतिः ८।४-७ ।
(२) याज्ञवल्क्यस्मृतिः (व्यवहाराध्यायः) ।
(३) कौटलीयार्थशास्त्रम् (तत्र तृतीयमधिकरणम्) ।
(४) वीरमित्रोदयः (व्यवहारप्रकाशः, पृ० ६) ।
(५) मिताक्षरा (याज्ञवल्क्यस्मृतिः २।५) ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

समुपस्थापितानामृणादानादि विवादविषयाणां भाषापाद, उत्तरपाद:, क्रियापाद: साध्यसिद्धिपादश्चेति भवन्ति चत्वार: पादा: । तथा --

भाषोत्तरक्रियासाध्यसिद्धिभि: क्रमवृत्तिभि: ।
आक्षिप्तचतुरंशस्तु चतुष्पादभिधीयते[1] ।।

एवन्च - पूर्वपक्ष: स्मृत: पादो द्वितीयश्चोत्तरस्तथा ।
क्रियापादस्तृतीयस्तु चतुर्थो निर्णयस्तथा[2] ।।

(क) भाषापाद: -

पादेष्वेतेषु भाषापाद: प्रथम: । पादेऽस्मिन्नर्थी न्यायालये लिखितमावेदनं प्रस्तौति । तच्च सर्वाङ्गपूर्णमनाकुलं च विधातव्यमर्थात्संवत्सरमासपक्षनामजात्यादिकं द्रव्यसंख्यापरिमाणादिकन्चावेदनस्य कृते यद्यदावश्यकं तत्सर्वमेव लेख्यम् । विशेषतो निवेदनपत्रे प्रकृतार्थो योजनीय:, अर्थात्पत्रमेतद्वास्तविकविषयेणायुतं कर्तव्यं वादिना । यदि वाप्यारामतडागगृहक्षेत्रादिषु विवादो भवेत्तदा तेषु विवादेषु निम्नलिखितादशविषया योजनीया: । आवेदनपत्रे लेखनीया विषया: --

देशश्चैव तथा स्थानं सन्निवेशस्तथैव च ।
जाति: संज्ञाऽधिवासश्च प्रमाणं क्षेत्रनाम च ।।

पितृपितामहं चैव पूर्वराजानुकीर्तनम् ।
स्थावरेषु विवादेषु दशैतानि निवेशयेत्[3] ।।

---

(१) मिताक्षरा (याज्ञवल्क्य: २।८) । (२) वीरमित्रोदय: (व्य०प्र०पृ०४५) ।
(३) मिताक्षरा (याज्ञवल्क्य: २।६) ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

(ख) उत्तरपाद: -

यदा वादिनाऽऽवेदनं दीयते, तच्चदि स्वीकरोति न्यायालयस्तदनन्तरं प्रत्युत्तरं देयं प्रत्यर्थिना । तथा च बृहस्पति: --

विनिश्चिते पूर्वपक्षे ग्राह्याग्राह्य विशोधिते ।
प्रतिज्ञार्थे स्थिरीभूते लेखयेदुत्तरं तत:[1] ।।

याज्ञवल्क्यस्मृतावपि - श्रुतार्थस्योत्तरं लेख्यं पूर्वावेदकसन्निधौ[2] ।

तदुत्तरञ्च निराकरणसमर्थं सारपूर्णं सन्देहजनकनानार्थादिशब्दरहितं पूर्वापराविरुद्धं सुबोधञ्च कर्तव्यम् ॥ तद्यथा --

पक्षस्य व्यापकं सारमसन्दिग्धमनाकुलम् ।
अव्याख्यागम्यमित्येतदुत्तरं तद्विदो विदु:[3] ।।

तच्च चतुर्विधम् -- सत्यमिथ्या प्रत्यवस्कन्दन प्राङ्न्यायश्चेति भेदात् । यथाह कात्यायन: --

सत्यं मिथ्योत्तरं चैव प्रत्यवस्कन्दनं तथा ।
पूर्वन्यायविधिश्चैवमुत्तरं स्याच्चतुर्विधम्[4] ।।

सत्योत्तरं यथा - "रूपकशतं मह्यं धारयति" इत्युक्ते सत्यं धारयामि इति । यथाह - "साध्यस्य सत्यवचनं प्रतिपत्तिरुदाहृता" इति । मिथ्योत्तरं तु नाहं धारयमिति । तथा च कात्यायन: --

---

(१) वीरमित्रोदय: (व्य० प्र० पृ० ५४) । (२) याज्ञवल्क्यस्मृति: २।७ ।
(३) मिताक्षरा (याज्ञवल्क्य: २।७) । (४) वीरमित्रोदय:(व्य०प्र०पृ०५६)

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अभियुक्तोऽभियोगस्य यदि कुर्यादपह्नवम्[1] ।
मिथ्या तत्तु विजानीयादुत्तरं व्यवहारतः ।।

तच्च मिथ्योत्तरं चतुर्विधम् --

मिथ्यैतन्नाभिजानामि तदा तत्र न संनिधिः ।
अजातश्चास्मि तत्काल इति मिथ्या चतुर्विधम्[2] ।। इति ।

प्रत्यवस्कन्दनं नाम - 'सत्यं गृहीतं प्रतिदत्तं प्रतिग्रहेण लब्धम्' इति वा ।

यथाह नारदः - अर्थिना लिखितोयोऽर्थः प्रत्यर्थी यदि तं तथा ।
प्रपद्य कारणं ब्रूयात् प्रत्यवस्कन्दनं स्मृतम्[3] ।।

प्राङ्न्यायोत्तरं तु यत्राभियुक्त एवं ब्रूयात् -- 'अस्मिन्नर्थेऽनेनाहमभियुक्तस्तत्र चार्य व्यवहारमार्गेण पराजितः' इति । उक्तञ्च कात्यायेन --

आचारेणावसन्नोऽपि पुनर्लेखयते यदि ।
सोऽभिधेयो जितः पूर्वं प्राङ्न्यायस्तु स उच्यते[4] ।।इति ।

उत्तरप्रदानकाले सन्दिग्धमत्यल्पमत्यधिकपदैकदेशव्याप्यं चोत्तरं न तु देयम् । यथा --

संदिग्धमन्यत्प्रकृतादत्यल्पमतिभूरि च ।
पदैकदेशव्याप्यन्यत्तथा नैवोत्तरं भवेत्[5] ।।

संदिग्धम् - सुवर्णशतमनेन गृहीत मित्युक्ते सत्यं गृहीतं सुवर्णशतं माषशतं वेति । प्रकृतादन्ययथा - सुवर्णशताभियोगे पणशतं धारयामीति ।

---

(१) मिताक्षरा (याज्ञवल्क्यः २।७) । (२) मिताक्षरा (याज्ञवल्क्यः २।७)
(३) मिताक्षरा (याज्ञवल्क्यः २।७) । (४) मिताक्षरा (याज्ञवल्क्यः २।७)
(५) मिताक्षरा (याज्ञवल्क्यः २।७) ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अत्यल्पं - सुवर्णशताभियोगे पणाशतं धारयामिति । अतिभूरि - सुवर्णशताभियोगे त्रिशतं धारयामीति । पक्षैकदेशव्यापिहिरण्यरजतवस्त्राद्यभियोगे हिरण्यं गृहीतं नान्यादिति । एतद्विधान्यनेकान्युत्तराणि भवन्ति किन्तु विजयाकाङ्क्षिभिः यदुत्तरं स्वानुकूलं तदेवोत्तरं देयम् ।

(ग) क्रियापादः -

यदा प्रतिवादी प्रत्युत्तरं प्रस्तौति तदनन्तरं न्यायाधीशो न्यायालयस्य कृतेऽपेक्षितं प्रमाणमन्वेषयति विचारयति वा तच्च द्विविधं - मानुषं दैविकञ्चेति भेदात् । मानुषं प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति त्रिविधं प्रोक्तम् । लिखितञ्च द्विविधं - लौकिकं शासनञ्चेति । शासनं राजकीयम् । लौकिकं लेख्यं सप्तविधं राजकीयन्तु त्रिविधम् । लौकिकं यथा --

भागदानक्रियाधानसंविद्दासऋणादिभिः[१] ।
सप्तधा लौकिकं लेख्यं त्रिविधं राजशासनम् ।।

(१) संविभक्ता भ्रातरः परस्परं विभागपत्रं कुर्वन्ति, तदेव भागलेख्यम्, (२) भूमिदानं विधायानाच्छेद्यमनाहार्यञ्च यत्पत्रं लिख्यते तद्दानलेख्यम्, (३) गृहक्षेत्रादिकं क्रीत्वा मूल्यपरिमाणान्वितं यत्पत्रं विधीयते तत्तु क्रयलेख्यम्, (४) स्थावरं जङ्गमञ्च बन्धं दत्त्वा भोगक्रियायुक्तं यल्लेख्यं लिख्यते तदाधिलेख्यं प्रोक्तम्, (५) ग्रामान्चलदेशविषये परस्परं यत्पत्रं लिख्यते तत्संवित्पत्रम्, (६) निर्धनः कर्माणि करिष्यामि इत्युक्त्वा यत्पत्रं लिखति तद्दासपत्रम्, (७) ऋणादानप्रदानं विधाय यत्पत्रं लिख्यते तदृणपत्रम् । एतल्लौकिकं सप्तविधं लेख्यमपि

---

(१) वीरमित्रोदयः (व्य० प्र० पृ० १४१) ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

स्वकृतान्यकृत भेदेन द्विविधं नारदेनोक्तम् --

लेख्यं तु द्विविधं प्रोक्तं स्वहस्तान्यकृतं तथा[1] ।

त्रिविधं राजशासनम् इत्युक्तं तच्चाह बृहस्पतिः --

दत्त्वा भूम्यादिकं राजा ताम्रपट्टे पटेऽथवा ।
शासनं कारयेद्धर्म्यं स्थानवंश्यादि संयुतम् ।।

एवं विधं राजकृतं शासनं समुदाहृतम् ।
देशादिकं यस्य राजा लिखितेन प्रयच्छति ।।
सेवाशौर्यादिना तुष्टः प्रसादलिखितं तथा ।
पूर्वोत्तरक्रियावादनिर्णयान्ते यदा नृपः ।
प्रदद्याज्जयिने लेख्यं जयपत्रं तदुच्यते[2] ।।

भुक्तिरुपभोगः, सागमोभोगः स्वत्वमुत्पादयति, स्वत्वोत्पादनसमर्थो विशुद्धागमयुतः सप्तविधो भोगः प्रमाणतां याति । तथा --

एतद्विधानमाख्यातं साक्षिणां लिखितस्य च ।
साम्प्रतं स्थावरे प्राप्ते भुक्तेश्च विधिरुच्यते ।।

विद्यया क्रयबन्धेन शौर्यभार्यान्वयागतम् ।
सपिण्डस्याप्रजस्यांशं स्थावरं सप्तधा कृतम् ।।

पित्र्ये लब्धक्रयाधाने रिक्थशौर्यं प्रवेदनात् ।
प्राप्ते सप्तविधे भोगः सागमः सिद्धिमाप्नुयात्[3] ।।

(१) विद्याधनं विद्याप्राप्तं धनं प्रतिग्रहादिकम्, (२) द्रव्यप्रदानेन क्रीतं भू-

---

(१) वीरमित्रोदयः (व्य०प्र०पृ० १४२) । (२) वीरमित्रोदयः (व्य०प्र०पृ०१४४)

(३) वीरमित्रोदयः (व्य० प्र० पृ० १५३) ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

हिरण्यादिकम्, (३) युद्धार्जितम्, (४) विवाहकाले प्राप्तम्, (५) पित्रादि-प्रोपात्तम्, (६) रिक्थहरान्तराभावे पिण्डदानाद्यधिकारितया प्राप्तम्, (७) पितृधनञ्च तेषामागमयुतानां भूहिरण्यादि धनानामुपभोगः प्रामाणिकः। निरागमोभोगस्तु न तु प्रामाणिकः। यथाह नारदः --

आगमेन विशुद्धेन भोगो याति प्रमाणताम्[१]।
अविशुद्धागमो भोगः प्रामाण्यं नैव गच्छति ॥

आगमाभावनिश्चये तु भोगः सर्वत्र निष्फल एव किन्तु पूर्वक्रमागतोऽविच्छिन्नो भोगस्त्वागमाभावेऽपि प्रामाण्यं गच्छति। आगमयुतो भोगोऽपि मध्ये मध्ये विच्छिन्नो भवेत्तदा तादृशो भोगो नैव प्रामाणिकः।

भोगार्थं प्रमाणं निरूपितमितः परं साक्षिस्वरूपं निरूप्यते - साक्षी च साक्षाद्दर्शनाच्छ्रवणाच्च भवति। यथाह मनुः --

समक्षदर्शनात्साक्ष्यं श्रवणाच्चैव सिध्यति[२]।

स च द्विविधः - कृतोऽकृतश्चेति। साक्षित्वेन निरूपितः कृतः। अनिरूपितोऽकृतः। कृतः पञ्चविधोऽकृतश्च षडविध इत्येकादशविधः। यथाह नारदः --

एकादशविधः साक्षी शास्त्रे दृष्टो मनीषिभिः।
कृतः पञ्चविधो ज्ञेयः षड्विधोऽकृत उच्यते ॥

तेषां भेदश्च तेनैव दर्शितः --

---

(१) मिताक्षरा (याज्ञवल्क्यस्मृतिः २।२७)।
(२) मनुस्मृतिः ८।७४।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

लिखित: स्मारिश्चैव यदृच्छाभिज्ञ एव च ।
गूढश्चोत्तरसाक्षी च साक्षी पञ्चविधः स्मृतः ।।

षड्विधस्याकृतस्य भेदोऽपि नारदेनैव दर्शितः --

ग्रामश्च प्राड्विवाकश्च राजा च व्यवहारिणाम् ।
कार्येष्वधिकृतो यः स्यादर्थिना प्रहितश्च यः ।।
कुल्याः कुलविवादेषु विज्ञेयास्तेऽपि साक्षिणः[1] ।

साक्षिणश्च तपः शीलाः, दाननिरताः, महाकुलोत्पन्नाः, सत्यवदनशीलाः, धर्मप्रधानाः, अकुटिलाः, पुत्रान्विताः, धनसम्पन्नाः, नित्यनैमित्तिककर्मानुष्ठानरता त्र्यवराः पुरुषा भवन्ति । पुनरेतेऽपि वर्णानुरूपा विधेयाः, यथा -- ब्राह्मणानां ब्राह्मणा एव । तथा स्त्रीणां साक्ष्यं स्त्रिय एव । यथाह मनुः --

स्त्रीणां साक्ष्यं स्त्रियः कुर्युः[2] । इति ।

सजातिसवर्णासंभवे सर्वेमूर्धावसिक्तादयो ब्राह्मणादयश्च सर्वेषु मूर्धावसिक्तादिषु ब्राह्मणादिषु च यथासंभवं साक्षिणो भवन्ति । त्रिभ्योऽधिकाः साक्षिण उपरि दर्शिताः किन्तु नित्यनैमित्तिककर्मानुष्ठानरत एकोऽप्युभयानुमतश्चेत्साक्षी भवति "उभयानुमतः साक्षी भवत्येकोऽपि धर्मवित्[3] इत्युक्तत्वात् । चौर्यपारुष्यसाहसादिषु तु यः कोऽपि साक्षी भवितुं शक्नोति तत्र गुणसम्पन्नो नैवापेक्षते । तथा --

सर्वः साक्षी संग्रहणे चौर्यपारुष्यसाहसे[4] ।

----

(१) मिताक्षरा (या०स्मृ०साक्षिप्रकरणम्) । (२)मनुस्मृतिः ८।६८ ।
(३) याज्ञवल्क्यस्मृतिः २।७२ । (४) याज्ञवल्क्यस्मृतिः २।७२ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

एतेषां त्रिविधानां प्रमाणानामाधार एव न्यायालयोपस्थिताना-मृणादानादीनां विवादानां निर्णयं करोति न्यायाधीशः । एतेषु त्रिषु मानुषप्रमाणेष्वेकमपि प्रमाणं नोपलभ्यते तदा दैविकप्रमाणस्याथवा दिव्ये-ष्वेकस्यावलम्बनं कर्तव्यं न्यायकर्त्रा । तथा च याज्ञवल्क्यः --

प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्तितम् ।
एषामन्यतमाभावे दिव्यान्यतममुच्यते[1] ।।

लिखितभुक्तिसाक्षिलक्षणं त्रिविधं मानुषं प्रमाणमुक्तम्, अतः परं दिव्यप्रमाणमुपस्थाप्यते - (१) तुला, (२) अग्निः, (३) जलम्, (४) विषम्, (५) कोशश्चेति पञ्चविधानि दिव्यानि शास्त्रोदितानि, दिव्या-न्येतानि संदिग्धस्यार्थस्य सन्देहनिवृत्त्यै प्रयोक्तव्यानि । तथा च याज्ञवल्क्यः --

तुलाग्न्यापो विषं कोशो दिव्यानीह विशुद्धये[2] ।

याज्ञवल्क्यस्तु एतानि पञ्चविधान्येव दिव्यान्युल्लिखति, किन्तु पितामहस्तु सप्तविधान्येवोपस्थापयति, तेषु तण्डुलतप्तमाषयोश्चान्तर्भावः, इतराणि तु समानान्येव । यथाह पितामहः --

घटोऽग्निरुदकं चैव विषं कोशस्तथैव च[3] ।
तण्डुलाश्चैव दिव्यानि सप्तमस्तप्तमाषकः ।।

दिव्येष्वेतेषु तण्डुलकोशदिव्ये शङ्काभियोगेऽल्पाभियोगेऽल्पकार्य-शङ्कायां च दातव्ये । इतराणि पञ्चविधानि तु महाभियोगे राजद्रोहाभि-

---

(१) याज्ञवल्क्यस्मृतिः २।२२ । (२) याज्ञवल्क्यस्मृतिः २।९५ ।
(३) मिताक्षरा (याज्ञवल्क्यस्मृतिः २।९५) ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

शङ्काायां ब्रह्महत्यादिमहापातकाभिशङ्कायां महाचार्याभिशङ्कायां च दातव्यानि । दिव्यान्येतानि मानुषप्रमाणानिर्णयस्य ऋणादानादि विवादस्य निर्णायकानि । गृहक्षेत्रादिषु विवादेष्वेतानि वर्जनीयानि "स्थावरेषु विवादेषु दिव्यानि परिवर्जयेत्" इत्युक्तत्वात् । एतानि तु ऋणादिषु विवादेष्वेव प्रयोक्तव्यानि । तेषु विवादेष्वपि लिखितादि प्रमाण सद्भावे दिव्यानि त्याज्यान्येव । विवादान्तरेष्वपि प्रमाणान्तर संभवे दिव्यानामनवकाश एव । एतान्यपि प्रमाणान्तर संभवे दिव्यानामनवकाश एव । एतान्यपि जातिवयोऽवस्थाविशेषेण दातव्यानि । यथाह याज्ञवल्क्यः --

तुला स्त्रीबालवृद्धान्धपङ्गुब्राह्मणरोगिणाम् ।
अग्निर्जलं वा शूद्रस्य यवाः सप्त विषस्य वा ॥[१]

एतदेव स्पष्टीकृतं पितामहेन --

ब्राह्मणस्य घटो देयः क्षत्रियस्य हुताशनः ।
वैश्यस्य सलिलं प्रोक्तं विषं शूद्रस्य दापयेत् ॥[२]

दिव्यप्रयोगस्य साधारणविधिः --

सचैलं स्नातमाहूय सूर्योदय उपोषितम् ।
कारयेत्सर्वदिव्यानि नृपब्राह्मणसन्निधौ ॥[३]

पादेऽस्मिन्विवादनिर्णयकारणानि प्रमाणान्येतान्येवान्विष्य यत्नपदुपयुक्तं तस्यैवोपयोगो विधीयते ।

---

(१) याज्ञवल्क्यस्मृतिः २।९८ । (२) मिताक्षरा(याज्ञवल्क्यः २।९८) ।
(३) याज्ञवल्क्यस्मृतिः २।९७ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

(घ) साध्यसिद्धिपाद: -

विजयैच्छुभिर्वादिप्रतिवादिभिरुपर्युक्तानां विवादनिराकरणहेतुभूतानां साधनानामुपस्थापनं कर्तव्यम् । उपस्थापितानि प्रमाणानि यदि वास्तविकानि भवेयुस्तदा प्रमाणोपन्यासकर्ता सिद्धिमर्थाज्जयलक्षणमाप्नोति । उपस्थापितानि प्रमाणानि यद्यसिद्धानि तदा भवति पराजित: । तथा च याज्ञवल्क्य: --

तत्सिद्धौ सिद्धिमाप्नोति विपरीतमतोऽन्यथा[1] ।

याज्ञवल्क्यादय: केचिदुपर्युक्तानां प्रमाणानामाधार एव जयपराजययो-र्निर्णयो दातव्य इत्याहु:, किन्तु व्यासस्त्वष्टविधानां प्रमाणानामाधार एव निर्णय: कर्तव्य:, अर्थान्निर्णयस्त्वष्ट विध इत्याह --

प्रमाणैर्हेतुचरितै: शपथेन नृपाज्ञया ।
वादिसम्प्रतिपत्त्या वा निर्णयोऽष्टविध: स्मृत:[2] ।।

शुक्राचार्यस्तु षड्विधं निर्णयं प्रदर्शयति यथा --

प्रमाणैर्हेतुचरितै: शपथेन नृपाज्ञया ।[3]
वादिसम्प्रतिपत्त्या वा निर्णय: षड्विध: स्मृत: ।।

विवादनिर्णयार्थं प्रमाणान्येवापेक्षितानि, सर्वमान्योऽयं नियम:, किन्तु कुत्रचिन्नकान्यपि प्रमाणान्युपलब्धानि तदा तु राजैव भवति प्रमाणमित्याह शुक्रनीतौ शुक्राचार्य: --

---

(१) याज्ञवल्क्यस्मृति: २।८ ।

(२) वीरमित्रोदय: (व्य० प्र० पृ० ८६) ।

(३) शुक्रनीति: ४।५।२६५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

लेख्यं यत्र न विद्येत न भुक्तिर्न च साक्षिणः ।
न च दिव्यावतारोऽस्ति प्रमाणं तत्र पार्थिवः[1] ।।

किन्तु प्रमाणाभावे सर्वत्र सन्देहः समुत्पद्यते तदा न्यायाधीशेन यत्नतो धर्मस्य व्यवहारस्य चरित्रस्य नृपाज्ञायाश्च विचारः कर्तव्यः, एतेषां चतुर्णामाधार एव सन्दिग्धस्य विवादस्य निर्णयो विधातव्यः । तद्यथा --

धर्मेण व्यवहारेण चरित्रेण नृपाज्ञया ।
चतुः प्रकारोऽभिहितः सन्दिग्धेऽर्थे विनिर्णयः[2] ।।

उपर्युक्तमानुषादिप्रमाणविशेषा एते धर्मव्यवहारादयश्चत्वारश्च विवाद-निर्णयोपायाः सिद्धाः, एतेषामाधार एव न्यायाधीशो निर्णयं प्रयच्छति, निर्णय-प्रदानाद् यः पराजितो भवेत् सोऽवश्यमेव शास्त्रोक्तदण्डप्रदानार्हः ।

दण्डव्यवस्था : मनुस्मृतौ दण्डोत्पत्ति वर्णनम् -

यदा जगदीश्वरेण चराचररक्षणोद्देश्येन राज्ञ उत्पत्ति-र्विहिता, तदैव तस्य प्रयोजन सिद्धये लोकोद्भवानां सर्वविधानां प्राणिनां रक्षणसमर्थस्य ब्रह्मतेजोमयस्य धर्म-स्वरूपस्य दण्डस्य चापि सृष्टिः कृता, तस्मिन्नेव चराचरं सर्वं जगदवलम्बितं विद्यते, तस्मात्तस्यैव भयेन स्थावरजङ्गमादयः सर्वे प्राणिनः स्वधर्मान्नचलन्ति सततं कर्तव्योन्मुखा भवन्ति स्व स्व मर्यादायां च तिष्ठन्ति । तद्यथा --

तस्यार्थे सर्वभूतानां गोप्तारं धर्ममात्मजम् ।
ब्रह्मतेजोमयं दण्डमसृजत्पूर्वमीश्वरः ।।

---

(१) शुक्रनीतिः ४।५।२६६ । (२) वीरमित्रोदयः (व्य० प्र० पृ० ८७) ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

तस्य सर्वाणि भूतानि स्थावराणि चराणि च ।
भयाद्भोगाय कल्पन्ते स्वधर्मान्न चलन्ति च[1] ।।

प्रकारेणानेन राज्ञा सहैव दण्डस्योत्पत्तिं विधाय तस्यैव माध्यमेन सज्जनानां संरक्षणं दुर्जनानां विनाशं च कृत्वा जनसमाजं नियन्त्रितं करोति जगत्कर्ता परमेश्वरः ।

दण्डलक्षणम् -

य उपायविशेषः सर्वं लोकं दुराचारान्निवर्तयति सदाचारे प्रवर्तयति स एव दण्डः, यस्य प्रयोगमात्रेण सर्वे जन्तवो दम्यन्ते । यथाह शुक्रनीतौ शुक्राचार्यः[2] --

दण्डः प्रजानां योगक्षेमसाधकः -

दण्डशक्तौ राजशक्तेः पूर्णयोगो विद्यते, अतो दण्डो वस्तुतो राजैवेत्याहुर्विद्वांसः, पुरुषकार्यकर्तृत्वात्पुरुषोऽपि सः, तस्मान्नेतृत्वं च प्राप्यते अतः स नेताऽपि भवति, स शासकोऽप्याज्ञादातृत्वात्, स एव चतुर्णामाश्रमाणां वर्णानान्च यो धर्मस्तस्य सम्पादने प्रतिभूः । दण्डः प्रजारक्षति तस्माद्राजेत्युक्तं युक्तमेव, सर्वाः प्रजा आज्ञां करोत्यतः शासितेति, निद्राणेष्वपि रक्षितृषु स एव जागर्तितद्भयेनैव चौरादीनामप्रवृत्तेः, ऐहिकपारलौकिकदण्डभयाद्धर्मानुष्ठानं कुर्वन्ति जनाः, अतः स धर्महेतुरेव तस्मात्तं धर्ममपि वदन्ति बुधाः । अपराधानुसारेण प्रयुक्तो धर्मरूप एष शास्त्रीयो दण्डः सर्वाः प्रजाः सानुरागाः करोति, लोभद्वेषा दिना

---

(१) मनुस्मृतिः ७।१४-१५ । (२) शुक्रनीतिः ४।१।४३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

प्रयुक्तोऽशास्त्रीयोदण्डस्तु सर्वं धनपुत्रादिकं विनाशयति । अतः स शास्त्रीय एव प्रयोक्तव्यः, एतद्विधो दण्ड एव पापानां पापाचरणरतानाञ्च विनाशकः, एतादृशो दण्डो यत्र विचरति तत्र न भवन्ति प्रजा व्याकुलाः । अतो देशं कालं परिस्थितिं चावेक्ष्य यस्मिन्नपराधे योदण्डोऽर्हतीत्यादिकं शास्त्रानुसारेण विचार्यापराधिष्वस्य प्रयोगो विधातव्यः । यथाह मनुः --

तं देशकालौ शक्तिं च विद्यां चावेक्ष्य तत्त्वतः ।
यथार्हतः संप्रणयेन्नरेष्वन्यायवर्तिषु [1] ।।

ब्राह्मणादिभिर्वर्णैराश्रमिभिश्च परिपूर्णोऽस्त्ययं लोकः, पक्षपातरहितस्य दण्डस्याधार एव सुरक्षितः परिपालितश्चायम् । इत्थमेव परिरक्षितो लोक एव धर्मकर्माभिमुखो भूत्वा स्व स्व वर्त्मनि सानन्दं ससुखञ्च तिष्ठति, अतः समानदोषेण दूषितस्य पुत्रस्य शत्रोश्च दोषं सममेव दृष्ट्वा दण्डप्रयोगः कर्तव्यः, अनया रीत्या प्रयुक्तो दण्ड एव लोकमिमं परं च रक्षति ।

दण्डो हि केवलो लोकं परं चेमं च रक्षति ।
राज्ञा पुत्रे च शत्रौ च यथा दोषं समं धृतः [2] ।।

दण्डो हि दुर्जनस्य विनाशं सज्जनस्य संरक्षणं सम्मानञ्च करोति, लोकोद्भवमप्रियकार्यं निवारयति, असन्मार्गप्रवृत्तान् सन्मार्गं प्रदर्शयति, तस्मादस्य प्रभावादेव लोको भवति सत्कार्यं प्रवृत्तः । जनानां दोषविशुद्धेर्मूलकारणत्वाद्रोगरूपापराधस्य चिकित्सक एव "चिकित्सागम इव दोषविशुद्धिहेतुर्दण्डः" [3] । राष्ट्रविशुद्धेः कारणविशेषोऽपि दण्ड एव यतो यथोचितदण्डप्रयोगाद्दुर्जना विनश्यन्ति दुर्जनानामभावे मात्स्यन्यायस्य सर्वथा

---

(१) मनुस्मृतिः ७।१६ । (२) कौटलीयार्थशास्त्रम् ३।१ ।
(३) नीतिवाक्यामृतम् (दण्डनीतिसमुद्देशः) ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

निवृत्तिः, मात्स्यन्यायाभाव एव राष्ट्रं विशुद्ध्यति, अतो विशुद्धराष्ट्रनिर्माणार्थं दण्डमाध्यमेनापराध निराकरणं कर्तव्यम् । उक्तप्रकारेण प्रयुक्तः शास्त्रविहितो दण्ड आन्वीक्षिकीत्रयीवार्तानामशेषाणां प्राणिनान्च्ययोगं क्षेमन्च सम्पादयतीति नात्रसंशयः । तथैवोक्तं कौटिल्येनापि --

> आन्वीक्षिकीत्रयीवार्तानां योगक्षेमसाधनो दण्डः[१] ।
>
> तस्माद्दण्डमूला स्तिस्रो विद्याः, विनयमूलोदण्डः प्राणभृतां योगक्षेमावहः[२] ।

महाभारते दण्डस्वरूपवर्णनम् -

आन्तरिकं बाह्यन्चेति दण्डस्य रूपद्वयं प्रदर्शयति महामुनिर्व्यासः - आन्तरिकं रूपन्तु जगदीश्वर एव धारयति, यस्योचितप्रयोगद्वारा धर्मार्थकामाख्यास्त्रयः पुरुषार्था अपि सततं वृद्धिं यान्ति दण्डाख्योऽयमीश्वरो दुष्टदमनार्थमग्निसदृशं रूपमाकल्य्य प्रादुर्भवति लोके । अस्य बाह्यशरीरं तु नीलकमलदलसदृशं श्यामरूपमस्ति, पुनरस्य चत्वारो दंष्ट्राश्चत्वारोभुजा अष्टौपादालोचनान्यनेकानि च सन्ति, पुनरयं शंकुकर्ण ऊर्ध्वरोमवान् जटी द्विजिह्वस्ताम्रवदनो व्याघ्रचर्मतनुच्छदश्चास्ति । एतादृशो दुर्धर्षोदण्डः सदैवात्युग्रं रूपं धारयति । खड्गधनुर्गदाशक्ति स्त्रिशूलमुद्गरशरमुशलपाश-तोमरादीनां रूपमादाय लोके भ्रमति सर्वात्मा मूर्तिमान् दण्डः, छेदनभेदनताडनमारणा-दिकं करोति । असिः, विशसनः, धर्मः, तीक्ष्णवर्त्मा, दुरासदः, श्रीगर्भः, विजयः, शास्ता, व्यवहारः, प्रजागरः, शास्त्रम्, ब्राह्मणः, मन्त्रः, प्राग्वचनम् धर्मपालः,

---

(१) कौटलीयार्थशास्त्रम् १।३ । (२) कौटलीयार्थशास्त्रम् १।४ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अजर:, देव:, सत्यग:, नित्यग:, ग्रह:, असङ्ग:, रुद्रतनय:, मनु:, ज्येष्ठ:, शिवङ्करश्चेति नामान्यस्य कीर्तितानि । सर्वत्र व्यापकत्वादयं भगवान् विष्णुरेव, नराणामाश्रयत्वान्नारायण:, प्रभावशालित्वात्प्रभु:, सदैव महद्रूपधारकत्वान्महान्पुरुषश्चेत्युच्यते ।

दण्डत्त्रिवर्ग: सततं सुप्रणीतात्प्रवर्तते ।
दैवं हि परमो दण्डो रूपतोऽग्निरिवोच्छ्रितः ।।
नीलोत्पलदलश्यामश्चतुर्दंष्ट्रश्चतुर्भुज: ।
अष्टपान्नैकनयन: शङ्कुकर्णोर्ध्वरोमवान् ।।
दण्डो हि भगवान्विष्णुर्यज्ञो नारायण: प्रभु: ।
शाश्वद्रूपं महद्विभ्रन्महापुरुष उच्यते[1] ।।

दण्डभेदा: -

दण्डभेदविषये शास्त्रकारेषु मतैक्यं नोपलभ्यते, केचित् त्रिविधानां दण्डानामुल्लेखं कुर्वन्ति चेत् केचिच्चतुर्विधानाम्, कामन्दकीयनीतिसारे त्रिविधानां दण्डानां चर्चोपलब्धा -- "स च दण्डो बधबन्धपरिक्लेशार्थहरणलक्षणास्तीक्ष्णमृदुमध्यमभेदेन त्रिविध:"[2] । बहुषु राजनीतिग्रन्थेषु तु चतुर्विधानामेव वर्णनं दृश्यते । आदिराजेन मनुनापिबहूनामेव मतमङ्गीकृतं दृश्यते,यथा--

वाग्दण्डं प्रथमं कुर्याद्धिग्दण्डं तदनन्तरम् ।
तृतीयं धनदण्डं तु वधदण्डमत: परम्[3] ।।

---

(१) शान्ति० १२१।१३-२२ ।
(२) प्राचीन भारत में अपराध और दण्ड पृ० २०६ उद्धृतम् (कामन्दक: २।३८ जयमङ्गला)
(३) मनुस्मृति: ८।१२९ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अपराधस्य लघुत्वगुरुत्वादीनां वर्णजातिस्त्रीबालवृद्धातुरादीनामाधार एवैते दण्डा भवन्ति प्रयोक्तव्याः । यत एकस्मिन्नेवापराधेऽपि वर्णादि भेदेनाधिकतां न्यूनतां च यातिदण्डः, अतोदण्डप्रदानकालेऽपराधस्य वर्णादीनाञ्च विचारोऽवश्यं कर्तव्यः । यदि सम्भवो भवेत्तदा दण्डेष्वेतेषु प्रथमं वाग्दण्डो दातव्यः, अस्माद्यथापूर्वास्थितिं नाकलयति पापकर्ता तदाधिग्दण्डः प्रयोक्तव्यः, तस्मादपि पूर्वरूपं नाङ्गीकरोति तदाऽर्थदण्डो देयः, तस्माच्चापराधान्न निवर्तते तदा वाध्यत्वेन ताडनाद्यङ्गच्छेदनरूपो वधदण्ड एव कर्तव्यः । वाग्दण्डधिग्दण्डयोर्भेदा नैवानेकाः, अवशिष्टयोस्त्वनेकेभेदाः शास्त्रदर्शिताः । तयोः प्रथमं धनदण्ड एवोपस्थाप्यते ।

धनदण्डः -

दण्डस्यास्यानेकेभेदाः प्राप्यन्ते तथापि त्रयो भेदास्तु बहुमान्याः, ते चैतादृशाः - (१) प्रथमसाहसः, (२) मध्यमसाहसः, (३) उत्तमसाहसः । पञ्चाशदधिके द्वे पणशते २५० प्रथमसाहसः । पणपञ्चशतानि ५०० मध्यमसाहसः । पणसहस्रं १००० तूत्तम साहसो ज्ञेयः । यथाहमनुः --

पणानां द्वे शते सार्धे प्रथमः साहसः स्मृतः[१] ।
मध्यमः पञ्च विज्ञेयः सहस्रं त्वेव चोत्तमः ॥

शङ्खस्त्वस्यामर्थान्मनूक्तायां पणसंख्यायमन्तरं प्रदर्शयति यथा - "चतुर्विंशतिरेकनवतिः प्रथमसाहसः, द्विशतं पञ्चशतञ्चैव मध्यमसाहसः, अष्टशतं सहस्रञ्चोत्तमः"[२] । इत्थं शङ्खमते भिन्नतोपलब्धा तथापि मनोर्मतमेव बहुभिः समर्थितं लोक-

---

(१) मनुस्मृतिः ८।१३८ । (२) मनुस्मृतिः ८।१२५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

प्रचलितं च दृश्यते । एतदतिरिक्तं कस्मिंश्चिदपराधे सर्वस्वहरणस्यापि विधानं प्राप्यते ।

वधदण्ड: -

वधदण्डस्य दशस्थानानि मनूक्तानि तानि चैतद्विधानि --

उपस्थमुदरं जिह्वा हस्तौ पादौ च पञ्चमम् ।
चक्षुर्नासा च कर्णौ च धनं देहस्तथैव च ॥

एतेषु धनं विहायान्यानि नवविधानि वधदण्डस्य स्थानानि, वधदण्डेति कथनेन लिङ्गोत्कर्तनादि नवविधादण्डा: प्रयुज्यन्ते वधार्हेषु । क: कीदृशदण्ड-प्रदानार्ह इति विषयस्य निर्णयस्तु न्यायालयादेव भवति । एते नवविधादण्डा:, क्षात्रियादि वर्णत्रयविषये भवन्ति न तु ब्राह्मणस्य कृते, ब्राह्मणस्तु महत्यपराधेऽपि[1] न वधदण्डार्ह:, शिरोमुण्डनाङ्कनादिकं विधायाघातशरीरोदेशान्निष्काश्यते । दण्डोऽयं भवति बहुश्रुतब्राह्मणविषये, बहुश्रुतादतिरिक्तास्तु पातकस्याघारेवधार्हा एवेत्याह कात्यायन: --

गर्भस्य पातने स्तेनौ ब्राह्मण्यां शस्त्रपातने ।[2]
अदुष्टां योषितं हत्वा हन्तव्यो ब्राह्मणोऽपि हि ॥

वधदण्डे इति कथनेन शारीरिकदण्डो गृह्यते, दण्डस्यास्य नवविधानि स्थान्युपर्युक्तानि, एतदतिरिक्ता अन्येऽपि प्रकारा: सन्ति शास्त्रोदिता:, यथा - लौहरज्जवादिभिरावध्य चतुष्पथेस्थापनम्, काराावासस्य दण्डप्रदानम्, शिफाभि-

---

(१) विश्वरूपेणोद्धृतं कात्यायन वचनमेतत् (याज्ञवल्क्यस्मृति: २।२८१) ।

(२) मनुस्मृति: ८।१२४ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

स्ताडनञ्चेत्यादि। मृत्युदण्डस्याप्यनेके प्रकारा: सन्ति यथा -- सर्वं शरीरस्य क्षुरादिभि: खण्डशश्छेदनम्, आस्ये तप्ततैलसेचनम्, अग्नौ जले वा प्रक्षेपणञ्चेत्यादि। बौद्धग्रन्थेऽप्यस्य द्वादशविधा: प्रकारा: सन्तिवर्णिता: - (१) शङ्खमुण्डिका - मस्तकस्य चर्मविदारणं कृत्वा शङ्खसदृशकरणम्, (२) राहुमुखम् - कर्णपर्यन्तमुख-विदारणम्, (३) ज्योतिर्मल्लिका - सर्वं शरीरं वस्त्रैराविष्ट्य तत्र तैलसेचनं विधायाग्नि प्रज्वालनम्, (४) हस्तप्रज्योतिका - हस्तयोस्तैलाप्लावितं वस्त्रमा-वेष्ट्य प्रज्वलिताग्नि संयोजनम्, (५) एरकवर्तिका - कण्ठदेशं यावच्चर्मोत्कर्तनम्, (६) चीरकवासिका - कटिप्रदेशपर्यन्तं चर्मविदारणम्, (७) ऐणेयक: - जानुनो: कूर्पर-योश्च लौहकील निखातनम्, (८) बडिसमांसिका - लौहनिर्मितेनाङ्कुशेन कण्ठ-विदारणम्, (९) कार्षापणक: - खण्डश: शरीरमांसच्छेदनम्, (१०) खारापतच्छिका - क्षुरादिना शरीरं क्षतं विधाय लवणप्रक्षेपणम्, (११) परिघपरिवर्तिका - कर्ण-योर्द्वयो लौहकीलकंनिखातनम्, बहुषु स्थलेषु शरीरस्यास्थिभञ्जनञ्चेत्यादयो बौद्धग्रन्थो-क्ता मृत्युदण्डस्य प्रकारा:[१]।

अपराधभेदेनदण्डभेदा: -

अपराधास्तु बहुविधास्तथापि ऋणादानाद्यष्टादशविवादविषयेभ्य: समुत्पन्ना एव मुख्या:, तेषु ये ये दण्डा: शास्त्रोक्तास्ते एवात्र प्रस्तूयन्ते। दण्डविषये शास्त्रकारा: स्वं स्वं मतं प्रदर्शयन्ति, सर्वेषां मतमत्रोपस्थापनमसम्भव मतो विशेषतो मनुयाज्ञवल्क्ययोर्मताधार एव दण्डा विविच्यन्ते। विवाद विषयेषु ऋणादानमेव प्रथमम्, अतोऽत्रापि पूर्वं तत्सम्बन्ध्यपराधदण्डा: प्रदर्श्यन्ते।

---

(१) प्राचीन भारत में अपराध और दण्ड, पृ० १६६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

ऋणादानाख्ये विवादे दण्डव्यवस्था -

अधमर्णिक: साधितार्थ-स्य दशमांशो दण्डनीय:, उत्तमर्णस्तु पन्चमांश:[1] । ऋणादानादि विवादविषयेषु य: साक्ष्यमङ्गीकृत्य न्यायालये न गच्छति न किन्चिदपि वदति च तदा स न्यायालयसाधितार्थस्य दशमांशो दण्ड्य:[2] । यदा साक्षिण: कूटं कुर्वन्ति कूटकरणाद् य: पराजित: पराजये यो दण्डो निश्चित स्तस्य द्विगुणं दण्डनीया: कूटसाक्षिण: । ब्राह्मणो यदि कौटसाक्ष्यं करोति तदा स स्वदेशान्निर्वास्य:[3], न दण्डनीय: । क्षत्रियादि त्रयोवर्णा यदि लोभात्कौट साक्ष्यं कुर्वन्ति तदा ते सहस्रं दण्डनीयास्तेषां देशनिष्कासनन्च भवति । मोहात् प्रथमसाहस: । भयाद् द्वौ मध्यमसाहसौ । मैत्रात् प्रथमसाहसस्य चतुर्गुणम् । कामात् प्रथमसाहसस्य त्रिगुणम् । अज्ञानाद् द्वे शते । अनवधानात्पणशतम् । देशनिष्कासनदण्डोऽपि सर्वत्र योजनीय: । ब्राह्मणस्तु धनदण्डैर्विना देशनिष्कासितो भवति[4] । य: साक्षित्वं स्वीकृ-त्य निगदनकाले रागलोभाधाक्रान्त: सन् तस्मान्निवृत्तो भवेत्तदा तस्मादेव कारणाद् विवादकर्ता पराजित: स्यात् तस्मिन्पराजये यो दण्डस्तस्य कृते निश्चित स्तस्यदण्डस्याष्ट गुणं दण्डनीय: स: । ब्राह्मणस्तु देशान्निष्कास्यते[5] ।

उपनिधौ दण्डव्यवस्था -

रूपसंख्यादिविशेषमनास्थाय वासनादि पात्रस्थं मुद्रितं द्रव्यद्रव्यं रक्षणार्थ-

---

(१) याज्ञवल्क्यस्मृति: २।४२ । (२) मनुस्मृति: ८।१०७ याज्ञवल्क्य: २।७६ ।
(३) याज्ञवल्क्यस्मृति: २।८१ । (४) मनुस्मृति: ८।१२०-१२१,१२३ ।
(५) याज्ञवल्क्यस्मृति: २।८२ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

मन्यस्य हस्तेविश्रम्भादर्प्यते तदौपनिधिकमुच्यते । यथाह नारद: --

असंख्यातमविज्ञातं समुद्रं यन्निधीयते [1] ।
तज्जानीयादुपनिधिं निक्षेपं गणितं विदु: ।।

एतद्विधं निक्षेपद्रव्यं यस्य हस्ते स्थापितं यथैव पूर्वं मुद्रादि चिन्हितमर्पितं तथैव स्थापकाय प्रत्यर्पणीयम् । यदि न ददाति स्वामिना याचितेऽपि तदा निक्षेप-ग्रहणकर्ता तत्समं द्रव्यं दण्डप्रदानार्ह: । धनिने मूल्यकल्पनया देयम् । याचितान्वाहित-न्यासनिक्षेपादिष्वप्यनेन एव नियमो योजनीय: [2] ।

अस्वामिविक्रयाख्ये विवादे दण्ड: -

अस्वामिविक्रयाख्यं विवादपदं दण्डञ्चोपस्थाप्यते । विवादलक्षणञ्चाह नारद: --

निक्षिप्तं वा परद्रव्यं नष्टं लब्ध्वापहृत्य [3] वा ।
विक्रीयतेऽसमक्षं यत् स ज्ञेयोऽस्वामिविक्रय: ।।

स्वात्मसम्बन्धि द्रव्यमन्यो विक्रयं करोति तदा पश्यति चेद् विनिवर्तयेत् । क्रेता-विक्रेता च द्वावेव चौरवद् दण्डनीयौ ? क्रेता विक्रेतारं प्रदर्शयति चेत्तदा क्रेता विशुद्ध्यति । विक्रेतुर्नाष्टिको स्वं धनमाप्नोति । चौरहस्तगतं धनद्रव्यादिकं राज्ञो न्यायाधीशस्य समक्षमनिवेद्यैवानेनमदीयं द्रव्यादिकमपहृतमित्युक्त्वा दर्पादिना यो गृह्णाति स षण्णव-त्यन्वति पणान्दण्डनीय स्तस्करप्रच्छादकत्वेन [4] ।

---

(१) मिताक्षरा (याज्ञवल्क्यस्मृति: २।६५) । (२) याज्ञवल्क्य: (उ०नि०प्र०) ।
(३) मिताक्षरा (याज्ञव० अस्वा० प्र०) । (४) याज्ञवल्क्य: (अस्वामिवि०प्र०) ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

संभूयसमुत्थानाख्ये विवादे दण्ड: -

लाभलिप्सवो वणिङ्नटनर्तकादयो यद्यत्कर्म कुर्वन्ति मिलितास्तत्संभूय समुत्थानम् । समवेतानां तेषां लाभालाभावुपचयापचयौचद्रव्यानुसारं भवत्यर्थात् येन यावद्धनं वस्तुग्रहणार्थं दत्तं तदनुसारमेव तत्सर्वं ज्ञेयम् । यदि समवेता एते प्रतिषिद्धं राजयोग्यं वा द्रव्यादिकं लाभलोभेन मूल्यमादायान्यस्मै प्रयच्छन्ति चेत्तदा तत्सर्वं राजाऽपहरेत् । एतेषु यो वणिक्शुल्कवञ्चनार्थं विक्रीयमाणस्य वस्तुविशेषस्य मिथ्यापरिमाणं वदति, य: शुल्कग्रहणस्थानादपसरति, यश्च पुनरस्येदमस्येदमित्यसत्यं कथयति, पुनर्यद्द्रव्यं विवादास्पदमस्ति तदेव विक्रीणाति क्रीणाति वा यस्ते सर्वे पण्यादष्टगुणं दण्डनीया: । जलजशुल्कग्रहणार्थं नियुक्त: स्थलजशुल्कं गृह्णाति चेत् तदा स दशपणान् दण्डनीय: ।

> व्यासिद्धं राजयोग्यं च विक्रीतं राजगामितत् ।।
> मिथ्यावदन्परिमाणं शुल्कस्थानादपासरन् ।
> दाप्यस्त्वष्टगुणं यश्च सव्याजक्रयविक्रयी [१] ।।
> तरिक: स्थलजं शुल्कं गृह्णन्दाप्य: पणान्दश ।

दत्तानपाकर्माख्ये विवादे दण्ड: -

दत्तस्य वस्त्रान्नद्रव्यसुवर्णादि वस्तुविशेषस्याप्रदानमर्थात् पुनर्हरणमेव दत्तानपाकर्म दत्ताप्रदानिकं वा अस्यस्वरूपन्वाह नारद: --

---

(१) याज्ञवल्क्यस्मृति: २।२६१-२६३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

दत्त्वाद्रव्यमसम्यग्य: पुनरादातु मिच्छति ।
दत्ताप्रदानिकं नाम व्यवहारपदं हि तत्[1] ॥

न्यायमार्गेण यद्दत्तं तत्सप्तविधम् । तदेवाह नारद: --

पण्यमूल्यं भृतिस्तुष्ट्या स्नेहात्प्रत्युपकारत:[2] ।
स्त्रीशुल्कानुग्रहार्थं च दत्तं दानविदो विदु: ॥

अस्याऽयं भाव: - (१) पण्यस्य क्रीतवस्तुविशेषस्य यन्मूल्यं भवेत्तद्दत्तम्, (२) भृतिर्वेतनादिकं कृतकर्मणे दत्तम्, (३) तुष्ट्या स्तुतिपाठकबन्दिचारणादिभ्यो दत्तम्, (४) स्नेहात्पुत्रपुत्र्यादिभ्यो दत्तम्, (५) प्रत्युपकारत: उपकृते प्रत्युपकाररूपेण दत्तम्, (६) स्त्रीशुल्कं विवाहार्थं कन्या ज्ञातिभ्यो दत्तम्, (७) अनुग्रहार्थं दत्तमेतत्सप्तविधमेव दत्तं न पुन: प्रत्याहरणीयम् । यदि य: कोऽपि लोभादहंकाराद्वा न त्यजति बलेन गृह्णाति तदा स स्वर्णमेकं दण्डनीय:[3] ।

वेतनादानविवादे दण्ड:

साम्प्रतं वेतनादानाख्यं विवादपदमभिधातुमुपक्रमते । तत्स्वरूपञ्च प्रदर्शयति नारद: --

भृत्यानां वेतनस्योक्तो दानादानविधिक्रम:[4] ।
वेतनस्यानपाकर्म तद्विवाद पदं स्मृतम् ॥

कार्यनियुक्त: कर्मचारि व्याध्यादि कारणेन विनापि निरूपितं कार्यं

---

(१) मिताक्षरा (या०द०प्र० प्र०) । (२) मिताक्षरा (या०द०प्र०प्र०) ।
(३) मनुस्मृति: ८।२१३ । (४) मिताक्षरा (या० वे० प्र०) ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

त्यजति चेत्कृष्णलान्यष्टौ दण्डनीय: । वेतनं चास्य न देयम् ।

भृतौ नार्तो न कुर्याद्योदर्पात्कर्म यथोदितम् ।
स दण्ड्य: कृष्णलान्यष्टौ न देयं चास्य वेतनम् ॥ (१)

संविद्व्यतिक्रमाख्ये विवादे दण्ड: -

पाषण्डिनैगमवणिगादीनां सङ्घानां ग्रामदेशयोर्वा सत्यादि शपथेन सह कृता या संवित्प्रतिज्ञा वा तामुल्लङ्घयति य स्तदा भवति संविद्व्यतिक्रम: । य एतद्विधं व्यतिक्रमणं करोति सामाजिकं समूहगतं वा द्रव्यन्चापहरति तस्य सर्वस्वहरणं कृत्वा देशनिष्कासनं कर्तव्यम् । सङ्घान्तर्गतस्थैर्जनै: सततं सङ्घहितं विधातव्यम्, यस्तद् विपरीतमाचरणमाचरति तदा स प्रथमसाहसं दण्ड्य: । (२) समूहहितार्थं प्रत्यर्पितं धनद्रव्यादिकं न प्रयच्छति य: स लब्धादेकादश गुणं दण्डं दापनीय: । (३) संविद् व्यतिक्रमकारिणं व्यतिक्रमविषयलाघवगौरवापेक्षया चतु:सुवर्णान्षण्णिष्कान्राजतं शतं चैतत्त्रयं दण्डं दापयेत् । यथाह मनु: --

निगृह्य दापयेच्चैनं समयव्यभिचारिणम् ।
चतु: सुवर्णान्षण्णिष्कांश्शतमानं च राजतम् ॥ (४)

क्रयविक्रयानुशयाख्ये विवादे दण्ड: -

अथ क्रयविक्रयानुशय: प्रदर्श्यते । तल्लक्षणन्चाह नारद: --

(१) मनुस्मृति: ८।२१५ । (२) याज्ञवल्क्यस्मृति: २।१८७-१८८ ।
(३) याज्ञवल्क्यस्मृति: २।१९० । (४) मनुस्मृति: ८।२२० ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

क्रीत्वा मूल्येन यत्पण्यं क्रेता न बहुमन्यते ।
क्रीतानुशय इत्येतद्विवादपदमुच्यते[1] ॥

भूमिताम्रपट्टादिकं किञ्चिद्द्रव्यं क्रीत्वा विक्रीय वा यस्य पश्चात्तापो जायते तदा स क्रीतं दशाहान्तरे प्रत्यर्पणं कुर्यात्, विक्रीतं वा गृह्णीयात् । दशाहादूर्ध्वं विक्रीतं वस्तु बलाद् गृह्णाति क्रीतं वा परित्यजति यः स षट्शतं दण्ड्यः[2] । प्रमचौन्मधोन्मादादि कन्यायादोषामनाख्याय दोषवतीं कन्यां वारय यः प्रयच्छति स कन्या षण्णवतिपणान्दण्ड्यः । यो द्वेषादिना कन्यां नेयं कन्या, जातयोनिरियमिति वदति चेत्स शतं दण्ड्यः[3] ।

स्वामिपालयोर्विवादेदण्डः -

परसस्य विनाशकारिणी महिषी अष्टौ माषान्दण्डनीया गौश्चतुरो माषान्, अजामेषाश्च माषद्वयं दण्डनीयाः । पशवो यदि परक्षेत्रे सस्यादिकं भक्षयित्वा रात्रावपि तत्रैवोपविशन्ति तदा यथोक्ताद्दण्डाद् द्विगुणो दण्डो ज्ञातव्यः । सवत्सानां भक्षयित्वोपविष्टानां यथोक्ताद्दण्डाच्चतुर्गुणोन दण्डो वेदितव्यः । महिषी यत्र यादृशेन दण्डेन दण्ड्यते तत्र तादृशेनैव दण्डेन खरोष्ट्रमपि प्रत्येकं दण्डनीयम् । मार्गसमीपवर्तिनि क्षेत्रे ग्रामविवीतसमीपवर्तिनि च क्षेत्रे कामतश्चारयति पशुं यः स चोरवद्दण्डमर्हति । उपर्युक्ता दण्डाः पालक एव योजनीयाः पशोश्च दण्डासंभवात् । दोषस्याधारे स्वामिपालौ द्वावेव

---

(१) मिताक्षरा (क्रीतानुशयप्रकरणम्) ।

(२) मनुस्मृतिः ८।२२२-२२३ । (३) मनुस्मृतिः ८।२२४-२२५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

दण्डार्हौ, अर्थात्कुत्रचिद्द्वावेव कुत्रचित्त्वेक एव, स्वामिपालयोर्दोषनिर्णयस्याधिकारस्तु न्यायाधीशस्याधीनः । पालदोषेणैव पशुविनाशे पालोऽर्धाधिकत्रयोदशपणदण्डार्हः ।[1] मार्गसमीपग्रामसमीपवर्तिनि वा परिहारस्थे क्षेत्रे पशुः सस्यादिकं भक्षयति पालोऽनिवारयति चेत्तदा पालः पणशतं दण्ड्यः, वर्त्मग्रामान्तव्यतिरिक्तेषु क्षेत्रेषु भक्षयति चेत्सपादं पणं दण्डार्हः । सर्वस्मिन् क्षेत्रे पशुभक्षितं सस्यादिकं फलं पालेन पशुस्वामिना वा यथापराधं क्षेत्रस्वामिने दातव्यम् ।

पथि क्षेत्रे परिवृते ग्रामान्तीयेऽथवा पुनः[2] ।
सर्वत्र तु सदो देयः क्षेत्रिकस्येति धारणा ।।

सीमाविवादे दण्डविधानम् -

जनपदसीमा, ग्रामसीमा, क्षेत्रसीमा, गृहसीमा चेत्यनेकविधाः सीमा भवन्ति । एतासु यदा विवादः समुत्पन्नस्तदा प्रत्यासन्नग्रामीणाः सीमां प्रदर्शयेयुः । यदि एते सामन्तादयो मिथ्या ब्रूयु स्तदा ते सर्वे प्रत्येकं मध्यमसाहसं ५०० दण्डनीयाः । यथाह याज्ञवल्क्यः --

अनृते तु पृथग्दण्ड्या राज्ञा मध्यमसाहसम्[3] ।

मर्यादाभेदने सीमातिक्रमणे क्षेत्रस्य च मर्यादिप्रदर्शनेन हरणे यथाक्रमेणाधमोत्तममध्यमसाहसा दण्डा वेदितव्याः[4] । गृहतडागोद्यानक्षेत्राणामन्यतमं ताडनमारणबन्धनादिभयकथनपूर्वकमाक्रम्य हरणे पञ्चपणशतानि दण्डनीयः, स्वत्वभ्रान्त्यापहरति चेद् द्विशतं दण्डनीयः । तथा च मनुः --

---

(१) याज्ञवल्क्यस्मृतिः २।१५९-१६५ । (२) मनुस्मृतिः ८।२४०-२४१ ।
(३) याज्ञवल्क्यस्मृतिः २।१५३ मनु० ८।२६२ । (४) याज्ञवल्क्यस्मृतिः २।१५५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

गृहं तडागमारामं क्षेत्रं वा भीषया हरन् ।
शतानि पन्च दण्ड्यः स्यादज्ञानाद्द्विशतो दमः ।।[1]

वाक्पारुष्यदण्डव्यवस्था -

संप्रति वाक्पारुष्याख्यं विवादपदं प्रस्तूयते । तत्स्वरूपन्च नारदेनोक्तम् -

देशजातिकुलादीनामाक्रोशं न्यङ्गसंयुतम् ।
यद्वचः प्रतिकूलार्थं वाक्पारुष्यं तदुच्यते ।।[2]

पारुष्यं चैतन्निष्ठुरमश्लीलं तीव्रन्चेति त्रिविधम् ।

साक्षेपं निष्ठुरं ज्ञेयमश्लीलं न्यङ्गसंयुतम् ।
पतनीयैरुपाक्रोशैस्तीव्रमाहुर्मनीषिणः ।।

निष्ठुराक्रोशदण्डविधानम् -

यः सत्येनासत्येनान्यथास्तोत्रेण चान्यस्य सवर्णस्य निष्ठुरं निर्भत्सनं करोत्यसौ अर्धाधिकत्रयोदशपणान्दण्डनीयः ।

अश्लीलाक्षेपदण्डविधानम् -

त्वदीयां मातरं भगिनीं वा अभिगन्तास्मि इत्युक्त्वाऽश्लीलवचनेन यः शपति स पन्चविंशतिपणान्दण्डनीयः । सवर्णविषये दण्डोऽयम् । अधमेष्वर्धः सार्धद्वादशपणात्मको दण्डो वेदितव्यः, उत्तमेषु परस्त्रीषु तु द्विगुणः पन्चाशत्प-

---

(१) मनुस्मृतिः ८।२६४ ।

(२) मिताक्षरा (या० वा० पा० प्र०) ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

णात्मक:[1] । क्षत्रियो ब्राह्मणमाक्रुश्य पणशतं दण्डमर्हति, वैश्यस्तु सार्धशतं द्विशते वा, शूद्रस्तु जिह्वाच्छेदनादिकं वधदण्डमाप्नोति । ब्राह्मणो यदि क्षत्रियस्याक्रोशं करोति तदा पञ्चाशत्पणान्दण्ड्य:, वैश्यस्य पञ्चविंशतिपणान्, शूद्रस्य द्वादशपणान् । शूद्रो यदि क्षत्रियं वैश्यञ्च परुषया वाचाक्रुश्य जिह्वाच्छेदमेव प्राप्नोति । शूद्रो ब्राह्मणादीनां वर्णत्रयाणां नामजात्यादिग्रहणपूर्वकमाक्रोशं करोति तदा तस्य मुखेऽग्निनाप्रदीप्तोदशाङ्गुलोलोहकीलो निखातव्य: । अहङ्कारात् ब्राह्मणं न धर्ममुपदिशति चेत्तस्य मुखे कर्णयोश्च तप्तं तैलं प्रक्षेपयेत् । यो देशं जातिं कर्म चाहंकारेण मिथ्या कथयति तदा स द्विशतं दण्ड्य:[2] । यदा पुत्रादयो मात्रादीन् शपन्ति तदा शतं दण्डनीया: । ब्राह्मणक्षत्रियो परस्परमाक्रोशं विवादं वा कुरुत:, तदा ब्राह्मण: पूर्वसाहसदण्डप्रदानार्ह: २५०, क्षत्रियस्तु मध्यम: ५०० । एवमेव वैश्यशूद्रौ परस्परमाक्रोशयतस्तदा वैश्यो मध्यमसाहस: ५०० शूद्रस्तु प्रथमसाहसदण्डप्रदानार्ह: १००० । अत्र शूद्रस्य जिह्वाच्छेदादिकं न[3] भवति । य स्तव हस्तकण्ठस्थिनेत्राणां विनाशं करोमीति वदति चेत्स शतं दण्ड्य:, पादनासाकर्णकरादीन विनाशयामीति कथयति चेत्पञ्चाशत्पणिकोदण्डो वेदितव्य स्तस्य कृते । शक्तिहीन स्तवहस्तपादाद्यङ्गभङ्गं करोमीति वदति चेदसौ दशपणान्दण्डनीय: । सबलो निर्बलं पूर्ववदाक्षिपति चेत्तदा स शतं दण्ड्य:, असकस्य कल्याणाय प्रतिभुवं च दापनीय:। ब्रह्महत्यादिभि: पातित्यहेतुभिर्वर्णानामाक्षेपे पञ्चशतं ५०० दण्डो ज्ञातव्य: । गौहनस्त्वमसीत्यादिभि रुपपातकहेतुभिराक्षेपे प्रथमसाहसमर्धात् २५० दण्डनीय: । वेदत्रयसम्पन्नानां देवानां राज्ञां चाक्षेपे उत्तम साहसो[१०००] दण्डो

---

(१) याज्ञवल्क्यस्मृति: २।२०४-२०६ । (२) मनुस्मृति: ८।२६७-२७३ ।
(३) मनुस्मृति: ८।२७५-२७७ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

वेदितव्यः, ब्राह्मणमूर्धावसिक्तादिजातीनां पूगादि सङ्घा नान्वा दोषे मध्यम-[५००] साहसो दण्डः, ग्रामाणां देशानान्वा दोषे प्रथम[२५०] साहसो दण्डो निश्चितः[१] ।

दण्डपारुष्ये दण्डव्यवस्था -

इदानीं दण्डपारुष्यं नाम विवादपदं विविच्यते । तत्स्वरूपञ्च प्रदर्शयति नारदः -

> परगात्रेष्वभिद्रोहे हस्तपादायुधादिभिः[२] ।
> भस्मादिभिश्चोपघातो दण्डपारुष्यमुच्यते ।।

यो भस्मना पङ्केन रेणुना वा परगात्रं स्पर्शयत्येष दशपणान्दण्ड्यः । विण्मूत्रश्लेष्मनखकेशमुक्तोच्छिष्टादिभिरमेध्यवस्तुभिः परशरीरं स्पर्शयति चेद्द्विगुणोऽथार्द् विंशति पणोदण्डो वेदितव्य स्तस्य[३] कृते । मूत्रपुरीषादिप्रक्षेपणे तु कात्यायनेन विशेषो दण्ड उक्तः --

> छर्दिमूत्रपुरीषाद्यैरापाद्यः स चतुर्गुणः ।
> षड्गुणः कायमध्येस्यान्मूर्ध्नित्वष्टगुणः स्मृतः[४] ।।

उपर्युक्तो दण्डः सवर्णविषये द्रष्टव्यः । स्वापेक्षयाऽधिकश्रुतवृत्तेषु तु दशपणाद्विंशतिपणाच्च द्विगुणो दण्डोऽर्थाद्विंशति पणश्चत्वारिंशत्पणश्च दण्डो ज्ञातव्यः । हीनेषु पूर्वोक्तस्यार्धदण्डोऽर्थात्पञ्चपणो दशपणश्च[५] । ब्राह्मणानां पीडाकरं क्षत्रियादेः करचरणादिकं यदङ्गं भवेचच्छेत्तव्यम् । क्षत्रिय-

---

(१) याज्ञवल्क्यस्मृतिः २।२०८-२११ । (२) मिताक्षरा (या०द०पा०प्र०) ।
(३) याज्ञवल्क्यस्मृतिः २।२१३ । (४) मिताक्षरा (याज्ञवल्क्यस्मृतिः २।२१३) ।
(५) याज्ञवल्क्यस्मृतिः २।२१३-२१४ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

वैश्ययोरपि दुःखोत्पादकं शूद्रस्याङ्गं छेदनीयमेव । यथाह मनुः --

येन केनचिदङ्गेन हिंस्याच्चेच्छ्रेष्ठमन्त्यजः ।[1]
छेत्तव्यं तत्तदेवास्य तन्मनोरनुशासनम् ॥

वधार्थं शस्त्रमुत्थापयति यः स प्रथमसाहसदण्डार्हः, शस्त्रादि स्पर्शने तु प्रथमसाहसादर्धदण्डः । प्रहर्तुं (ताडनार्थं) हस्तमुत्थापयति चेद्दशपणो दण्डः, पादमुत्थापयति चेद् विंशति पणो दण्डः कर्तव्य स्तस्य कृते । यः पादकेशकरवस्त्रादिकं गृहीत्वाऽऽकर्षयति दशपणान्दण्ड्योऽसौ । केशवस्त्रादिकमाकृष्य पादप्रहारं करोति चेच्छतं दण्डनीयः । काष्ठलोष्ठादिभिर्मृदुताडनं करोति शोणितं तु नोत्पादयति तदा द्वात्रिंशत्पणान्दण्ड्यः । गाढताडनेन शोणितमेवोत्पादयति तदा द्वात्रिंशतो द्विगुणं चतुः षष्टिपणान्दण्डनीयः । करपाददन्तानां भङ्गे कर्णयो नासाया प्रत्येकं छेदने व्रणस्योद्भेदने मृतकल्पो यथा भवति तथा ताडिते च मध्यमसाहसो दण्डः । गमनभोजनभाषणनिरोधे नेत्रस्य जिह्वायाश्च प्रतिभेदने ग्रीवाबाहुसक्थ्नां भञ्जने मध्यमसाहसो दण्डः । एकस्याङ्गभङ्गादिकं मिलिता बहवः कुर्वन्ति, तदा यस्मिन्यस्मिन् अपराधे यो यो दण्डः शास्त्रनिश्चितस्तत्र तस्माद् द्विगुणो दण्डः प्रत्येकं वेदितव्यः । कलहादौ अर्थात्कलहे वर्तमाने येनापहृतं तत्तेन प्रत्यर्पणीयम्, अपहृतद्रव्याद् द्विगुणोदण्डश्च देयः । ताडनादिना यो यस्य दुःखमुत्पादयति तन्निवारणार्थमौषधादिषु यो व्ययो भवेत् स स्वीकर्तव्यः । यस्मिन् कलहे यो दण्ड उक्तः स च देयः । परगृहकुड्यस्याभिघाते विदारणे द्विधाकरणे च यथाक्रमं पञ्चपणो दशपणो विंशतिपणश्च दण्डः कर्तव्यः । अवपातनेपुनः कुड्यस्यैते त्रयोदण्डाः समन्विता ग्राह्याः, पुनः कुड्यसम्पादनार्थं यद्धनमावश्यकं तच्च देयम् । अन्यस्य गृहे दुःखजनकं कण्टकादिद्रव्यं यः प्रक्षिपति स षोडश पणान्दण्ड्यः ।

---

(१) मनुस्मृतिः ८।२७९ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

विषभुजङ्गगादिकं प्राण इत्येव प्रक्षिपति चेन्मध्यमसाहसं दण्ड्यः । अजा-
विहारिणानां क्षुद्रपशूनां ताडने दुःखोत्पादने रक्तस्रावणे शृङ्गगादिशाखाङ्गग-
छेदने द्विपणश्चतुष्पणः षट्पणोऽष्टपण इत्येवं रूपो दण्डो वेदितव्यः,
द्विपणप्रभृतयो दण्डा अपराधस्याधारे प्रयोक्तव्याः । क्षुद्रपशूनां लिङ्गगच्छेदने मारणे
च मध्यमसाहसो दण्डः । स्वामिनेपशोर्मूल्यं च दातव्यम् । गोगजवाजिप्रभृतीनां
महापशूनामेतेषु स्थानेषु ताडनरक्तस्रावणादि निमित्तेषु उपर्युक्ताद् दण्डाद् द्विगुणो
दण्डो वेदितव्यः[1] । वटादीनां वृक्षाणां शाखाच्छेदने विंशतिपणः, स्कन्दच्छेदने
चत्वारिंशत्पणः, स मूलवृक्षाच्छेदनेऽशीतिपणो दण्डः कर्तव्यः । आम्रादीनां
वृक्षाणामपि पूर्वोक्तेषु स्थानेषु पूर्वोक्ता एव दण्डा वेदितव्याः । तीर्थस्थले
देवालये सार्वजनिकस्थले जलाधारे श्मशान चैत्यादिषु चोत्पन्नानां वृक्षाणां शाखाच्छे-
दनादिषु पूर्वोक्ताद्दण्डाद्द्विगुणः, पिप्पलादि विश्रुतवृक्षाणां शाखाच्छेदनादिषु
द्विगुणः । गुल्मगुच्छादीनामुक्तेषु स्थानेषु कर्तने पूर्वोक्तादर्धदण्डः[2] । पुष्पमूलफलयुतेषु
चर्मकाष्ठमृत्तिका निर्मितेषु भाण्डेषु विनाशितेषु मूल्यात्पन्चगुणोदण्डः । यानचालकस्या-
कौशलाद्यानमन्यथा गच्छति तत्र स्थाजनादुःखमाप्नुवन्ति चेत्तदाऽशिक्षित चालकनियोगात्
स्वामी द्विशतं दण्डमाप्नोति । चालकस्तु कुशल एव किन्त्वसावधानतया यानं विचलितं
भवेत्तदा चालक एव द्विशतं दण्ड्यः । यानचालकस्यानवधानात्प्राणिनोमृत्युं यान्ति
तदा चालको दण्डमाप्नोति गोगजोष्ट्रह्यादयो महान्तः प्राणिनो मृत्युं गच्छन्ति
चेत्तदा पन्चशतं दण्डो देयः । मनुष्यमारणेतूत्तमसाहसः । क्षुद्रपशूनां मारणे द्विशतो
दण्डः । रूरुपृषतादिषु मृगेषु शुकसारसादिषु पक्षिषु हतेषु पन्चाशद्दडो निश्चितः ।

---

(१) याज्ञवल्क्यस्मृतिः २।२२७-२२६ । (२) याज्ञवल्क्यः २।२२५-२२६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

गर्दभमारणे पञ्चरूप्यकपरिमाणो दण्डः, श्वसूकरमारणे षु रौप्यमाष परिमाणो-
दण्डः कल्पनीयः [1]।

स्तेयार्थे विवादे दण्डव्यवस्था -

संप्रतिस्तेयं नाम विवादपदं प्रदर्श्यते । तल्लक्षणञ्चाह मनुः -

निरन्वयं भवेत्स्तेयं हृत्वापव्ययते च यत् [2]।

धनस्वाम्याद्यसमक्षं यद्धनादिकमपहृतं तत्स्तेयम्, यच्च हृत्वाऽपह्नुते तदपि स्तेयमेव ।
अस्य लक्षणं नारदोऽप्याह -

उपायैर्विविधैरेषां छलयित्वाऽपकर्षणम् ।
सुप्तमत्तप्रमत्तेभ्यः स्तेयमाहुर्मनीषिणः [3] ॥

चौरलक्षणेन परीक्षया वा चौरोऽयमिति निश्चित्य तेनापहृतं सर्वं धनं स्वरूपेण मूल्यकल्पनया वा तस्मादेव गृहीत्वा स्वामिने दातव्यम्, चौरस्तु नानाविधैर्दण्डैर्दण्डितो भवति । दण्डेषु कारागारप्रवेशनं निगडादिबन्धनं करचरणाद्यङ्गच्छेदनं धनादानञ्चेते दण्डाः प्रमुखाः । ब्राह्मणो यदि चौरो भवेत्तदा तं महत्यप्यपराधेऽपि न घातयेत्, ललाटेऽङ्कयित्वा स्वदेशान्निष्कासयेत् । अङ्कनं च श्वपदाकारं विधेयम् । यथाह मनुः --

गुरुतल्पे भगः कार्यः सुरापाने सुराध्वजः ।
स्तेये च श्वपदं कार्यं ब्रह्महण्यशिराः पुमान् [4] ॥

अन्ये वर्णास्त्वपराधविशेषेण वधदण्डमपि प्राप्नुवन्ति यथाबन्दिग्राहा-

---

(१) मनुस्मृतिः ८।२८६, २९३-२९८ । (२) मनुस्मृतिः ८।३३२ ।
(३) मिताक्षरा (याज्ञवल्क्यस्मृतिः स्तेयप्रकरणम्) ।
(४) मनुस्मृतिः ९।२३७ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

दीन्बलावष्टम्भेन घातकान्, वाजिकुञ्जराणां च हारिणो नराञ्शूलानारोपयेत्[1] ।

प्रसङ्गेऽस्मिन्मनुः --

कोष्ठागारायुधागारदेवतागार भेदकान् ।
हस्त्यश्वरथहर्तृंश्च हन्यादेवाविचारयन्[2] ॥

वस्त्राद्यपहारको ग्रन्थिभेदकश्चैतो द्वावेव सन्दंशसदृशेन तर्जन्याङ्गुष्ठेन च हीनौ कार्यौ । द्वितीयापराधे तु पुनः करपादैकहीनकौ कार्यौ । तृतीयापराधे तु वध एव । तथा च मनुः --

अङ्गुली ग्रन्थिभेदस्य छेदयेत्प्रथमे ग्रहे ।
द्वितीये हस्तचरणौ तृतीये वधमर्हति[3] ॥

क्षुद्राणां मध्यमानामुत्तमानाञ्च द्रव्याणां हरणे मूल्याद्यनुसारतो दण्डः कल्पनीयः । क्षुद्रादिद्रव्याणां स्वरूपं चाह नारदः --

मृद्भाण्डासनखट्वास्थिदारुचर्मतृणादि यत् ।
शमीधान्यं कृतान्नं च क्षुद्रं द्रव्यमुदाहृतम् ॥
वासः कौशेयवर्ज्यं च गोवर्ज्यं पशवस्तथा ।
हिरण्यवर्ज्यं लोहं च मध्यं व्रीहि यवा अपि ॥
हिरण्यरत्नकौशेयस्त्रीपुङ्गोगजवाजिनः ।
देवब्राह्मणराज्ञां च द्रव्यं विज्ञेयमुत्तमम्[4] ॥

त्रिप्रकारेष्वेतेषु द्रव्येषु प्रथममध्यमोत्तमसाहसरूपो दण्ड एव स्वाभाविक इत्याह स एव । दण्डकल्पनायां देशं कालं वयः शक्तिं च सम्यग्विचारयेत् । यश्चोरस्य दुर्जनस्य वा

---

(१) याज्ञवल्क्यस्मृतिः २।२७३ । (२) मनुस्मृतिः ९।२८० ।
(३) मनुस्मृतिः । (४) मिताक्षरा (याज्ञवल्क्यस्मृतिः २।२७५) ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

दुष्टत्वं जानन्नपि भोजनं निवासस्थानमग्निरुदकं चौर्यप्रकारोपदेशरूपोमन्त्रश्चौर्यसाधनमपहारार्थं व्ययश्चैतानि प्रयच्छति स उत्तमसाहसेन दण्डनीयः । अन्यस्य शरीरे शस्त्रस्यावपातने दासीब्राह्मणगर्भव्यतिरेकेण गर्भस्य पातने चोत्तमसाहसो दण्डः । दासीगर्भनिपातने शतदण्डः । ब्राह्मणगर्भनिपातने तु ब्रह्महत्याया एव दण्डः कर्तव्यः । पुरुषमारणे स्त्रीमारणे च मृतानां शीलवृत्तादीनामाधारे उत्तमोवाऽधमो दण्डो व्यवस्थितः । भ्रूणघ्नी स्वगर्भपातिनी पुरुषघ्नी सेतूनां भेत्त्री च स्त्री दुष्टा भवति, एतामगर्भिणीं स्त्रियं गले शिलां बध्वाऽगाधजले प्रवेशयेत् । यास्त्री परजनवधार्थमन्नपानादिषु विषं प्रक्षिपति, दाहार्थं ग्रामादिष्वग्निं ददाति निजपतिं गुरुमपत्यञ्च मारयति तां विच्छिन्नकर्णकरनासौष्ठीं कृत्वा बलीवर्दैः प्रवाह्य मारयेत् । ये क्षेत्रं वनं क्रीडावनं गृहं ग्रामं विवीतं खलं वा दहन्ति ये राजपत्नीमभिगच्छन्ति तान्सर्वान्शुष्काग्निना दाहयेत्[1] ।

साहसे दण्डव्यवस्था -

इतः परं साहसं नाम विवादपदं प्रस्तूयते । तल्लक्षणन्चाह याज्ञवल्क्यः --

सामान्यद्रव्यप्रसभहरणात्साहसं स्मृतम्[2] ।

मनुस्मृतौ मुनुनापि --

स्यात्साहसं त्वन्वयवत्प्रसभं कर्म यत्कृतम्[3] ।

परकीयस्य साधारणद्रव्यस्य द्रव्यस्वामिसमक्षं बलादपहरणं साहसम् । राजदण्डं जनाक्रोशं चोल्लङ्घ्य सर्वजनसमक्षमेव हननहरणपरदाराधर्षणादिकं क्रियते

---

(१) याज्ञवल्क्यस्मृतिः २।२७६-२८२ । (२) याज्ञवल्क्यस्मृतिः २।२३० ।

(३) मनुस्मृतिः ८।३३२ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

चेदेतत्सर्वं साहसमेव । नारदोऽपि साहसस्वरूपं प्रदर्शयति --

सहसा क्रियते कर्म यत्किंचिद्बलदर्पितैः ।
तत्साहसमिति प्रोक्तं सहो बलमिहोच्यते[1] ।। इति ।

साहसमेतच्चौर्यवाग्दण्डपारुष्यस्त्रीसंग्रहणेषु प्रायः सादृश्यं जनयति तथापि दण्डप्रतिपादनार्थमस्य पृथक् निर्देशो ह दृश्यते । दण्डश्चप्रथमादि भेदेन त्रिविधः । त्रिविधस्यैव साहसस्य लक्षणं यथा --

तत्पुनस्त्रिविधं ज्ञेयं प्रथमं मध्यमं तथा ।
उत्तमं चेति शास्त्रेषु तस्योक्तं लक्षणं पृथक् ।।

फलमूलोदकादीनां क्षेत्रोपकरणस्य च ।
भङ्गाक्षेपोपमर्दाद्यैः प्रथमं साहसं स्मृतम् ।।

वासः पश्वन्नपानानां गृहोपकरणस्य च ।
एतेनैव प्रकारेण मध्यमं साहसं स्मृतम् ।।

व्यापादो विषशस्त्राद्यैः परदाराभिमर्शनम् ।
प्राणोपरोधि यच्चान्यदुक्तमुत्तमं साहसम्[2] ।।

यः सामान्यं द्रव्यं बलादपहरति स मूल्यस्य द्विगुणेनदण्डेन दण्डनीयः । तत्कं साहसं कृत्वाऽपलापं करोति चेत्तस्य कृते मूल्याच्चतुर्गुणो दण्डो निश्चितः । साहसं कुरु इत्येवमुक्त्वा यः कारयति स साहसिको यद्दण्डमाप्नोति तस्माद्द्विगुणं दण्डमाप्नोति । तुभ्यं धनं दास्याम्यहं मदुक्तं कार्यं कुरु इत्युक्त्वा साहसं कारयति यः स तु चतुर्गुणेन दण्डेन दण्डनीयः । य आचार्यादीनां मान्यजनानामाज्ञातिक्रमणं करोति, यश्च भ्रातृभार्यामपहरति एवं प्रतिश्रुतमर्थमप्रयच्छति, यश्च मुद्रितं गृहमुद्घाटयति तथा सामन्तानां

---

(१) मिताक्षरा (या० सा० प्र०) । (२) मिताक्षरा (या० सा० प्र०) ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

स्वकुलोत्पन्नानां स्वग्रामोद्‌भवानां स्वदेशीयानान्चापकारं करोति य:, ते सर्वे पन्चाशत्पणपरिमितेन दण्डेन दण्डनीया: । य: स्वेच्छया विधवां गच्छति, भयाकुलावस्थायां सहयोगमिच्छन्ति जना स्तदा य: शक्तोऽपि नाभिधावति, यश्च वृथाक्रोशं करोति, यश्च चाण्डालो ब्राह्मणादीन्स्पृशति, यश्च शूद्रप्रव्रजितदिगम्बरादीन् दैवे पित्र्ये च कर्मणि भोजयति, यश्च मातरं भगिनीं वा गमिष्यामीत्येवमयुक्तं शपथं करोति, यश्चायोग्यो योग्यकर्माध्ययनादिकं करोति, बलीवर्दादीनामज-मेषादीनान्च पुंस्त्वमर्थात्प्रजननशक्तिं विनाशयति, यश्च हिंस्त्रौषधप्रयोगेण वृक्षादे:फलं पुष्पं च पातयति, साधारणद्रव्यवन्चक:, दासीगर्भविनाशक:, ये च पुत्रादीन् पित्रादींश्च परस्परं त्यजन्ति ते सर्वे पणशतं दण्डप्रदानार्हा:[1] ।

साहससदृशेष्वापराधेषु दण्डव्यवस्था - रजको यदि प्रक्षालनार्थं समर्पितं वस्त्रं स्वयमेवाच्छादयति तदाऽसौ पणत्रयं दण्ड्य: । पुनर्वस्त्रमेतद् विक्रयं करोति, आधित्वं वा नयति स्वमित्रेभ्यो याचितं वा ददात्यसौ प्रत्यपराधं दशपणान्दण्डनीय: । पितापुत्रयोर्विरोधे य: साक्षित्वमङ्गीकरोति कलहं न निवारयति तदाऽसौ पण-त्रयं दण्ड्य: । तयोर्विरोधे प्रतिभूर्भवति किन्तु कलहं वर्धयति य: स चतुर्विंशति पणान्दण्डनीय: । तोलनदण्डस्य प्रस्थद्रोणादीनां द्रम्मनिष्कादीनान्च य: कूटं करोति यश्च तै: कूटजैरन्नपि व्यवहरति तावुभौ प्रत्येकमुत्तमसाहसं दण्डनीयौ य: कूटकं द्रम्मादिकं सम्यगिति ब्रूते सम्यक् च कूटकमिति वदति चेत्सोऽयं नाणकपरीक्षी उत्तमसाहसं दण्ड्य: । अनभिज्ञश्चिकित्सको जीवनार्थं चिकित्साविज्ञोऽहमित्युक्त्वा-तिर्यङ्मनुष्यराजपुरुषेषु मिथ्यौषधोपचारं करोति तदाऽसौ यथाक्रमं प्रथममध्य-

---

(१) याज्ञवल्क्यस्मृति: २।२३०-२३७ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

मोक्षसाहसान्दण्डनीयः । अनपराधिनं बन्धनानर्हं बध्नाति बद्धमनिवृत्तव्यवहारं चोत्सृजति, असौ उत्तमसाहसं दण्डनीयः । यो वणिक् कूटमानेन कूटतुलया वाऽन्यथा व्यवहरति असावपि द्विशतं दण्डनीयः । औषधद्रव्येषु तैलघृतादिषु स्नेहपदार्थेषु लवणादौ गन्धद्रव्येषु धान्याद्यन्येषु च विक्रयार्थमसारद्रव्यस्य संमिश्रणं करोति यः स षोडशपणान्दण्डनीयः । अजातिं गुणोत्कर्षाधानेन जातिं कृत्वा विक्रयं करोति तदा तस्य कृते पण्यस्याष्टगुणो दण्डो वेदितव्यः । कस्तूरिकादिकं सारद्रव्यं कृत्रिमं कृत्वा विक्रयं करोति तदा मूल्यस्याधारे दण्डः कल्पनीयः, न्यूनपणमूल्ये कृत्रिमकस्तूरिकादौ विक्रीते पञ्चाशत्पणो दण्डः, पणमूल्ये शतं द्विपणमूल्ये द्विशतो दण्डः, इत्थं मूल्यवृद्धौ दण्डवृद्धिः कल्पनीया । लाभलोभेन वणिजो राजनिर्धारितमूल्येषु ह्रासं वृद्धिं वा कुर्वन्ति तदा ते पणसहस्रं दण्डनीयाः । वणिजो मिलित्वैव देशान्तराद्धीनमूल्येनागतं पण्यद्रव्यं बहुमूल्यमादाय विक्रयं कुर्वन्ति चेत्ते उत्तमसाहसेन दण्डनीयाः[१] ।

स्त्रीसंग्रहणे दण्डव्यवस्था -

इदानीं स्त्रीसंग्रहणाख्यं विवादपदं प्रस्तूयते । स्त्रीसंग्रहणं त्रिविधम्, अस्य दण्डोऽपि त्रिविध एव व्यवस्थितः । प्रथमसाहसादि दण्डप्रदानार्हस्य त्रिविधस्यैव संग्रहणस्य स्वरूपं प्रदर्शयति महामुनिर्व्यासः --

त्रिविधं तत्समाख्यातं प्रथमं मध्यमोत्तमम् ।
अदेशकालभाषाभिर्निर्जने च परस्त्रियः ।+
कटाक्षावेक्षणं हास्यं प्रथमं साहसं स्मृतम् ।।

---

(१) याज्ञवल्क्यस्मृतिः २।२४८-२५० ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

प्रेषणं गन्धमाल्यानां धूपभूषणवाससाम् ।
प्रलोभनं चान्नपानैर्मध्यमं साहसं स्मृतम् ॥

सहासनं विविक्ते तु परस्परमुपाश्रय: ।
केशाकेशिग्रहश्चैव सम्यक् संग्रहणं स्मृतम्[1] ॥

मनुस्मृतौ मनुनापि --

परस्त्रियं योऽभिवदेत्तीर्थेऽरण्ये वनेऽपि वा ।
नदीनां वापि संभेदे स संग्रहणमवाप्नुयात् ॥

उपचारक्रिया केलि: स्पर्शो भूषणवाससाम् ।
सह खट्वासनं चैव सर्वं संग्रहणं स्मृतम् ॥

स्त्रियं स्पृशेददेशे य: स्पृष्टो वा मर्षयेत्तया ।
परस्परस्यानुमते सर्वं संग्रहणं स्मृतम्[2] ॥

पतिपित्रादिभिर्येन सह संभाषणादिकं निषिद्धं तेनैव सह संभाषणादिषु प्रवर्तमाना स्त्री शतं दण्डमाप्नोति । एवमेव पुरुषो निषिद्धया स्त्रिया सह संभाषणादिकं करोति चेद् द्विशतं दण्डमर्हति[3] । ~~सं प्रत्यपरत्वं-द्वशपणान्दण्डनीय:~~ । सवर्ण: सवर्णायामेव संग्रहणं करोति तदा स पणसहस्रं दण्डनीय: । हीनवर्णायां मध्यमसाहसम् । हीनवर्ण उच्चवर्णायां संग्रहणं करोति चेद् वधदण्डमाप्नोति । हीनवर्णं गच्छन्त्या: स्त्रिया: कर्णयो नासादेश्च कर्तनम्[4] । सवर्णां रक्षितां सवर्णां बलेनोपगच्छति तदा सहस्रं दण्डनीय:, इच्छन्त्या सवर्णया सह सकृन्मिथुने पञ्चशतं दण्डनीय:[5] । दात्रियवैश्यौ रक्षितया ब्राह्मण्या सह सहवासं कुरुत स्तदा तौ

---

(१) मिताक्षरा (या० स्त्रीसं० प्र०) । (२) मनुस्मृति: ८।३५६-३५८ ।
(३) याज्ञवल्क्यस्मृति: २।२८५ । (४) याज्ञवल्क्यस्मृति: २।२८६ ।
(५) मनुस्मृति: ८।३७८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

लिङ्गच्छेदन सर्वस्वहरणादिकं दण्डमाप्नुतः[1] । अरक्षितां ब्राह्मणीं गच्छतस्तौ तदा वैश्यः पञ्चशतेन क्षत्रियः सहस्रेण दण्डनीयः[2] । शूद्रोऽरक्षितां ब्राह्मणीं गच्छति चेत्तस्य लिङ्गोत्कर्त्तनं सर्वस्वहरणञ्च कर्त्तव्यम्, रक्षितां गच्छति चेत्तस्य प्राणहरणं सर्वस्वहरणञ्च भवति[3] । वैश्यो रक्षितां क्षत्रियां क्षत्रियो रक्षितां वैश्यां गच्छति चेत्तदा वैश्य पञ्चशतं क्षत्रियस्तु सहस्रं दण्डनीयः[4] । रक्षिते क्षत्रिया वैश्यै ब्राह्मणौ गच्छति चेत्सहस्रं दण्डो दापनीयः । रक्षितां शूद्रां क्षत्रियवैश्यौ गच्छतस्तदा तौ सहस्रं दण्डनीयौ । अरक्षितक्षत्रियागमने वैश्यः पञ्चशतं दापनीयः, अरक्षित-क्षत्रियागमने क्षत्रियस्य गर्दभमूत्रेण मुण्डनं कर्त्तव्यम् । ब्राह्मणोयस्त्वरक्षितां क्षत्रियां वैश्यां शूद्रां वा गच्छति तदा स पञ्चशतं दण्डनीयः, चाण्डालस्त्रियं गच्छति चेत्सहस्रम्[5] । यो विवाहोन्मुखां सवर्णामलङ्कृतां कन्यामपहरति स सहस्रं दण्डनीयः । सवर्णां तदनभिमुखीं हरन् प्रथमसाहसम्, क्षत्रियादय उत्कृष्टवर्णोत्पन्नां कन्याम-पहरन्ति तदा ते वधदण्डमाप्नुवन्ति[6] । यो हीनवर्णामनिच्छन्तीं कन्यामपहरति तस्य कृते प्रथमसाहसो दण्डः । यः समानजातीयां कन्यां बलात्कारेणाङ्गुलि प्रक्षेपणादिना दूषयति तस्याङ्गुलिद्वयच्छेदः कर्त्तव्यः षट्शतं दण्डप्रदानं च विधेयम् । समानजात्युत्पन्नामिच्छन्तीं कन्यामङ्गुलि प्रक्षेपेण दूषयति तदा-नाङ्गुलिच्छेदमाप्नोत्यपि तु द्विशतं दण्डमाप्नोति सः । कन्यैव कन्यामङ्गुलीं प्रक्षेपयति तदा द्विशतं दण्डमाप्नोति । यास्त्री कन्यामङ्गुलि प्रक्षेपेण कन्यात्वं नाशयति तस्याः शिरोमुण्डनमङ्गुलिच्छेदनञ्च विधाय खरारोहणं कृत्वा राजमार्ग-

---

(१) मनुस्मृतिः ८।३७७ । (२) मनुस्मृतिः ८।३७६ ।
(३) मनुस्मृतिः ८।३७४ । (४) मनुस्मृतिः ८।३८२ ।
(५) मनुस्मृतिः ८।३८३-३८५ । (६) याज्ञवल्क्यस्मृतिः २।२८७ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

प्रमर्णं[1] कारयेत् । यः कन्याया मैथुनत्वादि दोषान्प्रकाशयति स शतं दण्डनीयः, अविद्यमानस्य दोषस्याविष्करणं करोति चेद् द्विशतं दण्ड्यः । गोव्यतिरिक्त-पशुगमने दण्डो द्विशतं कल्पनीयः । यो हीनां स्त्रियं गां चाभिगच्छति स मध्यम-साहसदण्डप्रदानार्हः[2] । अवरुद्धा दास्य भुजिष्याश्चैताः स्त्रियो गम्या स्तासु गम्या-स्वपि गच्छन्पुरुषः पञ्चाशत्पणदण्डार्हः[3] । बलात्कारेणदास्यभिगमने दशपणो-दण्डः, बहवः पुरुषा अनिच्छन्तीमेकां पुरुषसंभोगजीविकां बलेनाभिगच्छन्ति तदा ते प्रत्येकं चतुर्विंशतिपणान्दण्डनीयाः[4] । शुल्कमादायार्थपतिं नेच्छति तदा द्विगुणं शुल्कं दद्यात्, शुल्कं दत्त्वा स्वयमनिच्छतः पुरुषस्य शुल्कहानिरेव । यस्तु पुरुषोमुखादवभिगच्छति स्वपत्न्यादीनां प्रव्रजितां वा गच्छति चेत्तदा स चतुर्विंशति पणान्दण्डनीयः । चाण्डालीगमने सहस्रं दण्डयित्वा ललाटे भगाकारेणाङ्कयित्वा स्वदेशान्निष्कासयेत् । पुनश्चाण्डाल उत्कृष्टां स्त्रियं गच्छति चेद् वधदण्डमाप्नोति[5] । पातकादिरहितानां मातृपितृपत्नीपुत्राणां त्यागं करोति यः स षट्शतं दण्डमाप्नोति[6] ।

द्यूतसमाह्वयाख्यविवादेदण्डः -

द्यूतसमाह्वयाख्यं विवादपदं प्रस्तूयते । पदस्यास्य स्वरूपन्वाभिहितं मनुस्मृतौ मनुना --

अप्राणिभिर्यत्क्रियते तल्लोके द्यूतमुच्यते ।
प्राणिभिः क्रियते यस्तु स विज्ञेयः समाह्वयः[7] ॥

---

(१) मनुस्मृतिः ८।३६७-३७० । (२) याज्ञवल्क्यस्मृतिः २।२८९ ।
(३) याज्ञवल्क्यस्मृतिः २।२९० । (४) याज्ञवल्क्यस्मृतिः २।२९१ ।
(५) याज्ञवल्क्यस्मृतिः २।२९२-२९४ । (६) मनुस्मृतिः ८।३८९ ।
(७) मनुस्मृतिः ९।२२३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

मिताक्षरायाञ्च --

अक्षाबध्नशलाकाद्यैर्देवनं जिह्मकारितम्[1] ।
पणक्रीडावयोभिश्च पदं द्यूतसमाह्वयम् ॥

अक्षाः पाशकाः, बध्नश्चर्मपट्टिका, शलाका दन्तादिनिर्मिता दीर्घाकारा । एतैरप्राणिभिर्यद्देवनं पणपूर्विका क्रीडा क्रियते तद्द्यूतम् । प्राणिभिर्मल्लमेषमहिषादिभिः कुक्कुट पारावतादिभिश्च पणपूर्वकं यः क्रीडाविशेषः क्रियते स समाह्वयो ज्ञेयः । द्यूतादिसेविनो मानवाः प्रच्छन्न तस्करा ज्ञेयाः, राष्ट्रे वसन्त एते वञ्चनात्मकक्रियया नित्यं पीडयन्ति सज्जनान् । अत ये द्यूतं समाह्वयञ्च कुर्युः कारयेयु र्वा तेषां हस्तच्छेदादिवधं कुर्यान्न्यायप्रदाता । यथाह मनुः --

द्यूतं समाह्वयं चैव यः कुर्यात्कारयेत वा ।
तान्सर्वान्घातयेद्राजा[2] - - - -- ॥

याज्ञवल्क्यस्तु देशनिष्कासनदण्डं प्रदर्शयति यथा --

राज्ञा सचिन्हं निर्वास्याः कूटाक्षोपधिदेविनः[3] ।

देशनिष्कासने नारदेन तु विशेष उक्तः --

कूटाक्षदेविनः पापान् राजा राष्ट्राद्विवासयेत्[4] ।
कण्ठेऽक्षमालामासज्य स ह्येषां विनयः स्मृतः ॥ इति ।

:--:--:--:

---

(१) मिताक्षरा (याज्ञवल्क्यस्मृतिः द्यूतसमाह्वयप्रकरणम्) ।

(२) मनुस्मृतिः ९।२२४ ।

(३) याज्ञवल्क्यस्मृतिः २।२०२ ।

(४) मिताक्षरा (याज्ञवल्क्यस्मृतिः २।२०२) ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

षष्ठपरिच्छेदः

दुर्गव्यवस्था : दुर्गपरिभाषा

शत्रवो यत्र सुखेन गन्तुमसमर्थाः, यत् स्थानं परदृष्ट्यामत्यन्तं दुर्गमम्, यच्छत्रोः कृते परं कष्टकरम्, शत्रुकृतं कार्यं यत्र न सफलम्, शत्रुकृतोद्योगादापतितां विपदां यन्निवारयति, यद्राजानं जनान् कोशञ्च रक्षति तद्दुर्गम् । तथा च नीतिवाक्यामृते --

> यस्याभियोगात् परे दुःखं गच्छन्ति दुर्जनोद्योग
> विषया वा स्वस्यापदो गमयतीति दुर्गम् ।[1]

शुक्रनीतावपि --

> यस्य दुर्गस्य सम्प्राप्तेः शत्रवो दुःखमाप्नुयुः ।
> स्वामिनं रक्षयत्येव व्यसने दुर्गमेवतत् ॥[2]

दुर्गभेदाः -

दुर्गं द्विविधं स्वाभाविकमाहार्यञ्चेति । जलपर्वतादिभिः स्वभावतः परिवृतं स्वाभाविकम्, प्राकारपरिखादिभिर्विनिर्मितमाहार्यम् । तद्यथा --

---

(१) नीतिवाक्यामृतम् दुर्गसमुद्देशः ।

(२) शुक्रनीतिः ४।६।१५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

तद् द्विविधं स्वाभाविकम्, आहार्यञ्च[1] ।

उपर्युक्तयोर्भेदयोर्द्वयोर्दुर्गमनेकधास्ति वर्णितम् । धन्वमहीजलवृक्षनृपर्वताख्यानि षड्विधानि दुर्गाणि स्मृत्यादिषु प्रतिपादितानि । तथा च मनुस्मृतौ --

धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव वा ।
नृदुर्गं गिरिदुर्गं वा समाश्रित्य वसेत्पुरम्[2] ।।

मरुभूमिवेष्टितं चतुर्दिशं पञ्चयोजनमनुदकं धन्वदुर्गम् । पाषाणैरिष्टकया वा विनिर्मितेन द्वादशहस्तादुन्नतेनोपरि भ्रमणयोग्येन गवाक्षादि युक्तेन प्राकारेण वेष्टितं महीदुर्गम् । अगाधजलेन परितः परिवृतं जलदुर्गम् । पुराद् बहिः परितो योजनमात्रं व्याप्यतिष्ठन् महावृक्षकण्टकिगुल्मलतादि खचितं वार्क्षदुर्गम् । चतुर्दिग्-वस्थायि हस्त्यश्वरथयुक्त बहुपादात रक्षितं नृदुर्गम् । पर्वतपृष्ठमतिदुरारोहं सङ्कीर्णैक-मार्गार्पितमन्तर्नदीप्रस्रवणाद्युदकयुतं बहुसस्योत्पन्न क्षेत्रवृक्षान्वितं गिरिदुर्गम् ।

महाभारतेऽपि --

धन्वदुर्गं महीदुर्गं गिरिदुर्गं तथैव च[3] ।
मनुष्यदुर्गं मृद्दुर्गं वनदुर्गं च तानि षट् ।।

कौटिल्येन जलपर्वतधन्ववनाख्यानि चतुर्विधानि दुर्गाण्युक्तानि । तानि यथा --

चतुर्दिशं जनपदान्ते साम्परायिकं दैवकृतं दुर्गं कारयेत् ।
अन्तर्द्वीपं स्थलं वा निम्नावरुद्धमौदकं प्रास्तरं गुहां
वा पार्वतं निरुदकास्तम्बमिरिणं वा धान्वनं
खञ्जनोदकं स्तम्बगहनं वा वनदुर्गम् । तेषां नदीपर्वत--

---

(१) नीतिवाक्यामृतम् दुर्गसमुद्देशः । (२) मनुस्मृतिः ७।७० ।
(३) शान्तिपर्व ८६।५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

दुर्गं जनपदारक्षास्थानं धान्वनं दुर्गमटवीस्थानम्[1] ।

दुर्गेष्वेतेषु जलदुर्गं पर्वतदुर्गं च्चातिसंकटे जनपदरक्षकम् । अवशिष्टं दुर्गद्वयं वनजन्तु रक्षणस्थानं वन्येभ्यः परेभ्यश्च जनपदानां रक्षास्थानञ्च । मानसारे तु शिबिरवाहिनीमुखस्थानीयद्रोणकसंसिद्धिकोलकनिगमस्कन्दावारेत्याख्यान्यष्ट- प्रकाराणि दुर्गाण्युल्लिखितानि सन्तीत्युक्तं हिन्दूराज्यशास्त्रकारेण[2] ।

दुर्गस्य प्राधान्यम् -

उपर्युक्तानां दुर्गाणां मध्ये गुणबहुत्वेन गिरिदुर्गस्याश्रयणमुचितं यतस्तस्मिन् शत्रुरारोढुं पर्वतादल्पप्रयत्नप्रेरितप्रस्तरादिना बहुविपक्ष सैन्य व्यापादनमित्यादयः सन्ति बहवो गुणाः । तथैव वर्णितं मनुस्मृतौ --

सर्वेण तु प्रयत्नेन गिरिदुर्गं समाश्रयेत् ।
एषां हि बाहुगुण्येन गिरिदुर्गं विशिष्यते[3] ।।

महाभारतकारस्त्वपरि दुर्लङ्घ्यत्वात् नृदुर्गमेव विशिष्टमतस्तस्यैव विशेषाश्रयः कर्तव्य इत्याह --

दुर्गेषु च महाराज षट्सु ये शास्त्रनिश्चिताः[4] ।
सर्वदुर्गेषु मन्यन्ते नरदुर्गं सुदुस्तरम् ।।

तथा च शुक्राचार्यः --

श्रेष्ठं तु सर्वदुर्गेभ्यः सेनादुर्गं स्मृतं बुधैः ।
तत्साधकानि चान्यानि तद्रक्षेन्नृपतिः सदा ।।

---

(१) कौटलीयार्थशास्त्रम् २।३ । (२) हिन्दूराज्यशास्त्रम् पृ० ८६ ।
(३) मनुस्मृतिः ७।७० । (४) शान्तिपर्व ५६।३५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

सेनादुर्गं तु यस्यस्यात्तस्य वश्या तु भूरियम् ।
विना तु सैन्यदुर्गेण दुर्गमन्यत्तु बन्धनम् [1] ।।

दुर्गमहत्ता -

मनुस्मृतौ --

यथा दुर्गाश्रितानेतान्नोपहिंसन्ति शत्रव: ।
तथारयो न हिंसन्ति नृपं दुर्गसमाश्रितम् ।।

एक: शतं योधयति प्राकारस्थो धनुर्धर: [2] ।
शतं दशसहस्राणि तस्माद्दुर्गं विधीयते ।।

शुक्रनीतावपि --

एक: शतं योधयति दुर्गस्थोऽस्त्रधरो यदि ।
शतं दशसहस्राणि तस्माद् दुर्गं समाश्रयेत् ।।

दंष्ट्रा विरहित: सर्पो यथा नागो मदच्युत: [3] ।
दुर्गेण रहितो राजा तथा गम्योऽभवद्रिपो: ।।

तथा च नीतिवाक्यामृते --

अदुर्गोदेश: कस्य नाम न परिभवास्पदम् ।

अदुर्गस्यराज्ञ: पयोधि मध्ये पोतच्युतपक्षिवदापदि नास्त्याश्रय: [4] ।

यथा दुर्गनिवासिनो मृगादीन् व्याधयो व्यापादयितुं न शक्नुवन्ति तथैव दुर्गाश्रितं राजानं न शत्रव: । एवमेको दुर्गस्थो धनुर्धर: शत्रूणां शतं विनाशयति, दुर्गस्थं धानुष्कशतं शत्रूणां दशसहस्राणि, पुनर्दुर्गस्याभावे विपदाश्रयाभाव:, तस्माद्दुर्गस्य महत्वमत्यधिकं सिद्धम् ।

---

(१) शुक्रनीति: ४।६।८-९ । (२) मनुस्मृति: ७।७३-७४ ।
(३) शुक्रनीति: ४।६।१०-११ । (४) नीतिवाक्यामृतम् दुर्गसमुद्देश: ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

दुर्गस्यावश्यकता -

राज्ञः प्रजानां कोशादीनाञ्च रक्षणार्थं दुर्गमपेक्षितम् । उक्तञ्च --

तत्र दुर्गाणि कुर्वीत जनकोशात्मगुप्तये[1] ।

एवञ्च - आत्मदारार्थलोकानां सञ्चितानान्तु गुप्तये[2] ।
नृपतिः कारयेद्दुर्गं प्राकारद्वारसंयुतम् ॥

दुर्गनगरादि संज्ञोत्पत्तिः -

पृथोः शासनकालात्प्राग् ग्रामनगरदुर्गादीनां न कापि व्यवस्था, जनाः स्वेच्छया यत्र तत्र निवसन्ति स्म, अतो जनसमाज आसीदव्यवस्थितः । अस्यां स्थितौ राज्ञा पृथुना भूमण्डलं प्रायः समं कृत्वा ग्रामनगरादीनां पृथग् व्यवस्था कृता, ततस्तेषां नामोद्घाटनं सीमानिर्धारणं दुर्गनिर्माणादिकञ्च विधाय जनवासस्य व्यवस्थापि विहिता । तथा चोपवर्णितं श्रीमद्भागवते --

अथास्मिन् भगवान् वैन्यः प्रजानां वृत्तिदः पिता ।
निवासान् कल्पयाञ्चक्रे तत्र तत्र यथार्हतः ॥
ग्रामान् पुरः पत्तनानि दुर्गाणि विविधानि च ।
घोषान् व्रजान् सशिबिरानाकरान् खेटखर्वटान् ॥
प्राक्पृथोरिह नैवैषा पुरग्रामादि कल्पना ।
यथासुखं वसन्ति स्म तत्र तत्राकुतोभयाः[3] ॥

---

(१) याज्ञवल्क्यस्मृतिः १।३२१ ।

(२) राजनीतिप्रकाशः पृ० २०२ एवं राजधर्मकाण्ड पृ० २८ ।

(३) श्रीमद्भागवतम् ४।१८।३०-३२ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

धनधान्यायुधादिभिः परिपुष्टं दुर्गं विजयप्रदम् -

तथा च मनुः - तत्स्यादायुधसंपन्नं धनधान्येन वाहनैः ।
ब्राह्मणैः शिल्पिभिर्यन्त्रैर्यवसेनोदकेन च ॥[1]

रामायणेऽपि -- कच्चिद्दुर्गाणि सर्वाणि धनधान्यायुधोदकैः ।
यन्त्रैश्च प्रतिपूर्णानि तथा शिल्पिधनुर्धरैः ॥[2]

कामन्दकोऽप्याह -- जलान्नायुधयन्त्राढ्यं वीरयोधैरधिष्ठितम् ।
गुप्तिप्रधानमाचार्या दुर्गं समनुमेनिरे ॥[3]

तथा च शुक्रनीतावपि -- युद्धसम्भारपुष्टानि राजा दुर्गाणि धारयेत् ।
धान्यवीरास्त्रपुष्टानि कोशपुष्टानि वै तथा ॥
सहायपुष्टं यद्दुर्गं तद् श्रेष्ठतरं मतम् ।
सहायपुष्टदुर्गेण विजयो निश्चयात्मकः ॥[4]

एवञ्च नीतिवाक्यामृतेऽपि --

वैषम्यःपर्याप्तावकाशो, यवसेन्धनोदकभूयस्त्वं स्वस्य परेषामभावो बहुधान्यरससंग्रहः, प्रवेशापसारौ वीरपुरुषा इति दुर्गसम्पद् अन्यद् बन्दिशालावत् ॥[5]

अस्यायं भावः -- दुर्गं खड्गाद्यायुध सुवर्णादि धनधान्यकरितुरगादि वाहनब्राह्मण-शिल्पियन्त्र घासोदक भोज्यपदार्थादिभिःसमृद्धं कार्यम् । एतद्विधं दुर्गमिष्ट फलप्रदम् ।

राजनिवासोपयुक्तं स्थलम् -

रमणीयमशोकचम्पकादिभिः सुशोभितं पशुवृद्धिकरं कन्दमूलफलपुष्पादिभि

---

(१) मनुस्मृतिः ७।७५ । (२) रामायणम्,अरण्यकांडम् १००।५३ ।
(३) कामन्दकीयनीतिसारः ४।६० । (४) शुक्रनीतिः ४।६।१२-१३ ।
(५) नीतिवाक्यामृतम्,दुर्गसमुद्देशः ।

CC.0 Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

रूपजीव्यं जलवृक्षपर्वतादिभिः समन्वितं स्थलं राजप्रासादनिर्माणयोग्यम् । तथा च याज्ञवल्क्यस्मृतौ --

रम्यं पशव्यमाजीव्यं जाङ्गलं देशमावसेत्[1] ।

शुक्राचार्योऽपि -- नानावृक्षलताकीर्णे पशुपक्षिगणावृते ।
सुबहूदकधान्ये च तृणकाष्ठसुखे सदा ।।

सुबहूदकधान्ये च त

आसिन्धुनौगमाकूले नातिदूरमहीधरे[2] ।
सुरम्यसमभूदेशे राजधानीं प्रकल्पयेत् ।।

उपर्युक्ते भूप्रदेशे सर्वविधसहायपुष्टं दुर्गं कार्यम् । तस्य मध्ये स्त्रीगृहदेवागारायुधागाराग्निशालादियुक्तं सर्वर्तुकफलपुष्पजलवृक्षादिसमन्वितं परिखाप्राकाराद्यैर्गुप्तं सुधाधवलितमात्मनः प्रासादं कारयेद्राजा ।

राजप्रासादवर्णनम् -

तद्यथा रामायणे -- प्रदोषकाले हनुमांस्तूर्णमुत्पत्य वीर्यवान् ।
प्रविवेश पुरीं रम्यां प्रविभक्तमहापथाम् ।।
प्रासादमालाविततां स्तम्भैः काञ्चनराजतैः[3] ।
शातकुम्भनिभैर्जालैर्गन्धर्वनगरोपमाम् ।।
सप्तभौमाष्टभौमैश्च स ददर्श महापुरीम् ।
तलैः स्फटिकसंकीर्णैः कार्तस्वरविभूषितैः ।।
वैदूर्यमणिचित्रैश्च मुक्ताजालविराजितैः ।
तलैः शुशुभिरे तानि भवनान्यत्र रक्षसाम् ।।

---

(१) याज्ञवल्क्यस्मृतिः १।३२१ । (२) शुक्रनीतिः १।२१३-२१४ ।
(३) रामायणम् ५।२।५०-५५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

काञ्चनानि विचित्राणि तोरणानि च रक्षसाम् ।
लङ्कामुद्योतयामासुः सर्वतः समलङ्कृताम् ॥
अचिन्त्यामद्भुताकारां दृष्ट्वा लङ्कां महाकपिः ।
आसीद्विषण्णो हृष्टश्च वैदेह्या दर्शनोत्सुकः ॥

तत्र स्थित्वा समानवर्णामसमानार्षगोत्रजां शुभसुलक्षणोपेतां दानेनोपभोगेन वा पुरुषान्तराऽपरिगृहीतां महाकुलप्रसूतां मनोनयनानन्दकारिणीं सुरूपां गुणवतीं भार्यामुद्वहेत् । उक्तञ्च मनुना --

तदध्यास्योद्वहेद्भार्यां सवर्णां लक्षणान्विताम् ।
कुले महति संभूतां हृद्यां रूपगुणान्विताम् ॥[१]

राजधानीनिर्माणोचितं नगरम् -

यन्नगरं दुर्गसम्पन्नं धनधान्यैपरिपूर्णं विविधैः शस्त्रास्त्रादिभिर्युक्तं प्राकारपरिखादिभिः परिवृतं करितुरगरथादिबलेन च समन्वितमस्ति । पुनर्यत्र शास्त्रमर्मज्ञा बहुविधा विद्वांसः कार्यकुशलाः शिल्पिनश्च वर्तन्ते, यत्र सारवस्तु संग्रहेण परिपूरितमस्ति भाण्डागारम्, यत्र धर्ममर्मज्ञाः सर्वविधकार्यनिपुणा हस्त्यश्वादि वाहनैर्युक्ताः पौरुषशालिनः शूरा वीराश्च निवसन्ति, एवं यत्र न्यायस्य न्यायालयस्थापनस्य चास्ति सुव्यवस्था, यत्र शान्तं वातावरणमस्ति, यत्र विविधोपद्रवेण जना न तु सन्त्रस्ताः, यत्र प्रतिदिनं धार्मिकोत्सवो वेदपाठो देवपूजाक्रमश्च प्रचलति, यत्र सुधाधवलितानि बहूनि बहुविधानि च भवनानि तथा देवमन्दिराणि च सन्ति तस्मिन्नेव नगरे स्वहितचिन्तकमन्त्रिपुरोहितसैनिकैः सह निवसेद्राजा । तथा च महाभारते--

---

(१) मनुस्मृतिः ७।७७ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

यत्पुरं दुर्गसम्पन्नं धान्यायुधसमन्वितम् ।
दृढप्राकारपरिखं हस्त्यश्वरथसङ्कुलम् ।।
विद्वांसः शिल्पिनो यत्र निचयाश्च सुसन्चिताः ।
धार्मिकश्च जनो यत्र दाक्ष्य उत्तमास्थितः ।।
ऊर्जस्विनरनागाश्वं चत्वरापणशोभितम् ।
प्रसिद्धव्यवहारं च प्रशान्तमकुतो भयम् ।।
सुप्रभं सानुनादं च सुप्रशस्तनिवेशनम् ।
शूराढ्यजनसम्पन्नं ब्रह्मघोषानुनादितम् ।।
समाजोत्सव संपन्नं सदा पूजितदैवतम् ।
वश्यामात्यबलो राजा तत्पुरं स्वयमाविशेत् [1] ।।

राजधानीराष्ट्रस्य प्राणरूपा -

कस्यचिदपि राष्ट्रस्य भवत्येकं प्रमुखं स्थानं यद्राजधानीति नाम्ना प्रसिद्धम्, तत्रैवोषित्वा राजा राज्यं सन्चालयति । पुरेषु राजधान्यामहत्वं सर्वाधिकं पृथग्विधन्च । तस्या निर्माणक्रियापि विशेषरूपा । राज्यस्य सर्वविधानि प्रमुखाणि तत्त्वानि राजधान्यामेवकेन्द्रितानि, सामान्यरूपेण विनिर्मितायां राजधान्यां न तु रक्षितानि । अतो राज्यस्य सारपूर्णतत्त्वरक्षणार्थं राजधानी सविशेषं दुर्गवेष्टिता कार्या । राजधान्यामहत्वं राष्ट्रात्परं स्थानन्च प्रागेवास्ति यथा "स्वाम्यमात्यौ पुरं राष्ट्रं" पुरं राज्ञः कृतदुर्गनिवासस्थानं राष्ट्रं देशः । राजपुरं प्रति विपक्षस्याक्रमणस्यादत्यन्तं भयमुत्पद्यते यतो राष्ट्रस्य प्रमुखं केन्द्रमर्थात् प्राणरूपं तत् तस्य प्राप्त्यामेवाखिल राज्यप्राप्तित्वात्जेतुं निरन्तरं प्रयस्यन्ति शत्रवः । अतो राजधान्याःसर्वतः सुरक्षायाः सुव्यवस्था कर्तव्या । सप्तसु राज्यप्रकृतिषु राजधान्येका

---

(१) शान्ति० ८६।६-१० ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

प्रमुखा, स्थानक्रमे सा तृतीया । राज्यप्रकृतिषूत्तरापेक्षया पूर्वा गुरुतरा, पूर्वप्रकृते-र्विनाशोऽपि गरीयान् । यथा - मित्रविनाशाद् बलविनाशः, बलात्कोशः, कोशा-द्राष्ट्रम्, राष्ट्राद्दुर्गम् । यतोऽन्धनादि सम्पन्न दुर्गादेव राज्यरक्षासिद्धिः । अत उत्तरापेक्षया पूर्वपूर्वा प्रकृतिर्यत्नतो रक्षितव्या । तथा च मनुस्मृतौ --

सप्तानां प्रकृतीनां तु राज्यस्यासां यथाक्रमम् ।[१]
पूर्वंपूर्वं गुरुतरं जानीयाद् व्यसनं महत् ॥

राजधान्या निर्माणम् -

विषयेऽस्मिन् प्रथमं कौटिल्यमतमुपस्थाप्यते यथा -- दुर्गपरिवृतायां राजधान्यां द्वात्रिंशद्धस्तमिताः पूर्वपश्चिमविस्तृतास्त्रयः, उत्तरदक्षिणविस्तारा-स्त्रयश्च राजमार्गाः, एवमुपर्युक्तस्थले गुप्तमार्गाः (सुरुङ्ग), तथा द्रोणमुखस्थानीय-विवीतश्मशान ग्रामसेतुवनकरितुरगरथ मार्गाश्च विधेयाः । पुना राजधान्याः परितो द्वादशद्वाराणि च । तथैव बहूदकोपेतानां वापीकूपतडागादीनां व्यवस्था च कार्या । वास्तुविद्यानुसारं नवश्रेणितं नवभागं कृत्वैकाशीति खण्डखण्डिते भूभागे मध्यखण्ड-स्योत्तरस्यां दिशि पूर्वाभिमुखमुत्तराभिमुखं वा राजसदनं विधेयम् । तस्मिन् जयन्त-वैजयन्तादि नामाङ्किता बहवः कोष्ठाश्च । राजभवनस्यैशान कोणे मन्त्रिगुरु-पुरोहितानां निवासस्थानमुदपानं यज्ञशाला च । आग्नेय कोणे पाकशाला (भान्डा-घर) हस्तिशाला च, तथा भाण्डागारमक्षपटलं सुवर्णरजतादीनामाभूषणनिर्माण-स्थानं तैलघृतादिरसानां क्रयविक्रयस्थानञ्च कुर्यात् । नैर्ऋत्यकोणे कुप्यगृहमायुधागारञ्च, ततः धान्याद्यन्नानामापणिकाः कार्मान्तिकाः पक्वान्नसुरामांसादि विक्रयिणो

---

(१) मनुस्मृतिः ९।२९५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

कलाध्यक्षा रूपाजीवा स्तालापचरा वेश्याश्च निवसेयु: । खरोष्ट्रस्थानं तेषां क्रयविक्रय स्थलञ्च नैर्ऋत्यकोण एव । वायव्यकोणे रथयानादिशाला: (ग्यारेज), तत ऊर्णासूत्रवेणुचर्मकवचादय: स्थाप्या: । तत: शस्त्रावरणकारव: शूद्राश्च वसेयु: । पण्यगृहं भैषज्यगृहञ्च तत्रैव । ईशानभागे राष्ट्रियकोशगृहं गवाश्वशालाश्च । ततो नगरदेवा राजदेवाश्च स्थाप्या: । मणिकारवो ब्राह्मणाश्च तत्रैव निवसेयु: । नगरस्य रिक्तस्थलेषु श्रेणीप्रवहणिकनिकाया: (पालकीआदिवोकनेहरु) वसेयु: । शिववैश्रवणाश्विनीकुमारादीनां देवानां दुर्गाणाञ्च मन्दिराणि पुरमध्ये स्थाप्यानि । यथास्थानं वास्तुदेवा दिक्पालाश्च स्थाप्या: । नगरस्य चत्वारि द्वाराणि मुख्यानि तानि चोत्तरादि क्रमेण क ब्रह्मेन्द्रयमस्कन्देति नामानि । नगरस्योत्तरे पूर्वे वा श्मशान-घाट:, वर्णोत्तमानां दक्षिणे । पाखण्डनास्तिक चाण्डालादीनां निवासस्थानंर श्मशानसमीपे कार्यम् । तद्यथा --

त्रय: प्राचीना राजमार्गास्त्रय उदीचीना इति वास्तुविभाग: ।
- - -चातुर्वर्ण्यसमाजीवे वास्तुहृदयादुत्तरे नवभागे यथोक्त विधानमन्तःपुरं
- - - - - - - - - पाखण्डचण्डालानां श्मशानान्ते वास: । [1]

तथा च शुक्राचार्य: --

अर्धचन्द्रां वर्तुलां वा चतुरस्रां सुशोभनाम् ।
सप्राकारां सपरिखां ग्रामादीनां निवेशिनीम् ।।
सभामध्यां कूपवापीतडागादियुतां सदा ।
चतुर्दिक्षु चतुर्द्वारां सुमार्गाराम वीथिकाम् ।।
दृढ़सुरालय मठपान्थशाला विराजिताम् । [2]
कल्पयित्वा वसेत्तत्र सुगुप्त: सप्रजो नृप: ।।

---

(१) कौटलीयार्थशास्त्रम् २।४ । (२) शुक्रनीति: १।२१५-२१७ ॥

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

राजधान्यां परिखाप्राकारादीनां व्यवस्था -

नदीसंगमे वास्तुविज्ञनिर्धारितस्थले दुर्गयुतां राजधानीं स्थापयेत् । तस्या उत्सङ्गे दण्डान्तरं (चतुर्हस्तान्तरं) कृत्वा पाषाणैरिष्टकाभिर्वा बद्धपार्श्वाः क्रमेण चतुर्दश द्वादश दश दण्डविस्तीर्णाः गभीराः प्राकृतिकजलपूर्णा आगन्तुकजलपूरिता वा सपरिवाहाः पद्मग्राहादिभिर्युक्ता स्तिस्रः परिखाः कार्याः । ताभ्यश्चतुर्दण्ड विप्रकृष्टं षड्दण्डोन्नतं हस्त्यादिभिः क्षुण्णं दृढं स्थूलं वप्रं कार्यम् । तस्मिन् कण्टकीलिता विषलताश्च योज्याः । वप्रमुपरि द्वादश हस्तादाचतुर्विंशति हस्तोच्छ्रित-मैष्टकं पाषाणमयं वा प्राकारं कारयेत् । तस्य मस्तकं कपादिना मृदङ्गाकारं तालमूलाकारं वा कार्यम् तस्योपरि त्रिंशत्त्रिंशद्दण्डान्तरेऽट्टालकं विधेयम् । द्वयो रट्टालकयोर्मध्ये द्वितलां प्रतोलीं कारयेत् । अट्टालकप्रतोलीमध्ये त्रिधानुष्कनिवास योग्यो छिद्रफलकेनाच्छादित इन्द्रकोशः कार्यः । इन्द्रकोशप्रतोलीमध्ये गुप्तमार्गो विधेयः । दण्डान्तरा द्विदण्डान्तरा वा चार्याः कार्याः । तत्रैव प्रधावितिकां निष्कुहद्वारं च कारयेत् । तथा च कौटलीयार्थशास्त्रे --

> वास्तुकप्रशस्ते देशे नदीसंगमे ह्रदस्य वाऽविशोषस्याङ्के सरसस्तटाकस्य
> वा वृत्तं दीर्घं चतुरश्रं[१] - - - - - । तस्य परिखास्तिस्रो
> दण्डान्तराः कारयेत् । - - - - - - - - - - - - - - - - - - - ।

प्राकारस्य वहिर्भागे लौहकीलादीनि शत्रुपीडोत्पादकानि विविधानि साधनान्य दृश्यरूपेण स्थापयेत् । तथथा --

> वहिर्जानुभञ्जनी त्रिशूलप्रकरकूपकूटावपातकण्टकप्रतिसराहि

---

(१) कौटलीयार्थशास्त्रम् २।३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

पृष्ठतालपत्र शृङ्गाटकश्वदंष्ट्रार्गलोपस्कन्दन पादुकाम्बरीषोद-
पानकैः छन्नपथं कारयेत्[1] ।

प्राकारस्योभयतो भवनं कृत्वा षट्तलोपेतं द्वारं विधारयेत् । पञ्चदशहस्तोन्नता स्थूलस्तम्भाः स्थाप्याः । पुनः कपाट द्वययुक्तं दुर्गवहिर्द्वारं च कार्यम् । गोधामुखाकारं तद् दुर्गस्य भवति मूलद्वारम् । द्वारस्योभयतः प्राकारसमीपे कुल्याश्च निर्मेयाः । तासां निकटे दस्यु विनाशकराः पाषाणकुद्दालकुठारादि साधनविशेषाः स्थाप्याः । तथा च कौटिल्यः --

तासु पाषाणकुद्दालकुठारी काण्डकल्पनाः ।
भुसुण्डिमुद्गरा दण्डचक्रयन्त्रशतघ्नयः ॥
कार्याः कार्मारिकाः शूला वेधनाग्राश्च वेणवः ।
उष्ट्रग्रीव्योऽग्निसंयोगाः कुप्यकल्पे च योऽवधिः ॥

---

(१) कौटलीयार्थशास्त्रम् २।३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

सप्तमपरिच्छेद:

सैन्यव्यवस्था : सेनाङ्गनिरूपणम्

राज्यस्य सप्ताङ्गानि प्रसिद्धानि, तेषु सैन्यमेकं महत्त्वपूर्णमङ्गम्, यस्याभावे न राज्यं नाम । राज्यस्याभिन्नाङ्गरूपाया: सेनाया अङ्गचतुष्टयं परिकल्पितम् । तथा चामर: --

हस्त्यश्वरथपादातं सेनाङ्गं स्याच्चतुष्टयम्[1] ।

रामायणे पुराणादिष्वपि विशेषतश्चतुरङ्गबलमेवास्ति वर्णितम् । तद्यथा --

बलेन चतुरङ्गेण स्वयमेत्य निशाचरम् ।
वधिष्यामि मुनिश्रेष्ठ शत्रुं तव यथेप्सितम्[2] ।।

कामन्दकेन तु सेनाया: षडङ्गं दर्शितम् । यथा --

षडङ्गं मन्त्रकोशाभ्यां पदात्यश्वरथद्विपै:[3] ।

चन्द्रगुप्तस्य समयेऽपि षडङ्गबलस्यैव व्यवस्थाऽऽसीदित्युक्तं यूनानी लेखकेन[4] । षडङ्गेषु नौविष्टिपत्त्यश्वहस्तिरथाभिधान्यासन् । कामन्दकस्तु मन्त्रकोशावपि गणयति षडङ्गेषु । महाभारते त्वष्टाङ्गयुताया: सेनाया अस्त्युल्लेख: ।

---

(१) अमरकोश: २।८।३३ । (२) रामायणम् अयोध्याकाण्डम् ३८।७ ।
(३) कामन्दकीयनीतिसार: १८।२४ । (४) ध०शा०इ०भार पृ० ६७६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

यथा -- रथा नागा हयाश्चैव पादाताश्चैव पाण्डव ।
विष्टिर्नाविश्चराश्चैव देशिका इति चाष्टमम् [१] ।।
अङ्गान्येतानि कौरव्य प्रकाशानि बलस्य तु ।

उक्तप्रकारेण चतुरङ्गं षडङ्गमष्टाङ्गञ्चेति त्रिविधं बलं शास्त्रदर्शितम् । हस्त्यादि चतुरङ्गेषु न केषाञ्चिदपि मतभेदः । षडङ्गेषु तु चतुरङ्गबलादतिरिक्तयो रङ्गकयोर्नैकमत्यं राजशास्त्रकाराणाम् । अष्टाङ्गानां चर्चोपस्थापिता शान्तिपर्वाध्याये न त्वन्यत्र । अष्टाङ्गेषु विष्ट्यादि चतुरङ्गानि हस्त्यादि चतुरङ्गबलस्य सहायकानीति सर्वसम्मतम् । सेनाङ्गेषु परिगणिता हस्त्यश्वरथाश्चैते त्रयोऽपि भवन्ति पदाति सेनाया वाहनस्य यानस्य वा कार्ये निरन्तरमाबद्धा स्तस्या एवाधीनाश्च । अतः सेनाया दर्शितं भेदद्वयं स्वगमा अन्यगमाश्चेति । पदगाः सैनिकाः स्वगमा यानारूढा (हस्त्यश्वरथगा) अन्यगमाः । तथा च शुक्रनीतौ --

स्वगमा या स्वयं गन्त्री यानगाऽन्यगमा स्मृता [२] ।
पादातं स्वगमं चान्यद् रथाश्वगजगं त्रिधा ।।

एतादृशो भेदः स्थलसेनायामेव न जलसेनायां नाकाशसेनायाञ्च ।

सेनाङ्गानां महत्वं कार्यञ्च -

सेनाङ्गेषु गजस्यात्यन्तं महत्त्वमस्ति, यतस्तस्य पाददन्तशुण्डपुच्छाश्चैतेऽष्टावयवा आयुधरूपाः, तैं एष्टाभिरायुधैरेव कार्यं करोति सः । अतोऽङ्गेषेष श्रेष्ठः । तथा च नीतिवाक्यामृते --

---

(१) शुक्रनीतिः ४।७।३ । (२) नीतिवाक्यामृतम्, बलसमुद्देशः ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

बलेषु हस्तिनः प्रधानमङ्गम्, स्वैरवयवैरष्टायुधा हस्तिनो भवन्ति[1]। एकोऽपि द्विपः सहस्रपरिमितैर्योद्धृभिः सह योद्धुं समर्थः प्रहार सहस्रेणापि न भवति विचलितः, अतः शक्त्यभिवृद्ध्यर्थं विजयप्राप्त्यर्थञ्च सेनायां गजाधिक्यं कार्यमित्याहुर्नीतिज्ञाः --

[2] हस्तिप्रधानो विजयो राज्ञाम् । [3] हस्तिप्रधानो हि परानीकवधः ।
[4] नागेषु हि क्षितिभुजां विजयो-निबद्ध -

स्तस्माद्गजाधिक बलो नृपतिः सदा स्यात् ।

हस्ति प्रधानो विजयो राज्ञां यदेकोऽपि हस्ती
सहस्रं योधयति न सीदति प्रहारसहस्रेणापि[5] ।

हस्तिविद्याज्ञैः पुरुषैः प्रशिक्षिता हस्तिनो युद्धकौशलं जानन्ति भवन्ति जेतुं समर्थाः कार्यकुशलाश्चाशिक्षिता स्तु सर्वनाशकराः । तथाऽऽहसोमदेवः --

अशिक्षिता हस्तिनः केवलमर्थप्राणहराः[6] ।

अतः सेनायां प्रयुक्ता गजाः शिक्षिता विधेयाः । पुरा राजानः प्रशिक्षितानां युद्धमर्मज्ञानां गजानां साहाय्येन युद्धं कुर्वन्ति स्म शत्रुघ्नलवणासुरयोर्युद्धे शत्रुघ्नस्य शताधिका युद्धविषयज्ञा गजा आसन् । तथा च रामायणे --

रथानां द्विसहस्रे च गजानां शतमुत्तमम्[7] ।

[8] बिहारभद्रस्य सेनायां १०००० पाटलिपुत्रस्य राज्ञः ६००० सुराष्ट्रस्य राज्ञः १६००

---

(१) नीतिवाक्यामृतम् बलसमुद्देशः । (२) कौटलीयार्थशास्त्रम् २।२ ।
(३) कौटलीयार्थशास्त्रम् ७।११ । (४) कामन्दकीयनीतिसारः १६।६२ ।
(५) नीतिवाक्यामृतम् बलसमुद्देशः । (६) नीतिवाक्यामृतम् बलसमुद्देशः ।
(७) रामायणम् ७।६४।२ । (८) धर्मशास्त्र का इतिहास भा०२ पृ० ६७६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

प्रशिक्षिता हस्तिन आसन् ।

हस्तिकार्यम् -

युद्धयात्रायां सेनाया अग्रगमनम्, सुरक्षितवासस्थानस्यान्वेषणम्, स्वानुगानां सैन्यानां सर्वतः संरक्षणम्, गभीराणां नदीनां गाम्भीर्यज्ञानम्, महारण्यप्रवेशनम्, प्रकीर्णानां स्वसैन्यानामेकत्रीकरणम्, एकत्रितानां परसैन्यानां भेदनं विनाशनञ्च, स्वपक्षस्योत्साहवर्द्धनम् शत्रुपक्षे भयोत्पादनम्, शत्रुसंगृहीतस्वसैन्यप्रत्यावर्तनम्, परसैन्यग्रहणम् शत्रुबलज्ञानम्, निर्बलशत्रुप्रत्याक्रमणम्, शत्रुव्यूहभेदनं नगरावमर्दनञ्च, नद्यादौ सेतुबन्धनञ्चेत्यादीनि प्रशिक्षित दन्ति बलकार्याणि । तथा च नीतिवाक्यामृते --

> सुखेन यानमात्मरक्षा परपुरावमर्दनम्, अरिव्यूहविघातो
> जलेषु सेतुबन्धो वचनादन्यत्र सर्वविनोद हेतवश्चेति[1] ।

एवञ्च - प्रकीर्णिकावर्जान्येतान्येव, चतुर्णामङ्गानां व्यस्तसमस्तानां वा[2]घातः, पक्षकक्षोरस्यानां च प्रभञ्जनमवस्कन्दः सौप्तिकं चेति ।

अश्वकार्यम् -

कौटिल्यार्थशास्त्रे -- अभिसृतं परिसृतमतिसृतमपसृतमुन्मथ्यावधानं बलयो गोमूत्रिकामण्डलं प्रकीर्णिका व्यावृत्तपृष्ठमनुवंशमग्रतः पार्श्वाभ्यां पृष्ठतो भग्नरक्षा भग्नानुपात इति[3] ।

---

(१) नीतिवाक्यामृतम् बलसमुद्देशः । (२) कौटलीयार्थशास्त्रम् १०।५ ।

(३) कौटलीयार्थशास्त्रम् १०।५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

नीतिवाक्यामृतेऽपि -- सरणम्, अपसरणम्, अवस्कन्द:, परानीकभेदनं च तुरङ्गमसाध्यम् एतत् ।[1]

एतानि कार्याण्यश्वस्य मुख्यानि, पुनर्यत्कार्यं गजाद्रथाच्चासम्भवं तदप्यश्वादेव साध्यम् ।

अश्वानां स्वभावश्चञ्चल: क्रियाकलापोऽपि तादृशएव, तस्माच्च सेनायां तीव्रगतिमुत्पादयन्ति । यस्य राज्ञ: सेनायामश्वबलस्य प्राधान्यं भवेत्तस्य विजयो निश्चित:, रिपवोऽपि भवन्ति स्वाधीना:, विपत्स्वपि सर्वविधा मनोरथा: सिद्धयन्ति । अत: सेनायामश्वस्योपयोगितात्यधिका । तथा च --

> अश्वबलं सैन्यस्य जङ्गम: प्रकार: । अश्वबल प्रधानस्य हि राज्ञ: कदनकन्दुकक्रीडा: प्रसीदन्ति श्रिय:, भवन्ति दूरस्था अपि करस्था: शत्रव:, आपत्सु सर्वं मनोरथसिद्धयस्तुरङ्गमा एव ।[2]

रथकार्यम् -

कौटिल्यार्थशास्त्रे --

> उन्मथ्यावधानुक्तजान्यैतान्येव स्वभूमावभियानापयान स्थितयुद्धानीति ।[3]

युद्धतत्परेषु परसैन्येषु भयोत्पादनसमर्थाशब्दशक्तिरन्तर्निहिता रथेषु । रणे शब्दायमानस्य रथस्य भयङ्करशब्दं श्रुत्वा संग्रामोद्यता: शत्रवो भवन्ति विचलिता: । युद्धार्थं सुसज्जितेषु रथेषु शङ्खाभेर्यश्च स्थाप्यन्ते युद्धारम्भे वाद्यन्ते च शङ्खघोष:

---

(१) नीतिवाक्यामृतम् बलसमुद्देश: । (२) नीतिवाक्यामृतम् बलसमुद्देश: ।
(३) कौटलीयार्थशास्त्रम् १०।५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

उत्तेजनमिति शौर्योत्पादकः । कुरुक्षेत्रयुद्धे भगवता श्रीकृष्णेन पाञ्चजन्योऽर्जुनेन देवदत्तो वृकोदरेण पौण्ड्रनामकः शङ्खो वादितः । तथा च श्रीमद्भगवद्गीतायाम् --

पाञ्चजन्यं हृषीकेशो देवदत्तं धनञ्जयः ।[1]
पौण्ड्रं दध्मौ महाशङ्खं भीमकर्मा वृकोदरः ॥

युद्धातिरिक्तानि वनादीन्यनेकानि कार्याण्यपि भवन्ति । स्पष्टान्येव ।

पदातिकार्यम् -

हस्तिनाश्वैरथैश्च सहसाध्यं तत्स्थापनम्, कण्टकवारणं तथा प्रसारणम्, व्यायामाकरणम्, सर्वत्र शान्तिस्थापनम्, रात्रौ जनानां चौरादिभ्यो रक्षणस्य च संपादनम्, सर्वविधयुद्धकरणञ्चेत्यादीनि पदातिसैन्यस्य कार्याणि । तथा च --

सर्वदेशकालप्रहरणायुधं युद्धञ्चेति ।[2]

गौल्मम् -

एतत्[3] द्विविधं स्वतन्त्रं चतुरङ्गबलस्य सहायकञ्चेति । स्वतन्त्रं न कस्याप्यधीनम् । तस्यैकः स्वतन्त्रविभागोऽपि वर्तते । सोऽयं स्कन्धावारविनाशे परसैन्यनिवारणे चलदस्यु विनाशे पौरसंरक्षणादिकार्ये च भवति सुप्रसिद्धः । यस्य चैतस्य सम्बन्धः चतुरङ्गिणीभिः स्थितौ तत्र भवति गौल्मस्य व्यवस्था ।

---

(१) श्रीमद्भगवद्गीता १।१५ । [illegible]

(२) कौटलीयार्थशास्त्रम् १०।५ ।

(३) हिन्दूराज्यशास्त्रम् पृ० २६६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

विष्टिबलम् -

सैन्यगमनोपयुक्तमार्गनिर्माणम्, नद्यादिषु सेतुबन्धनम्, शिबिर-निर्माणम्, जलपानार्थं शिबिरसमीपे कूपादिनिर्माणम्, शस्त्रास्त्रादि युद्ध-सामग्रीणामन्नवस्त्रभाण्डादीनाञ्च वहनम्, खाद्यवस्तुनिर्माणमर्थात्पाचनकार्य-करणम्, अस्वस्थसैनिकानामौषधोपचारकरणमर्थात्परिचारकस्य कार्यसम्पादनम्, समरहतानां सैनिकानां वहनदहनादिसमुचितकार्यकरणञ्चेत्यादिकमस्य कर्तव्यानि । [1]

दैशिकबलम् -

महाभारतटीकाकारेण नीलकण्ठमहोदयेनोपदेशकरणमस्यकर्तव्यमित्युक्तम् । प्रा० हेमचन्द्रमहाभागस्तु सैनिकशिक्षाप्रदानमस्य कार्यमित्याह । कोशकारोऽमरस्तु पथप्रदर्शनमेवास्य कर्तव्यमिति कथयति । वस्तुतस्तु मार्गविहीनेषु नदीवनपर्वतादिषु मार्गमन्विष्यसेनाया अग्रगमनम्, समुचितमार्गप्रदर्शनम्, प्रत्यहं सैनिकशिक्षाप्रदानञ्चेत्यादी-न्यस्य कार्याणि ज्ञातव्यानि । [2]

चारबलम् -

बलमिदमष्टमम्, स्वदेशे परदेशे च गुप्तचरकार्य (सी०आई०डी०) कार्यकरणमस्य प्रमुखं कर्तव्यम् । [3]

---

(१) हिन्दूराज्यशास्त्रम् पृ० २६१ । (२) हिन्दूराज्यशास्त्रम् पृ० २६२ ।

(३) हिन्दूराज्यशास्त्रम् पृ० २६२ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

आकाशसेना वायुसेना वा -

१ एषाऽऽकाशमण्डलादेव स्वकार्यं सञ्चालयति । कौटिल्येन "शस्त्रैर्णेवाकाश-योधिनः" इत्युक्तम् । महाभारतस्य पञ्चदशतमेकर्णपर्वाध्यायेऽप्याकाशसेनाया वर्णनं मिलति यथा -- शाल्वराजेनाकाशादेव द्वारकां प्रतियुद्धं कृतम्, विमानमारूह्य पाषाणवर्षणं वार्षवर्षणञ्च विहितम् । अतस्तदानीन्तनादेवसमयादाकाशसेना समुद्भूता । सैव सम्प्रति वायुसेनेति नाम्ना विश्वविख्याता ।

सैनायाः प्रकारः -

षड्विधं सैन्यं प्रतिपादयति कौटिल्यः । तथा --

मौलभृतकश्रेणी मित्रामित्राटवीबलानां समुद्दानकालाः ।[२]

१- मौलबलम् -- सदैव राज्यस्य मूलस्थानस्थं (केन्द्रस्थं) वंशपरम्परानुगतं सैन्यम् ।

२- भृतकबलम् -- राज्यसञ्चालनकार्ये सहयोगार्थं वेतनं दत्त्वा नियुक्तं सैन्यम् ।

३- श्रेणीबलम् -- विविधवर्गविशेषात्संगृहीतं सशस्त्रं सैन्यम् ।

४- मित्रबलम् -- मित्रसकाशात्प्राप्तं मित्रत्वेन सहयोगार्थं स्वयमागतञ्च सैन्यम् ।

५- अमित्रबलम् -- जीत्वानीतमात्मसमर्पितं सैन्यम् ।

६- अटवीबलम् -- वनचरेभ्यो नियुक्तं सैन्यम् । बलेष्वेतेषूत्तरोत्तरा पेक्षया पूर्वं पूर्वं बलं श्रेष्ठं शक्तिप्राधान्यात् । तथा च प्रोक्तं नीतिवाक्यामृते --

---

(१) हिन्दूराज्यशास्त्रम् पृ० २६२ ।

(२) ~~हिन्दूराज्यशास्त्रम्~~ पृ० -२ कौटलीयार्थशास्त्रम् ६।२ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

मौलभृतकभृत्यश्रेणीमित्राटवीकेषु पूर्वं पूर्वं बलं यतेत[1] ।

बलेष्वेतेषु मौलबलस्य महत्त्वं सर्वाधिकं यतस्तस्मिन् तादृशाः सैनिका नियुज्यन्ते ये आपद्यपि स्वं कर्तव्यमुत्तरदायित्वञ्च न त्यजन्ति, दण्डितावस्थायामपि न द्रुह्यन्ति, परेषामभेद्या अपि भवन्ति । पुनर्येषां पितृपितामहादयोऽपि सैनिक-सेवायामेव निरता आसन्, वंश एवास्यां सेवायां प्रवृत्तस्तादिदं बलं सदैव भवति राज-कोशादेव परिपालितम् । मौलबलनियुक्तानामविच्छिन्न सेवया सत्कार्येण च प्रभावितो राजा तेभ्योऽनेकविधं पारितोषिकं मानाधिकं करमुक्तं भूभागञ्च प्रयच्छति । तथा च --

मौला स्यमापद्यनुगच्छति दण्डितमपि न दुष्यति,
भवति चापरेषामभेद्यम् । अर्थमानाभ्यामनुगृह्णीयात्[2] ।

औत्साहिकं बलम् -

औत्साहिकं बलञ्च प्रदर्शितं कौटिल्येन, षड्विधबलादतिरिक्तमेतत् । तद्बलप्रविष्टाः पुरुषाः स्वोत्साहेन स्वकार्यं सम्पादयन्ति अतस्ते "औत्साहिकाः" इति नाम्ना प्रसिद्धाः । बलविशेषस्यास्य भेद्योऽभेद्यश्चेति द्वौ भेदौ स्तः । जीवन-वृत्त्यर्थं धनलोभेन वा सेनायां प्रविष्टा अथवा परेषां वृद्धिं दृष्ट्वा स्वसैन्यं परित्यज्या-न्यस्य सैन्यमुपगता भेद्याः । ये देशभक्तिभावनया स्वसैनिकसेवायां प्रविशन्ति द्रव्या-शयान्यत्र नाधिगच्छन्ति तेऽभेद्याः । तदभेद्यं बलं परदेशविघातार्थं सदैव भवति सुसंघटितम् । तथा च नीतिवाक्यामृते --

---

(१) नीतिवाक्यामृतम् बलसमुद्देशः ।

(२) नीतिवाक्यामृतम् बलसमुद्देशः ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अथान्यत् सप्तमम् औत्साहिकं बलं यद्विजिगीषोर्विजय
यात्राकाले परराष्ट्रविलोऽनार्थमेव मिलति[1]।

कौटलीयार्थशास्त्रेऽपि --

सैन्यमनेकजातीयस्थमुक्तमनुक्तं वा विलोपार्थं यदुत्तिष्ठति
तदौत्साहिकम् । भक्तवेतनविलोपविष्टिप्रतापकरं भेद्यं
परेषाम्, अभेद्यं तुल्यदेशजातिशिल्पप्रायं संहतं महत्[2]।

बलेऽस्मिन् दात्रसारत्वादयो गुणा भवन्ति सदैव समुदिताः । तथा च --

दात्रसारत्वं शस्त्रज्ञत्वं शौर्यसारत्व मनुरक्तत्वञ्चेत्यौत्साहिकस्य गुणाः[3]।

कौटिल्येनोक्त प्रकारेण बलं सप्तविधं प्रोक्तम् । महाभारतकारेण तु बलस्य चतुर्विधत्वमुक्तम् । रामायणकारेणापि चतुर्विधानि बलानि ग्राह्याणीत्युक्तम् ।

तद्यथा --

मित्राटविबलं चैव मौलभृत्यबलं तथा ।
सर्वमेतद्बलं ग्राह्यं वर्जयित्वा द्विषद्बलम्[4] ।।

सारमसारं शिक्षितमशिक्षितं बुल्मीभूतमगुल्मकं दत्तास्त्रं स्वशस्त्रास्त्रं कृतगुल्मं स्वयं गुल्मं दत्तवाहनमारण्यकञ्चेति भेदाद् द्वादशविधं सैन्यं वर्णितमस्ति शुक्रनीतौ ।

तद्यथा --

सुयुद्धकामुकं सारमसारं विपरीतकम् ।
शिक्षितं व्यूहकुशलं विपरीतमशिक्षितम् ।।

---

(१) नीतिवाक्यामृतम् बलसमुद्देशः । (२) कौटलीयार्थशास्त्रम् ६।२ ।

(३) नीतिवाक्यामृतम् बलसमुद्देशः ।

(४) रामायणं युद्धकाण्डम् १७।२४ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

गुल्मीभूतं साधिकारि स्वस्वाधिकमगुल्मकम् ।
दचास्त्रादि स्वामिना यत् स्वशस्त्रास्त्रमतोऽन्यथा ।।

कृतगुल्मं स्वयं गुल्मं तद्वच्च दत्तवाहनम् ।[1]
आरण्यकं किरातादि यत् स्वाधीनं स्वतेजसा ।।

सैन्यविभाजनम् -

इदानीन्तनानां सैन्यानां विभाजनमस्त्येतद्विधम् -- सेना, कम्पनी, प्लयाटून, रेजिमेण्ट, बटालियन्, डिभिजन्, आर्मिकोरश्चेति । प्राचीनकाले तु सैन्यं निम्नानुरूपमासीद्विभाजितम्, पत्तिसेनामुखगुल्मगणवाहिनीपृतनाचम्वनीकिन्यक्षौहिण्यश्चेति । सैन्यस्यै तद्विधां संज्ञां प्रकल्प्य तासु सैन्यसंख्यापि परिगणिता । तथा चामरः --

एकेभैकरथा त्र्यश्वा पत्तिः पञ्चपदातिका ।
पत्त्यङ्गैस्त्रिगुणैः सर्वैः क्रमादाख्या यथोत्तरम् ।।

सेनामुखं गुल्मगणौ वाहिनी पृतना चमूः[2]
अनीकिनी दशानीकिन्यक्षौहिण्यथ संपदि ।।

---

(१) शुक्रनीतिः ४।७६२-६४ ।

(२) अमरकोशः २।८।८०-८१ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

कक अमरोक्तपत्त्यादि संज्ञाविशेषे रथगजादिसंख्या बोधकचक्रम्

	पत्ति:	सेनामुखम्	गुल्म:	गण:	वाहिनी	पृतना	चमू:	अनीकिनी	अक्षौहिणी
रथसंख्या	१	३	९	२७	८१	२४३	७२९	२१८७	२१८७०
गजसंख्या	१	३	९	२७	८१	२४३	७२९	२१८७	२१८७०
अश्वसंख्या	३	९	२७	८१	२४३	७२९	२१८७	६५६१	६५६१०
पदातिसंख्या	५	१५	४५	१३५	४०५	१२१५	३६४५	१०९३५	१०९३५०
सर्वसंकलनम्	१०	३०	९०	२७०	८१०	२४३०	७२९०	२१८७०	२१८७००

महाभारतकृतं सैन्यविभाजनम् -- एकस्यां सेनायां पञ्चशतं रथा: पञ्चशतं गजा:पञ्चशतोत्तरसहस्रपरिमिता अश्वा: पञ्चशताधिक द्विसहस्रमिता: पदातिका भवन्ति । एतादृश्या दशसेनाया एका पृतना, दशपृतनाया एकावाहिनी, दशवाहिन्या एकाध्वजिनी, दशध्वजिन्या एकाचमू:, दशचम्व एकाक्षौहिणी ।

पृतनादिसंज्ञायां रथादिसैन्यसंख्या चक्रम्

	सेनायाम्	पृतनायाम्	वाहिन्याम्	ध्वजिन्याम्	चम्वाम्	अक्षौहिण्याम्
रथा:	५००	५०००	५००००	५०००००	५००००००	५०००००००
गजा:	५००	५०००	५००००	५०००००	५००००००	५०००००००
अश्वा:	१५००	१५०००	१५००००	१५०००००	१५००००००	१५००००००
पदगा:	२५००	२५०००	२५००००	२५०००००	२५००००००	२५००००००

CC-0 Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अत्रोपस्थापितयोः सैन्यविभागजनयोः सैन्यस्य संज्ञायां संख्यायाञ्च कौशकारमहाभारतकारयोर्नास्ति मतैक्यम् । सैन्यसंख्यायां महदन्तरं दृश्यते । कौरव-पाण्डवयोर्युद्धे कौरवपक्षे महाभारतोक्ता उक्ततालिकानुरूपा एकादशाक्षौहिणी पाण्डवपक्षे सप्ताक्षौहिणी सेनाः सञ्चालिता आसन् । पाण्डवापेक्षया कौरवस्य द्विगुणं बलमासीत् । वैशम्पायनेन कृतं सैन्यसंघटनमधो निर्दिष्टम्[१] --

	रथाः	गजाः	अश्वाः	पदातयः
पत्त्याम्	१	१०	१०००	१०००००
सेनामुखे	३	३०	३०००	३०००००
गुल्मे	९	९०	९०००	९०००००
गणे	२७	२७०	२७०००	२७०००००
वाहिन्याम्	८१	८१०	८१०००	८१०००००
पृतनायाम्	२४३	२४३०	२४३०००	२४३०००००
चम्वाम्	७२९	७२९०	७२९०००	७२९०००००
अनीकिन्याम्	२१८७	२१८७०	२१८७०००	२१८७००००००
अक्षौहिण्याम्	२१८७०	२१८७००	२१८७००००	२१८७००००००

उपर्युक्तयोर्द्वयोरपेक्षायामिदं संघटनं पृथग्विधं सैन्यसंख्यायामपि वृहदन्तरमस्ति ।

---

(१) नीतिप्रकाशिका ७।१९-२२, २७-३० ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

सैनापत्यादीनां गुणाः कार्यञ्च -

नीतिज्ञाः, शस्त्रास्त्रविद्यायां नतिविद्यायाञ्च निपुणाः, विविधव्यूहरचनायां कुशलाः, युवकाः, विक्रान्ताः, सहनशीलाः, कठोराङ्गकाः, स्वधर्मपरायणाः, स्वामिभक्ताः, शत्रुनाशनसमर्थाः, क्षात्रियादि कुलोत्पन्नाश्चैतद्विध गुणसम्पन्नाः सेनाधिपतयो नियोक्तव्याः । तथा च शुक्रनीतौ --

नीतिशस्त्रास्त्रव्यूहादि नतिविद्याविशारदाः ।
अबाला मध्यवयसः शूरा दान्ता दृढाङ्गकाः ॥
स्वधर्मनिरता नित्यं स्वामिभक्ता रिपुद्विषः ।
शूद्रा वा क्षात्रिया वैश्या म्लेच्छाः सङ्करसम्भवाः ॥
सेनाधिपाः सैनिकाश्च कार्या राज्ञा जयार्थिना ।[1]

महाभारतयुद्धे कौरवसेनायाः सेनापतिर्युद्धविद्याविशारदो भीष्मस्तथा पाण्डवसेनायाः सेनापतिर्धृष्टद्युम्नश्चासीत् । स्वस्यां सेनायां सेनापतौ च यद्-गुणादिकमपेक्षितं तदस्ति न वेति च चिन्तया विन्सित आसीत् पाण्डवैः सह युद्धार्थं तत्परो सेनापतिर्भीष्मः । राज्ञश्चिन्ता निवृत्यर्थं प्रदत्तोऽयं परिचयः । तद्यथा --

नमस्कृत्य कुमाराय सेनान्ये शक्तिपाणये ।
अहं सेनापतिस्तेऽद्य भविष्यामि न संशयः ॥
सेनाकर्माण्यभिज्ञोऽस्मि व्यूहेषु विविधेषु च ।
कर्मकारयितुञ्चैव भृतानाप्यभृतांस्तथा ॥

---

(१) शुक्रनीतिः २।१३८-१४० ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

यात्रायाने च युद्धे च तथा प्रशमनेषु च ।
भृशं वेद महाराज यथा वेद बृहस्पतिः ॥

व्यूहानाञ्च समारम्भान् दैवानान्यथवा मानुषान् ।
तैरहं मोहयिष्यामि पाण्डवान् व्येतु ते ज्वरः ॥

सोऽहं योत्स्यामि तत्त्वेन पालयं स्तव वाहिनीम् ।
यथावच्छास्त्रतो राजन् व्येतु ते मानसो ज्वरः ॥

हस्त्यश्वादि चतुरङ्गबलानां बलाध्यक्षाणाञ्च यानि कार्याणि तानि सर्वाण्येव प्रधानसेनापतिना ज्ञातव्यानि । ततः सर्वविधयुद्धविषये ज्ञानोपार्जनम्, शस्त्रास्त्रसञ्चालने ज्ञानम्, विद्याविनयोपार्जनम्, निखिलानां सैनिकानां कार्योन्मुखीकरणे दक्षताया उपार्जनम्, हस्त्यश्वरथ सञ्चालने ज्ञानोत्पादनम्, व्यायामोपयुक्तस्थलनिर्माणे यथोचित निर्देशनम्, व्यायामस्य कृते समुचितव्यवस्था करणम्, सेनाया व्यायामनिरीक्षणम्, युद्धानुकूल कालस्य युद्धात्प्रत्यावर्तन समयस्य च ज्ञानम्, सर्वविधव्यूहरचनायां ज्ञानोत्पादनम्, शत्रुबलवीक्षणम्, परपक्षस्य व्यूहभेदनम्, विचलित स्वसैनिकानामेकत्रीकरणम्, एकत्रितपरसैन्य भेदनं मारणञ्च, स्वदुर्ग निर्माणम्, शत्रुदुर्गभेदनम् यानाक्रमणादि काले तूर्यध्वजपताकादिभिर्यदिङ्गितं तदनुरूपकार्यार्थं स्वसैनिकेभ्यः शिक्षाप्रदानञ्चेत्यादीनि सेनापतेः कार्याणि ।-तथा च कौटलीयार्थशास्त्रे[2] --

तदेव सेनापतिः सर्वयुद्धप्रहरणविद्याविनीतो हस्त्यश्वरथचर्यासम्पुष्टश्चतुरङ्गस्य बलस्यानुष्ठानाधिष्ठानं विद्यात् । स्वभूमिं युद्धकालं प्रत्यनीकमभिन्नभेदनं भिन्नसन्धानं संहतभेदनं

---

(१) उद्योगपर्व १६४।७-११ । (२) कौटलीयार्थशास्त्रम् २।३३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

भिन्नवधं दुर्गवधं यात्राकालं च पश्येत् ।

तूर्यध्वजपताकाभिर्व्यूहसंज्ञाः प्रकल्पयेत् ।
स्थाने याने प्रहरणे सैन्यानां विनयेरत: ।।

सचिवव्यवस्था -

रामरावणयोर्युद्धे रावणात्मज: प्रहस्तो राक्षससेनाया:सेनापतिरासीत् । स्वबस्यसहयोगार्थं कार्यकुशलाश्चत्वार: सचिवा नियुक्ता आसन्, ये सचिवस्य युद्धयात्रायामङ्गरक्षकस्य च कार्यं कुर्वन्ति स्म । एतद्विधा सचिवव्यवस्था रामायण एव दृश्यते न त्वन्यत्र । तथा हि --

निनदन्त: स्वरान्घोरान्राक्षसा जग्मुरुद्धृत: ।
भीमरूपा महाकाया: प्रहस्तस्य पुर: सरा: ।।

नारान्तक: कुम्भहनुर्महानाद: समुन्नत: ।
प्रहस्तसचिवा ह्येते निर्ययु: परिवार्यतम् ।।

बलाध्यक्षा: -

पञ्चानां षण्णां वा सैनिकानामेका पत्ति:, तस्यामेक: पत्तिपालाख्योऽधिकारी नियुज्यते । त्रिंशतामेको नायक: स गौल्मिक: । शतानां नायक: शतानिक: । श्रेष्ठोऽनुशतिक: सेनानीलेखकश्चैतेऽप्यावश्यकतानुसारं स्थाप्यन्ते । प्रतिशतमधिपा

---

(१) रामायणं युद्धकाण्डम् ५७।३८-३९ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

भवन्त्येते । सहस्राणां स्वामी साहस्रिकः, दशसहस्राणामायुतिकः । तथा च शुक्रनीतौ --

> पञ्चानामथवा षण्णामधिपः पदगामिनाम् ।
> योज्यः स पत्तिपालः स्यात्त्रिंशतां गौल्मिकः स्मृतः ।।
> शतानां तु शतानीकस्तथाऽनुशतिको वरः ।
> सेनानीर्लेखकश्चैते शतं प्रत्यधिपा इमे ।।
> साहस्रिकस्तु संयोज्यस्तथा चायुतिको महान् ।।[1]

पत्तिपालादीनां कार्याणि -

पत्तिपालः सैनिकानां कार्यकालं परिवर्तयति । गौल्मिकस्तु सेनायाः कार्यकुशलतायाः सतर्कताया वा निरीक्षणं करोति । व्यूहरचनायां व्यायामादि-विषये च सैनिकेभ्यः शिक्षाप्रदानम्, युद्धविषये युद्धसामग्रीविषये च ज्ञानोपार्जनं शतानीकस्य कर्तव्यम् । तस्य सहयोगार्थमनुशतिको नियुज्यते, तादृशगुणयुतः सोऽपि तथाविधमेव कार्यं करोति । सेनानीस्तु सैनिकेभ्यः कार्यं निर्दिशति । यस्य निर्देशानुसारं स्वस्वकार्यं सम्पादयन्ति सैनिकाः । कस्यां सेनायां कति सैनिकाः सन्ति वेतनं कति प्राप्नुवन्ति के पुराणाः कुत्र वर्तन्ते स्थानान्तरणं कस्य जातं कस्य कर्तव्यमित्यादिकं विषयं यो जानाति स लेखकः ।

> व्यूहाभ्यासं शिक्षयेद्यः सायं प्रातस्तु सैनिकान् ।
> जानाति स शतानीकः सुयोद्धुं युद्धभूमिकाम् ।।
> तथाविधोऽनुशतिकः शतानीकस्य साधकः ।
> जानाति युद्धसम्भारं कार्ययोग्यं च सैनिकम् ।।

---

(१) शुक्रनीतिः २।१४१-१४२ ।

CC.0 Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

निर्देक्ष्यति कार्याणि सेनानीर्यामिकांश्च स: ।
परिवृत्तिं यामिकानां करोति स च पत्तिप: ॥

स्वावधानं यामिकानां विजानीयाच्च गुल्मप: ॥
सैनिका: कति सन्त्येते: कतिप्राप्तं तु वेतनम् ।
प्राचीना: के कुत्रतास्वेतान् वेत्ति स लेखक: ॥

पत्त्यध्यक्षस्य कार्यसम्बन्धे कौटिल्य: --

कार्योपयुक्तशस्त्रास्त्राणां विचार:, कर्मकराणां संरक्षणवेतनमानादीनां व्यवस्था, मौलादिषड्विधसैन्यानां बलाबलज्ञानम्, सैनिकानामष्टविधयुद्धाभ्यास:, तेषां कार्यतत्परता चेत्यादिषु विषयेषु पत्त्यध्यक्षेण विचार:कर्तव्य: । तथा च कौटलीयमर्थशास्त्रे --

इष्वस्त्रप्रहरणावरणोपकरणकल्पनासारथिरथिकरथ्यानां च कर्म स्वायोगं विद्यात् । आकर्मभ्यश्च भक्तवेतनं भृतानामभृतानां च योग्यारक्षानुष्ठानमर्थमानमच्वकर्म च । एतेन पत्त्यध्यक्षो व्याख्यात: । स मौलभृतश्रेणी मित्रामित्राटवीबलानां सारफल्गुतां विद्यात् । निम्नस्थलप्रकाशकूटखनकाकाशदिवारात्रियुद्धव्यायामं च विद्यात् । आयोगमयोगं च कर्मसु ।

इमे सेनापतिपदान्निम्न पदाधिकारिण: पत्तिपादय: । एतेषां पदपरिज्ञायकानि विविधानि चिन्हानि च परिकल्पितानि, यत् (बिल्ला) स्ववस्त्रस्योपरि धारयन्ति सेनापतय:, यस्मात्पदाधिकारिणां प्राप्यते पदपरिचय: । औपचारिककार्यकाले स्वस्वचिन्हधारणमनिवार्यम् । तथैव वर्णितं शुक्रनीतौ --

---

(१) शुक्रनीति: २।१४३-१४७ ।

(२) कौटलीयार्थशास्त्रम् २।३३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

उक्तसंज्ञान् स्वस्वचिन्हैर्लाञ्छितांश्च नियोजयेत्[1] ।

सैन्यशासनसंस्था -

षड्विभागयुता सर्वोच्चैका[2] प्रशासनसंस्था परिकल्पिता, या भवति सैन्यशासनकार्यप्रवृत्ता । बलसमुत्पन्नानां सर्वविधसमस्यानां समाधानम् उत्कृष्ट-बलसर्जनम्, बलविहितकार्यमूल्याङ्कनम्, कृतकार्यस्याधारे पारितोषिकमानादीनां व्यवस्थाकरणञ्चेत्यादिकमस्या: कार्यम् । अस्या: प्रतिविभागे कार्यनिपुणा विख्याताश्च पञ्च पञ्च सदस्या नियुज्यन्ते । श्रेष्ठ जनाधिष्ठितानां विभागानां भूमिकापि महत्वपूर्णा विद्यते । विभागेषु प्रथमो नौसेनया सह, द्वितीय: खाद्यादि विविधविषयेण सह, तृतीय: पदाति सेनया सह, चतुर्थोऽश्वबलेन सह, पञ्चमो रथेन सह, षष्ठोविभागो हस्तिबलेन सह सम्बद्ध: । समस्यासमाधानादिकं स्वस्वबलस्य कुर्वन्त्येते विभागा: ।

शिबिरनिर्माणम् -

सैनिकनिवेशनिर्माणविषये कौटिल्यमतं प्रस्तूयते -- वास्तुविद्याविज्ञ-निर्धारिते भूभागे सेनापतिवर्धकिदैवज्ञा: शिबिरनिर्माणं कुर्यु: । वर्तुलं दीर्घाकारं चतुरस्रं[1] यादृशं स्थलं लभ्यते तादृश एव निवेशो निर्मेय: । निवेशस्य चतुर्दिक्षु चतुर्द्वारं कार्यम् । पुनर्दुर्गनिर्माणोक्तविध्यनुसारं पूर्वपश्चिम विस्तारास्त्रय:, उत्तरदक्षिण-गतास्त्रयश्चेति षट्पथाश्च कार्या: । शिबिरस्थलं नवखण्डविभक्तं कार्यम् । मध्य-

---

(१) शुक्रनीति: २।६४८ । (२) धर्मशास्त्र का इतिहास भा०२ पृ० ६८१ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

मण्डलस्योपरि नवमभागे राजनिवासस्थानं तस्य पश्चिमे अन्तः पुरं विधेयम् । तस्य समीपेऽन्तःपुररक्षकाः सैनिकाश्च स्थाप्याः । राजनिवासस्थानस्याग्रे - उपस्थान-गृहं (बैठकघर) दक्षिणतः कोशागारं राजशासनगृहमक्षपटलञ्च कार्यम् । वामतो हस्त्यादि त्रिविधानां बालानां स्थानं विधेयम् । राजवास्तुकानन्तरं चतुःशत-हस्तान्तरं कृत्वा शकटकाष्ठप्राकारादिभिः परिवेष्टितं कार्यम् । शकटादिभि-र्विनिर्मिता एते चत्वारो वरणा शिबिररक्षकाः प्रोक्ताः । प्रथमसालपुरस्तान्म-न्त्रिपुरोहितौ स्थाप्यौ दक्षिणतोऽन्नागारं महानसञ्च, वामतः कुप्यागारमायुधा-गारञ्च निर्मेयम् । द्वितीये प्राकारे मौलभूतानां सैनिकानामश्वानां रथानामेवं च सेनापतेश्च स्थानं कल्पनीयम् । तृतीये दन्तिबलस्य श्रेणीबलस्यैवं कण्टकशोधनाध्यक्षस्य च स्थानं चतुर्थे नायकोपेतानां विष्टिमित्रामित्राटवीबलानां स्थानां निर्दिष्टम् ।

तथा च --

> वास्तुकप्रशस्ते वास्तुनिनायकवर्धकि मौहूर्तिकाः - - - - चतुर्थे
> विष्टिर्नायको मित्रामित्राटवीबलं स्वपुरुषाधिष्ठितम् । [1]

विषयेऽस्मिन् शुक्राचार्योऽप्याह --

> ग्रामाद्बहिः समीपे तु सैनिकान् धारयेत् सदा ।
> ग्राम्यसैनिकयोर्नस्यादुत्तमणाधिमर्णता ॥
> सैनिकार्थं तु पण्यानि सैन्ये सन्धारयेत् पृथक् । [2]

व्यूहरचना : व्यूहविभागः -

युद्धक्षेत्रे बलविन्यासो व्यूहः । सेनाधिपतयः सेनानायकाश्च व्यूहरचनां

---

(१) कौटलीयार्थशास्त्रम् १०।१ । (२) शुक्रनीतिः ४।३८२-३८३ ।
(३) कौटलीयार्थशास्त्रम् १०।५ ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

कुर्युः । विनिर्मितस्य व्यूहस्य भवन्ति पञ्चभागाः - द्वौ कक्षौ पक्षौ द्वावुरस्य चेति । सैनिकसैनिकयोर्मध्ये चतुर्दशाङ्गुलान्तरं विधाय पदाति सैनिकाः, द्विचत्वारिंशदङ्गुलान्तरेऽश्वाः, सप्तत्यङ्गुलान्तरं कृत्वा रथा गजाश्च स्थाप्याः । सैनिकानां संख्या यदि न्यूनाभवेत्तदोक्ताङ्गुलानां द्विगुणं त्रिगुणं वा विधाय बलविन्यासः कार्यः। अन्तरमिदं सजातीयानां विजातीयानान्तु यथा - पञ्चहस्तान्तरं कृत्वा धानुष्कान्स्थापयेत् । धानुष्का यत्र तिष्ठन्ति ततः पञ्चदशहस्तान्तरं कृत्वा धानुष्का घोटकाः, ततः पञ्चसप्तति हस्तान्तरे रथा स्तदन्तरं कृत्वा हस्तिनः स्थाप्याः । अनया रीत्या व्यूहस्य पक्षकक्षोरस्याः पञ्चवर्गाः कथिताः । प्रतिवर्गस्यान्तरं धनुष्पञ्चकं कार्यम् । एकस्याश्वस्याग्रे त्रयो योद्धारः, तथा रथस्य गजस्य चाग्रे पञ्चदश योद्धार पञ्चवाजिनश्च स्थाप्यन्ते । हस्तिनोऽश्वस्य रथस्य च पृष्ठे पञ्च पञ्च जना रक्षका अपि तिष्ठन्ति ।

समव्यूहः -

त्रयाणां[१] रथानां भवत्येकं त्रिकम्, त्रीणि त्रिकाणि व्यूहस्य मध्यभागे पक्षकक्षयोरप्युभयत स्तावन्त एव रथा स्थाप्यन्ते । अनेन प्रकारेण कस्य व्यूहस्य पञ्चसु वर्गेषु तिष्ठन्ति पञ्चचत्वारिंशद्रथाः । एकस्मिन्रथे पञ्चतुरङ्गमा युज्यन्ते । अनयारीत्या रथेषु पञ्चविंशत्यधिक द्विशतं २२५ घोटका भवन्ति नियुक्ताः । एकस्य घोटकस्याग्रे त्रयो योद्धारो भवन्त्यवस्थिताः । अनेन प्रकारेणाश्वनामग्रभागे पञ्चसप्तत्यधिकषट्शतं ६७५ योद्धारो भवन्ति । हस्त्यश्वरथानामग्रे यावन्तो योद्धारो निवसन्ति तावन्त एव सैनिका स्तेषां पादरक्षका अपि भवन्ति । क्रमेणानेन विरचितो व्यूहः

---

(१) कौटलीयार्थशास्त्रम् १०।५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

(विन्यासविशेष:) पक्षकक्षोरस्येषु पञ्चाक्यवेषु समानबलत्वात् समव्यूह: प्रोक्त: । अस्मिन्नयोर्द्वयोर्द्वयोर्वृद्धिं कृत्वैक विंशत्यन्तारथा: स्थाप्यन्ते चेदस्य व्यूहस्य वृद्धरूपा भवन्त्यन्ये दशभेदा: । तथा च --

तस्य द्विरथो वृद्धिराएकविंशति रथादित्येवमाणो दश[1] समव्यूहप्रकृतयो भवन्ति ।

विषमव्यूह: -

यदि हस्त्यादीनां संख्या पक्षकक्षोरस्येषु विषमाभवेत्तदा विषमव्यूह: कथित: । अस्मिन् व्यूहेऽपि समव्यूहानुसारं रथवृद्धि: स्यात्तदायमपि भवति दशविध: । तथा --

पक्षकक्षोरस्यानामतो विषमसंस्थाने विषमव्यूह:
तस्यापि द्विरथोत्तरा वृद्धिराएकविंशतिरथादित्ये[2]
वमोजा दशविषमव्यूह प्रकृतयो भवन्ति ।

आवाप: --

व्यूहनिर्माणानन्तरमपि सैनिकायथवशिष्टास्तदावशेषोभागो व्यूहे[3] आवाप: कार्य: । अवशिष्टरथस्य त्रिषु भागेषु द्वौ भागौ च पक्षकयो:, एको भागो मध्ये आवापो विधेय: । व्यूहे यावन्तो रथादय: सन्ति तेषां भागत्रयं विधाय एकभाग आवापो भवितुमर्हति । योधृणां वृद्ध्याऽऽवाप:, पत्तिबाहुल्य न

---

(१) कौटलीयार्थशास्त्रम् १०१५ । (२) कौटलीयार्थशास्त्रम् १०१५ ।
(३) कौटलीयार्थशास्त्रम् १०१५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

प्रत्यावापः, हस्त्यश्वरथेष्वेकाङ्गवृद्ध्यान्वावापः, दूष्यदलस्थापने नात्यावापः प्रोक्तः ।

[१] व्यूहरचनायां बलप्राधान्येनैव व्यूहसंज्ञा प्रकल्प्यते यथा -- रथप्रधानो व्यूहो रथव्यूहः । हस्तिप्रधानो हस्तिव्यूहः । हस्तिनोऽश्वस्य रथस्य च संमिश्रणेन मिश्रव्यूहः । मिश्रव्यूहे चक्रान्तयोर्गजाः पार्श्वयोरश्वा उरस्ये रथाः स्थाप्यन्ते, एतादृशो व्यूहो मध्यभेदो । पक्षकक्षोरस्यानां मध्ये घोटकाः स्थाप्यन्ते चेदन्तभेदो । मध्ये क्वचिन अश्वाः पदार्थाः पार्श्वयोश्च केवलमश्वाः स्थाप्यन्ते चेदश्वव्यूहः । अग्रभागे कवचयुक्ताः पदातयः पृष्ठे धन्विनः सन्ति चेत् पत्तिव्यूहः कथितः ।

<u>व्यूहभेदाः -</u>

दण्डशकटवराहमकरसूचीगरुडपद्मवज्राभिधा व्यूहस्याष्टौ भेदा मनूक्ताः ।

मनुस्मृतौ --

दण्डव्यूहेन तन्मार्गं यायात्तु शकटेन वा ।
वराहमकराभ्यां वा सूच्या वा गरुडेन वा ।।

यतश्च भयमाशङ्केत्ततो विस्तारयेद्बलम् ।
पद्मेन चैव व्यूहेन निविशेत सदा स्वयम् ।।

संहतान्योधयेदल्पान्कामं विस्तारयेद्बहून् ।
सूच्या वज्रेण चैवैतान्व्यूहेन व्यूह योधयेत् [२] ।।

महाव्यूहाः प्रकृतिव्यूहाश्चेति भेदाद् द्विविधानां व्यूहानां वर्णनमुपस्थापयति

---

(१) कौटलीयार्थशास्त्रम् १०।५ ।

(२) मनुस्मृतिः ७।१८७-१८८, १९१ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

कामन्दको यथा -- धनुषसूचीदण्डशकटमकरध्वजश्चेते महाव्यूहा: । मण्डलासंहत-भोगदण्डाख्या: प्रकृतिव्यूहा: । सर्वतोभद्रदुर्जयाख्यौ मण्डलव्यूहभेदौ।अर्धचन्द्रकादयोऽसंहतव्यूहभेदा: । अतिक्रान्तप्रतिक्रान्तादयो भोगव्यूहभेदा: । प्रदरदृढकादयो दण्ड-व्यूहभेदा: । इत्थं व्यूहस्य सप्तदशोपभेदा: कामन्दकेन प्रकल्पिता: । तद्यथा कामन्दकीयनीतिसारे --

धनु: सूची च दण्डश्च शकटोमकरध्वज: ।
इत्यादयो महाव्यूहास्तदाकारान्प्रकल्पयेत् ।।

यदिस्याद्दण्डबाहुल्यं तदा चाप: प्रकीर्तित: ।
मण्डलोऽसंहतो भोगो दण्डश्चेति मनीषिभि: ।।

कथिता: प्रकृतिव्यूहा भेदास्तेषां प्रकीर्तिता: ।
तिर्यग्वृत्तिश्च दण्ड: स्यात् - - - - - - - - ।
- - - - - - - - - - - - - - - - - - ।।

एते सप्तदशप्रोक्ता दण्डव्यूहाश्च पञ्चधा ।
तथा व्यूहद्वयञ्चैव मण्डलस्य प्रयोक्तृभि: [1] ।।

दण्डभोगमण्डलासंहताभिधाश्चत्वार: प्रकृतिव्यूहा: कौटिल्येन प्रदर्शिता: । पदातकादादि पञ्चवर्गस्थानां सैनिकानां समूह: सहैव वसति सहैव गच्छति चेद् दण्ड-व्यूह: कथित: । अस्य प्रदरदृढकोऽसह्यश्येन चापचापकुक्षिप्रतिष्ठसुप्रतिष्ठसञ्जय-विजयस्थूलकर्णविशालविजयचमूमुखरुषास्य सूचीबलय दुर्जयाख्या भवन्ति सप्तदश भेदा: । विषमरूपेण वर्तमानो भोगव्यूह: । अस्य सर्पसारी गोमूत्रिका युग्माशय-शकटपद्ममकरशकटपारियन्तकाख्या: षड्भेदा: प्रोक्ता: । पदातकादिस्थानामेक-

---

(१) कामन्दकीयनीतिसार: १९।४०-५३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

भावी भवेत्तदा भवति मण्डलव्यूहः । अस्य सर्वतोभद्रदुर्जयाख्यौ द्वौ भेदौस्तः । पक्षक-

क्षोरस्यानां भागोऽसंहतः स्यात्तदा संहतव्यूहः । अस्य वज्रोघोद्यानककाकपदार्ध-

चन्द्रिकाभिधा भवन्ति तन्नभेदाः ।

पक्षकक्षोरस्यैः समं वर्तमानोदण्डः । पक्षकक्षोरस्यै-
र्विषमं वर्तमानो भोगः । पक्षकक्षोरस्यानामेको-
भावे मण्डलः । पक्षकक्षोरस्यानामसंहतादसंहतः[1] ।

महाभारतस्याश्रमवासिकपर्वाध्याये शकटपद्मवज्रव्यूहा-
नामस्त्युल्लेखः[2] । कर्णपर्वाध्याये मकरशकटादीनां[3]
चर्चोपलब्धा ।

क्रौञ्चश्येनमकरसूचीमुखचक्रसर्वतोभद्रशकटाख्या व्यूहा शुक्राचार्योक्ताः ।

एतेषां लक्षणानि यथा शुक्रनीतौ --

एकैकशो द्विशो वाऽपि सङ्घशो बोधितो यथा ।
क्रौञ्चानां खे गतिर्यादृक् पङ्क्तितः संप्रजायते ॥

तादृक् संचारयेत् क्रौञ्चव्यूहं देशबलं यथा ।
सूक्ष्मग्रीवं मध्यपुच्छस्थूलपक्षं तु पंक्तितः ॥

बृहत्पक्षं मध्यगलपुच्छं श्येनं मुखे तनु ।
चतुष्पान्मकरो दीर्घस्थूल वक्त्र द्विरोष्ठकः ॥

सूचीसूक्ष्ममुखोदीर्घः समदण्डान्तरन्ध्रयुक् ।
चक्रव्यूहश्चैकमार्गो ह्यष्टधा कुण्डली कृतः ॥

चतुर्दिक्ष्वष्टपरिधिः सर्वतोभद्र संज्ञकः ।
अमार्गश्चाष्टवलयी गोलकः सर्वतोमुखः ॥

---

(१) कौटलीयार्थशास्त्रम् १०।६ । (२) म०भा०आ०वा० प० ७।१५ ।

(३) म० भा० क० प० ११।४ एवं २८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

शकट: शकटाकारो व्यालो व्यालाकृति: सदा[1] ।

समरभूमौ बलविन्यास एव व्यूह:, इत्थमनेकैराचार्यैरनेकविधा व्यूहा व्यूहनिर्माणे विधिविशेषाश्च प्रोक्ता: । अत: परं युद्धविषयो दीयते ।

युद्धलक्षणम् -

शत्रुभावाकृष्टयो: पक्षयोर्द्वयोर्मिथ: शस्त्रास्त्राणां प्रयोगो युद्धम्, अथवा स्वार्थसिद्ध्यर्थं शस्त्रास्त्रादिभि: शत्रुदमनं युद्धम् । तथा च शुक्रनीतौ --

आविष्कृतौ शत्रुभावमुभयो: संयतात्मनो:[2] ।
अस्त्राद्यै: स्वार्थसिद्ध्यर्थं व्यापारो युद्धमुच्यते ।।

युद्धभेदा: -

धर्मयुद्धं कूटयुद्धञ्चेति द्विविधं युद्धमित्याहुर्बहवो नीतिज्ञा: । कौटिल्यस्तु प्रकाशयुद्धं कूटयुद्धं तूष्णींयुद्धञ्चेति युद्धं त्रिविधमित्याह । आवयोस्तस्मिन् स्थले समये च विधीयमानमाक्रमणं प्रकाशयुद्धम् । दुर्गादिभेदनं दहनं तथा धनापहरणमेवं भयोत्पादनताडनादिकञ्च कृत्वा क्रियमाणं कूटयुद्धम् । गुप्तचरद्वारा भेदनीतिं प्रयुज्य विविधै: कपटोपायैश्च शत्रुविनाशनं तूष्णीं युद्धम् । तथा च कौटिल्य: --

प्रकाशयुद्धं निर्दिष्टौ देशे काले च विक्रम: ।
विभीषणमवस्कन्द: प्रमादव्यसनार्दनम् ।।
एकत्र त्यागघातौ च कूटयुद्धस्य मातृका ।

---

(१) शुक्रनीति: ४।७।२७८-२८३ ।

(२) शुक्रनीति: ४।७।२९६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

योगगूढोपजापार्थं तूष्णीं युद्धस्य लक्षणम्[1] ।।

दैविकमासुरं मानवञ्चेति त्रिविधं युद्धं प्रदर्शयति शुक्राचार्यः -- मन्त्रास्त्रं प्रयुज्य क्रियमाणं दैविकं युद्धम् । बृहन्नालिक लघुनालिकादिभिरस्त्रैर्विधीयमानमासुर युद्धम् । खड्गप्रासकुन्तादिभिः शस्त्रैर्बाहुभिश्च प्रवृत्तं युद्धं मानवं प्रोक्तम् । तथा --

मन्त्रास्त्रैर्दैविकं युद्धं नालाद्यस्त्रैस्तथाऽऽसुरम् ।
शस्त्रबाहुसमुत्थं तु मानवं युद्धमीरितम्[2] ।।

युद्धनियमाः -

युद्धनियमान् प्रदर्शयति मनुः --

न कूटैरायुधैर्हन्याद्युध्यमानो रणे रिपून् ।
न कर्णिभिर्नापि दिग्धैर्नाग्निज्वलिततेजनैः ।।

न च हन्यात्स्थलारूढं न क्लीबं न कृताञ्जलिम् ।
न मुक्तकेशं नासीनं न तवास्मीति वादिनम् ।।

न सुप्तं न विसन्नाहं न नग्नं न निरायुधम् ।
नायुद्धमानं पश्यन्तं न परेण समागतम् ।।

नायुधव्यसनप्राप्तं नार्तं नातिपरिक्षतम् ।
न भीतं न परावृत्तं सतां धर्ममनुस्मरन्[3] ।।

एवञ्च याज्ञवल्क्यस्मृतावपि --

तवाहं वादिनं क्लीबं निर्हेतिं परसंगतम्[4] ।
न हन्याद्विनिवृत्तं च युद्धप्रेक्षणकादिकम् ।।

---

(१) कौटलीयार्थशास्त्रम् ७।६।८६ । (२) शुक्रनीतिः ४।७।२२० ।
(३) मनुस्मृतिः ७।९०-९३ । (४) याज्ञवल्क्यस्मृतिः १।३२६ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

तथा च गौतमधर्मसूत्रे --

न दोषो हिंसायामाहवे, अन्यत्र व्यश्वसारथ्यायुध-
कृताञ्जलि प्रकीर्णकेशपराङ्मुखोपविष्टस्थलवृक्षादि-
रूढदूतगो ब्राह्मणवादिभ्यः ।[1]

शङ्खोऽप्याह --

न पानीयं पिबन्तं न भुञ्जानं नोपानहौ मुञ्चन्तं
नावमर्णं सवर्मान स्त्रियं न करेणुं न वाजिनं न
सारथिनं न सूतं न दूतं न ब्राह्मणं न राजानमराजा
हन्यात्, इति ।[2]

महाभारतेऽपि --

नैवासन्नद्धकवचो योद्धव्यः क्षत्रियो रणे ।
एक एकेन वाच्यश्च विसृजेति क्षिपामि च ।।
स चेत्सन्नद्ध आगच्छेत् सन्नद्धव्यं ततो भवेत् ।
स चेत्ससैन्य आगच्छेत् - - - - - - - ।
- - - - - - - - - - - - - - - - -
विशीर्णश्च स मोक्तव्य एष धर्मः सनातनः ।
तस्माद्धर्मेण योद्धव्यमिति स्वायंभुवोऽब्रवीत् ।।[3]

तथा च रामायणेऽपि --

बद्धाञ्जलिपुटं दीनं याचन्तं शरणागतम् ।
न हन्या दानृशंस्यार्थमपि शत्रुं परंतप ।।

---

(१) गौतमधर्मसूत्रम् २।१।१७-१८ । (२) मिताक्षरा (याज्ञवल्क्यस्मृतिः) १।३२६ । (३) शान्ति० ९५।७-१४ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

आर्तो वा यदि वा दृप्तः परेषां शरणं गतः ।
अरिः प्राणान्परित्यज्य रक्षितव्यः कृतात्मना ।।

वचनैरेतैर्युद्धविषयेमन्वादीनामत्युदाच विचारोऽस्ति प्रस्फुटितः[1] ।

नियमपूर्वककृतयुद्धस्य फलम् -

शास्त्रोक्तनियममनुसृत्य यदि युद्धं संपाद्यते चेन्नदोषः, अपितु तद् दृष्टमदृष्टञ्च फलप्रदम् । यथा - शत्रुविजयधनलाभादिरूपं दृष्टं फलम्, युद्धेऽपराङ्०-मुखत्व नियमपालनात्स्वर्गं फलञ्च । तथा चोपवर्णितं याज्ञवल्क्यस्मृतौ --

य आहवेषु वध्यन्ते भूम्यर्थमपराङ्०मुखाः ।
अकूटैरायुधैर्यान्ति ते स्वर्गं योगिनो यथा ।।
पदानि क्रतुतुल्यानि भग्नेष्वविनिवर्तिनाम् ।
राजा सुकृतमादत्ते हतानां विपलायिनाम्[2] ।।

मनुस्मृतावपि --

आहवेषु मिथोऽन्योन्यं जिघांसन्तो महीक्षितः ।
युद्धमानाः परं शक्त्या स्वर्गं यान्त्यपराङ्०मुखाः[3] ।।

एवञ्च पराशरस्मृतावपि --

द्वाविमौ पुरुषौ लोके सूर्यमण्डल भेदिनौ ।
परिव्राड् योगयुक्तश्च रणे चाभिमुखोहतः[4] ।।

---

(१) रामायणम् ६।१८।२७-२८ । (२) याज्ञवल्क्यस्मृतिः १।३२४-३२५ ।

(३) मनुस्मृतिः ७।८९ । (४) पराशरस्मृतिः ३।३९ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अपरञ्च श्रीमद्भगवद्गीतायाम् --

हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम् ।
तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः[1] ॥

तथा महाभारतेऽपि --

वराप्सरः सहस्राणि शूरमायोधने हतम्[2] ।
त्वरमाणाऽभिधावन्ति मम भर्ता भवेदिति ॥+

कौटिल्योऽपि --

यान् यज्ञसंघैस्तपसा च विप्राः स्वर्गैषिणः पात्रचयैश्च यान्ति[3] ।
क्षणेन तामप्यतियान्ति शूराः प्राणान्सुयुद्धेषु परित्यजन्तः ॥

अस्त्रशस्त्राणां लक्षणम् - युद्धोपयुक्तानामस्त्रशस्त्राणां लक्षणं प्रदर्श्यते ।

शुक्राचार्यः --

अस्यते क्षिप्यते यत्तु मन्त्रयन्त्राग्निभिश्च तत्[4] ।
अस्त्रं तदन्यतः शस्त्रमसिकुन्तादिकं च यत् ॥

अस्त्रभेदाः -

अस्त्रं द्विविधं मान्त्रिकं नालिकञ्चेति । मन्त्रद्वाराप्रयोज्यं ब्रह्मास्त्रादिकं मान्त्रिकम् । मन्त्रद्रष्टारः परमर्षयस्तस्यैव (मान्त्रिकास्त्रस्य) प्रयोगं कुर्वन्ति स्म । प्राचीनतमेयुगे मान्त्रिकास्त्रस्यैव प्राधान्यमासीत् । तदेव विजयप्रदमिति मन्यमाना राजानोऽपि तस्यैवाश्रयं कुर्वन्ति स्म । तस्याभाव एव नालिकास्त्रं व्यवहरन्ति स्म ।

---

(१) श्रीमद्भगवद्गीता २।३७ । (२) शान्ति० ९८।४६ ।
(३) कौटलीयार्थशास्त्रम् १०।३ । (४) शुक्रनीतिः ४।७।१९१ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

तथा च शुक्रनीतौ --

अस्त्रं तु द्विविधं ज्ञेयं नालिकं मान्त्रिकं तथा ।
यदा तु मान्त्रिकं नास्ति नालिकं तत्र धारयेत् ।।
सह शस्त्रेण नृपतिर्विजयार्थं तु सर्वदा[1] ।।

नालिकं द्विविधं लघुबृहच्चेति भेदात् । अस्त्रेषु मुख्ये ते, तयोर्द्वयोर्वर्णनमुपस्थापितं शुक्राचार्येण । तथा शुक्रनीतौ --

तिर्यगूर्ध्वच्छिद्रमूलं नालं पञ्चवितस्तिकम् ।
मूलाग्रयोर्लक्ष्यभेदि तिलबिन्दुयुतं सदा ।।
यन्त्राघाताग्निकृद् ग्रावचूर्णधृक्कर्णमूलकम् ।
सुकाष्ठोपाङ्गबुध्नं च मध्याङ्गुलबिलान्तरम् ।।
स्वान्तेऽग्निचूर्णसंधातृ शलाकासंयुतं दृढम्[2] ।
लघुनालिकमप्येतत् प्रधार्यं पत्तिसादिभिः ।। इति लघुनालिकलक्षणम् ।

बृहन्नालिकलक्षणं यथा --

यथा यथा तु त्वक्सारं यथा स्थूलबिलान्तरम् ।
यथा दीर्घं बृहद्गोलं दूरभेदि तथा तथा ।।
मूलकीलभ्रमाल्लक्ष्यसमसन्धानभाजि यत् ।
बृहन्नालिकसंज्ञं तत् काष्ठबुध्नविनिर्मितम्[3] ।।
प्रवाह्यं शकटाद्यैस्तु सुयुक्तं विजयप्रदम् ।

अस्त्रोपयुक्ताग्निचूर्णनिर्माणविधिः -

अग्निचूर्णस्य (बारूद) संयोगादेव नालिकयोः प्रयोगः, तस्याभावे ते

---

(१) शुक्रनीतिः ४।७।१९२-१९३ । (२) शुक्रनीतिः ४।७।१९५-१९७ ।
(३) शुक्रनीतिः ४।७।१९८-२०० ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

निष्प्रयोजनसिद्धे । अतस्तयोः कृतेऽत्यावश्यकत्वात् चन्निर्माणविधिं च प्रदर्शयति शुक्राचार्यः । तच्चूर्णं प्रकारद्वयेन निर्मीयते यथा शुक्रनीतौ --

सुवर्चिलवणात्पञ्चपलानि गन्धकात्पलम् ।
अन्तर्धूमविपक्वार्कस्नुह्याद्यङ्गारतः पलम् ।।
शुद्धात् संग्राह्य संचूर्ण्य संमील्य प्रपुटेद्रसैः ।
स्नुह्यर्काणां रसोनस्य शोषयेदातपेन च ।।
पिष्ट्वा शर्करवच्चैतदग्निचूर्णं भवेत् खलु ।।[1]

इत्येकप्रकारस्यनिर्देशः ।

द्वितीयो प्रकारो यथा --

अङ्गारस्यैव गन्धस्य सुवर्चिलवणस्य च ।
शिलाया हरितालस्य यथा सीसमलस्य च ।।
हिङ्गुलस्य तथा कान्तरजसः कर्पूरस्य च ।
जतोर्नील्याश्च सरलनिर्यासस्य तथैव च ।।
समन्यूनाधिकैरंशैरग्निचूर्णान्यनेकशः ।
कल्पयन्ति च तद्विदश्चन्द्रिकाभादिमन्ति च ।।[2]

शस्त्रलक्षणम् -

वाणगदापट्टिशखड्गप्रासकुन्तचक्रपाशकवचशिरस्त्राणकरजा ख्यानि एकादश-विधानि शस्त्राणि शुक्राचार्योक्तानि, तेषां लक्षणानि च तेनैवोक्तानि तानि यथा शुक्रनीतौ --

---

(१) शुक्रनीतिः ४।७।२००-२०२ । (२) शुक्रनीतिः ४।७।२०५-२०८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

लक्ष्यभेदी यथाबाणो धनुर्ज्यां विनियोजितः ।
मवच्था तु संधाय द्विहस्तश्च शिलीमुखः ।। इति बाणलक्षणम् ।
अष्टास्रा पृथुबुध्ना तु गदा हृदयसम्मिता । इति गदालक्षणम् ।
पट्टिशः स्वसमो हस्तबुध्नश्चोभयतो मुखः । इति पट्टिशलक्षणम् ।
ईषद्वक्रश्चैकधारो विस्तारे चतुरङ्गुलः ।
क्षुरप्रान्तो नाभिसमो दृढमुष्टिः सुचन्द्ररुक् ।। इति खड्गलक्षणम् ।
खड्गः प्रासश्चतुर्हस्तदण्डबुध्नः क्षुराननः । इति प्रासलक्षणम् ।
दशहस्तमितः कुन्तः फालाग्रः शङ्कुबुध्नकः । इति कुन्तलक्षणम् ।
चक्रं षड्हस्तपरिधिक्षुरप्रान्तं सुनाभि युक् । इति चक्रलक्षणम् ।
त्रिहस्तदण्डस्त्रिशिखो लौहरज्जुः सुपाशकः । इति पाशलक्षणम् ।
गोधूमसम्मितस्थूलपत्रं लोहमयं दृढम् ।
कवचं सशिरस्त्राणमूर्ध्वकायविशोभनम् ।। इति कवचशिरस्त्राणलक्षणम् ।[1]
तीक्ष्णाग्रं करजं श्रेष्ठं लौहसारमयं दृढम् । इति करजलक्षणम् ।

वर्मादीनामुत्पत्तिः -

यदा राजसु युद्धस्योपक्रमः समुद्भूतस्तदा देवराजेनेन्द्रेण शत्रुविघातार्थं वर्मशस्त्रधनुषामुत्पादनं कृतं न तत्पूर्वं तेषामुत्पत्तिः । एतद्वर्णनं महाभारतस्योद्योगपर्वाध्याये समुपलब्धम् । तथा -

ततो राज्ञां समभवद्युद्धमेतत् तत्र जातं वर्मशस्त्रं धनुश्च ।
इन्द्रेणैतद् दस्युबधाय कर्म उत्पादितं वर्मशस्त्रं धनुश्च ।।[2]

- - - - - - - - - - - - - - - - -

(१) शुक्रनीतिः ४।७।२११-२१७ । (२) म० भा० उद्योगपर्वणि ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

अस्त्रशस्त्राणां प्रकारः -

यन्त्रमुक्तपाणिमुक्तमुक्तसन्धारित-अमुक्त नियुद्धास्थानां पञ्चविधाना-मस्त्रशस्त्राणां वर्णनमस्त्यग्निपुराणे । धनुरादिभिर्यन्त्रैः क्षिप्यते यदस्त्रं यन्त्रमुक्तम्। प्रस्तरतोमरादिकं पाणिमुक्तं शस्त्रम् । प्रासादिकं मुक्तसन्धारितम् । खड्गादिकममुक्तम् । मल्लयुद्धं नियुद्धम् । तद्यथा --

यन्त्रमुक्तं पाणिमुक्तं मुक्तसन्धारितन्तथा ।
अमुक्तं बाहुयुद्धञ्च पञ्चधा तत्प्रकीर्तितम् ।।

क्षेपणीचापयन्त्राद्यैर्यन्त्रमुक्तं प्रकीर्तितम् ।
शिलातोमरयन्त्राद्यं पाणिमुक्तं प्रकीर्तितम् ।।

मुक्तसन्धारितं ज्ञेयं प्रासाद्यमपि यद्भवेत् ।
खड्गादिकममुक्तञ्च नियुद्धं विगतायुधम् ।।[1]

कौटिल्योक्तान्यस्त्रशस्त्राणि --

स्थिरयन्त्रचलयन्त्रहलमुखादीनां विविधानामस्त्रशस्त्राणां विवेचनं कौटिल्येन कृतमस्ति कौटलीयार्थशास्त्रे । यथा --

(क) सर्वतोभद्रजामदग्न्यबहुमुखविश्वासघातिसंघाटीयानकपर्जन्यक-बाहूर्ध्वबाह्वर्धबाहूनि स्थिरयन्त्राणि । एतेषां स्थिति र्भवत्यचला ।[2]

(१) सर्वतोभद्रः - दुर्गस्थाप्यः शकटचक्राकारः स करोति परितो पाषाणवर्षणम् ।

(२) जामदग्न्यः - बहुबाणान्तरगुप्तः स्वयमेव निरन्तरं बाणक्षेपकः ।

---

(१) अग्निपुराणम् २४८।३-५ । । (२) कौटलीयार्थशास्त्रम् २।१८

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

(३) बहुमुखम् - दुर्गनिर्मितमट्टालकसदृशं चर्मणाऽच्छादितं छिद्रितलोपितं भवति तद्
यत्र स्थित्वा धानुष्काः परितः कुर्वन्ति बाणवर्षणम् ।

(४) विश्वासघातिः - नगराद्बहिस्स्थापितो गदाकारः स्पर्शमात्रेणाप्यरि
मस्तकविदारकः ।

(५) संघाटी - लम्बकाष्ठाङ्गिलतमग्नि यन्त्रम् ।

(६) यानकः - चक्रोपरिस्थापितं दण्डाकारं दीर्घयन्त्रम् ।

(७) पर्जन्यः - जलपूरितं वरुणास्त्रम् । केषाञ्चिन्मते पञ्चाशद्धस्तमितं प्राकारा-
द्बहिस्थापितं भवति तत्, यदि शत्रवस्तस्यसमीपं गच्छन्ति तदा
स्वयमेव चलति च तद्यन्त्रम् ।

(८) बाहुयन्त्रम् - पञ्चविंशतिहस्तमितं स्तम्भद्वययुक्तं भवति स्तम्भ संयोजकं कीलकं
निस्काश्यते चेत् शत्रोरुपरिपतति तत् ।

(९) ऊर्ध्वबाहुः - बृहदाकारः स्तम्भः, कीलकेन योजितः सः, यदि कीलकं
निस्काश्यते तदा पतति शत्रून् विनाशयति च ।

(१०) अर्धबाहुः - ऊर्ध्वबाहुवोः कार्यं करोति ।

(ख) पाञ्चालिकदेवदण्डसूकरिकामुसलयष्टिहस्तिवारकतालवृन्तमुद्गरद्रुघण-
गदास्पृकलाकुद्दालास्फोटिमोद्घाटिमोत्पाटिशतघ्नी त्रिशूल चक्राणि चलयन्त्राणि ।
(च) पाञ्चालिकः - प्राकाराद्बहिस्थाप्यो दृढकाष्ठनिर्मितस्तीक्ष्णमुखः । (२) देव-
दण्डः - दुर्गस्थाप्योऽकीलको बृहद्रूपः स्तम्भः । (३) सूकरिकासूत्रचर्माभ्यां निर्मिता-
कार्पासेणोदरपूरिता सा शत्रुभिस्त्यक्तं[१] पाषाणादिकं निवारयति । (४) मुसलयष्टिः -
कुन्ताकारः खादिरदण्डः । (५) हस्तिवारकः - द्विशि मुखो दण्डो वा हस्ति-

----

(१) कौटलीयार्थशास्त्रम् २।१८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

नियन्त्रको मुद्गरः । (६) तालवृन्तः - व्यजनवत्परिभ्रमतिवायुं प्रवाहयति । (७) मुद्गरः - । (८) द्रुघणः - मुद्गरसदृशः काष्ठदण्डः (९) गदा । (१०) स्पृक्तला - कण्टकयुता गदा ।(११) कुद्दालः । (१२) आस्फोटिमः - स्तम्भ चतुष्टयेन युतश्चर्मवेष्टितः पाषाणः । (१३) उद्घाटिमः - मुद्गरसदृशो यन्त्रविशेषः । (१४) उत्पाटिमः - स्तम्भोत्पाटको यन्त्रविशेषः । (१५) शतघ्नीप्राकारस्योपरि स्थाप्या परितः पीवरैः कीलकैर्युता बृहत्स्तम्भाकारा शकटचक्रयोजिता भवति । (१६) त्रिशूलम् - त्रिमुखं कुन्ताकारम् । (१७) चक्रम् - चक्राकारं यन्त्रविशेषम् । एतानि सप्तदशयन्त्राणि चलरूपाणि ।

(ग) हलमुखयन्त्राणि - यथा - शक्तिप्रासकुन्तहाटकभिण्डिपाल शूल-तोमरवराहकर्णकर्षणत्रासिकादीनि च हलमुखानि । [१] (१) शक्तिः - चतुर्हस्तमिता करवीरपत्रसदृशी लौहमयी । (२) प्रासः - काष्ठलोहाभ्यां विनिर्मित उभयतोमुख-श्चतुर्विंशत्यङ्गुलमितः । (३) कुन्तः - सप्तषट् वा पञ्चहस्तमितः फालतुल्याग्र-भागः । (४) हाटकः - कुन्तसदृशस्त्रिमुखः । (५) भिण्डिपालः - फालयुतः कुन्तः । (६) शूलः - एकमुख स्तीक्ष्णकुन्तः । (७) तोमरः - मुखे बाणयोजित-चतुर्वा पञ्चहस्तमितः । (८) वराहकर्णः - वराहकर्णसदृशमुखः प्रासतुल्यः । (९) कणयः - मध्यग्राह्य उभयतस्तीक्ष्णात्रिमुखो लौहमयः । (१०) कर्षणः - तोमरपरिमितो हस्तेन त्याज्यः सपक्षो बाणः । (११) त्रासिकः - समस्तको लौहमयः प्रासपरिमितः ।

(घ) धनुः - कार्मुककोदण्डद्रूणश्चेति क्रियाभेदेन त्रिविधम् । (१) तार-

---

(१) कौटलीयार्थशास्त्रम् २।१८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

निर्मितं तालधनुः । (२) विशिणवंशनिर्मितं चापधनुः । (३) काष्ठसारमयं दारवधनुः । (४) शृङ्गनिर्मितं शाङ्गधनुः । तथथा -

तालचापदारवशाङ्गाणि कार्मुककोदण्डद्रूणा धनूंषि[1] ।

[2]

(ङ०) ज्या - मुर्वार्कशणगवेधुवेणुस्नायुभिर्निर्मिता ।

(च) इषवः - वेणुशरशलाकादण्डासननाराचादिभिर्निर्मिताः । आयसास्थिकाष्ठनिर्मिता स्तेषामग्रभागा छेदनभेदनताडनसमर्थाः ।

(छ) खड्गाः - निस्त्रिंशमण्डलाग्रासियष्टयश्चेति त्रिप्रकाराः ।

(ज) त्सरुः - खड्गमहिष शृङ्गेण गजदन्तेन वा निर्मिताः ।

(झ) क्षुरकल्पाः - क्षुरसदृशानि शस्त्राणि । परशुकुठारपट्टिसखनित्रकुद्दाल-क्रकचकाण्डच्छेदनाश्चेते क्षुरकल्पाः प्रोक्ताः ।

(न) यन्त्रपाषाणगोष्पपाषाणमुष्टिपाषाणरोचनीदृषदश्चेतानि पाषाणायुधानि ।

(ट) वर्माणि - लोहजाललोहजालिकालोहपट्टलोहकवचसूत्रकङ्कट शिशुमारक-खड्गिधेनुकहस्तिगोश्चेतानि शिरस्त्राणकण्ठत्राणकूर्पासकंचुक-वारवाणपट्टनागोदरिकाश्चेतान्यपि शरीररक्षकाणि वर्माणि ।

(१) लोहजालम् - लोहनिर्मितं शरीरावरणम् । (२) लोहजालिका - पृष्ठभागस्यावरणम् । (३) लोहपट्टः - हस्तादतिरिक्तशरीरस्यावरणम् । (४) लोहकवचम् - वक्षस्थलस्यावरणम् । (५) सूत्रकङ्कटम् -सूत्रनिर्मितं जालम् । (६) शिशुमारकः - जलचरचर्मनिर्मितम् । (७) खड्गिः - खड्गचर्मनिर्मितः कवचः । (८) धेनुकः - महिषचर्मनिर्मितः । (९) हस्तिः - हस्तिचर्मनिर्मितः । (१०) गो - वृषभचर्म-

---

(१) कौटलीयार्थशास्त्रम् २।१८ । (२) कौटलीयार्थशास्त्रम् २।१८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

निर्मितः । (११) शिरस्त्राणः - शिरोरक्षको लोहकवचः । (१२) कण्ठत्राणः - कण्ठरक्षको लोहकवचः । (१३) कूर्पासः - आकूर्परगतं कञ्चुकम् । (१४) कञ्चुकम् - आजानुलम्बितं च लोहकञ्चुकम् । (१५) वारवाणम् - आगुल्फलम्बितं लोहकञ्चुकम् । (१६) पट्टः - लोहभिन्नवस्तुनिर्मितोऽहस्तो भवति सः । (१७) नागोदरिका - हस्ताङ्गुलिरक्षकः कवचः एते सप्तदशविधाः कवचा शरीरधार्याः कथिताः । (ठ) पैटीचर्महस्तिकर्णतालमूलधमनिकाकपाटकिटिकाप्रतिहतबलाहकान्ताश्चैतानि शरीररक्षणार्थं हस्तग्राह्याण्यावरणानि ।

सैनिकबलविषये विशेषो विचारः -

परिच्छेदेऽस्मिन्प्रथमं सेनाङ्गनिरूपणक्रम उपस्थापितः क्रमेऽस्मिन् सेनाया हस्त्यादि चतुरङ्गं मन्त्रादि षडङ्गं विष्ट्याद्यष्टाङ्गञ्चेति त्रिविधमङ्गं निरूपितम् । हस्त्यादि चतुरङ्गेषु न केषाञ्चिदपि विवादोऽर्थात्तान्यङ्गानि सर्वमान्यानि । अष्टाङ्गान्युल्लिखितानि महाभारते न त्वन्यत्र । अष्टाङ्गेषु विष्ट्यादि चतुरङ्गानि हस्त्यादि चतुरङ्गबलस्य सहायकानि । सहायकबलसर्जनं नान्यैर्विहितम्, किन्तु महाभारतकारेण तु कृतम्, इत्थं सेनायाः समुन्नतौ पूर्णबलप्रदसहायकाङ्गस्थापनया महामुनौ व्यासेन सैन्यं प्रति विस्तारस्यैव विकासस्य च भावः प्रस्फुटितो दृश्यते । षडङ्गं कामन्दकेन दर्शितं स मन्त्रं कोशञ्च स प्रवेशयति षडङ्गेषु, अनयोर्द्वयोः कल्पनया सेनाङ्गनिरूपकेषु कामन्दको वैज्ञानिको दूरदर्शी नीतिज्ञोऽप्यासीदिति कथयितुं शक्यते । यतोऽस्माकं परम्परायां संस्कृतौ च मन्त्राणां सर्वोत्कृष्टं स्थानं विद्यते, मन्त्रसाध्या न केऽपि विषयाः, तस्मादयमप्यस्मिन्विषये

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

विश्वस्ताः स्म । महर्षयस्तपोबलेन मन्त्रान् प्राप्नुवन्ति स्म सर्वशक्तिसम्पन्नाना-
मृषीणां तपसा प्राप्तानां मन्त्राणां शक्तिरतुलनीयाऽवर्णनीया च । एतादृशानां
दिव्यशक्तिसमायुक्तानां मन्त्राणां सेनायामुच्चस्थापनं सातिशयं युक्तियुक्तम् । सा
सेना सेनायां परिगणिता भवति यस्यां परैरभेद्या शक्तिर्भवन्त्यन्तर्निहिता ।
मन्त्राः सेनायां तादृशीं शक्तिं प्रादुर्भावयन्ति या शक्तिर्नकश्चिदपि छेद्या भेद्या च ।
राज्यविकासः कोशस्याधीनः, तस्याभावे न किमपि कार्यं सिद्धम्, अत एतादृशस्य
सर्वविघ्नोच्छेदककार्यस्य साधकस्य कोशस्य सेनायां संयोजनं नासङ्गतमपितुतस्माद्राज्यो-
न्नतिः सारल्येन कर्तुं शक्यते । कारणेनानेन कोशस्यापि सेनाङ्ग एव स्थापनं कृतं
कामन्दकेन ।

चतुरङ्गबलं सर्वत्र प्रसिद्धम्, चतुरङ्गेषु हस्त्यश्वरथपादाना गृह्यन्ते ।
सर्वज्ञैर्महर्षिभिः परिकल्पितानि हस्त्यादीनि त्रीण्यङ्गान्युपेक्षितान्यधुना । तेषां
त्रयाणामेव महत्वं स्थानञ्च नैव दृश्यते इदानीन्तन्यां सेनायाम् । किन्तु तैः सम्पाद्यं
कार्यमत्यधिकमस्ति सेनायां यत्कार्यं पदगैरसाध्यं तदपि तान्यङ्गानि साधयन्तीत्याहुः
कौटिल्यादयो नीतिज्ञाः । विशेषतो गजस्य भूमिका सेनायां महत्वपूर्णा विद्यते ।
यस्य क्षितिभुजः सेनायां हस्तिनः प्राधान्यं भवेत्तस्य सर्वथा विजयो निश्चितः, इति
वदन्ति मुनयः । पुनः सेनायां नियुक्तानां प्रशिक्षितानां नागानां महारण्यप्रवेशनं
शत्रुव्यूहभेदनं स्वसैन्यानां सर्वतः संरक्षणञ्चेत्यादीनि सारपूर्णानि बहूनि बहुविधानि
च कार्याणि सन्ति शास्त्रोक्तानि । एतादृशानां महत्वपूर्णकार्यभारवहनसमर्थानां
द्विरदानां न्यूनतया सैन्यबलेष्विदानीन्तनेषु सर्वोच्चायाः शक्त्या एवाभावानुभवो
जायते । गहनकार्यसम्पादनसमर्थानामुपर्युक्तानामङ्गानामुपेक्षया इदानीन्तना सेना

CC-0 Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

संकुचिता दृश्यते । सैन्यसंकुचितत्वात् पूर्वं सेनायां शक्त्यभिवृद्ध्यर्थं नीतिशैरस्माकं पूर्वजैर्महर्षिभिः प्रस्तुतानि किन्त्विदानीमुपेक्षितानि तानिहस्त्यादीन्यङ्गानि त्रीणि पुनः सेनायां मौत्साहिकानि कर्तव्यानि ।

पुनर्मौलभृतकश्रेणीमित्रामित्राटव्यौत्साहिका यथाः सप्तविधाः सैनिका व्यवस्थितरूपेण सञ्चालिता आसन्तदानीं बलेष्वेतेष्वौत्साहिकबलस्य महत्त्वं सर्वाधिकमासीत् । किन्त्विदानीन्तु सैन्यमस्ति चतुर्विधम् । यथा[1] -- (१) इन्जिनीयरसैन्यम्, (२) सपोर्टसैन्यम्, (३) पाइनीयरसैन्यम्, (४) इन्फ्याक्ट्रिसैन्यम् । औत्साहिकबलसदृशं बलं नास्त्यधुना । तद्बलं न कदापि केषाञ्चिदपि भेयम् । एतादृशस्य बलस्याभावे सैन्यं निर्बलं जायते परेषां भवति भेयं च । शुक्राचार्येण सासारादीनां द्वादशविधानां सैन्यानां वर्णनं विहितं तादृशाः[2] सैनिका अपि नैवेदानीम् । सैन्यसंज्ञायां संख्यायामपि सामञ्जस्यं नोपलभ्यते । इदानीन्तनानां सैन्यानां विभाजनमस्ति निम्नाङ्कितं यथा --

	पत्त्याम्	सेनामुखे	गुल्मे	गणे	वाहिन्याम्	डिभिजनविशेषे	कोरविशेषे	आर्मिविशेषे
पदाति संख्या	९३	४३	२६१	८२६	२४८७	७४६९	१२३८३	३७८४६

इत्थमिदानीन्तन्याः सेनाया एकाङ्गमात्रमस्ति । व्यासेन वैशंपायननामरेण च कृतं सैन्यविभाजनमष्टाङ्कनवाङ्काङ्कतयोः पृष्ठयोर्दर्शितमस्ति । इत्थं कालयोर्द्वयोः सैन्यविभाजनयोर्बृहदन्तरं दृश्यते । अक्षौहिणी तु नैवकल्पितेदानीम्, तस्यां

---

(१) लड़ाई का सिद्धान्त हरू २०३३ शा० ने० जं० अ० ।

(२) लड़ाइका सिद्धान्त हरू २०३३ शाक्तिनपाल जङ्गि अड्डा ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

वैशंपायनेन पदातिसैन्यसंख्या - २१८७०००००० दर्शिता । तस्या अवस्थाया: सैन्यसंख्याया अपेक्षायामिदानीन्तना सैन्य संख्यातीव न्यूना । तस्मादिदानीं सैन्यशक्तेर्ह्रास: स्वाभाविक एव । तस्माद्देशेऽशान्तं वातावरणं प्रसरति विविधा: समस्या: समुत्पद्यन्ते, एतत्सर्वं समाधानं सैन्यादेव सम्भवम्, अतो जनसंख्याया आधारे सैन्यसंख्याया विस्तारो नितान्तमपेक्षित: ।

शिबिरनिर्माणं वास्तुविद्याविज्ञैः पुरुषैर्निर्धारिते भूप्रदेशे शास्त्रीयविध्यनुसारं कार्यम्, पुन स्तन्नगराद्ग्रामाच्च बहिर्निर्मेयम्, यतो जनानां सैनिकानाञ्च परस्परं सम्पर्को निषिद्धस्तथाऽऽदानप्रदानञ्च निषिद्धम्, तस्माज्जनघनत्वयुक्ते स्थले सैनिकावासो न कल कार्य: । पुन: सैनिकानां कृते पृथगापणोऽपि स्थाप्य:, यो जनानां कृतेऽग्राह्य: किन्तु सैनिकानां कृते तु सुखबोधक: । एतादृशा अवश्यपालनीया बहवो नियमा नीतिज्ञै: कौटिल्यादिभि: सन्ति प्रस्तुता: । महापुरुषै: समादिष्टा एते नियमविशेषा इदानीमुपेक्षिता दृश्यन्ते । अत एवेदानीं सेनायामुच्छृङ्खलताया अनुशासनहीनताया अकर्मण्यतायाश्च भाव: प्रतिभाति । यदा कदा एतन्निराकरणार्थं कौटिल्यादीनामादेशोऽवलम्बनीय: ।

युद्धे सैन्यबलविन्यासो व्यूह: । दण्डशकटवराहमकरादयो विविधा व्यूहा: सन्ति शास्त्रोक्ता: । एतेषु यदा यस्य प्रयोग उचितस्तस्यैव रचना क्रियते स्म तदानीम् । व्यूहेन विना युद्धस्यारम्भ एव न क्रियते स्म । यतो व्यूहस्तु सुखेन विजयप्रद: । अत एव युद्धमर्मज्ञा व्यूहस्य महत्वमावश्यकत्वञ्च गायन्ति । किन्त्विदानीं युद्धन्तु यत्र तत्र श्रूयते व्यूहस्य तु चर्चापि कर्णपथं नायाति । अत एव भवन्ति युद्धे बहव: पराजिता: । तस्माद्युद्धे विजयाकाङ्क्षिभिरिदानीमपि क व्यूहाभ्यास: करणीय: ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

धर्मयुद्धं कूटयुद्धञ्चेति युद्धं द्विविधमिति वदन्त्यधिकतरा आचार्याः । कौटिल्यस्तु तत्त्रिविधमित्याह, तेष्वन्यैरनिर्दिष्टं प्रकाशयुद्धम्, अन्ये आचार्यास्तु तदपि धर्मयुद्धसदृशं तस्मात्तस्य पृथक् निर्देशोऽनावश्यक इत्याहुः । किन्तु कौटिल्यमते धर्मयुद्धप्रकाशयुद्धयोर्भिन्नतायाभाव उपलभ्यते । तस्मात्तेन त्रिविधं युद्धमुक्तम् । युद्धानि यानि स्यु स्तथापि प्राक्तने युगे तु क धर्मयुद्धस्यैव प्राधान्यमासीत् । धर्मयुद्धे प्राणान् परित्यजन्तो मानवा स्वर्गं गच्छन्ति स्म । किन्त्विदानीन्तु धर्मयुद्धस्य नामैव न श्रूयते, पुनः पक्षद्वयेन पालनीया युद्धविषयका अधिका नियमाः सन्ति शास्त्रोक्ता-स्तेऽपि सन्ति उपेक्षिताः । इदानीन्तु केवलं कूटयुद्धं प्रचलति । कूटयुद्धप्रसक्ताः सैनिका धर्मयुद्धस्य नियमान्न विचारयन्ति केवलं जनहननमेव स्वं पौरुषमिति स्मरन्त्येवं हिंसायामेव विजयोऽस्तीति मन्यन्ते । सैनिकानामेतद्विधया भावनया जनजातिविनाशा-वस्थामाप्नोति । श्रूयते चेदानीं जगतितले कूटयुद्धस्य प्रभावादेव बहवो मानवाः समाप्तिं गताः । अतो विश्वस्मिन्नशेषाः सैनिकाः यदियदा युद्धं बाध्यत्वेन करणीयं स्यात्तदा कूटयुद्धं विहाय धर्मयुद्धं प्रत्युन्मुखा भवेयुः । अस्मादेव जगतोऽभ्युत्थानं जायते । बर्न्नि

युद्धे विशेषतः शत्रुभावाकृष्टयोः पक्षयोर्द्वयोः शस्त्रास्त्राणामेव प्रयोगः सम्भवः । एतेषां प्रयोगः सर्वनाशसूचक इति विषयं प्राचीनतमे युगेऽपि ऋषयोऽपि जानन्ति स्म, तथापि तेऽपि शस्त्रास्त्राणां विकासस्य चरमसीमायां सम्प्राप्ता आसन् । शस्त्रास्त्राणां यद्विकासस्तस्यामवस्थायां पौरस्त्यैर्विद्वद्भिः कृतः स्तद्विधं विकासं कर्तुमद्ययावन्नैव समर्थाः पाश्चात्या वैज्ञानिकाः । सर्वशक्तिसम्पन्नैर्मन्त्रद्रष्टृभिर्महर्षिभि-र्ब्रह्माग्नेयवारुणादीनि विविधानि सर्वनाशकराण्यस्त्राण्यासन्समुत्पादितानि तदानीम् । पुनः स्थिरयन्त्रचलयन्त्रहलमुखादीनि सारपूर्णान्यस्त्रशस्त्राण्यपि विनिर्मितान्यासन् ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

एतद्विधानि स्थिरादीन्यस्त्राणि तु नैवोत्पादितान्यधुना यद्यप्यधुनापि विश्व-विनाशनसमर्थान्यणुशक्तयस्त्राणि विनिर्मितानि सन्तीति श्रूयते, किन्त्विदानीं यान्यपि शस्त्रास्त्राणि निर्मितानि स्युस्तथापि तेषां सर्वेषां निर्माणं मान्त्रिकादीनामस्त्रशस्त्राणां प्रभावेणैव जातम् । अतो जगत्यधुना शस्त्रास्त्राणां विकासस्य यागतिरुपलब्धा सा निश्चयेन प्राक्कालीनानां शस्त्रास्त्राणां विकासस्य परिणामरूपा । तस्मादस्त्रशस्त्राणां विकासस्य गतिरिदानीन्तनस्यापेक्षायां तदानीमेव तीव्रतरा दृश्यते । अतः सैन्यबलेन सह सम्बद्धानां प्रायः सर्वेषां विषयाणामनुशीलनान्निष्कर्षोऽयं निष्पद्यत इदानीन्तन्याः सैन्यव्यवस्थाया अपेक्षायां तदानीन्तना सैन्यव्यवस्था एव व्यवस्थिता विकसिता एवं प्रशंसनीया चेति मामकीनो विचारः ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

उपसंहारः

जगदिदं प्रलयकाले सूक्ष्मरूपतया प्रकृतावासील्लीनम्, तस्मादननुमेयम-विज्ञेयमप्रतर्क्यंन्वासीदिदम् । अतोऽव्यक्तावस्थामिमामालोक्यास्य व्यक्तस्वरूप-मिच्छतैश्वर्यादिसम्पन्नेन परमात्मना स्वेच्छया शरीरपरिग्रहोकृतः । स्वयं प्रकाशितेन जगन्निर्मात्रा भगवता शक्तिस्वरूपमायाद्वारा निखिलस्य चराचरजगतः सृष्टिर्विहिता । हिरण्यगर्भरूपेणावस्थितेनानेन मनुष्यपशुपतगादीनि नामानि मानवानां कर्माणि च प्रदिष्टानि । कर्माणि-ब्राह्मणस्याध्ययनाध्यापनादीनि क्षत्रियस्य प्रजारक्षणादीनि । पृथक् कर्माणि चैतानि वेदशब्देभ्य एवाकाम्य दर्शितानि । वेदशब्दस्तु वेदराशिः । प्रलयकालेऽप्यवस्थितः सूक्ष्मरूपेण परमात्मनि । तथा च प्रोक्तं मनुस्मृतौ --

सर्वेषां तु स नामानि कर्माणि[1] च पृथक्पृथक् ।
वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे ।।

प्रकारेणानेन जगन्निर्माणं विधाय जगत्यपि चेतनां चिन्तनशक्तिं संवेदनशीलतां चोत्पाद्य मानवजातेरुत्कृष्टताऽऽदर्शता च प्रतिपादिता । चेतन-शीलेषु मनुष्येष्वपि रक्षणादि कार्यं तु क्षत्रियस्यैव शक्तिमत्ता समर्थता वा दर्शिता । रक्षणादिकार्यसाधनशक्तिस्तु वस्तुतो हस्त एवान्तर्हिता, तस्मादस्य रक्षण-कार्यार्हक्षत्रियस्योत्पत्तिरपि जगत्कर्तुर्भगवतो हस्ताभिधादङ्गादेव दृश्यते यथा --

---

(१) मनुस्मृतिः १।२१ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः[1] ।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥

क्षत्रिया भगवतः प्रजापतेर्बाहुकृताः, अर्थात्क्षत्रियत्वजातिविशिष्टा बाहुत्वेनोत्पादिताः । बाहुत्वेन निष्पादिता एते स्वभावतो लोकसंरक्षणकुशलाः, दुष्टदमनसमर्थाः, पराक्रमशीलाः, शूराः, वीराश्च भवन्ति । अतएवाष्ट विधान्यस्य प्रमुखाणि कर्माणि दर्शितानि, तानि चैतद्विधानि -- (१) दुष्टनिग्रहणम्, (२) भूहिरण्यादि द्रव्यदानम्, (३) विविधेषु वर्णेषु वर्गेषु श्रेण्यादिषु च विभाजितानां प्रजानां परिपालनम्, (४) राजसूयादियज्ञसंपादनम्, (५) न्यायपूर्वकोपार्जितः सुवर्ण-रत्नधनान्नादिभिः कोशवर्धनम्, (६) शास्त्रोदितकरादानम्, (७) शत्रुपक्षस्य मान-मर्दनम्, (८) सततं राष्ट्रवर्धनञ्चेतान्यवश्यकर्तव्यानि कार्याणि शुक्राचार्योक्तानि तथा च शुक्रनीतौ प्रथमाध्याये --

दुष्टनिग्रहणं दानं प्रजायाः परिपालनम् ।
यजनं राजसूयादेः कोशानां न्यायतोऽर्जनम् ॥

करदीकरणं राज्ञां रिपूणां परिमर्दनम्[2] ।
भूमेरुपार्जनं भूयो राजवृत्तं तु चाष्टधा ॥

यदा जातिधर्मकुलधर्मादीनां सर्वविधानां धर्माणां विनाशः, भ्रष्टाचारान्यायादीनामधर्माणामुत्थानं भवेत्तदा सर्वधर्मसंस्थापनं लोकस्थानां सत्कार्यनिरतानां सर्वासां प्रजानां संरक्षणमसत्कार्यप्रवृत्तानां दुर्जनानां विनाशञ्च स्वयमेवाहं करिष्यमीत्युक्तं क्षत्रियधर्ममनुस्मरता भगवता श्रीकृष्णेन श्रीमद्भगवद्गीतायाम्[3] । महामुनिना भगवता

---

(१) शुक्लयजुर्वेदसंहिता ३१।११ । (२) शुक्रनीतिः १।१२३-२४ ।
(३) श्रीमद्भगवद्गीता ४।७-८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

व्यासेनापि क्षात्रधर्मस्यात्युत्कृष्टताया वर्णनं विहितम्, तच्चैतादृशम् - वर्णधर्माः, आश्रमधर्माः, जातिधर्माः, लौकिकधर्माश्चैते सर्वधर्माः क्षात्रधर्मस्यैवाधीनाः । यतः परमात्मना सर्वप्रथमं क्षात्रियधर्मस्यैव निर्देशो विहितः, क्षात्रियधर्मादतिरिक्ता अन्ये धर्मा अनन्ताः, किन्तु ते तु तदनन्तरमेवोक्ताः, क्षात्रियधर्मादन्ये ये धर्माः शास्त्रोक्ता स्ते सर्वे क्षात्रियधर्मस्यैवाङ्गरूपाः, अतो धर्मोऽयं सर्वोत्कृष्टतमः । पुरा भगवता विष्णुनाऽस्यैव धर्मस्यावलम्बनं विधायासत्कार्यप्रवृत्तानां दुर्जनानामतिशयपीडोत्पादका-दाक्रमणाद् देवानां ऋषीणां च रक्षणं विहितम् । पुनर्दुराशयान्वितानामाक्राम-काणां विनाशोऽप्यस्यैव धर्मस्य बलेन विहितः । अत एव धर्मोऽयं सर्वश्रेष्ठः, सर्वेषां धर्माणां साररूपः, सनातनः, नित्यः, सर्वतोमुखः, मोक्षसाधकश्च । तथा महाभारते--

चातुराश्रम्यधर्माश्च जातिधर्माश्च पाण्डव ।
लोकपालोत्तराश्चैव क्षात्रधर्मे व्यवस्थिताः ।।

क्षात्रोधर्मो ह्यादिदेवात्प्रवृत्तः पश्चादन्ये शेषभूताश्च धर्माः ।
शेषाः सृष्टा ह्यन्तवन्तो ह्यनन्ताः सुप्रस्थानाः क्षात्रधर्मा विशिष्टाः ।+
अस्मिन्धर्मे सर्वधर्माः प्रविष्टास्तस्माद्धर्मं श्रेष्ठमिमं वदन्ति ।।

सर्वधर्मपरं क्षात्रं लोकज्येष्ठं सनातनम् ।
शश्वदक्षरपर्यन्तमक्षरं सर्वतोमुखम् ।।[1]

एतत्प्रजारक्षणादिकं कर्तव्यं न तु क्षात्रियमात्रस्यापि त्वभिषेकादि गुणोपेतस्य क्षात्रियस्यैव "शास्त्रीयाभिषेकादिगुणयुक्तस्य राज्ञः प्रजापरिपालनादिः" इत्युक्तत्वात् ।[2] वैदिकविधीना य: क्षात्रियोऽभिषिक्तो भवेत्प्रजापालनादिकं तस्यै-वानिवार्यं कर्तव्यम् । यो राजोचितगुणसम्पन्नो भवेत्तस्यैव राजपदे निर्वाचनं कुर्वन्ति

---

(१) शान्ति० ६४।६, २०, २२, २६ । (२) मिताक्षरा (याज्ञ० १।१)

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

प्रजाजनाः पुनस्तस्मैऽभिषेकञ्च प्रयच्छन्ति ते । इत्थं जननिर्वाचितस्य राज्ञो राष्ट्रपते राष्ट्राध्यक्षस्य वा प्रजा रक्षणाधिकारः शास्त्रस्वीकृतः । जनमतनिर्वाचितः प्रथमो राजा पृथुरेवासीत् । राजन्यस्मिन् वास्तविकं राजत्वमासीदन्तर्हितम् । अत एवानेन राजा सर्वाः प्रजा रञ्जिताः, इत्याहुः शास्त्रप्रयोजकाः । एतादृशै राजभिः परिपालितो यो धर्मः स एव सर्वेषु धर्मेषु श्रेष्ठतमः, तस्मात्तस्मिन्नेवाश्रिता भवन्त्यन्ये सर्वेधर्माः । तस्मादेव सर्ववर्णाः सर्वाजातयश्च परिपालिताः परिपोषिताश्च । पुनः सर्वविधाः शिक्षा अपि राजधर्मादेवोपलभ्यन्ते, अर्थाद्राजधर्मेष्वेव सर्वविधाः शिक्षाः प्रतिपादिताः । एवं सर्वविधानां योगानां वर्णनमपि राजधर्मेष्वेवोपलभ्यन्ते । अत एव सर्वमेव राजधर्मेष्वेवप्रतिष्ठितम्, सर्वेलोका अपि तेष्वेवाश्रिताः । तथा च महाभारते --

सर्वे त्यागा राजधर्मेषु दृष्टाः सर्वा दीक्षा राजधर्मेषु चोक्ताः[1] ।
सर्वे योगा राजधर्मेषु चोक्ताः सर्वेलोका राजधर्मान्प्रविष्टाः ॥

राजधर्मो हि सर्वविधानां प्राणिनां जीवनाधारः । अस्मिन्नेव धर्मार्थकाममोक्षाख्याश्चतुर्विधाः पुरुषार्था अपि निहिताः । येन प्रकारेण रश्मिरश्वस्याङ्कुशो गजस्य नियन्त्रणं विदधाति तेनैव प्रकारेण राजधर्मो लोकनियन्त्रणं करोति । तद्यथा --

त्रिवर्गोऽत्र समासक्तो राजधर्मेषु कौरव ।
मोक्षधर्मश्च विस्पष्टः सकलोऽत्र समाहितः ॥

यथा हि रश्मयोऽश्वस्य द्विरदस्याङ्कुशो यथा[2] ।
नरेन्द्रधर्मो लोकस्य तथा प्रग्रहणं स्मृतम् ॥

---

(१) शान्ति० ६३।२६ । (२) शान्ति० ५६।४-५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

एतद्विधस्य सर्वशक्तिसम्पन्नस्य राजधर्मस्य धर्मपरायणस्य राज्ञो वोपेक्षां करोति यः, तेनकृतं गोभूहिरण्यद्रव्यादि दानं देवयज्ञस्वरूपं हवनादिकं पितृयज्ञस्वरूपं श्राद्धादिकञ्च न किञ्चिदपि फलप्रदम् । इन्द्रवायुयमसूर्यादीनां श्रेष्ठदेवश्रेष्ठानामंशाना-कृष्यविसृष्टोऽयं राजा, तस्मादस्मिन्तेषां यद्विधाः शक्तयः सन्ति ताः सर्वा भवन्त्यन्तर्हिताः । अत एवासौ तेषां वीर्यानुरूपमाचरणमाचरति । पुनरस्मिन्बह्वी-देवा मनुष्यरूपेण निवसन्ति, तस्मादस्योपेक्षा न क्वापि केश्चिदपि कर्तव्या । उक्तञ्च --

सर्वलोकगुरुं चैव राजानं योऽवमन्यते ।
न तस्य दत्तं न हुतं न श्राद्धं फलति क्वचित्[1] ।।

एवञ्च --

बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः ।
महती देवता ह्येषा नररूपेण तिष्ठति[2] ।।

इत्थं राजा इन्द्रादीनां देवश्रेष्ठानामंशरूप इति तु सर्वथा सिद्धः । एतादृशस्य राज्ञो लोकनियन्त्रणस्य मूलसाधनविशेषस्तु दण्ड एवेत्याहुर्नीतिज्ञाः । दण्डस्य लक्षणन्त्वेतद्विधं दर्शयन्त्याचार्याः - यः साधनविशेषो दुराचारप्रवृत्तानपि सदाचारोन्मुखान्करोति स एव दण्डः[3] । दण्ड एव सर्वोच्च शासकः, तस्मादयं सर्वाः प्रजा शास्ति, सर्वान्रक्षति, सुप्तानपि बोधयति । यदस्य प्रयोगो विचारपूर्वकमर्थादि-दोषाननवेक्ष्य विधीयते तदाऽयमैहिकं पारलौकिकञ्च सुखादिकं प्रयच्छति, अथाल्लोकद्वयं रक्षति । आन्वीक्षिकीत्रयीवार्तानां योगक्षेमसाधनोदण्डः । समुचितदण्डप्रयोगाल्लोक-

---

(१) शान्ति० ६५।२८ । (२) मनुस्मृतिः ७।८ ।
(३) शुक्रनीतिः ४।४३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

प्रचलिताः परम्परागताः सर्वविधाधर्माः संरक्षिता भवन्ति । धर्मसंरक्षणादेव सर्वेषां समुन्नतिः, त्रयाणामेव पुरुषार्थानामभिवृद्धिः, अतो दण्डप्रयोगस्त्व-पराधानुसारेणैव विधातव्यः । अज्ञानेन कामक्रोधादिना वा प्रयुक्तोऽयं सर्वेषु क्रोधमुत्पादयति, तस्मादनेकेऽनर्थाः समुत्पद्यन्ते । नियन्त्रित-मर्यादित-जनसमाज-निर्माणेऽस्य प्रमुखा भूमिका विद्यते । एतादृशस्य महत्वपूर्णसाधनविशेषस्य प्रयोगस्त्व-शिक्षितेन न तु कर्तव्यः । यस्मिन्दण्डनीतेः पूर्णं ज्ञानं विद्यते तेनैव प्रयोक्तव्योऽयम् । दण्डनीतौ कुशलो राजापि दण्डरूप एव, तस्य नीतिर्दण्डनीतिः । नीतिरेषा सर्वान् सन्मार्गं प्रदर्शयत्यर्थात्सन्मार्गाभिमुखान्करोति । उक्तञ्च --

दमो दण्ड इति ख्यातस्तस्माद्दण्डो महीपतिः ।
तस्य नीतिर्दण्डनीतिर्नयनान्नीतिरुच्यते[1] ॥

अन्यच्च --

दण्डेन नीयते चेयं दण्डनं नयति चाप्यतः ।
दण्डनीतिरिति प्रोक्ता त्रींल्लोकाननुवर्तते[2] ॥

राजनीतिरेव दण्डनीतिः दण्डनीतिरर्थशास्त्रनाम्नापि प्रसिद्धा । राजनीतिः, दण्डनीतिः, राजशास्त्रम्, अर्थशास्त्रम्, नीतिशास्त्रम्, शासनशास्त्रञ्चेते शब्दाः पर्यायवाचकाः । तस्मात्स्वेच्छयाप्रयोगं कुर्वन्ति शास्त्रकाराः । बृहस्पति-कौटिल्यादिभिरर्थशास्त्रशब्दस्य प्रयोगो विहितः, तैः कृतं शास्त्रमर्थशास्त्रनाम्ना प्रसिद्धम् - बार्हस्पत्यार्थशास्त्रं कौटलीयार्थशस्त्रमित्यादि । शुक्रसोमदेवकामन्दकादिभि-र्नीतिशास्त्रं विनिर्मितमथान्नीतिशास्त्रशब्दस्य प्रयोगः कृतः । येन यः शब्दः प्रयुज्यते तथापि तैर्निर्मितानि नीतिशास्त्रार्थशास्त्रादीनि सर्वाण्येव राज्यशासनविधिनिर्णायि-कानि, शासनपथप्रदर्शकानि वा । पूर्वाचार्यैर्यान्यर्थशास्त्राणि नीतिशास्त्राणि

---

(१) शुक्रनीतिः १।१५७ । (२) महाभारत ५९।७८ ।

CC-O Samskrit and University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

चोपस्थापितानि, तेषां सारूपं कौटलीयार्थशास्त्रम् । एतदेवोक्तं कौटिल्येनापि स्वस्यग्रन्थस्य प्रारम्भे ---- "यावन्त्यर्थशास्त्राणि पूर्वाचार्यैः प्रस्थापितानि प्रायशस्तानि संहृत्यैकमिदमर्थशास्त्रं कृतम्" । पुनः शुक्रं बृहस्पतिं च प्रणम्य ग्रन्थारम्भो विहितः कौटिल्येन, "नमः शुक्रबृहस्पतिभ्याम्"[1] अस्य कारणन्त्वेतदेव ताभ्यां कौटिल्यः प्रभावितः । तेन निर्मितं शास्त्रं जनान् धर्मार्थ कामेषु प्रवर्तयति, पुनस्तान् सर्वतो रक्षति च ।

पुनरर्थशास्त्रस्य दण्डनीतेर्वा प्रमुखाश्चत्वार उद्देश्यविशेषा दर्शिताः, ते च यथा - (१) अलब्धस्य लाभः, (२) लब्धस्य परिरक्षणम्, (३) रक्षितस्य संवर्धनम्, (४) वर्द्धितस्य सत्पात्रे प्रक्षेपश्च । भूहिरण्यमित्रद्रव्यादीन्यवश्य लभ्यानि, तेषु यदलब्धं तद्दण्डादिभिर्लब्धुं जेतुं वा इच्छेत् । यल्लब्धं जितं वा भवेत्तस्य रक्षणं यत्नतो विधातव्यम् । रक्षितं च स्थलजलपथवाणिज्यादिभिरुपायैर्वर्धयेत् । वृद्धं च शास्त्रीयविभागेन धर्मार्थकामयुक्तेभ्यः सत्पात्रेभ्यो दद्यात् । एतद्विधानामुद्देश्यानां पूर्तिः प्रयत्नतः कर्तव्या । तथा च प्रोक्तं याज्ञवल्क्यस्मृतावाचाराध्याये --

अलब्धमिहेद्धर्मेण लब्धं यत्नेन पालयेत् ।[2]
पालितं वर्द्धयेन्नीत्या वृद्धं पात्रेषु निक्षिपेत् ।।

कामन्दकीयनीतिसारेऽपि --

न्यायेनार्जनमर्थस्य रक्षणं वर्धनं तथा[3] ।
सत्पात्रप्रतिपत्तिश्च राजवृत्तं चतुर्विधम् ।।

मनुस्मृतावपि --

---

(१) कौटलीयार्थशास्त्रम् १।१ । (२) याज्ञवल्क्यस्मृतिः १।३१७ ।
(३) कामन्दकीयनीतिसारः १।१८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

मनुस्मृतावपि --

अलब्धं चैव लिप्सेत लब्धं रक्षेत्प्रयत्नतः[1] ।
रक्षितं वर्धयेच्चैव वृद्धं पात्रेषु निक्षिपेत् ।।

इत्थमर्थशास्त्रनीतिशास्त्रादीनां शास्त्राणामध्ययनादिदं ज्ञायते - शास्त्राण्येतानि समानार्थकानि राज्यशासनसम्बन्धितमानविषय प्रतिपादकानि च ।

धर्मशास्त्रार्थशास्त्रयोस्तु किञ्चिदन्तरं परिलक्षितम् । धर्मशास्त्रं कर्तव्याकर्तव्योपदेशकम् "धर्मशब्दः कर्तव्यतावचनः"[2] वस्तुतस्तु धर्मस्याध्यात्मिकं महत्वं विद्यतेऽयमदृष्टार्थमुत्पादयति । पुनः शास्त्रमेतत् सुव्यवस्थित राज्यस्य समाजस्य वाधीनं परन्त्वर्थशास्त्रन्तु (नीतिशास्त्रं दण्डनीति वा) अव्यवस्थितराज्यस्य समाजस्य च सुव्यवस्थायां सर्वथा समर्थतां दर्शयति । राज्यशासनसम्बन्धिनो यावन्तो नियमाः सन्ति ते सर्वे न तु धर्मशास्त्रीयाः, अपितु व्यावहारिक कार्यस्यानुभवादिष्वाधारिताः । अनुभवाधार निर्मितनियमा एव व्यवहारोपयुक्ताः । तथ्यस्यास्यानुगतावहवोऽर्थशास्त्रकारा व्यावहारिकान्नियमानप्युपस्थापयन्ति, अर्थाद्दण्डनीतौ केचिन्नियमा लोकव्यवहारोपयुक्ता अपिदृश्यन्ते । अतो व्यावहारिकानुभवस्याधारे राज्यसञ्चालनविधौ अर्थात्केषुचिन्नियमेषु परिवर्तनमप्यायाति । धर्मशास्त्रं केवलं धर्मं धर्मेणसह सम्बद्ध विषयमेवोपदिशति । अर्थशास्त्रन्तु (नीतिशास्त्रं) राज्ञोऽधिकारं विशेषाधिकारं कर्तव्यमुत्तरदायित्वञ्चोपस्थापयति । किन्त्वस्य पूर्णसम्बन्धस्तु धर्मशास्त्रेण सहैवार्थाद्धर्मशास्त्रस्यैवाङ्गमेतत् तस्मादस्योत्पत्तिश्च धर्मशास्त्रस्योत्पत्तिवद् दैवीति सिद्धं[3] । अर्थशास्त्रं

---

(१) मनुस्मृतिः ७।९९ । (२) मेधातिथिः (मनुस्मृतिः ७।१) ।
(३) धर्मशास्त्र का इतिहास भाग-२, पृ० ५८२ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

कस्यचिद्राज्यशासनस्य स्वरूपस्य विस्तृतं विवेचनमुपस्थापयति चेद्धर्मशास्त्रन्तु राजशास्त्रस्य ये ये विषयाः प्रमुखास्तेषां राज्याङ्गानाञ्च सामान्यं वर्णनमुपस्थापयति । तस्माद्धर्मशास्त्रकारा धर्मस्यैवाधिकं महत्वं प्रदर्शयन्ति चेदर्थशास्त्रकारास्त्वर्थस्यैव । मनुयाज्ञवल्क्यापस्तम्बादयो धर्मशास्त्रकाराः, धर्मशास्त्रन्तु स्मृतिरित्याहुः "धर्मशास्त्रन्तु वै स्मृतिः"[1] । किन्तु पुराणानां त्वायुर्वेदः, धनुर्वेदः, गान्धर्ववेदः, अर्थशास्त्रञ्चैते चत्वार उपवेदा इति कथनम्[2] ।

व्याकरणन्यायमीमांसावेदान्तादीनिशास्त्राणित्वनेकानि, किन्त्वेतानि तु केवलं बुद्धेश्चातुर्यप्रदर्शकानि, मानवानां व्यावहारिकजीवननिर्वाहोपयुक्तं तु नीतिशास्त्रमेव । अस्य महिमाऽवर्णनीयः, सर्वेषामुपजीवकं सर्वविधानां पुरुषार्थानां मूलञ्चैतत् । तस्मान्नीतिशास्त्रस्य प्रवर्तकः शुक्राचार्योऽप्यस्य महिमानं गायति --

क्रियैकदेशबोधीनि शास्त्राण्यन्यानि सन्ति हि ।
सर्वोपजीवकं लोकस्थितिकृन्नीतिशास्त्रम् ॥

धर्मार्थकाममूलं हि स्मृतं मोक्षप्रदं यतः ।
अतः सदानीतिशास्त्रमभ्यसेयत्नतो नृपः ॥

यद्विज्ञानान्नृपाद्याश्च शत्रुजिल्लोकरञ्जकाः ।
सुनीतिकुशला नित्यं प्रभवन्ति च भूमिपाः ॥

सर्वलोकव्यवहारस्थितिर्नीत्या विना न हि ।
यथाऽशनैर्विना देहस्थितिर्न स्याद्धि देहिनाम्[3] ॥

वस्तुतस्तु व्याकरणादिभिः शास्त्रैः प्रजानां राज्ञोऽपि दैनिकजीवन-

---

(१) मनुस्मृतिः २।१०, याज्ञवल्क्यस्मृतिः २।२१, आपस्तम्बधर्मसूत्रम् १६।२४।२३

(२) विष्णुस्मृतिः ३।६।२८ (उद्धृत धर्मशास्त्र का इतिहास भाग-२, पृ० ५८३) ।

(३) शुक्रनीतिः १।५-११ ।

CC-0 Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

समस्यासमाधानं न तु सम्भवम्, तस्मात्तेषामज्ञानादपि न कापि वास्तविकी हानिः। किन्तु नीतिशास्त्रस्याज्ञानात् वेदादिकमन्यत्सर्वमेव च विनश्यति। एतदुक्तं महाभारते शान्तिपर्वणि --

मज्जेत्त्रयी दण्डनीतौ हतायां सर्वे धर्माः प्रक्षयेयुर्विवृद्धाः ।
सर्वे धर्माश्चाश्रमाणां हताः स्युः क्षात्रे त्यक्ते राजधर्मे पुराणे ।।(१)

इत्थं नीतेरावश्यकताया महत्त्वादिविषयाणाञ्च सवर्णनमुपस्थापितम्, किन्तु तस्या उत्पत्तिविषयस्तूपरिनोक्तः, तस्मिन्विषयेऽपि किञ्चिद् वक्तुं सर्वथा सान्दर्भिकम्, तस्मादितः परं तस्या उत्पत्तेर्मूलं प्रीतः किं कथमुत्पत्तिश्चेति विषय उपस्थाप्यते। धर्मविप्लवकारणेनानाचारा अन्याया विविधोपद्रवाश्चोत्कर्षतां गताः, तस्मात्सन्त्रस्ता देवा ऋषयश्च जगन्निर्मातुः स्वयम्भुवः शरणं सम्प्राप्ताः, ततस्ते तं परमेष्ठिनमित्थं विनिवेदयन्ति --

नष्टे ब्रह्मणि धर्मे च देवास्त्रासमथागमन् ।
ते त्रस्ता नरशार्दूल ब्रह्माणं शरणं ययुः ।।

प्रपद्य भगवन्तं ते देवा लोकपितामहम् ।
ऊचुः प्राञ्जलयः सर्वे दुःखशोकभयार्दिताः ।।

भगवन्नरलोकस्थं नष्टं ब्रह्म सनातनम् ।
लोभमोहादिभिर्भावैस्ततो नो भयमाविशत् ।।

अत्र निःश्रेयसं यन्नस्तद्ध्यायस्व पितामह ।(२)

धर्मविनाशकारणेन शोकाकुलानां देवादीनामेतद्वचनमाकर्ण्य भगवता पितामहेनापि तान्प्रसाद्य लक्षसंख्याध्यायपरिमितं लोकव्यवहारोपयुक्तं नीतिशास्त्रं

---

(१) शान्ति० ६३।२८ । (२) शान्ति० ५९।२२-२४, २७।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

विनिर्मितम् । यस्मिन् सर्वेपुरुषार्थानीतयः धर्मादयश्चोपयुक्ताः प्रायाशोऽशेषा विषया समाहिता आसन् ।

ततोऽध्यायसहस्राणां शतं चक्रे स्वबुद्धिजम् ।
यत्रधर्मस्तथैवार्थः कामश्चैवानुवर्णितः ॥[1]

जगत्कर्त्रा ब्रह्मणा निर्मितमेतच्छास्त्रं दण्डनीतिरिति नाम्नापि प्रसिद्धम्[2] । शुक्राचार्यस्यानुसारमस्मिन्नीतिग्रन्थे कोटिसंख्यायां श्लोकाः समाविष्टा आसन् । तद्यथा शुक्रनीतौ --

शतलक्षश्लोकमितं नीतिशास्त्रमथोक्तवान् ।
स्वयंभूर्भगवाँल्लोकहितार्थं संग्रहेण[3] वै ॥

प्रजाजनानामायुषोह्रासमवलोक्य भगवता शङ्करेण शास्त्रमेतद्दशसहस्रमितेष्वध्यायेषु संक्षिप्तं कृतम् । संक्षिप्तमेतच्छास्त्रं "वैशालाक्षनीतिशास्त्र" मिति नाम्ना प्रसिद्धम् । शास्त्रमेतद् भगवता इन्द्रेण गृहीतम् ।

युगानामायुषोह्रासं विज्ञाय भगवाञ्शिवः ।
संचिक्षेप ततः शास्त्रं महार्थं ब्रह्मणा कृतम् ॥

वैशालाक्षमिति प्रोक्तं तदिन्द्र प्रत्यपद्यत ।
दशाध्यायसहस्राणि सुब्रह्मण्यो महातपाः ॥[4]

पुनरिन्द्रेणापि वैशालाक्षशास्त्रं पञ्चसहस्राध्याये संक्षिप्तं कृतम्, तच्छास्त्रं "बाहुदन्तकम्" इति सिद्धम् । तदनन्तरं भगवता बृहस्पतिनाऽध्यायानां त्रिभिः सहस्रैः संक्षिप्तं विहितम् । यद् "बार्हस्पत्यनीतिशास्त्र" मिति नाम्ना प्रसिद्धम् । ततोऽन्ते

---

(१) शान्तिपर्व ५९।२९ । (२) शान्तिपर्व ५९।७८ ।
(३) शुक्रनीतिः १।२-३ । (४) शान्तिपर्व ५९।८७-८८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

भगवता शुक्राचार्येणाध्यायानां सहस्रेण बार्हस्पत्यशास्त्रं संक्षिप्तं कृतम् ।

भगवानपि तच्छास्त्रं संचिक्षेप पुरन्दरः ।
सहस्रैः पञ्चभिस्तात यदुक्तं बाहुदन्तकम् ।।

अध्यायानां सहस्रैस्तु त्रिभिरेव बृहस्पतिः ।
संचिक्षेपेश्वरो बुद्ध्या बार्हस्पत्यं तदुच्यते ।।

अध्यायानां सहस्रेण काव्यः संक्षेपमब्रवीत् ।
तच्छास्त्रममितप्रज्ञो योगाचार्यो महातपाः ।।[1]

इत्थमखिललोकस्थानां प्राणिनामायुषोऽल्पतामनुभूय महर्षिभिः, स्वस्वबुद्धिवैभवेन शास्त्रमेतत्पितामहं संक्षिप्तं कृतम् । अमितप्रज्ञेण शुक्राचार्येण संक्षिप्तं नीतिशास्त्रं तु द्वाविंशति शतश्लोकान्वितमस्ति, अस्मिन् ये ये विषया मन्वादिभिरपि स्वीकृता स्ते एव समाविष्टाः । तद्यथा --

मन्वाद्यैरादृतो योऽर्थस्तदर्थो भार्गवेणवै ।
द्वाविंशतिशतं श्लोका नीतिसारे प्रकीर्तिताः ।।[2]

महाभारते सप्तानां राजनीतिशास्त्रकाराणां वर्णनमुपलभ्यते[3] ते चेते (१) बृ बृहस्पतिः, (२) विशालाक्षः, (३) काव्यः (शुक्रः), (४) सहस्राक्षः (इन्द्रः), (५) प्राचेतसो मनुः, (६) भरद्वाजः, (७) गौरशिरामुनिश्च । कौटलीयार्थशास्त्रे राजशास्त्रप्रवर्तकानां पञ्चानां सम्प्रदायानामुल्लेखोऽस्ति यथा -- (१) मानवाः, (२) बार्हस्पत्याः, (३) औशनसाः, (४) पराशराः, (५) आम्भीयश्च । एतदतिरिक्ताः प्रयोगा अपि प्राप्यन्ते यथा - अपरे, एके, इत्यादि । कौटलीयार्थशास्त्रे निम्नलिखिताचा-

---

(१) शान्तिपर्व ५९।८८-८९ । (२) शुक्रनीतिः ४।४२६ ।
(३) शान्तिपर्व ५८।१-३ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

माचार्याणामपि नामोल्लेखः प्राप्यते - (१) भारद्वाजः, (२) विशालाक्षः, (३) पराशरः, (४) पिशुनः, (५) पिशुनपुत्रः, (६) कौणपदन्तः, (७) वातव्याधिः, (८) बाहुदन्ती-पुत्रः, (९) कात्यायनः, (१०) कणिकः, (११) दीर्घ-चारायणः, (१२) घोटमुखः, (१३) किञ्जल्कश्चेते त्रयोदशविद्वांसो राजशास्त्रकर्तारः । कुत्रचिदाचार्याः इति प्रयोगोऽप्युपलभ्यते । आचार्यशब्दोऽयं कस्यचिद् मतखण्डनार्थं प्रयुक्तः कस्यचिद् व्यक्तिविशेषस्य संकेतो वात्र तु निर्णयप्रदानं न सम्भवम् ।

इत्थं नीतिशास्त्रप्रवर्तका अनेके आचार्याः दृश्यन्ते । एतेषु केचिद्धर्मशास्त्रस्य केचिदर्थशास्त्रस्य केचि तु धर्मशास्त्रार्थशास्त्रयोश्चापि स्वतन्त्रं ग्रन्थमुल्लिखन्ति । कतिपयेषु ग्रन्थेषु तु धर्मशास्त्रार्थशास्त्रयोर्द्वयोरपि संमिश्रणमपि प्राप्यते । यद्यपि धर्मशास्त्रेऽर्थशास्त्रस्यार्थशास्त्रेधर्मशास्त्रस्य चर्चाऽप्यतीवोपयुक्ता दृश्यते, अन्यथा शास्त्रमपूर्णं जायेत । यद्यपि द्वयोः शास्त्रयोः पृथक् पृथक् विषय स्वीकारोऽपि युक्तिसङ्गत एव, यतो धर्मशास्त्रे धर्मस्य कर्तव्यस्य च प्राधान्यं विद्यते, अर्थशास्त्रेत्वर्थस्यैव ।

उपर्युक्तानां शास्त्राणां या मर्यादा तस्या रक्षकस्तु राजैवार्थशास्त्रप्रतिपादितनियमस्याधार एव राज्यसञ्चालनं राज्ञः प्रमुखं कर्तव्यम् । यदा लोके प्रजाजना भवन्त्यसन्मार्गेषु प्रवृत्तास्तदोपर्युक्तनीतिशास्त्रप्रतिपादितदण्डस्तस्य निर्वाहकश्च नितान्तमपेक्षितः । दण्डनिर्वाहकस्तु राजैव । यत्र यत्र दण्डस्यावश्यकता दर्शिता तत्र दण्डधरोऽपि सर्वथाऽपेक्षते । अर्थाद् दण्डधरस्याभावे न केषाञ्चिदपि रक्षासिद्धिः । उक्तञ्च मनुस्मृतौ --

यदि न प्रणयेद्राजा दण्डं दण्ड्येष्वतन्द्रितः ।
शूले मत्स्यानिवापक्ष्यन्दुर्बलान्बलवत्तराः ॥

---

(१) मनुस्मृतिः ७।२० ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

अतो चराचररक्षार्थं राज्ञ उत्पत्तिर्विहिता जगदीश्वरेण ।

रक्षार्थमस्य सर्वस्य राजानमसृजत्प्रभुः[1] ।

शुक्रनीतावपि --

यदि न स्यान्नरपतिः सम्यङ्नेता ततः प्रजाः[2] ।
अकर्णधारा जलधौ विप्लवेतेह नौरिव ॥

किन्तु कृतयुगे तु राज्ञ आवश्यकतैव नासीत्, धर्मेणैव सर्वं जगत्परिपालितं रक्षितं चासीत् । धर्मेणैव राज्ञोऽशेषं कार्यं सञ्चालितमासीत्, अर्थाद्धर्मः सर्वाङ्गपूर्ण आसीत् तस्माच्छासकस्यावश्यकता नानुभूता ।

चतुष्पात्सकलो धर्मः सत्यं चैव कृते युगे ।
नाधर्मेणागमः कश्चिन्मनुष्यान्प्रति वर्तते ॥

किन्तु क्रमशो लोके धर्मस्य प्रभावशिथिलतां गतः, तस्मादनाचारा उपद्रवाश्च वृद्धिं गताः । उपद्रवपीडितानां देवादीनामनुनयमङ्गीकृत्य सृष्टिकर्त्रा दण्डोपदेशकनीतिशास्त्रस्य पालनकर्त्रा दण्डनिर्वाहकस्य चोत्पत्तिर्विहिता, मतमेतत्त्वधिकशास्त्रज्ञातम् ।

किन्तु युगप्रवर्तकस्तु राजैव, राजा यदि सच्चरित्रः, धर्मानुष्ठाननिरतः, शासनकुशलः, दण्डनीत्यां च चतुरो भवेत्तदाऽसद् युगमपि सत्फलप्रदम् । राजा यदि दुराचरणो दण्डनीत्यां चाकुशलस्तदा सद्युगमप्यसद्युगस्योत्पादकम् । तस्माल्लोके यदधर्मा भ्रष्टाचाराश्च वृद्धिं यान्ति तदा तत्र युगस्य प्रजानाञ्च न दोषः । दोषस्तु सर्वथा राज्ञ एव । तथा चोक्तं शुक्रनीतौ --

---

(१) मनुस्मृतिः ७।३ । (२) शुक्रनीतिः १।६५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

युगप्रवर्तको राजा धर्माधर्मप्रशिक्षणात् ।
युगानां न प्रजानां न दोषः किन्तु नृपस्य हि ॥[1]

अस्य तात्पर्यन्त्वेतदेवस्यात् - सन्मार्गप्रवृत्ता मानवालोके दुर्लभाः, अर्थात्स्वभावविशुद्धा मनुजाः कष्टेन लभ्यन्ते, तस्मादेते तु राज्ञो दण्डप्रयोगनैपुण्येन सुशासनेन च भवन्ति सन्मार्गोन्मुखाः सदाचरणरताश्च ।एतदेव समर्थितमादिमुनिना मनुनापि --

सर्वो दण्डजितोलोको दुर्लभो हि शुचिर्नरः ।
दण्डस्य हि भयात्सर्वं जगद्भोगाय कल्पते ॥[2]

मनुस्मृतेर्व्याख्यायां व्याख्याकारेण कुल्लूकभट्टेनोद्धृतादेकस्याच्छ्रुतिवाक्यादप्येतदेव सिद्ध्यति - मानुषामूलतो दोषमुक्ता नोपलभ्यन्ते, तथा च श्रुतिः -- "सत्यवाचो देवा अनृतवाचो मनुष्याः"[3] इति । तस्माद्राज्ञा दण्डेनैव लोकनियन्त्रणं कर्तव्यम् । दण्डभयादेव मानवाः स्वस्वकर्तव्योन्मुखाः, मानवमात्रेषु न दण्डप्रयोगः, अपितु देवदानवादिष्वपि प्रयुज्यते, अर्थादिन्द्राग्निवायुसूर्यकुबेरवरुणादयोदेवास्तथा दानवगन्धर्वराक्षसपशुपक्षिसर्पा अपि परमार्थभयपीडिता भवन्ति तस्मात्तेऽपि जलदानाद्युपकाराय प्रवर्तन्ते । तथा च श्रुतिः -- "भयादस्याग्निस्तपति भयात्तपतिसूर्यः, भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः ।"[4]

यदा लोके दण्डस्य विभ्रमो भवेदर्थाद्दण्डस्याप्रयोगोऽनुचितप्रयोगो वास्यात्तदा ब्राह्मणक्षत्रियादयोवर्णा इतरेतरस्त्रीगमनेन वर्णसङ्करानुत्पादयन्ति, वर्णसङ्कर-

---

(१) शुक्रनीतिः ४।५८ । (२) मनुस्मृतिः ७।२२ ।
(३) मन्वर्थमुक्तावली: (मनुस्मृतिः ६।२६) । (४) मन्वर्थमु० (मनुस्मृतिः ७।२३)

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

बाहुल्याल्लौकिकनर्थाधिक्यं सर्वथा सिद्धम्, पुनश्चतुर्वर्गफलविधायकाः सर्वशास्त्रीय-नियमाश्चोपेक्ष्यन्ते, एवं चौर्यसाहसव्यभिचारभ्रष्टाचारादिभिरपकारैः सर्वलोको दुर्दशां याति । तथा च मनुः --

दुष्येयुः सर्ववर्णाश्च भिद्येरन्सर्वसेतवः ।
सर्वलोकप्रकोपश्च भवेद्दण्डस्य विभ्रमात् ॥[1]

अतएवास्य प्रयोगो देशकालपरिस्थित्यनुसारं वर्णजात्याद्यनुसारञ्च विधातव्यः । दण्डसञ्चालनं शासनसञ्चालनं वा केवलेनैकेन राज्ञा राष्ट्रपतिना-राष्ट्राध्यक्षेण वा नसम्भवम् । अस्य कृते तु विविधा विचाराः, बहुविधा बुद्धि-विशेषाः अनेकविधाशक्तिविशेषाश्चापेक्ष्यन्ते । एतदर्थमेवास्माकं पूर्वजमहर्षिभिरनेक-विद्वद्भिश्च सर्वशक्तिसमेतमेकं सप्ताङ्गोपेतं राज्यं परिकल्पितम् । यद्राज्यं सप्त-विधाभिरत्युत्कृष्टाभिः शक्तिभिः समन्वितं विद्यते । याः शक्तयो राज्याङ्गेषु सन्ति विभाजिताः । यान्यङ्गानि राज्यतत्त्वेष्वपि परिगणितानि सन्ति । तेषां तत्त्वानां विस्तृतं विवेचनन्तु पृथक् परिच्छेदं प्रकल्प्य तत्तत्परिच्छेदे कृतमस्ति । अत्र तु केवलं परिच्छेदोक्तानां विषयाणामुपसंहारः क्रियते ।

राज्यतत्त्वेषु राजवशीर्षस्थानीयः । अस्य सम्बन्धेत्वस्मिन्नेवोपसंहार-प्रसङ्गेऽपि किञ्चिदुक्तम्, अ इतः परमवशिष्टानि तत्त्वानि विविच्यन्ते । असहायो राजा न किमपि कार्यं साधयितुं क्षमः, अतः सुयोग्याः सहाया नियोक्तव्या भवन्ति । येषां समुदयो मन्त्रिपरिषदिति नाम्ना विख्यातः । अस्याः सहयोगेनैव राज्यसञ्चालनं विधातव्यं राज्ञा राष्ट्रपतिना वा । परिषदः सहयोगेनविना राज्यं

---

(१) मनुस्मृतिः ७।२४ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

कर्तुमिच्छति चेन्न कदापि सफलः, यतः शासनसञ्चालनन्तु महत्कठिनं कार्यम्, तस्मादस्य कृते सामूहिकं सहयोगं सर्वथाऽपेक्षितम् । यदि राजा सर्वं शासनकौशलं जानाति तथाप्येकाकी न किमपि कार्यं कुर्यात् । स्वतन्त्रभावान्वितो यदि मन्त्र्यादीनां परामर्शेण विना स्वतन्त्रमेवाचरणमाचरति चेत्तदा राज्येऽनर्थं जायते । अमात्यादयो विशिष्टाधिकारिणश्च प्रतिकूलतां यान्ति, स्वयमेवापि विनश्यति, राज्यं च समाप्यते । पुना राज्यं तु जनानामेव, ते तु नित्यं सुखं शान्तिं चेच्छन्ति, तदर्थमेव प्रतिनिधिं निर्वाचयन्ति, जननिर्वाचितास्तेऽपि जनभावनानुकूलमेव कार्यमिच्छन्ति, यदि राजा जननेतृणां भावना विपरीतमाचरति चेत् तदा स सर्वं विनाशावस्थां प्राप्स्यति । अतो हितमिच्छता राज्ञाऽमात्यादीनां परामर्शः सर्वथा स्वीकार्यः[1] ।

ते चामात्या अपि विविधाभिरुपधाभिर्विशुद्धा एव नियोक्तव्याः । एतेषां संख्या न तु निश्चिताऽर्थात्संख्याविषये न त्वेकमत्यं नीतिज्ञानाम्, तथापि शुक्राचार्यस्तु दशसंख्यां प्रदर्शयति । ताश्च यथा --

पुरोधाश्च प्रतिनिधिः प्रधानः सचिवस्तथा ।
मन्त्री च प्राड्विवाकश्च पण्डितश्च सुमन्त्रकः ।।
अमात्यो दूत इत्येता राज्ञः प्रकृतयो दश[2] ।

अमात्यानां संख्या विषये यस्य यन्मतं स्यात्तथापि त्रिपुरुषान्न्यूना न कर्तव्या, इत्याहुराचार्याः । तैरित्थंमल्पसंख्या समादृता, यतस्तेषां मतेऽल्पसंख्यायां मन्त्रितस्य मन्त्रस्य भेदो न तु सम्भवः । एते मन्त्रिणोऽपि शास्त्रोक्तगुणसम्पन्ना एव नियोक्तव्या भवन्ति ।

---

(१) शुक्रनीतिः २।२-४ ।

(२) शुक्रनीतिः २।७१-७२ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

सप्तसु राज्यतत्त्वेषु मित्रन्त्वेकम् । तस्याभावे तदङ्गहीनं भवति । अनङ्गस्य दशा सर्वथा निर्बला, शत्रुभिर्भेदिता च । अतो राज्यं यत्नतः सर्वाङ्ग-पूर्णं कर्तव्यम् । मित्ररूपाङ्गपूर्त्यर्थं प्रथमं प्रयत्नतो मित्रोपार्जनं विधातव्यम् । मित्राणि च तादृशान्येवोपार्जनीयानि, यानि सम्पत्काविव विपद्यपि प्रेमभावं सहयोगञ्च न त्यजन्ति । भूहिरण्यरत्नादि लाभेन तथा राजा न वृद्धिमेति यथा मित्रं लब्ध्वा वर्धते । अतो मित्रन्तु राज्ञो राज्यस्य चाभ्युदयस्य मूलकारणम् । इत्थं मित्रं न स्वभावसिद्धं तस्मात्तदुपार्जनमेव कर्तव्यमित्याहुः केचिदाचार्याः । केचित्तु मित्रं तु स्वभावतः सिद्धं तस्मात्तस्योपार्जने कोऽपि प्रयासोऽपेक्षित इत्याहुः । स्वभावसिद्धं मित्रञ्च त्रिविधम् -- सहजकृत्रिमप्राकृतभेदेन । एतेषामपि संवर्धनन्त्ववश्यमेवकर्तव्यं दानमानसत्कारादिभिः । राज्ञः समुचितादरेण वृद्धिङ्गतान्येतान्येव राजानं राज्यं च प्रति सदैव सहयोगं स्नेहं सद्भावञ्च प्रदर्शयन्ति ।

कोशतत्त्वमपि राज्यस्याभिन्नमङ्गं सिद्धम् । तत्त्वविशेषोऽयं राज्यस्य सर्वाङ्गसञ्चालने मूलाधाररूपेणावस्थितो दृश्यते । यतोऽस्याभावे राज्यस्यैवाभावः प्राणरूपत्वादथात्कोशस्तु राज्ञो राज्यस्य च प्राणरूप एव । तस्याभावे न जीवति राजा राज्यं च । तथा च नीतिवाक्यामृते -- "कोशो हि भूपतीनां जीवितं न प्राणाः"[१] । तस्मात्कोशसंरक्षणसंवर्धनादौ सदैव यत्नं कर्तव्यं राज्ञा । महत्त्वपूर्णत्वा-दस्योत्पत्तिरपि राज्ञोत्पत्तिना सहैव ।

जनजीवनोपयुक्तसर्वविधवस्तूपेतो भूप्रदेशः राष्ट्रम् । कोशकारमते राज्यस्य सप्ताङ्गेषु पञ्चममङ्गमेतत् । महामनसां महर्षीणां तपोबलादुत्पन्नमेतत् ।

---

(१) नीतिवाक्यामृतं कोशसमुद्देशः ५ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

तस्मादस्योत्पत्तिस्तु सर्वेभ्योऽङ्गेभ्यः प्रागेव निश्चिता मुनिभिः । अस्मादेवान्येषामङ्गानामुत्पत्तिः । अतोऽस्याभावेऽन्येषामङ्गानां प्रजानाञ्चाधार एव समाप्यते । तस्मादस्यापि संरक्षणं संवर्धनञ्च सर्वथा सर्वैरेव विधातव्यम् ।

अवशिष्टयोर्द्वयोरप्यङ्गयोर्महत्त्वं त्ववर्णनीयम् । एतयोर्विस्तृतं विवेचनन्तु पूर्वमेवोपस्थापितम् । तस्मादेतयोर्महत्त्वं तु सम्बद्धपरिच्छेदादेवावगन्तव्यम् । एतादृशानां सप्तानामेवतत्त्वानां संगमाद्राज्यमुत्पद्यते, उत्कृष्टतत्त्वयोगादुद्भूतस्यैतस्योपकारः सर्वतः सदैवापेक्षितः । अन्ते गुरुचरणानामाशिषा मत्कृतोऽयं प्रयासः सफलतां यास्यतीत्याशान्वितोऽहं विरमामि ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

धर्मशास्त्रीयराज्यतत्त्वविमर्शे समुद्धृतग्रन्थानां सूची

१- ऋग्वेदसंहिता - गौरीत्युपाह्वशिवरामशास्त्रिप्रभृतिभिः सम्पादिता । जनार्दन महादेव गुर्जर - रामवाडी, मुम्बई ।

२- शुक्लयजुर्वेदसंहिता - उव्वटाचार्यविरचितमन्त्रभाष्येण महीधराचार्यकृतवेददीप-भाष्येण च समन्विता । सम्पादकः - जगदीश लाल शास्त्री । मोतीलाल बनारसीदास, नई दिल्ली, सन् १९७८ ।

३- अथर्ववेदः - मातृभूमि और स्वराज्य शासन - लेखकः - म० म० ब्रह्मर्षि पं० श्रीपाददामोदरसातवलेकरः । मुद्रकः प्रकाशकश्च वसन्त श्रीपादसातवलेकरः ।

४- गौतमधर्मसूत्रम् - हरदत्तकृत-मिताक्षरावृत्ति-सहितम् । प्रकाशकः - चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-१ सन् १९६६ ।

५- आपस्तम्बधर्मसूत्रम् - श्रीमद्धरदत्तमिश्रविरचितया उज्ज्वलाख्यया वृत्त्या संवलितम् । श्रीचिन्नस्वामिशास्त्रिणा रामनाथशास्त्रिणा च टिप्पण्यादिभिः संयोज्य संशोधितम् । चौखम्बा संस्कृत सीरीज आफिस वाराणसी-१, सन् १९६६ ।

६- बौधायनधर्मसूत्रम् - श्रीगोविन्दस्वामिप्रणीतविवरणसमेतम् । श्रीचिन्नस्वामि-शास्त्रिणा भूमिकाटिप्पण्यादिभिस्संयोज्य संशोधितम् । प्रकाशकः - जयकृष्ण-दास हरिदासगुप्तः, चौखम्बा संस्कृत सीरीज आफिस, बनारस सिटी, १९६१ ।

७- पारस्करगृह्यसूत्रम् - हरिहरभाष्यम् । संपादकः - डा० ओमप्रकाशपाण्डेय । चौखम्बा अमरभारती प्रकाशन, वाराणसी । वि० सं० २०३६ ।

८- मनुस्मृतिः - श्रीकुल्लूकभट्टप्रणीतया मन्वर्थमुक्तावल्या क्षेपकपरिशिष्टश्लोककर-कारादिकोशेन च सहिता । प्राणजीवनशर्मणा संस्कृता । गुजराती मुद्रणालये मुद्रिता । प्रकाशकः - मणिलाल इच्छाराम देसाई । ख्रिस्ताब्दः १९१३ ।

९- याज्ञवल्क्यस्मृतिः - विज्ञानेश्वरप्रणीत मिताक्षरा व्याख्यया विभूषिता । प्रकाशकः - चौखम्बा संस्कृत सीरीज आफिस, वाराणसी । मुद्रकः - विद्या-विलास प्रेस, वाराणसी । सं० २०२४ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

१०- पराशरस्मृति: - विद्वन्मनोहराख्य व्याख्या सहिता ।

११- विष्णुस्मृति: - श्रीनन्दपण्डितविरचितसंक्षिप्त वैजयन्ती व्याख्योपेता । प्रकाशक: - चौखम्बा संस्कृत सीरीज आफिस, वाराणसी । मुद्रक: - विद्याविलास प्रेस, वाराणसी, सं० २०१८ ।

१२-श्रीमद्वाल्मीकिरामायणम् - सम्पादक: - पं० शिवरामशर्मा वासिष्ठ: । चौखम्बा विद्याभवन, वाराणसी-१ । सन् १९५७ ।

१३- महाभारतम् - (शा० प०) : सम्पादक: - डा०पं०श्रीपाददामोदरसातवलेकर: । प्रकाशको मुद्रकश्च - वसन्त श्रीपादसातवलेकर:, स्वाध्यायमण्डल भारतमुद्रणालय:, किल्ला-पाण्डी, जि० - वलसाण गुजरात । सं० २०३६ ।

१४- श्रीमद्भागवतम् - महर्षिव्यासरचितम्, गीताप्रेस, गोरखपुर ।

१५- अग्निपुराणम् - श्रीमन्महर्षिकृष्णद्वैपायनव्यासप्रणीतम् । सम्पादक: - आचार्य: श्रीबलदेवोपाध्याय:, प्रकाशक: - चौखम्बा संस्कृत सीरीज आफिस, वाराणसी । मुद्रक: - विद्याविलास प्रेस, वाराणसी, सं० २०२३ ।

१६- सिद्धान्तकौमुदी - तत्त्वबोधिनीसमाख्यव्याख्यासंवलिता । भट्टोजिदीक्षित-प्रणीता पाणिनीयव्याकरणसूत्रवृत्ति: । केशवतनूजदिनकरशास्त्रिभिर्वासुदेव-शर्मणा च संशोधिता । मुम्बय्यां निर्णयसागरमुद्रणयन्त्रालये मुद्रयित्वा प्रकाशिता । शक सं० १८२३ ।

१७- अमरकोश: - श्रीमदमरसिंहविरचित:, मणिप्रभा हिन्दीटीकोपेत: । टीकाकार: - हरगोविन्द शास्त्री । प्रकाशक: - चौखम्बा संस्कृत सीरीज आफिस, वाराणसी । मुद्रक: - चौखम्बा प्रेस, वाराणसी, वि० सं० २०३४ ।

१८- वीरमित्रोदय: - व्यवहारप्रकाशोराजनीतिप्रकाशश्च । श्रीमित्रमिश्रविरचित: । विष्णुप्रसादशर्मणा संशोधित: ।

१९- कौटलीयार्थशास्त्रम् - हिन्दीव्याख्योपेतम् । व्याख्याकार: - वाचस्पतिगैरोला । प्रकाशक: - चौखम्बा विद्याभवन, चौक, वाराणसी । मुद्रक: - श्रीजीमुद्रणालय, वाराणसी, सन् १९८४ ।

CC-0 Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

२०- शुक्रनीतिः - विद्योतिनी हिन्दीव्याख्योपेता । प्रकाशकः - चौखम्बा संस्कृत सीरीज आफिस, वाराणसी । मुद्रकः - विद्याविलास प्रेस, वाराणसी, सं० २०२५ ।

२१- कामन्दकीयनीतिसारः - पं० ज्वालाप्रसादजी मिश्र कृत भाषाटीकासहितः । मुद्रकः प्रकाशकश्च - खेमराज श्रीकृष्णदास, बम्बई । सं० २००९ शाके १८७४ ।

२२- नीतिवाक्यामृतम् - श्रीसोमदेवसूरिविरचितम् । रामचन्द्रमालवीय कृत हिन्दी-व्याख्योपेतम् । प्रकाशकः - चौखम्बा विद्याभवन, वाराणसी । मुद्रकः - विद्या-विलास प्रेस, वाराणसी । सम्वत् २०२६ ।

२३- नीतिमयूखः - श्रीनीलकण्ठभट्टविरचितः । महादेवशर्मणा व्यंकटेशशास्त्रिणा च संशोधितः । मुम्बय्यां गुजराती मुद्रणयन्त्रालये मुद्रयित्वा प्रकाशितः । वि० सं० १९७७ ।

२४- चाणक्यसूत्रम् - चाणक्यप्रणीतम् । कौटलीयार्थशास्त्रान्तर्गतम् ।

२५- मीमांसान्यायप्रकाशः - आपदेवकृतः । महामहोपाध्याय वासुदेवशास्त्री - अभ्यंकरविरचितया प्रभाख्यया व्याख्यया संवलितः । ख्रिस्ताब्दा १९७२ ।

२६- मुहूर्तचिन्तामणिः - श्रीरामज्योतिर्विद्प्रणीतः । पीयूषधाराख्यव्याख्यया समलंकृतः ।

२७- रघुवंशः - महाकविकालिदासविरचितः । श्रीमल्लिनाथकृतव्याख्यया संवलितः ।

२८- श्रीमद्भगवद्गीता - मुद्रकः प्रकाशकश्च - गीताप्रेस, गोरखपुर ।

२९- विष्णुसहस्रनामस्तोत्रम् - मुद्रकः प्रकाशकश्च - गीताप्रेस, गोरखपुर ।

३०- स्मृतिसमुच्चयादर्शः - पुस्तकेऽस्मिन्नुक्तं सन्ति निम्नलिखिताः स्मृतयः - (१) अङ्गिरः स्मृतिः, (२) अत्रिसंहिता, (३) अत्रिस्मृतिः, (४) आपस्तम्ब-स्मृतिः, (५) औशनस्मृतिः, (६) गोभिलस्मृतिः, (७) दक्षस्मृतिः, (८) देवलस्मृतिः, (९) प्रजापतिस्मृतिः, (१०) बृहद्यमस्मृतिः, (११) बृहस्पतिस्मृतिः,

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

(१२) यमस्मृतिः, (१३) लघुविष्णुस्मृतिः, (१४) लघुशङ्खस्मृतिः, (१५) लघुशातातपस्मृतिः, (१६) लघुहारीतस्मृतिः, (१७) लघ्वाश्वलायनस्मृतिः, (१८) लिखितस्मृतिः, (१९) वसिष्ठस्मृतिः, (२०) वृद्धशातातपस्मृतिः, (२१) वृद्धहारीतस्मृतिः, (२२) वेदव्यासस्मृतिः, (२३) शङ्खलिखितस्मृतिः, (२४) शङ्खस्मृतिः, (२५) शातातपस्मृतिः, (२६) सम्वर्तस्मृतिः, (२७) बौधायनस्मृतिः ।

३१- धर्मशास्त्र का इतिहास - लेखक - डा० पाण्डुरङ्ग वामन काणे, अनुवादक - अर्जुन चौबे काश्यप । प्रकाशकः - उत्तरप्रदेश हिन्दी संस्थान, महात्मागांधी मार्ग, लखनऊ । मुद्रकः - महावीर प्रेस, भेलुपुर, वाराणसी-१० । सन् १९८२ ।

३२- हिन्दूराज्यतन्त्र - १-२ खण्ड, लेखक - काशीप्रसादजी जायसवाल । अनुवादक - रामचन्द्र वर्मा, प्रकाशकः - नागरीप्रचारिणीसभा, काशी । मुद्रकः - शंभुनाथ वाजपेयी, नागरी मुद्रण, काशी, वि० सं० २०३४ ।

३३- हिन्दूराज्यशास्त्र - अम्बिकाप्रसाद वाजपेयी । प्रकाशकः - हिन्दी साहित्य सम्मेलन, प्रयाग । मुद्रकः - रामप्रताप शास्त्री, सम्मेलन मुद्रणालय, प्रयाग । वि० सं० २००६ ।

३४- हिन्दूराज्यशास्त्र - लेखकः - सुरेशचन्द पंत । प्रकाशकः - प्रकाशन केन्द्र, लखनऊ । सन् १९७१ ।

३५- प्राचीन भारत में अपराध और दण्ड - डा० हरिहरनाथ त्रिपाठी । प्रकाशकः - चौखम्बा विद्याभवन, वाराणसी । मुद्रकः - विद्याविलास प्रेस, वाराणसी । वि० सं० २०२१ ।

३६- नेपालको संविधान - प्रकाशकः - श्री ५ को सरकार कानून तथा न्यायमन्त्रालय कानून किताब व्यवस्था समिति, २०१९ ।

३७- पुरुषार्थ चतुष्टय - प्रेमवल्लभ त्रिपाठी, प्रकाशकः - राजविद्या ग्रन्थमाला, वाराणसी-१ । मुद्रकः - आनन्द कानन प्रेस, वाराणसी ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

३८- साङ्ख्यकारिका: - श्रीमदीश्वरकृष्ण विरचिता: । सम्पादकोऽनुवादकश्च - जगन्नाथ शास्त्री । प्रकाशक: - मोतीलाल बनारसीदास, सन् १९६६ ।

३९- दशकुमारचरितम् - महाकविदण्ड्याचार्यविरचितम् । प्रकाशक: - चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, सन् १९७८ ।

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

सङ्केताक्षरसूची

(१)	अ० वे०	:	अथर्ववेद:
(२)	अ० पु०	:	अग्निपुराणम्
(३)	अ० को०	:	अमरकोश:
(४)	आ० ध० सू०	:	आपस्तम्बधर्मसूत्रम्
(५)	उ०	:	उद्धृतम्
(६)	ऋ० वे०	:	ऋग्वेद:
(७)	का० नी० सा०	:	कामन्दकीयनीतिसार:
(८)	कौ०	:	कौटिल्य:
(९)	कौ० अ०	:	कौटलीयार्थशास्त्रम्
(१०)	गौ०	:	गौतम:
(११)	गौ० ध० सू०	:	गौतमधर्मसूत्रम्
(१२)	चा० सू०	:	चाणक्यसूत्रम्
(१३)	द० च०	:	दशकुमारचरितम्
(१४)	ध० शा० इ०	:	धर्मशास्त्र का इतिहास
(१५)	नी० म०	:	नीतिमयूख:
(१६)	प० स्मृ०	:	पराशरस्मृति:
(१७)	पा० गृ० सू०	:	पारस्करगृह्यसूत्रम्
(१८)	पृ०	:	पृष्ठम्
(१९)	प्र०	:	प्रकरणम्
(२०)	प्रा० भा० अ० द०	:	प्राचीन भारत में अपराध और दण्ड
(२१)	बौ० ध० सू०	:	बौधायनधर्मसूत्रम्
(२२)	भा०	:	भाग:

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

(२३) नी० वा०	:	नीतिवाक्यामृतम्
(२४) म० स्मृ०	:	मनुस्मृतिः
(२५) मु० चि०	:	मुहूर्तचिन्तामणिः
(२६) याज्ञ०स्मृ०	:	याज्ञवल्क्यस्मृतिः
(२७) याज्ञ०	:	याज्ञवल्क्यः
(२८) रघु०	:	रघुवंशः
(२९) रामा०	:	रामायणम्
(३०) रा० नी० प्र०	:	राजनीतिप्रकाशः
(३१) वि०स्मृ०	:	विष्णुस्मृतिः
(३२) वी० मि०	:	वीरमित्रोदयः
(३३) व्य० प्र०	:	व्यवहारप्रकाशः
(३४) शान्ति०	:	शान्तिपर्व
(३५) शु० य० वे०	:	शुक्लयजुर्वेदः
(३६) शु० नी०	:	शुक्रनीतिः
(३७) सि० कौ०	:	सिद्धान्तकौमुदी
(३८) हि० रा० त०	:	हिन्दूराज्यतन्त्र
(३९) हि० रा० शा०	:	हिन्दूराज्यशास्त्र

सरस्वती भवन
प्रवाप्ति संख्या 66840
सम्पूर्णानन्द संस्कृत विश्वविद्यालय

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri

CC.O Sampurnanand University Collection. Digitized by eGangotri